May. 1909.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 137.

वीरमित्रोदयः ।

महामहोपाध्यायश्रीमित्रमिश्रविरचितः ।

पर्वतीयनित्यानन्दशर्मणा संशोधितः ।

Title

VÎRAMITRODAYA,

BY

MAHÂMAHOPÂDHYÂYA PANDIT MITRA MÎSRA,

EDITED BY

Parvatiya Nityânanda Sarmâ.

FASCICULUS VI.

PUBLISHED AND SOLD BY THE SECRETARY,
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT:
BENARES:
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHÂRÂMA MUKUNDAJÎ, BOMBAY.
PROBSTHAIN & CO., BOOKSELLERS, LONDON.
Printed by Harikrishna Dâs, Proprietor,
AT THE VIDYA-VILÂS PRESS.
BENARES.

Price Rupee One.

॥ श्रीः ॥

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥
स्तबकः—१३७

ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि।

इति याज्ञवल्क्यस्मरणात्।

तत्प्रत्याख्याने दोषमाह आपस्तम्बः, स्त्रीणां प्रत्याचक्षणानां समाहितो ब्रह्मचारी इष्टं दत्तं हुतं प्रजां पशून् ब्रह्मवर्चसमन्नाद्यं हन्ति। तस्मादुहवै ब्रह्मचारिसंघं चरन्तं न प्रत्याचक्षीतेति। स्त्रीग्रहणं प्राचुर्याभिप्रायेण न परिसंख्यार्थम्। अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वेत्याश्वलायनस्मरणात्। ब्रह्मचारिणां भिक्षाशने फलमाह

मनुः,

भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता। इति।

अत्रिरपि,

शाकभक्षाः पयोभक्षाः ये चान्ये यावकाशिनः।

सर्वे ते कृतभैक्षस्य कलां नार्हन्ति षोडशीम्॥

तप्तकाञ्चनवर्णेन गवां मूत्रेण यावकम्।

पिबेद् द्वादशवर्षाणि न तद्भैक्षसमं भवेत्॥

यावकं यवौदनः। नचात्र फलश्रवणादनियतं भिक्षाचरणमिति वाच्यम्। अकरणे मनुना प्रायश्चित्तोक्तेः।

अकृत्वा भैक्षचरणमसमिध्य च पावकम्।

अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्॥ इति।

प्रत्याख्यानं न कर्त्तव्यमिति यदुक्तं, तद्व्रताध्ययनादिविशिष्टब्रह्मचारिविषयम्।

तथाच मनुः,

भिक्षां च भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे। इति।

विधिवदित्यनेनाविधिवतां निषेधमाह

वसिष्ठः,

अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः।

तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदो हि सः ॥ इति ।

हस्तदत्ता भिक्षा न भोक्तव्येत्याह

मनुः,

हस्तदत्ता तु या भिक्षा लवणं व्यञ्जनानि च ।
भोक्ता ऽप्यशुचितां याति दाता स्वर्गं न गच्छति ॥

भैक्षमाहारादधिकं नाहर्त्तव्यमित्याह

मनुः,

आहारादधिकं वर्णी न कचिद्भैक्षमाहरेत् ।
युज्यते स्तेयदोषेण कामतोऽधिकमाहरन् ॥
माधुकरीयमानीय ब्राह्मणेभ्यः प्रयच्छति ।
स याति नरकं घोरं भोक्ता भुङ्क्ते च किल्विषम् ॥
तस्मान्नोपहरेद्भैक्ष्यमतिरिक्तं कदाचन । इति ।

कामत इति वदता अकामतोऽधिकाहरणे न दोष इत्युक्तं भवति । अकामतोऽधिकाहरणे प्रतिपत्तिरुक्ता ऽऽपस्तम्बेन । नोच्छिष्टं कुर्यादशक्तौ भूमौ निखनेदप्सु वा क्षिपेदाचार्याय वा दद्यादन्तर्दिने वा शूद्रायेति । अन्तर्दिने आचार्यदासाय। अशक्तौ तावद्भोजनाशक्तौ । उच्छिष्टं न कुर्यात्प्रथममेवोद्धृत्य पृथक् स्थापयेत् । नोच्छिष्टं कस्यचिद्दद्यादिति मनुना तस्य दानप्रतिषेधात् । आहृतं भैक्षं गुरवे निवेद्याश्नीयात् ।

तथाच मनुः,

समाहृत्य तु तद्भैक्षं यावदर्थं समाप्नुयात् ।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।
पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति ॥
अपूजितं तु यद्भुक्तमुभयं तु हिनस्ति तत् ।

पूजितं संस्कृतम्। अकुत्सयन् अनिन्दन्। विशेषान्तरमाह याज्ञवल्क्यः,

कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्व्वनुज्ञया।

अपोशानक्रियापूर्व्वं सत्कृत्यान्नमकुत्सयन्॥ इति।

कृताग्निकार्य इति प्रातः कथंचिदकृतस्याग्निकार्य्यस्य कालान्तरविधानार्थं न पुनस्तृतीयप्राप्त्यर्थमिति मिताक्षरा। अन्ये तु अग्निकार्य्यशब्देन व्याहृतिभिर्भैक्षात्रिभागेन होममाहुः।

तथाच शङ्खः,

याचयेद्याचितं चान्नं त्रिधा कृत्वैकभागकम्।

अग्नौ व्याहृतिभिः स्थाप्य भागमेकं गुरोरपि॥

एकं भुञ्जीत मतिमान्स्वाध्यायं च ततः पठेत्। इति।

हारीतोऽपि, भैक्षमवोक्षितं पर्य्यग्निकृतम् आदित्यदर्शितमनुज्ञातममृतसंमितं प्रातस्तदश्नन् ब्रह्मचारी ब्रह्मसिद्धिमवाप्नोतीति।

ब्रह्मपुराणेऽपि,

अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेत्ततः।

अस्माकं नित्यमस्त्वेतदिति भक्त्याऽथ वन्दयेत्॥ इति।

गुर्वसन्निधाने तद्भार्य्यादिभ्यो निवेदयेत्।

तथाच गौतमः, असन्निधौ तद्भार्य्यापुत्रसब्रह्मचारिसद्भ्य इति। सन्तः श्रोत्रियाः।

तथाचापस्तम्बः, विप्रवासे गुरोराचार्य्यकुलाय तद्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्य इति। आहृतस्य भैक्षस्य भोजनकालमाह गौतमः, सायं प्रातस्त्वन्नमभिपूजितमनिन्दन् भुञ्जीतेति। सायं प्रातरिति वदता मध्ये भोजननिषेधोऽभिहितः।

अत एव मनुः,

सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्।

नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥ इति ।

अग्निहोत्रसमताभिधानात्कालद्वयेऽपि भोजननियमेनाकरणे प्रत्यवाय इति गम्यते ।

तथा च श्रुतिः, तस्मात्सायंप्रातराश्येव स्यादिति । अयं चान्तरा भोजननिषेधस्समर्थस्यैव, न बालस्य । प्रधानविपत्तिप्रसङ्गात् । "यदि तृपदस्येदोदनं धानास्सक्तूनित्यनुव्रतये" दिति दीक्षाप्रकरणीयलिङ्गात् ।

आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ॥

इति वचनाच्च । तत्र विशेषमाह

मनुः,

अष्टौ ग्रासा मुनेर्भैक्षं वानप्रस्थस्य षोडश ।
द्वात्रिंशतं गृहस्थस्य अमितं ब्रह्मचारिणः ॥

नचात्रामितमित्यनेनात्यशनमाशङ्कनीयम् ।

कालेनाद्यं लघु क्षिप्रमल्पमद्याद् द्रवोत्तरम् ।

इति स्मरणात् ।

मनुरपि,

नचैवात्यशनं कुर्यान्नचोच्छिष्टं कचिद्व्रजेत् ।
अनारोग्यमनायुष्यमस्वास्थ्यं चातिभोजनम् ॥
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् । इति ।

भैक्ष्यस्य कचिदपवादमाह

याज्ञवल्क्यः,

ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ।

व्रतं मधुमांसादिवर्जनं तस्य प्रसिद्धत्वात् ।

अत एव मनुः,

प्रतिषिद्धं न भोक्तव्यं मधुमांसं च नित्यशः । इति ।

अकामतो मधुभक्षणे न दोष इत्याह

वसिष्ठः, अकामापन्नं मधु वाजसनेयके न दुष्यतीति। यत्तु विष्णुनोक्तं,

श्राद्धसुग्लवणशुक्तपर्युषितवर्जमिति, तदनभ्यर्थिताभिप्रायम्।

अत एव मनुः,

काममभ्यर्थितोऽश्नीयाद् व्रतमस्य न लुप्यते। इति।

इति भैक्षचर्याविधिः।

अथ ब्रह्मचारिप्रकीर्णकधर्माः।

तत्र मनुः,

अग्नीन्धनं भैक्ष्यचर्यमधःशय्यां गुरोर्हितम्।
आसमावर्त्तनात्कुर्यात्कृतोपनयनो द्विजः॥

ब्रह्मपुराणेऽपि,

मेखलामाजिनं दण्डमुपवीतं च नित्यशः।
कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत्॥ इति।

इदं च वेदस्याप्युपलक्षणम्।

तथा च यमः,

दण्डं कमण्डलुं वेदं मौञ्जीं च रशनां तथा।
धारयेद् ब्रह्मचर्यं च भिक्षाभ्याशी गुरौ वसेत्॥ इति।

वेदो दर्भमुष्टिः। गुरौ गुरुसमीप इत्यर्थः।

व्यासः,

जघन्यशायी पूर्वं स उत्थाय गुरुवेश्मनि।
यच्च शिष्येण कर्त्तव्यं कार्यं दासेन वा पुनः॥
कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत पार्श्वतः।
किंकरः सर्वकाले च सर्वकर्मसु कोविदः॥

नाभुक्तवति चाश्नीयादपीते चाम्बु नो पिबेत् ।
न च तिष्ठत्युपविशेदासीने प्रस्वपेन्न च ॥ इति ।

याज्ञवल्क्यस्तु विशेषमाह,

गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः ।
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ॥ इति ।

उपासनाप्रकारमाह हारीतः, अथोदकुम्भकुशपुष्पसमिन्मूलफलाहरणसंमार्जनोपलेपनाङ्गशुश्रूषाप्रभृतिभिर्गच्छन्तं शयानमासीनं भक्त्याऽनुवर्त्तेत नास्य निर्माल्यशयनासने छायापादुके चाक्रामेदिति ।

आपस्तम्बोऽपि,

आचार्याधीनः स्यादन्यत्र पतनीयेभ्य इति ।

बौधायनोऽपि,

सर्वत्राप्रतिहतगुरुवाक्योऽन्यत्र पातकादिति ।

गौतमोऽपि,

अधःशायी पूर्वोत्थायी जघन्यसंवेशीति ।

यमोऽपि,

गुर्वधीनोऽस्वतन्त्रः स्यात्पूर्वोत्थायी गुरोर्गृहे ।
सदा जघन्यसंवेशी जितस्वप्नो जितोदरः ॥
जितनिद्रो जितालस्यो जितक्रोधो जितात्मवान् ।
शुश्रूषुरनहंता च गुरुदेवार्चने रतः ॥

अनहंता अनहंकारी ।

गौतमः, सत्यवचनमिति । उपनीतेन सत्यमेव वक्तव्यमित्यर्थः । गुरुपूजायां फलमाह शङ्खः,

न स्नानेन न होमेन नैवाग्निपरिचर्यया ।
ब्रह्मचारी दिवं याति स याति गुरुपूजनात् ॥

मनुरपि नियमान्तराण्याह,

नीचशय्यासनं चास्य नित्यं स्याद् गुरुसन्निधौ ।
गुरोश्च चक्षुर्विषये काचिच्चेष्टाऽस्य नो भवेत् ॥

एतच्च गोयानादिव्यतिरिक्तविषयम् ।

तथाच स एव,

गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥ इति ।

यद्यप्येतद्यानं निषिद्धं तथाप्यतिक्रान्तनिषेधस्यापद्ग्रस्तस्य वा सहयानाभ्यनुज्ञानार्थं तद्यानाभ्यनुज्ञानम् ।

विष्णुरपि, नास्यैकासनो भवेदन्यत्र शिलाफलकनौयानेभ्य इति । गुरोः परिवादाद्याकर्णननिषेधमाह

मनुः,

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥ इति ।

सद्दोषख्यापनं परिवादः । असद्दोषख्यापनं निन्दा ।

गुरोः परिवादादिकरणे दोषमाह स एव,

परिवादात् खरो भवति श्वा वा भवति निन्दकः ।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरः ॥

अननुज्ञातगुरुधनोपजीवी परिभोक्ता ।

हारीतोऽपि,

अमृतस्य प्रदातारं गुरुं यस्त्ववमन्यते ।
नचैनं वहति ब्रह्म तिर्यग्योनौ च जायते ॥
ऋचं वा यदि वाऽर्धं वा पादं वा यदि वाऽक्षरम् ।
सकाशाद्यस्य गृह्णीयान्नियतं तस्य गौरवम् ॥ इति ।

गुरुनामोच्चारणे निषेधः

स्मृत्यन्तरे,

आचार्यं चैव तत्पुत्रं दीक्षितं च तथा गुरुम् ।
स्वसारं च पितुश्चैव मातरं मातुलं तथा ॥
हितैषिणं च विद्वांसं श्वशुरं पतिमेवच ।
न ब्रूयान्नामतो विद्वान्मातुश्च भगिनीं तथा ॥

यत्र गुर्वादिनामग्रहणमावश्यकं तत्रोपाध्यायादिशब्देन गृह्णीयादेव ।

तथाच गौतमः, नामगोत्रे गुरोस्समानतो निर्दिशेदिति । समानतो मानेन सहेत्यर्थः । समाननाम्नः पुरुषान्तराद्वा ।

तथाच मनुः,

नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
नचैवास्यानुकुर्वीत गतिं भाषितचेष्टितम् ॥

गुरुवत् गुरुपत्न्यादिरपि सेव्य इत्याह

विश्वामित्रः,

तद्भार्यापुत्रयोश्चैव वृद्धानां धर्मशालिनाम् ।
शुश्रूषा सर्वदा कार्या प्रणामो भक्तिरेवच ॥ इति ।

नारदोपि,

आविद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुम् ।
तद्वत्कि गुरुदारेषु पुत्रपौत्रे तथैवच ॥ इति ।

गौतमोऽपि, तद्भार्यापुत्रेषु चैवमिति । तस्याचार्यस्य भार्याः पुत्राश्च तेषु च एवम् आचार्यवद्वर्तितव्यमित्यर्थः । अत्र विशेषमाह स एव, नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानीति । गुरुभार्यापुत्रेषु, वर्तयेदिति शेषः ।

मनुरपि,

अभ्यञ्जनं स्नपनं च गात्रोद्वर्त्तनमेवच।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम्॥
ब्रह्मचर्यं तपो भैक्ष्यं सन्ध्ययोरग्निकर्म च।
स्वाध्यायो गुरुवृत्तिश्च चर्येयं ब्रह्मचारिणाम्॥ इति।
तपो ब्रह्मचारिनियमः। तथा चापस्तम्बः,
नियमेषु तपः शब्दं तदतिक्रमे विद्याकर्म निस्रवतीति। अतो नियमानुष्ठानमावश्यकमेव।

तथाच मनुः,
सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन्।
सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः॥
इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम्।
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम्॥ इति।
दृतिश्चर्मकोशः।

याज्ञवल्क्यः,
मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्।
भास्करालोकनाश्लीलपरिवादादि वर्जयेत्॥ इति।
मधु क्षौद्रम्। मांसं छागादेः। इदं चाव्याधौ। तदपनोद्यव्याधौ तु गुरूच्छिष्टं कृत्वा भोक्तव्यमेव।

तथाच वसिष्ठः, स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति। व्याधीयीत व्याधिमान् भवति।

तथाच कूर्मपुराणे,
आदर्शं नैव वीक्षेत नाचरेद्दन्तधावनम्।
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः॥ इति।
अञ्जनं तैलादिना गात्रस्य कज्जलादिना चाक्ष्णोः वर्जयेत्। एतदपि व्याध्यादौ कार्यम्। औषधस्यात्रतघ्नत्वात्।

तदाह स्मृतिः,

अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

उच्छिष्टं गुरुव्यतिरिक्तस्य । तथा च वसिष्ठः । उच्छिष्टमगुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतं चेति । अगुरोरभोज्यमिति वदन् गुरोर्भोज्यमित्याह ।

तथा चापस्तम्बः,

पितुर्ज्येष्ठस्य च भ्रातुर्भोक्तव्यमिति । क्वचिदस्यापवादमाह स एव, धर्मविप्रतिपत्तावभोज्यमिति । धर्मविप्रतिपत्तौ गुरोः पापसन्देहे । शुक्तं निष्ठुरवाक्यम् । स्त्री प्रेक्षणालम्भने मैथुनशङ्कायाम् । भास्करालोकनमादित्यावेक्षणम् ।

तदाह मनुः,

नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

उपरक्तं राहुग्रस्तम् । अश्लीलमसभ्यभाषणम् । परिवादः सदोषख्यापनम् । आदिशब्देनान्येऽपि नियमा लक्ष्यन्ते ।

तथा च गौतमः,

वर्जयेन्मधुमांसगन्धमाल्यादिवास्वप्नाञ्जनाभ्यञ्जनयानोपानच्छत्रकामक्रोधलोभमोहवादनस्नानदन्तधावनहर्षनृत्तगीतपरिवादभयानीति । अत्र गन्धनिषेधो भोगार्थं न देवनिर्माल्यस्य । तथाच स्मृतिः, देवताशिष्टमेव गृह्णीयाद्ब्रह्मचारीति । एवं माल्यादावपि।

मनुरपि

वर्जयेन्मधु मांसं च गन्धं माल्यं रसान् स्त्रियः ।
शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनम् ॥
अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ।

कामं क्रोधं च लोभं च नर्तनं गीतवादनम् ॥
द्यूतं च जनवादं च परिवादं तथाऽनृतम् ।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ॥ इति ।

रसा इक्षुरसादयः । मधुनो रसत्वेऽपि पृथगुपादानमधिकप्रायश्चित्ताभिधानाय ।

गौतमः,

गुरुदर्शने कण्ठप्रावृतावसक्थिकाऽपाश्रयपादप्रसारणानिनिष्ठीवितहसितविजृम्भितावस्फोटनानि । कण्ठप्रावृतं दक्षिणबाहुनुद्धरणेन प्रावरणम् । अवसक्थिका ऊरौ पादावरोपणम्, परिकरबन्धो वा । अपाश्रयः पीठाद्यवष्टम्भनावस्थानम् । निष्ठीवितं थूत्कारः । हसितं हास्यम् । विजृम्भितं जृम्भा । अवस्फोटनं सावष्टम्भेन भुजताडनम् । इदं चाशक्यमपि नयनमुखादि पिधाय कार्यम् ।

तदाहापस्तम्बः,

न स्मयेत यदि स्मयेतापिगृह्य स्मयेतेति ब्राह्मणं नोपजिघ्रेत् स्त्रियं मुखेन न हृदयेन प्रार्थयेत् नाकारणादुपस्पृशेदिति ।

अत्र विशेषमाह स एव,

दत्त्वा च न नाम कथयेत् कृत्वा च नानुस्मयेदात्मप्रशंसां परगर्हां च वर्जयेदिति ।

हारीतः,

हयगजचैत्यवृक्षवृषभारोहणप्रवचनसंधिसंसर्पणमहानद्यर्णवप्रतरणमहासाहसाविरुद्धानि वर्जयेदिति । चैत्यं चिता चयमस्थानं वा । प्रवचनम् अध्यापनम् । संधिसंसर्पणं भित्तिविवरेण गमनम्।

आपस्तम्बः,

स्त्रीभिर्यावदर्थसंभाषी मृदुः शान्तो दान्तो ह्रीमान् दृढधृतिरिति ।

विष्णुः, कृतलवणं ब्रह्मचारी वर्जयेदिति । कृतलवणं कृत्रिमं लवणम् । ऊषरभूमिजमिति यावत् ।

मनुरपि,

नैनं सूर्योऽभिनिम्लोचेत्सूर्यो नाभ्युदियात्क्वचित् ।
सूर्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः ॥
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा ।
मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखान्वितः॥ इति।

मुण्डः शिखाविहीनः । मुण्डः शिखी वेति गौतमस्मरणात् ।

कात्यायनोऽपि,

सशिखं वपनं कार्यमास्नानाद्ब्रह्मचारिणः ।
आशरीरविमोक्षात्तु ब्रह्मचर्यं चरेद्द्विजः ॥ इति ।

एतत् छन्दोगाभिप्रायम् ।

तथाच विष्णुपुराणम्,

एते छूनशिखास्तत्र दशनैरचिरोद्गतैः ।
कुशकाशा विराजन्ते बटवः सामगा इव ॥ इति ।

यमः,

खट्वासनं च शयनं वर्जयेद्दन्तधावनम् ।
स्वपेदेकः कुशेष्वेव न रेतः स्कन्दयेत्क्वचित् ॥

मनुरपि,

एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ।
कामाद्धि स्कन्दयेद्रेतो हिनस्ति व्रतमात्मनः ॥

व्रतं ब्रह्मचर्यम् । अकामतो रेतःस्कन्दने प्रायश्चित्तमाह मनुः,

स्वप्नेऽपि विसृजेद्ब्रह्मचारी शुक्रमकामतः ।

स्नात्वाऽर्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् । इति ।
कामतस्त्ववकीर्णिव्रतम् । इत्युपनीतधर्माः ॥

अथोपाकरणम् ।

तत्र याज्ञवल्क्यः,

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥ इति ।

अधीयन्तइति अध्यायाः वेदास्तेषामुपाकर्म प्रारम्भः, स च श्रावण्यां पौर्णमास्यां श्रवणे हस्ते वा कार्यः । तत्रेयं व्यवस्था । ऋग्वेदिनां श्रवणे, बह्वृचाः श्रवणे कुर्युरिति परिशिष्टात् । तस्य दिनद्वयव्याप्तौ परदिनएव ग्राह्यम् ।

तपो हन्त्युत्तराषाढा उपाकर्मणि वैष्णवे ।
धनिष्ठामिश्रिते कार्यमुपाकरणसंज्ञकम् ॥

इति निगमात् । यजुर्वेदिनां तु श्रवणयुक्तायां श्रावणपौर्णमास्याम् । अथातोऽध्यायोपाकर्म श्रवणेन श्रावण्यां पौर्णमास्यामिति कात्यायनस्मरणात् । श्रवणेन, युक्तायामिति शेषः । तदभावे केवलपौर्णमास्यामिति ।

भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्णएव तु ।

इति प्रचेतःस्मरणात् । दिनद्वयेऽपि पूर्वाह्णव्यापित्वे अव्यापित्वे वा तैत्तिरीयैः परेद्युः कार्या ।

पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः ।

इति विशिष्य तैत्तिरीयकोपादानात् । इतरैर्याजुषैः पूर्वेद्युरेव कार्या ।

श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम् ॥

इति सामान्यवाक्यात् । सामगानां तु हस्ते उपाकर्म ।

सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्वच्छन्दसाम् ॥
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकम् ।

इति गर्गस्मरणात् । तस्य दिनद्वयव्याप्तौ परदिनएव ग्राह्यम् ।

धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥

इति परिशिष्टात् । त्वाष्ट्रं चित्रा । पर्वश्रवणहस्तेषु ग्रहणसंक्रमदुष्टेषु उपाकर्म न कार्यम् ।

उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः ।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु ॥

इति निषेधात् । किं तु तदा श्रावणमासस्यैव हस्तान्विता पञ्चमी केवला वा पञ्चमी हस्तान्विताऽन्या वा तिथिर्ग्राह्या ।

हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ।

इति योगियाज्ञवल्क्ये सर्वशाखासाधारण्येन हस्तेन युक्तेऽहनि पञ्चम्यां वेति व्याख्यानात् । सोऽयं विकल्पो यजुर्वेदिषु वाजसनेयिनामेव ।

संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ॥

इति स्मृतिमहार्णवात् । तैत्तिरीयाणां तु न श्रावणपञ्चम्यनुकल्पः, किं तु भाद्रपदी पौर्णमासी । अथातः स्वाध्यायोपाकर्म श्रावण्यां प्रौष्ठपद्यां वेति विकल्पाभिधायकबौधायनसूत्रवाक्यात् । तैत्तिरीयपरत्वेऽपि पञ्चम्यां वाजसनेयिग्रहणमनर्थकं स्यात् । बौधायनानां तु आषाढी पौर्णमास्यनुकल्पः । श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य छन्दांस्य-

धीयीतेति बौधायनस्मरणात् । सर्वेषामपि स्वगृह्योक्ताः काला अनुकल्पत्वेन व्यवस्थिताः ज्ञेयाः । श्रावणे ओषधिप्रादुर्भावाभावे भाद्रपदे श्रुतिपर्वहस्ताः क्रमेण ऋग्यजुःसामशाखिभिर्ग्राह्याः ।

अदृष्ट्यौषधयस्तस्मिन् मासे तु न भवन्ति चेत् ।
तदा भाद्रपदे मासि श्रवणेन तदिष्यते ॥

इति बह्वृचपरिशिष्टात् । श्रवणः पर्वादीनामुपलक्षणम् ।

श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्द्धपञ्चमान् ॥

इति मानवात् । अत्रापिशब्देन भाद्रपदीयहस्तपञ्चम्योरुपादानम् । प्रौष्ठपदीं हस्तेनोपाकरणमिति गोभिलीयात् । मलमासे तूपाकर्म न कार्यम् । किं तु शुद्धे ।

उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि ।
अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिषु ॥

इति कात्यायनस्मरणात् । छन्दोगानां तु मलमासेऽन्न न शुद्धे ।

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्ममहाषष्ठ्यौ सेतादिष्ट वृषादितः ॥

इति ऋष्यशृङ्गस्मरणात् । यद्यप्यत्र छन्दोगपदं न श्रूयते तथापि "सिंहे रवौ छन्दोगाः कुर्युरिति" गार्ग्यवाक्ये तेषां सिंहार्कनियमेनानुत्कर्षस्य छन्दोगविषयत्वसंभवात् । उपाकर्मानन्तरं पक्षद्वयेऽपि वेदमभ्यसेत् ।

युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्द्धपञ्चमान् ।
इति मानवात् ।

अथ तत्र तच्छालीयविशेषनिरूपणाय तत्सूत्राण्युदाह्रियन्ते ।

तत्राश्वलायनसूत्रम्,

अथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पञ्चम्यां हस्तेन वेति।

अथशब्दो मङ्गलार्थः। उपाकरणं प्रारम्भः। अत इति। यतो ब्रह्मयज्ञो नित्यः स चोपाकरणं विना नेत्यर्थः। ओषधीनां प्रादुर्भावे। वर्षर्त्तौ यः श्रवणस्तेन युक्ते काले। न तु ओषधिप्रादुर्भाव एव स्वतन्त्रः कालः। वाशब्दस्याभावेन विकल्पस्याप्रामाणिकत्वात्। श्रावणस्य पञ्चम्यां हस्तेन वेति। श्रावणस्य पञ्चमी यदा हस्तेन युक्तेत्यर्थः।

अथातः श्रावणे मासे श्रवणर्क्षयुते दिने।
श्रावण्यां श्रावणे मासि पञ्चम्यां हस्तसंयुते॥
दिवसे विदधीतैतदुपाकर्म यथोदितम्।
अध्यायोपाकृतिं कुर्यात्तत्रोपासनवह्निना॥ इति
स्मृत्यन्तरात्।

अथ सांख्यायनसूत्रम्। अथोपाकरणम्। अथशब्दो मङ्गलार्थः। उपाकरणं वक्ष्यमाणं कर्म,उच्यतइति शेषः। ओषधीनां प्रादुर्भावे। ओषधीनां व्रीह्यादीनां प्रादुर्भावे वर्षासु। हस्तेन श्रवणेन वा। हस्तश्रवणाभ्यामन्यतमेन युक्ते काले कुर्यादुपाकरणम्। तस्मात्षट्कर्मनित्येन ब्राह्मणेनाध्ययनाध्यापनयजनयाजनदानप्रतिग्रहप्रधानेन दृष्टादृष्टार्थानां कर्मणां सिद्धिमिच्छतोपाकर्म कर्त्तव्यमिति।

अथापस्तम्बीयं सूत्रम्। श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीत।

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्त्तते।
चान्द्रमासास्तदन्ताश्चैत्राद्या द्वादश स्मृताः॥

तेषु यया यया पौर्णमासी सासा चैत्र्यादिका स्मृता ।
कादाचित्केन योगेन नक्षत्रस्येति निर्णयः ॥

तदेवं सिंहस्थे सवितरि याऽमावास्या तदन्ते चान्द्रमसे मासे या मध्यवर्त्तिनी पौर्णमासी सा श्रावणी । श्रवणयोगस्तु भवतु वा मा भूत् । तस्यां श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य गृह्योक्तेन विधिना उपाकर्म कृत्वा स्वाध्यायमधीयीत । अधीयानश्च मासमेकं प्रदोषे प्रथमे रात्रिभागे नाधीयीत ग्रहणाध्ययनं धारणाध्ययनं च न कुर्यात् । प्रदोषग्रहणाद्रात्रावप्यूर्ध्वं न दोष इति ।

अथ हिरण्यकेशिसूत्रम्।अथोपाकरणोत्सर्जनं व्याख्यास्यामः। अथानन्तरम्।अभ्यर्हितत्वादुपाकरणस्य पूर्वनिपातः। किमर्थं युगपत्प्रतिज्ञातं क्रियते श्रावणपक्षे तैषीपक्षस्येति पृथग्वचनादेव सिद्धे। उभयोरसंयुक्तत्वख्यापनार्थम्।तेनासम्भवात् अकृतउपाकरणे उत्सर्गस्याप्यभावः।पारायणे चोत्सर्गस्य भावादुपाकरणमपि स्यात्। केचिदपूर्वाध्ययनार्थे उपाकरणोत्सर्जने मन्यन्ते।तेषां गृहीतस्यापि स्मरणार्थेऽभ्यासे न स्यातामुपाकरणोत्सर्जने । तत्र काण्डं प्रथममुपाकृत्याध्ययनमुपाकुर्यात् । असमाप्ते काण्डे उत्सर्गकाले आगते उत्सृज्याध्यायं विरम्य पुनरुपाकृत्याध्यायं काण्डं वा यथाकालमधीत्योत्सृज्य विरन्तव्यम्। अर्थात् प्रथमउपाकरणे अध्यायमुपाकृत्य काण्डमुपाकर्त्तव्यम्।श्रावणीपक्षओषधीषु जातासु हस्तेन पौर्णमास्यां वाऽध्यायोपाकर्म।श्रावण्याः पौर्णमास्याः पक्षः श्रावणपूर्वपक्ष इत्यर्थः । तस्मिन् दृष्टे देवे जातास्वोषधीषु हस्तेन पौर्णमास्यां वा श्रावण्यामध्यायोपाकर्म भवति । यत्राध्यायः क्रियते आरभ्यते तदध्यायोपाकर्म । जातास्वोषधीष्विति सन्दिग्धे

काले लिङ्गेन निर्णयः। अथवा जातास्वेवोत्कृष्यावकृष्य वा प्रौ-
ष्ठपदे वाऽऽषाढे वा मासि क्रियार्थमिति।

अथ पारस्करसूत्रम्। अथातोऽध्यायोपाकर्म। तच्चाग्निम-
तोऽध्यापनप्रवृत्तस्य। उपाकरणस्यात्रसभ्याग्निसाध्यत्वान्निरग्ने-
र्नाधिकारः।

उपाकर्मणि आचार्यस्याग्नौ
शिष्यकर्तृका समिदाहुतिर्यस्मात्।
तेनाध्यापयतोऽपि निरग्नेः
साग्नेरप्यनध्यापयतो नाधिकारः॥

यत्तु लौकिकेऽग्नौ तदनुष्ठानं तत्राचारमात्रमेव मूलम्।
ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां श्रवणयुक्तायां श्रावण-
शुक्लपक्षदश्याम् ओषधिप्रादुर्भावे। अत्र पौर्णमास्याः प्राधा-
न्याच्छ्रवणाभावेऽपि तस्यां तद्भवति। श्रावणस्य पञ्चमीं हस्तेन
वा। श्रावणपञ्चमीं हस्तयुक्तां वा पञ्चमीं, प्राप्येति। तेन का-
लद्वयम्। अन्ये तु कालचतुष्टयमाहुरिति।

अथ मैत्रसूत्रम्। वर्षासु श्रवणेन स्वाध्यायानुपाकुरुते।
वर्षाग्रहणं भाद्रपदे श्रवणेन यथा स्यादित्येवमर्थम्। तेन प्रथ-
मातिक्रमे कारणाभावाच्छ्रावण्यामेव युक्तम्। यत्र तु प्रथमे श्रवणे
अनध्यायनिमित्तं विद्युदादि भवति तदा भाद्रपदे श्रवणेनैव
कुर्यात्। प्रकरणात्स्नातकोऽध्यापयिष्यामिति गम्यते। अन्तेवा-
सिभिर्योगमिच्छन्निति लिङ्गाच्च। प्रथमाध्ययने चैतत् अन्वार-
म्भणीयेष्टिवत्। न जपे अभ्यासार्थे वा, अतिप्रसङ्गात्। उपा-
कृतिरपूर्वाध्ययनार्था ब्रह्मयज्ञार्था चेत्यपरे। अन्यस्तु ब्रह्मयज्ञार्थ-
त्वं न युक्तं, विशिष्टनक्षत्रकालश्रवणात्। अत एव प्रत्यध्ययनं
न कार्यं किं तु संवत्सरेसंवत्सरे कर्तव्यम्। ज्योतिष्टोमवत्।

शालाग्निकरणात्प्राक् जन्माग्नौ निर्मन्थ्ये वा जन्माग्न्यभावात् । अन्यस्तु जन्माग्नावेव । तस्य नित्यत्वात् । स एव निर्मन्थ्य उच्यते । अरणिभ्यां मन्थनविधानाज्जातकर्मादौ । अर्धपञ्चमा-न्मासानधीत्योत्सृजते । अर्धपञ्चमाः अर्धं पञ्चमस्य येषां मासानां ते अर्धपञ्चमाः । अधीत्य, ब्रह्मचारी । इतरथा अध्याप्येति ब्रूयात् । उत्सृजते कतिचिद्दिवसान्नाधीयीत इत्यर्थः । न पुनः स्वाध्यायमुत्सृजेत् । उत्तरत्राध्ययनविधानात् । अन्यस्तु उत्सर्गसंज्ञं कर्म करोति । तदुपरिष्टाद्वक्ष्यामि ।

तथा च स्मृत्यन्तरं,

पौषमासस्य रोहिण्यामष्टकायामथापि वा ।

जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥ इति ।

ततोऽर्थाद् गृहे उपाकर्मेति ।

अथ खादिरसूत्रम् । प्रौष्ठपदीं हस्तेनाध्यायानुपाकुर्युरिति । प्रौष्ठपदे मासे हस्तेन युक्ते काले अध्यायान्वेदभागान् तदङ्गानि च । आङ् मर्यादार्थे । उपविष्टाः संहता आचार्यः शिष्याश्च नोपनयनादिवत्प्रत्येकम् । उपाकुर्युरधीयीरन् । इति वक्ष्यमाणेन प्रकारेण । प्रौष्ठपदीमिति सप्तम्यर्थे द्वितीया । पूर्वस्मिन् हस्तइति । यद्येकस्मिन्मासि हस्तद्वयसंभवस्तदा पूर्वस्मिन्हस्ते कुर्यात्, न तत्र पूर्वाह्णनियम इत्यर्थः । श्रावणीमित्येकइति । श्रावण्यां पौर्णमास्यामित्यर्थः ।

गोभिलसूत्रम् । प्रौष्ठपदीं हस्तेनोपाकरणम् । गोदानव्रतान्ते वेदपर्वणाम् अध्ययने प्राप्ते वेदारम्भस्य कालान्तरविधानार्थमिदमाह । प्रौष्ठपदो भाद्रपदः तस्य या पौर्णमासी सा प्रौष्ठपदी तां प्राप्तां हस्तेन हस्तनक्षत्रेण उपाकरणम् अधीतस्य ग्रन्थस्योपादानं, कर्त्तव्यमिति शेषः । ननु प्रौष्ठपदे हस्तेनेति सप्तम्यां प्राप्तायां

कस्माद्द्वितीया क्रियते । उच्यते । प्रौष्ठपदीशब्दादनन्तरं प्रतिशब्दाध्याहारार्थं प्रौष्ठपदीं हस्तेनोति । प्रौष्ठपदीं प्राति प्रतिप्रौष्ठपदीमिति । तेन उत्सृष्टस्य छन्दसो भाद्रपदशुक्लपक्षे हस्तेन प्रतिवर्षमनेन वक्ष्यमाणेनोपाकरणं कर्त्तव्यमिति । कथं पुनर्गम्यते यत्प्रतिशब्दमध्याहृत्य प्रतिवर्षमुपाकरणम् । उच्यते । एवं हि श्रूयते आचार्याणामध्यापयतां शिष्याणां चावर्त्तयताम् अज्ञानकृतः प्रामादिको यो दोषस्तेन छन्दसां यातयामत्वं भवति । यातयामैः छन्दोभिः श्रौतस्मार्त्तकर्मकारिणः समग्रफलभाजो न भवन्ति । तत्र यदेतदुपाकर्मोत्सर्जनलक्षणं कर्म तेन पुनः छन्दसामयातयामत्वं जन्यते । तस्मादावृत्त्यर्थं प्रतिशब्दोऽध्याहृत इति । उक्तं च,

अस्थानोच्छ्वासविच्छेदात् घोषणाध्यापनादिकम् ।
प्रामादिकं श्रुतौ यत्स्याद्यातयामत्वकारि तत् ॥
प्रसक्तं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः ।
क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ॥
अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः ।
क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकम् ॥ इति ।

अथ कौशिकाथर्वणसूत्रम् । अथ वेदस्याध्ययनविधिं व्याख्यास्यामः श्रावण्यां प्रौष्ठपद्यां वोपाकृत्यार्द्धपञ्चमान्मासानधीयीरन्निति ।

अथ वेदाध्ययनम् ।

तत्र श्रुतिः, स्वाध्यायोऽध्येतव्य इति । अस्यार्थः । अधीयतइत्यध्यायो वेदः । स्वस्याध्यायः स्वाध्यायः । स्वपरम्परागता शाखेत्यर्थः । ततश्च न यत्किञ्चिच्छाखाध्ययने विधिचारितार्थ्यं

किं तु स्वशाखाध्ययनमेव ।

उक्तं च भट्टपादैः,

पारम्पर्यागतां मुक्त्वा स्वां समाख्यानिबन्धिनीम् ।
शाखां शाखान्तरं युक्तं नाध्येतुं सदृशे श्रमे ॥

वसिष्ठोऽप्येतमर्थमाह,

परम्परागतो येषां वेदः सपरिबृंहणः ।
तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथा ॥ इति ।

परिबृंहणान्यङ्गानि । अत्र येषां यो वेदः पारम्पर्यागत इति यच्छब्दाध्याहारेण व्याख्येयम् । अन्यथा तच्छब्दानुपपत्तेः । वेदोऽत्रैका शाखा न शाखासमूहः । यत्तु

तपोविशेषैर्विविधैः व्रतैश्च विधिनोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यस्सरहस्यो द्विजन्मना ॥

इति मनुना कृत्स्न इति वेदविशेषणमुपात्तं तदपि वेदशब्दस्य शाखापरत्वेन तस्या एव कृत्स्नत्वमभिधत्ते, नैकवेदीयानेकशाखासमूहमिति न विरोधः । ततश्च यस्य या पित्रादिक्रमागता शाखा तच्छाखीयेन कर्मणा संस्कृतः प्रथमं तां शाखामधीयीतेत्यर्थः ।

तथाच वसिष्ठः,

पारम्पर्यागतो येषां स्वशाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत् ।

पञ्चार्षीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत् ।
अधीत्य शाखामात्मीयां परशाखां ततः पठेत् ॥

परेषां स्ववेदातिरिक्तानां वेदानां शाखा परशाखा तां पठेत् । ततश्च स्वशाखाध्ययनानन्तरं वेदत्रयेऽप्येकैकामेव शाखां पठेदित्यर्थः सिध्यति ।

तथाच मनुः,

वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । इति ।

त्रयीसाध्यज्योतिष्टोमादिकर्मानुष्ठानार्थम् ऋग्यजुःसामवेदा-

न्, मार्क्सौमिकहविर्यज्ञमात्रानुष्ठानार्थम् ऋग्यजुर्वेदौ, पाकयज्ञमात्रानुष्ठानार्थं स्वशाखामात्रं पठेदित्यर्थः। वेदान्तरीयाऽपि पूर्वपरिगृहीतैव शाखाऽध्येतव्या। पूर्वपरिग्रहसामर्थ्यात्। न या काचित्।

तथाच भरद्वाजसूत्रं "यजनीयकल्पपरिग्रहे पूर्वपरिग्रहः प्रमाणम्, तत्त्यागे दोषः, तदज्ञाने स्वेच्छया परिग्रह" इति।

कल्पकारिकायामपि,

स्वेन पित्रादिभिर्वापि यः कल्पादिः पुराऽऽदृतः।
स तु नैव परित्याज्य इति वेदानुशासनम्॥

स्वशाखां परित्यज्य शाखान्तराध्ययने दोषमाह वसिष्ठः,

एकवेदेऽपि शाखानां मध्ये योऽन्यतमां श्रयेत्।
स्वशाखां तु परित्यज्य शाखारण्डः स उच्यते॥
यः स्वशाखां परित्यज्य पारक्यामधिगच्छति।
स शूद्रवद्बहिष्कार्यः सर्वकर्मसु साधुभिः॥
आत्मशाखां परित्यज्य परशाखासु वर्त्तते।
उच्छेत्ता तस्य वंशस्य रौरवं नरकं व्रजेत्॥
स्वीयां शाखोज्झिता येन ब्रह्मतेजोऽर्थिना परम्।
ब्रह्मघ्नेव स विज्ञेयः सर्वकर्मसु गर्हितः॥

शाखान्तरीयकर्मकरणे दोषमाह स एव,

न जातु परशाखोक्तं बुधः कर्म समाचरेत्।
आचरन् परशाखोक्तं शाखारण्डः प्रकीर्तितः॥
यः स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत्।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति॥ इति।

कात्यायनोऽपि,

स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः।

कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम् ॥ इति ।

लौगाक्षिरपि,

यः स्वशाखां परित्यज्य पारक्यामधिगच्छति ।

स शूद्रवद् बहिष्कार्यो हव्यकव्येषु दातृभिः ॥ इति ।

स्वशाखानुक्तमप्यविरुद्धं परशाखोक्तं ग्राह्यम् ।

तथाच कात्यायनः,

यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ।

विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥ इति ।

वेदश्चाव साङ्गोऽध्येतव्यो न वेदमात्रं,तैर्विना तदर्थज्ञानानिष्पत्तेः।

तथाच श्रुतिः, ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । ब्राह्मणेनेति त्रैवर्णिकोपलक्षणार्थम् । निष्कारण इत्यन्धत्वादिना कर्मानधिकारेऽप्यध्ययनावश्यकताबोधनाय । अङ्गानि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिश्चेति षट् । ज्ञेय इत्यध्ययनविधेरक्षरग्रहणमात्रपर्यवसायित्वपरिहारेणार्थज्ञानपर्यवसायित्वावगमाय ।

गौतमोऽपि, मन्त्रब्राह्मणयोर्वेदः षडङ्गमेकइति । येषां मते साङ्गस्य वेदत्वं तेषां वेदाध्ययनविधिनैव तदध्ययनं सिध्यतीति न पृथक् तदध्ययनविध्यपेक्षा । येषां मन्त्रब्राह्मणयोरेव वेदत्वं तेषामङ्गाध्ययनविधिः पृथगपेक्षितः। अध्ययनविधेश्चार्थज्ञानपर्यवसायित्वं नाक्षरग्रहणमात्रफलकत्वमित्याह

पराशरः,

ज्ञातव्यः सर्वदैवार्थो वेदानां कर्मसिद्धये ।

पाठमात्रमधीते यः पङ्के गौरिव सीदति ॥

वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चैवहि ।

अजानतोऽर्थं तद्व्यर्थं तुषाणां कण्डनं यथा ॥

पाठमात्ररतान्नित्यं द्विजांश्चार्थविवर्जितान् ।
पशूनिव च तान्प्राज्ञो वाङ्मात्रेणापि नार्चयेत् ॥ इति ।
योऽधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते ॥ इति ।

व्यासः,
नान्यतो ज्ञायते धर्मो वेदादेवैष निर्बभौ ।
तस्मात्सर्वप्रयत्नेन यज्ञार्थे वेदमाश्रयेत् ॥ इति ।

लघुव्यासः,
न वेदपाठमात्रेण सन्तोषं कारयेद्द्विजः ।
पाठमात्रावसानस्तु पङ्के गौरिव सीदति ॥
यथा पशुर्भारहारी न तस्य लभते फलम् ।
द्विजस्तथाऽर्थानभिज्ञो न वेदफलमश्नुते ॥

दक्षः,
वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥
विचारो वेदार्थविचारः ।

लघुव्यासः,
श्रुतहीनमधीतं यत्तेह नामुत्र तद्भवेत् ।
श्रुतं तु केवलमपि संसारान्ताय कल्पते ॥
किं पुनः समुच्चितमिति भावः ।

यदाह व्यास एव,
ज्ञानं कर्म च संयुक्तं मुक्त्यर्थं कथितं यथा ।
अधीतं श्रुतसंयुक्तं तथा श्रेष्ठतरं भवेत् ॥
समुचितं स्तोकमपि श्रुतोपात्तं विशिष्यते ।
चतुर्णामपि वेदानां केवलाध्ययनादिति ॥

अध्ययनीयानि शास्त्राण्याह

मनुः,

बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च ।
नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् ॥

पुराणेऽपि,

धर्मशास्त्रं तु विज्ञेयं शब्दशास्त्रं तथैवच ।
पुराणानीतिहासांश्च तथाऽऽख्यानानि यानि च ।
महात्मनां च चरितं श्रोतव्यं नित्यमेव च ॥ इति ।

अथ वेदप्रशंसा ।

तत्र मनुः,

चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ॥

याज्ञवल्क्योऽपि,

यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् ।
वेद एव द्विजातीनां निःश्रेयसकरः परः ॥

मनुः,

वेदमेव सदाऽभ्यस्येत्तपस्तप्यन्द्विजोत्तमः ।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥
आ हैव स नखाग्रेभ्यः परमं तप्यते तपः ।
यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥ इति ।

यः धृतमाल्योऽपि सन् निरन्तरं स्वाध्यायमधीते स आनखाग्रमुत्कृष्टं तपः करोतीत्यर्थः । हैति प्रसिद्धौ । स्रग्ग्रहणं नियमातिक्रमप्रदर्शनार्थम् । ततश्च नियमातिक्रमेणापि कृतमध्ययनमुत्कृष्टफलं भवति किं पुनर्नियमवदिति भावः ।

मनुः,

ऋषिदेवमनुष्याणां वेदश्चक्षुः सनातनः । इति ।

स्मृतिसारसमुच्चये,

वेदो यस्य शरीरस्थो न स पापेन लिप्यते ।
वेदात्मा स तु विज्ञेयः शरीरं किंप्रयोजनम् ॥
वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्त्तितानि न संशयः ॥

अथ वेदार्थज्ञानफलम् ।

तत्र मनुः,

वेदशास्त्रार्थतत्त्वज्ञो यत्रयत्राश्रमे वसेत् ।
इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते ॥

हारीतोऽपि,

मन्त्रार्थज्ञो जपन् जुह्वत् तथैवाध्यापयन् द्विजः ।
स्वर्गलोकमवाप्नोति नरकं तु विपर्यये ॥

निरुक्तमपि, योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मेति । वेदानध्ययने प्रत्यवायमाह

मनुः,

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ इति ।

अनेन नित्यकर्मविध्याक्षिप्तेऽप्यध्ययननित्यत्वे शाब्दीयनित्यताऽभिहिता । ततश्चानध्ययने पृथक्प्रत्यवायः सिध्यति । पृथक्प्रायश्चित्तोपदेशात् ।

वसिष्ठः,

यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ।
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ॥

मनुरपि,

यथा षण्डोऽफलः स्त्रीषु यथा गौर्गवि चाफलः ।
यथा चाऽज्ञे ऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥

व्यासः,

तथा वेदविहीनस्य क्रियाः सर्वास्तु निष्फलाः । इति ।

वसिष्ठोऽपि,

नानृचो ब्राह्मणो भवति नावर्णो न कृषीवलः ।
न शूद्रपेषणं कुर्वन्न स्तेनो न चिकित्सकः ॥

सारसमुच्चयेऽपि,

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
स वै दुर्ब्राह्मणो नाम सर्वकर्मबहिष्कृतः ॥
नित्यं नैमित्तिकं काम्यं यच्चान्यत्कर्म वैदिकम् ।
अनधीतस्य विप्रस्य सर्वं भवति निष्फलम् ॥
अनधीत्य द्विजो यस्तु शास्त्राणि च बहून्यपि ।
शृणोति ब्राह्मणो नाशे नरकाणि प्रपद्यते ॥
नाधीतवेदो यो विप्र आचारेभ्यः प्रवर्त्तते ।
नाचारफलमाप्नोति यथा शूद्रस्तथैव सः ॥
अनधीतस्य विप्रस्य पुत्रो वाऽध्ययनान्वितः ।
शूद्रपुत्रः स विज्ञेयो न वेदफलमश्नुते ॥
अनभ्यासाच्च वेदानामाचारस्य च लङ्घनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥ इति ।

याज्ञवल्क्योऽपि,

वेदाभ्यासरतं क्षान्तं महायज्ञक्रियापरम् ।
न स्पृशन्तीह पापानि महापातकजान्यपि ॥

शङ्खः,

न वेदमनधीत्यान्यां विद्यामधीयीतान्यत्र वेदाङ्गस्मृतिभ्य इति ।

तेनोपनयनानन्तरं वेदाध्ययनोपक्रमात्प्राक् स्मृत्यध्ययनमुक्तं भवति।

हारीतः,

वेदो विद्या ब्राह्मणस्य तत्परिज्ञानार्थमङ्गानीति । तत्परिज्ञानं वेदपरिज्ञानम् । वेदज्ञानफलमाह

व्यासः,

यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् ।
तथा दहति वेदज्ञः कर्मजं दोषमात्मनः ॥

मनुः,

तपो विद्याऽपि विप्रस्य निःश्रेयसकरं परम् ।
तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते ॥
विद्या वित्तं तपश्चेति त्रीणि तेजांसि देहिनः ।
इह चामुत्र च श्रेयस्तदेव प्रतिपादयेत् ॥
विद्यया विमलं ज्योतिर्वित्तत्यागात्सुखोदयम् ।
तपसा विमलां भूतिं प्राप्नुयान्मानवस्त्रिभिः ॥ इति ।

अथाध्यापकनिरूपणम् ।

तत्र मनुः,

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः ।
प्रब्रूयाद्ब्राह्मणस्तेषां नेतराविति निश्चयः ॥

स्मृत्यधिकारेऽपि स एव,

निषेकादिः श्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्य चित् ॥
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ।
शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित् ॥ इति ।

निग्रहस्थानान्यनुक्रम्याह

शङ्खोऽपि, एतानि ब्राह्मणोऽधिकुरुते स च दर्शयतीतरे-

षामिति ।

पालकाप्यसंहितायामपि,

ब्राह्मणस्त्वथ वर्णांस्त्रीनध्यापयितुमर्हति ।
द्वौ क्षत्रियस्तथा वैश्य एकमध्यापयेत्सदा ॥
गुणवत्स्वपि शूद्रेषु मा बुधं कर्त्तुमर्हसि ।
एषा ह्यनुपमा विद्या वेदवेदाङ्गसंमिता ॥
स्त्रियां नानुपपन्नाय कथयेन्न ह्यसाधवे ।
अश्रद्दधाना ये च स्युर्नास्तिका येऽभ्यसूयकाः ॥
तेषां विद्यां न कथयेद्ये च विद्याविमानिनः ।
आचार्यस्त्वेव कथयेद्विज्ञानकुशलेष्वपि ॥
नापुत्राय प्रदातव्या नाशिष्यायाहिताय च । इति ।
बुधं व्याख्यातारम् ।
शूद्रान्नं शूद्रसंपर्कः शूद्रेण च सहासनम् ।
शूद्राज्ज्ञानागमश्चैव ज्वलन्तमपि पातयेत् ॥

इति पराशरेण शूद्रादध्ययनस्य पर्युदस्तत्वात् । एवं ज्योतिष-वैद्यकादिसंहितास्वप्युदाहार्य्यम् । एतदनापत्कालविषयम् । आपत्काले तु क्षत्रियादेरप्यध्ययनविधानात् ।

तथाच मनुः,

अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या तु शुश्रूषा यावदध्ययनं गुरोः ॥ इति ।

गौतमोऽपि, आपत्काले ऽब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा समाप्ते ब्राह्मणो गुरुरिति । अनुगमनं च यावदध्ययनम् । अनुगमनग्रहणाच्छुश्रूषान्तरनिवृत्तिः । विद्या रत्नादेरप्युपलक्षणम् ।

तथाच देवलः,

रत्नं नाम स्त्रियो विद्या धर्मः शौचं सुभाषितम् ।
विविधानि च शिल्पानि समादेयानि सर्वशः ॥

मनुरपि,

श्रद्दधानः शुभां विद्यामाददीतावरादपि ।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥
विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ॥ इति ।

अथाध्यापकधर्माः ।

तत्र यमः,

सततं प्रातरुत्थाय दन्तधावनपूर्वकम् ।
स्नात्वा हुत्वाऽथ शिष्येभ्यः कुर्यादध्यापनं नरः ॥

आपस्तम्बोऽपि, शयानश्चाध्यापनं वर्जयेत् नच तस्यां शय्यायामध्यापयेत् यस्यां शयीतेति ।

मनुः,

अध्येष्यमाणं तु गुरुर्नित्यं कालमुपस्थितम् ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥

शिष्यशिक्षाप्रकारमाह गौतमः, शिष्यशिष्टिरवधेन अशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा शास्य इति ।

मनुरपि,

भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥ इति ।

ताडनस्थानमाह मनुः,

पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषम् ॥

कूर्मपुराणे,

एवमाचारसंपन्नमात्मवन्तं सदाऽग्निकम् ।
वेदमध्यापयेद्धर्मं पुराणाङ्गानि नित्यशः ॥
शुश्रूषोरनध्यापने दोष उक्तस्तत्रैव,
संवत्सरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशन् ।
हरते दुष्कृतं तस्य शिष्यस्य वसतो गुरुः ॥ इति ।

वसिष्ठोऽपि,
यो विद्यार्थिने न संपद्यात्स कर्महा स्यादिति ।

लघुव्यासः,
वेदविप्लावनात्तेन वरं मौनं समाश्रितम् ।
वेदविप्लावनाद्विप्रो नरकं यात्यधोमुखम् ॥
वेदविप्लावनलक्षणमाह यमः,
योऽर्थार्थी मां द्विजो दद्यात्पठेच्चैवाविधानतः ।
अनध्याये च तत्प्राहुर्वेदविप्लावनं बुधाः ॥ इति ।

मनुः,
धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ॥

यमोऽपि,
धर्मार्थौ यत्र न स्यातां शुश्रूषा वा धनागमः ।
विद्यया सह मर्त्तव्यं न विद्यामूषरे वपेत् ।

श्रुतिरपि,
विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायानृजवे अयताय
न मां ब्रूयात् अवीर्यवती तथा स्याम् ।
यमेव विद्याशुचिमप्रमत्तं
मेधाविनं ब्रह्मचर्योपपन्नम् ।

यस्ते न द्रुह्येत्कतमच्च नाहं
तस्मै मां ब्रूया निधिपाय ब्रह्मन् ॥ इति ।
विष्णुः, नापरीक्षितं याजयेन्नाध्यापयेन्नोपनयेदिति ।

मनुः,
अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति ।
तयोरन्यतरः प्रैति विद्वेषं वाऽधिगच्छति ॥ इति ।

अथ विद्यादानप्रशंसा ।

तत्र यमः,
दशानां तु सहस्राणां युक्तानां धुर्यवाहिनाम् ।
सुपात्रे विनियुक्तानां कन्या विद्या च तत्समम् ॥ इति ।

बृहस्पतिरपि,
सहस्रसंमिता धेनुरनड्वान्दश धेनवः ।
दशानडुत्समं यानं दशयानसमो हयः ॥
दशवाजिसमा कन्या भूमिदानं तु तत्समम् ।
भूमिदानात्परं नास्ति विद्यादानं ततोऽधिकम् ॥

मनुरपि,
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ।
वार्यन्नगोमहीवासास्तिलकाञ्चनसर्पिषाम् ॥

याज्ञवल्क्योऽपि,
सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः ।
तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतम् ॥

संवर्तोऽपि,
विद्यादानेन सुमतिर्ब्रह्मलोके महीयते । इति ।

अथाध्येतृनिरूपणम् ।

तत्र लघुव्यासः,

संस्कारवद्भिः कर्त्तव्यं वेदस्याध्ययनं द्विजैः ।
शूद्रस्य फलवत्तत्स्यादन्यथा निष्फलं स्मृतम् ॥ इति ।
द्विजैस्त्रैवर्णिकैः तदनुलोमजैश्च । तन्नियममाह

स एव,

मेखलाऽजिनदण्डानां धारणं ब्रह्मचारिभिः ।
वेदः कृत्स्नोऽधिगन्तव्यः सर्वज्ञाने द्विजातिभिः ॥
भिक्षाऽशिभिर्गुरोर्नित्यं शुश्रूषायां रतैः सदा ।
आसमाप्तेर्व्रतं कार्यं वेदस्य विधिवद् द्विजैः ॥ इति ।
धारणं, कृत्वेति शेषः । सर्वज्ञाने इति निमित्तसप्तमी । तश्च सर्वज्ञाननिमित्तमित्यर्थः सिध्यति ।

अथाध्येतृधर्म्माः ।

तत्र याज्ञवल्क्यः,

कृतज्ञाद्रोहिमेधाविशुचिकल्पानसूयकाः ।
अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः ॥ इति ।

मनुरपि,

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्मतः ॥

अथ वेदादिविद्यारम्भकालः ।

विद्याश्चाह वसिष्ठः,

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या एताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो वेदो गान्धर्व एवच ।
अर्थशास्त्रमिति ह्येता उपविद्याः प्रकीर्त्तिताः ॥ इति ।
तत्र सर्वसाधारणमुत्तरायणम् । तथाच

ज्योतिर्निबन्धे,

धर्मार्थस्मरगाः शुभा उपचये पापग्रहाः शोभनाः
लग्नं चास्थिरमुत्तरायणमथो नास्तं गतो बोधनः । इति ।
मासपक्षौ मुहूर्त्तसङ्ग्रहे,
उत्तरायणगे सूर्ये कुम्भमासं विवर्जयेत् ।
पूर्वपक्षः शुभः प्रोक्तः कृष्णेचान्त्यत्रिकं विना ॥ इति ।

अथ तिथयः ।

तत्र मार्कण्डेयः,
षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाऽष्टमीम् ।
रिक्तां पञ्चदशीं चैव सौरिभौमदिनं तथा ॥ इति ।
नृसिंहः,
रिक्तां षष्ठीं प्रतिपदं पर्वाष्टम्यौ च वर्जयेत् ।
अथ वाराः । तत्र वसिष्ठः,
दिवसांशोदया वर्ज्या यत्नेन कुजसौरयोः ।
श्रेष्ठाः सितज्ञजीवानां मध्यमाश्चन्द्रसूर्ययोः ॥ इति ।
अथ नक्षत्राणि । तत्र महेश्वरः,
हस्तादित्रितये तथा निर्ऋतिभे पूर्वान्त्यभेष्वश्विभे
मित्रर्क्षेच मृगादिपञ्चसु शुभः प्रारम्भ आद्यैः स्मृतः ।
विद्यानां हरिभत्रये च दिवसे सूरेर्भृगोर्वा विदो
ऽनध्यायाख्यतदाद्यवर्जिततिथौ केन्द्रस्थितैस्सद्ग्रहैः ॥ इति ।
राजमार्त्तण्डोऽपि,
पूर्वात्रये मूलमृगादिपञ्चके
तथाऽश्विनीषु त्रितये च हस्तात् ।
सावित्ष्णुधिष्ण्येष्वपि सर्वविद्या-
प्रारम्भ इष्टः शुभवासरेषु ॥ इति ।
अथ श्रुतिस्मृत्यारम्भासाधारणनक्षत्राणि । तत्र

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NOS. 103, 108, 114, 122, 129, 137.

वीरमित्रोदयः ।

संस्कारप्रकाशस्य पूर्वार्धम् उपनयनप्रकरणान्तम्

महामहोपाध्यायश्रीमित्रमिश्रविरचितम् ।

पर्वतीयनित्यानन्दशर्मणा संशोधितम् ।

VÎRAMITRODAYA;

BY

MAHÂMAHOPÂDHYÂYA PANDIT MITRA MÎSRA,

EDITED BY

Parvatîya Nityânanda Sarmâ.

PUBLISHED AND SOLD BY THE SECRETRY

CHOWKHAMBÂ SANSKRIT BOOK-DEPÔT.

BENARES:

AGENTS: OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHÂRÂMA MUKUNDAJÎ, BOMBAY.

PROBSTHAIN & CO., BOOKSELLERS, LONDON

Printed by Harikrishna Dâs, Proprietor

AT THE VIDYÂ-VILAS PRESS.

BENAREES.

वसिष्ठः,

हस्ताश्वयुक्श्रवणतिष्यसमीरमित्र
चित्रादितित्रिपुराजिद्वसुवरुणेषु ।
हस्तोत्तराकमलसम्भवपौष्णभेषु
श्रुत्याः स्मृतेः प्रथममारभणं द्विजानाम् ॥
धर्मशास्त्रेषु विश्वाद्यं त्रितयं पौष्णमेवच ।
अष्टमस्था ग्रहाः सर्व्वे सर्वविद्यासु वर्जिताः ॥ इति ।
अथ षडङ्गसाधारणानि नक्षत्राणि ।
ज्योतिषाद्यङ्गशास्त्राणां स्वाती हस्तपुनर्वसू ।
पौष्णं तिष्योऽश्विनीमूलवारुणाः स्युः सुपूजिताः ॥

अथ ज्योतिःशास्त्रे,

मूलेज्यवरुणादित्यरेवतीहस्तवारिणी ।
अश्विनी ज्योतिषां शास्त्रे प्रशस्तास्तारका इमाः ॥
अथ गणितविद्यायां राजमार्त्तण्डे,
अधोमुखान्त्यहस्तार्द्राश्रविष्ठामित्रपुष्यभम्,
सौम्येज्यभृगुवर्गाः स्युर्गणितेषु शुभप्रदाः ॥

अथ शब्दशास्त्रे,

अश्विनी रोहिणी सौम्यं पुष्यो हस्तादिपञ्चकम् ।
अदितिर्ईश ताराः स्युः शब्दशास्त्रे सुपूजिताः ॥
दीर्घवृद्धिकरं पौष्णप्राजापत्योत्तरात्रयम् ।
वर्ज्यं पूर्वात्रयं याम्यमूलशर्मेन्द्रपैतृकाः ॥
रिक्ताऽष्टमी पञ्चदशी निषिद्धास्त्रयोदशी सप्तमिका च मध्या ।
शब्दशास्त्रपरिज्ञाने शस्तौ हस्तपुनर्वसू ॥

अथार्थशास्त्रे,

वरुणादित्यहस्तेज्यहरिविष्णुध्रुवाः शुभाः ।

अर्थशास्त्रेषु सौम्येज्यभृगुवर्गोदयाः शुभाः ॥

अथाभिषक्शास्त्रे,

मार्त्तण्डाश्विसमीरमित्रवरुणादित्योत्तरारेवती-
चित्राविष्णुशशाङ्कपुष्यवसुषु प्राजेशभे भैषजम् ।
कुर्यादर्कबुधार्किशुक्रशशभृद्वारोदयांशे शुभे
रिक्तायां वरभेऽङ्गनासमुदये शुद्धेऽरिदाराष्टके ॥
केन्द्रत्रिकोणगे जीवे नैधने शुभसंयुते ।
भेरीशास्त्रे च नाट्ये च तथा सामुद्रिकेऽपि वा ॥
गान्धर्वे नीतिशास्त्रे च शस्तावहिपुनर्वसू ।
आयुर्वेदे धनुर्वेदे धनिष्ठा पूज्यते सदा ॥
शास्त्रे महानसे शिल्पे सूपशास्त्रे विशेषतः ।
खड्गशस्त्राभियोगे च आर्द्राराशिर्विशिष्यते ॥
कौक्कुटे चानुराधा स्यादश्वविद्यासु चाश्विनी ।
चित्रशास्त्रेषु चित्रा स्याद्धर्मशास्त्रेषु वैष्णवम् ॥
ज्योतिःशास्त्रेषु च स्वाती योगशास्त्रेषु वारुणम् ।
मृगशीर्षं षडङ्गेषु विशेषेण प्रशस्यते ॥

संहितान्तरेऽपि,

शास्त्रं प्रति पृथग्भानि तिष्यो हस्तः पुनर्वसुः ।
वाद्यशास्त्रे च नाट्ये च तथा सामुद्रिकेऽपि वा ॥
सर्वशाकुनिकज्ञाने गजशास्त्रे च शान्तिके ।
आयुर्वेदे धनुर्वेदे धनिष्ठा पूज्यते सदा ॥

ज्योतिर्निबन्धे,

मित्रादित्यकराश्विनीस्थिरमरुत्पौष्णं च ताराधनु
र्विद्यायामतिशोभना रविकविक्ष्माजेज्यवारोदयाः ।

दीपिकायामपि,

अदितिगुरुयमार्कत्वातिचित्राग्निपैष्ण-
ध्रुवहरिवसुमूलाहीन्दुभाग्यान्त्यभेषु ।
विशनिशशिबुधाहे विष्णुबोधे विपौषे
शुभशयतिथियोगे चापविद्याप्रदानम् ॥ इति ।
राजमार्तण्डः,
हरौ सुप्ते तथा पौषे चैत्रे वाऽप्यसिते तिथौ ।
शनिसौम्यार्कजस्याह्नि धनुर्वेदो न शस्यते ॥
ध्रुवेन्द्रमृदुमूलाग्निद्विदैवत्याश्च राशयः ।
नृपशास्त्रे शुभाः प्रोक्ताः शुभयुक्तेक्षितोदये ॥
मित्रादितिमरुत्त्वाष्ट्रचित्रशास्त्रे शुभावहाः ।
रुद्रान्त्यध्रुवतारेज्यहरीन्द्रखड्गगन्धयोः ॥
अथ ग्रहसंस्थानम् । तत्र स एव,
सेवागमेषु सर्वेषु क्षिप्रोग्राः शुभदा मताः ।
विद्यागमेषु सर्वेषु प्रशस्ताश्चरमित्रकाः ॥
चरस्थिरं द्व्यङ्गगृहे विलग्ने
कनिष्ठमध्येष्टफला भवन्ति ।
त्रिकोणकेन्द्रायगताः शुभाः स्युः
शुभास्त्रिलाभारिगतास्तु पापाः ॥
शुभलग्ने दशमभवे रवौ कुजे वाऽथ तद्वर्गे ।
आयुर्विद्या कार्या नृपसेवा वैरिविग्रहः कार्यः ॥
वसिष्ठः,
विद्यारम्भे द्विःस्वभावा विशिष्टा
मध्याः प्रोक्ता ये चरा राशयश्च ।
शुद्धे लग्ने नैधने पुत्रधर्म
कुर्यात्स्थानस्पत्नीविद्यासमाधिम् ॥
आतृषष्ठायकर्मस्थाः पापाः सर्वे शुभावहाः ।

स्त्रीमृत्युत्रर्जं शुक्रज्ञौ हीन्दुर्विनिधनोदयौ ॥ इति ।

अथ सारस्वतयोगाः । तत्र स एव,

सावित्रनक्षत्रतृतीयपादे तीक्ष्णांशुशीतांशुशशाङ्कजाश्चेत् ।
तस्योदये ज्ञार्कनिशेशवारे सारस्वतं योगमुदाहरन्ति ॥
आदित्यर्क्षे बुधस्यांशे वर्त्तन्ते ज्ञेन्दुभास्कराः ।
बुधवारे च तल्लग्ने योगः सारस्वतो भवेत् ॥
बुधोत्तरे गुरोरंशे केन्द्रगा ज्ञार्कभार्गवाः ।
त्रयोदश्यां यमे लग्ने योगः सारस्वताह्वयः ॥ इति ।

अथाध्ययनप्रकारः ।

संग्रहे,

आदौ गणपतिं चेष्ट्वा सम्पूज्य च सरस्वतीम् ।
गुरुपूजां ततः कृत्वा विद्यास्सर्वास्समारभेत् ॥ इति ।

मनुः,

ॐकारपूर्विकास्तिस्रो महाव्याहृतयोऽखिलाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥

अत्र विशेषमाह गौतमः, ॐपूर्वा व्याहृतयः पञ्च सत्यान्ता इति । इदं च प्रात्यहिकाध्ययने वेदितव्यम् ।

तथा च संवर्तः,

प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्र्याश्चानुवचनं ततो वृत्तान्तमारभेत् ॥ इति ।

वृत्तस्य पूर्वपठितस्य अन्तं समाप्तिस्थलमारभेदित्यर्थः । प्रणवोच्चारणं च प्राणायामत्रयानन्तरं वेदितव्यम् ।

तथाच मनुः,

प्राक्कूलान्पर्युपासीत पवित्रैश्चैव पावितः ।
प्राणायामैस्त्रिभिः पूर्वं तत ॐकारमर्हति ॥ इति ।

प्राक्कूलान्प्रागग्रान्, दर्भानिति शेषः । पवित्रैः पावनैः ।

गौतमोऽपि,प्राणायामानुपस्पृशन्दर्भैरिति। प्राणानामायामाः स्थानानि शीर्षण्यानि चक्षुरादीनीन्द्रियाण्युच्यन्ते । तानि दर्भैरुपस्पृशेदित्यर्थः । प्राणायामा अपि द्विराचमनानन्तरं वेदितव्याः ।

तथाच मनुः,

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
प्राञ्जलिस्तु कृतापोशो लघुवाग्विजितेन्द्रियः ॥ इति ।

अत्राचान्तः कृतापोश इत्यनेन द्विराचमनमुच्यते ।

तथाच स एव,

सुप्त्वा क्षुत्वा च भुक्त्वा च ष्ठीवित्वोक्त्वाऽनृतं वचः ।
पीत्वाऽपोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ॥ इति ।

प्रयतः आचान्तः । प्राणायामानप्याह

गौतमः,

प्राणायामास्त्रयः पञ्चदशमात्रा इति । प्राणायामः प्राणसंरोधः । पञ्चदशमात्रा इत्यनेन सव्याहृतिकः प्राणायामो व्यावर्त्यते । वचनारम्भसामर्थ्यात् । एतच्च प्रणवोच्चारणम् अध्ययनारम्भसमाप्त्योः कार्यम् ।

तथाच मनुः,

ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते ॥

धर्मान्तरमप्याह स एव,

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।

सदा नित्यमध्ययने । पादग्रहणमभिवादनम् ।

तदाहाङ्गिराः,

प्राप्ते वेदानुवचने तद्विसर्गे ऽन्वहं गुरोः ।
उपसंग्रहणं कार्यं विप्रोष्य स्वागतेन च ॥ इति ।
तच्च प्राञ्जलिना कार्यम् ।
तल्लक्षणमाह मनुः,
संहत्य हस्ताधध्येयं स हि ब्रह्माञ्जलिः स्मृतः । इति ।
आश्वलायनस्त्वन्यथाऽऽह ।
उत्तानं वामपाणिं चावाङ्मुखं दक्षिणं तथा ।
पाण्योः पृष्ठं दृढं कुर्यादङ्गुलीभिः परस्परम् ॥
अङ्गुष्ठौ च दृढीकृत्य क्रियते या तथाऽञ्जलिः ।
सा ब्रह्मणा कृतत्वात्प्राक् ब्रह्माञ्जलिरिति स्मृता ॥
वेदारम्भे विशेषेण समाप्तौ च विशिष्यते ।
ब्रह्मयज्ञे च कार्या स्यात्सावित्रीग्रहणे तथा ॥ इति ।
तत्र विशेषमाह संवर्तः,
ततोऽधीयीत वेदं तु वीक्षमाणो गुरोर्मुखम् ।
हस्तौ सुसंयतौ कार्यौ जानुभ्यामुपरिस्थितौ ॥
गुरुमुखवीक्षणविधानेन गुरुमुखादेवाध्येतव्यमिति गम्यते ।
गुरुमुखोच्चारणानूच्चारणस्याध्ययनत्वात् ।
अतएव नारदः,
पुस्तकप्रत्ययाधीतं नाधीतं गुरुसंनिधौ ।
न राजते सभामध्ये गूढगर्भ इव स्त्रियाः ॥
अननुज्ञाताध्ययने प्रत्यवायमाह
लघुव्यासः,
ऋचमर्धर्चमथवा पादं वा यदिवाऽक्षरम् ।
गृह्णाति योऽननुज्ञातं पुरस्तात्परतो द्विजः ॥
स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ।

शूद्रसन्निधावध्ययने प्रत्यवाय उक्तः काशीखण्डे,
श्रावयेद्वैदिकं मन्त्रं न शूद्राय कदाचन ।
ब्राह्मण्याद्धीयते विप्रः शूद्रो धर्माच्च हीयते ॥
लघुव्यासोऽपि,
अनध्यायेष्वधीतं यच्च शूद्रस्य सन्निधौ ।
प्रतिग्रहनिमित्तं च नरकाय तदुच्यते ॥ इति ।
मनुरपि,
नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ।
न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् ॥ इति ।
गौतमोऽपि,
नापररात्रमधीत्य पुनस्संविशेदिति ।
हारीतोऽपि, ब्राह्मे मुहूर्त्ते प्रतिबुध्य स्वाध्यायमधीत्य न पुनः संविशेदिति ।
विस्वराद्यध्ययने दोषमाह नारदः,
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥
हस्तेनाधीयमानस्तु स्वरवर्णान्प्रयोजयेत् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोकं च गच्छति ॥
विद्याधिगमोपायमाह मनुः,
यथा खनन्खनित्रेण नरो वार्यधिगच्छति ।
एवं गुरुगतां विद्यां शुश्रूषुर्राऽधिगच्छति ॥
नारदोऽपि,
गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थं नोपपद्यते ॥
यो ऽहरिव गणाद्भीतः सौहित्यान्नरकादिव ।

राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥
पत्पदैः पांसुभिः श्लक्ष्णैर्वल्मीकः क्रियते महान् ।
न तत्र बलमावध्यमुद्योगस्तत्र कारणम् ॥
शनैर्विद्यां शनैरर्थानारोहेत्पर्वतं शनैः ।
शनैः कन्था शनैः पन्थाः पञ्चैतानि शनैः शनैः ॥

सौहित्यं तृप्तिः । विद्याविघ्नानप्याह

स एव,

द्यूतं पुस्तकशुश्रूषा वाटिकासक्तिरेवच ।
स्त्रियः प्रीतिश्च तन्द्री च विद्याविघ्नकराणि षट् ॥

नाटकासक्तिरित्यपि पाठः । द्यूतं प्रसिद्धम् । पुस्तकशुश्रूषा लिखनशोधनादिव्यसनम् । वाटिकासक्तिरारामविहारः । नाटकासक्तिरिति पाठे गीतनृत्याद्यासक्तिः । स्त्रियः स्त्रीव्यसनम् । प्रीतिः सक्रन्दनादौ । तन्द्र्यालस्यम् । एतानि व्यस्तानि समस्तानि विद्याविघ्नकराणि भवन्तीत्यर्थः । नियमेन स्वल्पमप्यध्येतव्यं न तदतिक्रमेण बह्वपीत्याह

व्यासः,

ऋक्पादमप्यधीयीत मार्गेणोक्तेन धर्मवित् ।
न त्वेव चतुरो वेदानन्यायेन कदाचन ॥ इति ।

अथ सज्योतिरनध्यायः ।

तत्र मनुः,

प्रादुष्कृतेष्वग्निषु च विद्युत्स्तनितनिस्वने ।
सज्योतिरस्यानध्यायः शेषे रात्रौ तथा दिवा ॥

इदं च वर्षर्तौ । अन्यर्तौ अहोरात्रम् ।

हारीतोऽपि, सायंसंध्यास्तनिते रात्रौ नाधीयीरन्निति ।

अथाहोरात्रानध्यायाः ।

तत्र याज्ञवल्क्यः,

पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥
पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः ।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥ इति ।

पौर्णमास्यमावास्ये पञ्चदश्यौ । राहुसूतके चन्द्रसूर्योपरागे । पञ्चदशीग्रहणेनैव सिद्धौ पुनर्वचनमौत्पातिके पर्वणि ग्रहणेऽनध्यायत्वप्रतिपादनार्थम् । ऋतुसन्धिषु प्रतिपत्स्विति मिताक्षरा । वस्तुतस्तु चतुर्मासात्मकऋतुत्रयसन्धिगतासु द्वितीयास्विति व्याख्येयम् । आषाढीकार्त्तिकीफाल्गुनीसमनन्तरासु द्वितीयास्विति स्मृत्यन्तरात् । श्राद्धिकं भुक्त्वा प्रतिगृह्य चेत्यन्वयः । एतच्च पार्वणविषयम् । एकोद्दिष्टे तु त्र्यहस्य वक्ष्यमाणत्वात् । शक्र इन्द्रध्वजः, तत्पातोच्छ्राययोः । तत्कालोऽभिहितो

ब्राह्मे,

द्वादश्यां भाद्रशुक्लस्य इन्द्रध्वजसमुच्छ्रयः ।
इषे कृष्णचतुर्थ्यां तु सप्ताहात्पात इष्यते ॥ इति ।

वसिष्ठोऽपि,

श्वमार्जारनकुलमूषकशीघ्रगाणामन्तरा गमने त्वहोरात्रमिति ।
अभोजनमित्यनुवर्तते । एतच्च त्रिरात्रोपवासाशक्तौ ।
तथाचोशना, मार्जारान्तरागमने घृतं प्राश्य त्र्यहमुपवसेदिति ।

हारीतोऽपि,

प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः । इति ।

अनध्यायानुवृत्तौ मनुः,

अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु । इति ।

अष्टकास्वरूपमाह पैठीनसिः, प्रौष्ठपदप्रभृतयः कृष्णे भ-

चास्तिस्रोऽष्टका मार्गशिरःप्रभृतय इत्येके इति ।

शौनकोऽपि, हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इत्याह । अष्टमीनां तत्त्वेनैवानध्यायत्वसिद्धौ अष्टकाग्रहणं सप्तमीनवम्योरनध्यायत्वप्राप्त्यर्थम् ।

अधीयीतेत्यनुवृत्तौ शङ्खः, अष्टम्याः प्रदोषे इति ।

पैठीनसिः, शुक्लचतुर्दश्यां सर्वासु चाष्टमीषु नक्तमनध्यायोऽष्टकावर्जमिति ।

नृसिंहपुराणे,

महानवम्यां द्वादश्यां भरण्यामपि चैवहि ।
तथाऽक्षयतृतीयायां शिष्यं नाध्यापयेद्बुधः ॥
माघमासे तु सप्तम्यां रथाख्यायां तु वर्जयेत् । इति ।

महानवमी आश्विनशुक्लनवमी । महाद्वादशी कार्तिकशुक्लद्वादशी । महाभरणी महालयान्तर्गता ।

स्मृत्यन्तरे, भाद्रपदे मघाभरण्योरनध्यायः सश्रवणयोरेकादशीद्वादश्योश्च आषाढीकार्त्तिकीफाल्गुनीसमीपस्थद्वितीयासु च अपरपक्षान्ते तथा द्वितीयायां चेति ।

नारदीये,

अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु ॥ इति ।

महोत्सवेऽप्यनध्यायमाह मनुः,

पञ्चदश्यां चतुर्दश्यामष्टकासु महोत्सवे । इति ।

तथा नारदीये,

सिता ज्येष्ठे द्वितीया तु आश्विने दशमी सिता ।
चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः ॥ इति ।
तासामनध्यायत्वं स एवाह, या च सोपपदा तिथिरिति ।

वसिष्ठोऽपि, आचार्यपुत्रशिष्यभार्यास्वहोरात्रमृत्विग्यज्ञ-योनिसंबन्धिष्विति ।

योनिसंबन्धिनो मातुलादयः । एवं सब्रह्मचारिण्यपि द्रष्टव्य-म् । अत एवाहोरात्रमित्यनुवृत्तौ

गोभिलः,

सब्रह्मचारिणि प्रेते स्वे च भूमिपतौ मृते । इति ।

हारीतोऽपि, प्रातःसन्ध्यास्तनिते त्वहोरात्रमिति ।

गौतमोऽपि, छर्दितश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रमिति ।

अथवा घृतं प्राश्याधीयीत ।

तदाहापस्तम्बः, छर्दित्वा स्वप्नान्ते सर्पिर्वा प्राश्येति ।

अथ पक्षिण्यनध्यायाः ।

तत्र मनुः,

यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।

विरमेत्पक्षिणीं रात्रिं यद्वा प्येकमहर्निशम् ॥ इति ।

स्मृत्यन्तरेऽपि, वेदसमापने प्रथमसन्ध्यासु तदाऽहोरात्रं प-रेयुरनध्याय इति ।

नारदीयेऽपि,

निशाद्वयं दिवा रात्रौ संक्रमे दिवसद्वयम् ।

अनध्यायं प्रकुर्वीत या च सोपपदा तिथिः ॥ इति ।

दिवा संक्रमे पूर्वोत्तरसंलग्नं निशाद्वयं, रात्रौ संक्रमे पूर्वोत्त-रवर्तिदिवसद्वयमित्यर्थः ।

अथाकालिकानध्यायाः ।

तत्र मनुः,

विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे ।

आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥

एतेषु विद्युदादिषु प्रत्येकमाकालिकं निमित्तकालादाराभ्या-परेद्युर्यावत्स एव कालस्तावदनध्याय इत्यर्थः।

गौतमोऽपि, आकालिका निर्घातभूकम्पराहुदर्शनोल्का इति।

एतच्च वर्षर्तुं विना प्रातःसन्ध्यायां निमित्तोत्पत्तौ द्रष्टव्यम्।

तथाच मनुः,

एतांस्त्वभ्युदिता विद्याद्यदा प्रादुष्कृताग्निषु।

तदा विद्यादनध्यायमनृतौ वाऽभ्रदर्शने॥ इति।

अग्निप्रादुष्करणेन प्रातःसंध्या लक्ष्यते। अनध्यायम् आ-कालिकम्।

गौतमोऽपि, स्तनयित्नुवर्षविद्युतश्च प्रादुष्कृताग्निष्विति। आकालिकमिति शेषः। प्रातःसन्ध्यायामहोरात्रमिति हारीतस्म-रणात्।

मनुः,

निर्घाते भूमिचलने ज्योतिषां चोपसर्जने।

एतानाकालिकान्विद्यादनध्यायानृतावपि॥

निर्घात आन्तरिक्षो ध्वनिः। ज्योतिषामुपसर्जनं सूर्याचन्द्र-मसोः परिवेषः, उल्कापातो वा।

याज्ञवल्क्योऽपि,

सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने।

समाप्य वेदं द्युनिशमारण्यकमधीत्य च॥ इति।

भरद्वाजोऽपि,

अग्न्युत्पाते पांसुवर्षे ग्रामेऽनध्ययनं भवेत्।

आपस्तम्बोऽपि, उल्कायामग्न्युत्पाते च सर्वासां विद्या-नामाकालिकः।

मनुः,

चौरैरुपद्रुते ग्रामे सन्त्रासे वाऽग्निकारिते ।
आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ॥ इति ।

अद्भुतेषु रक्तवृष्ट्यादिषु ।

वसिष्ठोऽपि,

दिक्पर्वतानां दाहास्वेदभङ्गप्रपातेषूल्काधिः पांसुवर्षेष्वाकालिकम् ।

अथ द्व्यहानध्यायाः ।

तत्र गौतमः, अमावास्यायामहोरात्रं द्व्यहं चेति । यदा द्व्यहे अमावास्या तदा द्व्यहमनध्यायः । अमावास्येत्यनध्यायतिथिमात्रोपलक्षणम् । उदयास्तमयाभ्यतरव्यापिन्योर्द्वयोरपि अध्ययने सम्पूर्णत्वश्रवणात् ।

तथाच स्मर्यते,

यान्तिथिं समनुप्राप्य उदयं याति भास्करः ।
यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
सा तिथिस्सकला ज्ञेया दानाध्ययनकर्मसु ॥ इति ।

एतेनाष्टम्याद्यवच्छेदेनानध्याय इति निरस्तम् ।

अथ त्रिरात्रानध्यायाः ।

तत्र याज्ञवल्क्यः,

त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ।
उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा ॥ इति ।

गुरुरत्राचार्यः । राहुदर्शने शक्रध्वजप्रपतने आचार्ये प्रमिते त्रिरात्रमिति शङ्खस्मरणात् ।

मनुरपि,

उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् । इति ।

भरद्वाजोऽपि,

अभ्युत्पाते पांसुवर्षे ग्रहेऽनध्ययनं भवेत् ।

आकालिकं त्रिरात्रं तु सविद्युत्स्तनयित्नुके ॥

मनुः,

शक्रध्वजनिपाते च उल्कापाते तथैव च ।

अनध्यायस्त्रिरात्रं तु भूमिकम्पे तथैव च ॥ इति ।

व्यासः, उल्काविद्युत्समासे त्रिरात्रमिति । समासे यौगपद्ये ।

मनुः,

प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।

त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥ इति ।

आपस्तम्बोऽपि, विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र सन्निपातो वा त्र्यहमनध्यायः ।

गौतमोऽपि, कार्त्तिकीफाल्गुन्याषाढीपौर्णमासीस्तिस्रोऽष्टकास्त्रिरात्रमिति ।

उक्तपौर्णमासीरारभ्य त्रिरात्रं, ततस्तिस्रोऽष्टकाः सप्तम्यादयः तास्वपि त्रिरात्रमनध्याय इत्यर्थः ।

पुनर्गौतमः, श्वनकुलमण्डूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्चेति ।

उपवासः प्रायश्चित्तार्थं, विप्रवासो गुरुशिष्ययोस्सहावासः । सहैकत्रस्थानमिति यावत् । सोऽपि त्रिरात्रम् । श्वगोमायुमार्जारसर्पमण्डूकनकुलमूषकाणामेतेषामध्यायानानामन्तरा गमने त्रिरात्रमुपवासस्त्र्यहं च प्रवसेदिति हारीतस्मरणात् । ततश्च त्र्यहानध्यायोऽर्थं सिद्ध एव ।

अथ मासानध्यायः ।

तत्रापस्तम्बः, श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीतेति ।

अथ षण्मासानध्यायः ।

तत्रापस्तम्बः, चण्डालश्वपाकशशकपण्डव्यवाये षण्मासमनध्ययनमिति । व्यवायेऽन्तरा गमने ।

अथ संवत्सरानध्यायः ।

तत्र स एव, यदि हस्ती संवत्सरं व्याघ्रस्तथैवचेति ।

अथ तात्कालिकानध्यायाः ।

तत्र याज्ञवल्क्यः,

श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिस्वने ।
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥
देशेऽशुचावात्मनि च विद्युत्स्तनितसम्प्लवे ।
भुक्त्वाऽऽर्द्रपाणिरम्भोऽन्तरर्धरात्रेऽतिमारुते ॥
पांशुवर्षे दिशां दाहे संध्यानीहारभीतिषु ।
धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥
खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ।
सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः ॥ इति ।

बाणः शततन्तुर्वीणा । शर इत्यन्ये । आर्त्तो दुःखितः । अन्त्यश्चण्डालः । नीहारो धूमिका । ईरिणम् ऊषरम् । एवं भेर्यादिशब्देऽपि,

तथाच गौतमः । बाणभेरीमृदङ्गगर्दशब्देष्विति । गर्द इत्यपपाठः । सांप्रदायिकस्तु गर्त्त इति पाठः । स्तुहि श्रुतं गर्तसदं युवानमिति श्रुतेः । गर्त्तः शकटम् । साम्नि पठ्यगाने ऋग्यजुषोरेवानध्यायः ।

तदाह मनुः,

सामध्वनावृग्यजुषी नाधीयीत कदाचन । इति ।

यमोऽपि,

सामशब्दे नर्ग्यजुषी मारुते चातिवायति । इति ।

अत्र हेतुमाह मनुः,

ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः ।

सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥

एवमृगादिध्वनावपि साम्नामनध्यायः । शाखान्तरे च साम्नामनध्याय इत्यापस्तम्बस्मरणात् ।

विष्णुः, न शूद्रपतितयोः समीपे न देवतायने श्मशानचतुष्पथरथ्यासु नोदकान्ते नापिहितपादो न वान्तो न विरिक्तो नाजीर्ण इति ।

मनुरपि,

नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।

वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥

येन वाससा मैथुनं कृतं तद्वासः परिधाय नाधीयीतेत्यर्थः । एतदधौतवासोविषयम् ।

तथाच मनुः,

वाससपि अनिर्णिक्ते मैथुनापतिते सति ।

मैथुनापतिते मैथुनसम्बद्धे ।

वसिष्ठोऽपि, मैथुनव्यपेतायां शय्यायां वाससाऽन्यमिथुनव्यपेतेन वा निर्णिक्तेन स्वप्रान्ते छर्दितस्येति ।

मनुः,

नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।

धर्मनैपुणकामानां पूतिगन्धे च सर्वशः ॥

धर्मनैपुणकामा अगृहीतवेदाः । गृहीतवेदानां तु ग्रामेऽप्यध्ययनमविरुद्धम् ।

तथाच वसिष्ठः, ग्रामे नगरे तु कामं गोमूत्रपर्युषितपरि-

लिखिते चेति ।

मनुरपि,

अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।

अनध्यायो रुद्यमाने समवाये जनस्य च ॥

वसिष्ठोऽपि, सन्ध्यास्वन्तःशवे दिवाकीर्त्यइति । दिवाकीर्त्यश्चण्डालः । अन्तश्चण्डाले ग्रामे नाधीयीतेत्यर्थः । एवं चतुष्पथादिष्वपि द्रष्टव्यम् ।

तथाच प्रचेताः, चतुष्पथमहापुरुषोद्यानेषु देवसमीपेऽधीयीतेति ।

गौतमोऽपि, श्मशानग्रामान्तमहापुरुषाशौचेष्विति ।

श्मशाने विशेषमाहापस्तम्बः, श्मशाने सर्वतः शम्यामासादाद् श्मशानवत् । शूद्रपतितौ समानगोचर इत्येके । शूद्राणां तु प्रेक्षणप्रतीक्षणयोर्वाऽनध्याय इति । तथा ऽश्वाद्यारूढोऽपि नाधीयीत ।

अत एव मनुः,

नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम् ।

न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥

शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ।

नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव वा ॥

न विवादे न कलहे न सेनायां न सङ्गरे ।

न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके ॥ इति ।

प्रौढपादः आसने जान्वां वाऽऽरूढपादः । अवसक्थिका कटिजान्वोर्वस्त्रादिना बन्धनम् । भोजनाचमनानन्तरं यावदार्द्रपाणिस्तावदित्यर्थः ।

उदके मध्यरात्रे च विण्मूत्रे च विसर्जयन् ।

उच्छिष्टः श्राद्धभुक्चैव मनसाऽपि न चिन्तयेत् ॥

बौधायनोऽपि, महतोऽपि जननमरणयोरनध्याय इति ।

मनुः,

पांसुवर्षे दिशां दाहे गोमायुविरुते तथा ।
श्वखरोष्ट्रे च रुवति त्रिसन्ध्यं न पठेद्विजः ॥

यमः,

आगतं चातिथिं दृष्ट्वा नाधीयीत ततः पुमान् ।
अभ्यनुज्ञापिते तस्मिन्नध्येतव्यं प्रयत्नतः ॥ इति ।

मनुरपि,

अतिथिं चाननुज्ञाप्य मारुते चातिवायति ।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ॥

गौतमः,

अभ्रदर्शने चानृताविति ।

यमः,

श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥ इति ।

मनुः,

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥

इति मनुवचनम्, तद्ब्रह्मयज्ञाध्ययनविषयम् ।

अत एव श्रुतिः । तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देश इति । एतैश्च वाक्यैर्यत्रैकनिमित्तकेऽनध्याये कालद्वयं कालत्रयं वा विहितं यथोत्सर्जने,

विरमेत्पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ।

इत्यादि, तत्र सर्वत्र शक्ताशक्ताध्येतृविषयत्वेन गुरुलघुकालानां व्यवस्था ज्ञेया ।

अथानध्यायाध्ययने दोषः ।

तत्र शङ्खलिखितौ,

छिद्रेष्वेवावतिष्ठन्ति ये केचित्पुरुषादकाः ।
तत्रस्था घ्नन्ति तद्ब्रह्म ब्राह्मणस्याल्पमेधसः ॥
तत्काले तस्य रक्षांसि श्रियं ब्रह्म यशो बलम् ।
सर्वमादाय गच्छन्ति येऽनध्यायेष्वधीयते ॥
छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकीर्त्तिताः ।
छिद्रेभ्यः स्रवति ब्रह्म ब्राह्मणेन यदर्जितम् ॥
तत्फलं तस्य रक्षांसि श्रियं ब्रह्म यशो बलम् ।
सर्वमादाय गच्छन्ति वर्जयन्तीप्सितं फलम् ॥

यमोऽपि,

आयुः प्रजां पशून्मेधां कृतमाशुकृतं च यत् ।
अनध्यायेष्वभ्यसतो ब्रह्म व्याहरतस्तथा ॥

इन्द्रनारदसंवादेऽपि,

अनध्यायेष्वधीयानान् किं शक्र न निहंसि तान् ।
असुरास्ते दुरात्मानो ब्रह्मघ्ना ब्रह्मदूषकाः ॥
अनध्यायेष्वधीतेन हुतं याति न वैदिकम् ।
मृताः स्वर्गे न गच्छन्ति किं नारद न ते हताः ॥ इति ।

अथानध्यायप्रतिप्रसवः ।

तत्र मनुः,

वेदोपाकरणे चैव स्वाध्याये चैव नैत्यके ।
न निषेधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥ इति ।

शौनकोऽपि,

नित्ययज्ञे च नाङ्गे च क्रतौ पारायणेऽपि च ।
नानध्यायोऽस्ति मन्त्राणां ग्रहणे ब्रह्मणा स्मृतः ॥

देवतार्चनमन्त्राणां नानध्यायः स्मृतस्तथा ।
नानध्याये जपेद्वेदान् गृहीतनियमादृते ॥

कूर्मपुराणे,

नैत्यके नास्त्यनध्यायः सन्ध्योपासनएवच ।
उपाकर्मणि कर्मान्तहोममन्त्रेषु चैवहि ॥
एकामृचमथैकं वा यजुः सामाथवा पुनः ।
अप्यष्टकास्वधीयीत मारुते चातिवायति ॥
नानध्यायोऽस्ति चाङ्गेषु नेतिहासपुराणयोः ।
न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत् ॥
एष धर्मस्समासेन कीर्त्तितो ब्रह्मचारिणाम् ।
ब्रह्मणा विहितः पूर्वमृषीणां भावितात्मनाम् ॥
अधीयीत सदा नित्यं ब्रह्मविद्यां समाहितः ।
सावित्रीं शतरुद्रीयं वेदान्तांश्च विशेषतः ॥
अभ्यसेत्सततं युक्तो भस्मस्नानपरायणः । इति ।

अथ प्रदोषाः ।

तत्र पुराणम्,

मेधाकामस्त्रयोदश्यां सप्तम्यां च विशेषतः ।
चतुर्थ्यां च प्रदोषेषु न स्मरेन्न च कीर्त्तयेत् ॥ इति ।

तत्परिमाणमाह प्रजापतिः,

षष्ठीं च द्वादशी चैव अर्द्धरात्रोननाडिका ।
प्रदोषे न त्वधीयीत तृतीया नवनाडिका ॥

षष्ठीद्वादश्योरर्द्धरात्रादर्वाक् घटिकैकं सप्तमीत्रयोदशीप्रवेशो प्रदोषः । तृतीयायां सार्धयामादर्वाक् चतुर्थीप्रवेशो प्रदोष इत्यर्थः ।

पक्षान्तरमाहोशना,

चतुर्थी याममात्रेण सार्द्धयामेन सप्तमी ।

त्रयोदशी चार्द्धरात्रात्प्रदोषं जनयत्यलम् ॥ इति ।

त्रयोदश्यां विशेषमाह स एव,

त्रयोदश्याम्प्रथमांश्चतुरो मुहूर्त्तान्नाधीयीतेति ।

अथोत्सर्जनम् ।

तत्र श्रावण्यामुपाकरणपक्षे पौषशुक्लप्रतिपदि पूर्वाह्णे कार्यम् । प्रौष्ठपद्यामुपाकर्मपक्षे माघशुक्लप्रतिपदि कार्यम् ।

तथाच मनुः,

पौषं तु छन्दसां कुर्याद् बहिरुत्सर्जनं द्विजः ।

माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥ इति ।

शुक्लस्य पूर्वाह्णे प्रथमेऽहनीति पौषेऽपि सम्बध्यते । साकाङ्क्षत्वात् । मासान्विप्रोऽर्धपञ्चमानिति लिङ्गाच्च । कालान्तरमप्याह याज्ञवल्क्यः,

पौषमासस्य रोहिण्यामष्टकायामथापिवा ।

जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद् बहिः ॥ इति ।

अष्टका कृष्णाष्टमी । रोहिण्यपि कृष्णपक्षगतैव । अष्टकासाहचर्यात् । तत्रोभयत्रापि पूर्वाह्ण एव । पूर्वाह्णे प्रथमेऽहनीति स्मरणात् ।

बौधायनोऽपि, श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य पौष्यां माघ्यां वोत्सृजेदिति ।

कात्यायनोऽपि,

उपाकृत्योदगयने ततोऽधीयीत धर्मवित् ।

उत्सर्गश्च तथा तिष्यतिथ्यां प्रौष्ठपदेऽपिवा ॥ इति ।

उपाकरणानन्तरम् उदगयनेऽध्ययनारम्भं कृत्वा पौषे भाद्रपदे वा पुण्ययुक्तायां तिथौ उत्सर्जनं कुर्यादित्यर्थः ।

गार्ग्योऽपि,

सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद् बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्वछन्दसाम् ॥ इति ।
अत्रैव विशेषः परिशिष्टे,
मासे प्रौष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदा ।
तदा च श्रावणे कुर्यादुत्सर्गं छन्दसां द्विजः ॥ इति ।
उक्तकालासम्भवे तूपाकर्मदिनएवोत्सर्जनं कार्यम् ।

तथा च खादिरगृह्ये,
पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवा । इति ।

स्मृतिसमुच्चयेऽपि,
उत्सर्जनं पौषमासे उपाकर्मदिनेऽथवा । इति ।
तदेतदुभयं प्रत्यब्दं कार्यम् ।
प्रत्यब्दं यदुपाकर्म सोत्सर्गं क्रियते द्विजैः ।
क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ॥ इति ।
अत्रोक्तयोस्तिथ्यर्क्षयोर्दिनद्वयव्यापित्वे परेद्युरौदयिकं ग्राह्यम् ।

तथा च निगमः,
श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्षण्मुहूर्त्तकैः ।
विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ॥ इति ।
श्रावणीप्रौष्ठपदीग्रहणं पौषीमाघ्योरप्युपलक्षणम् । उत्सर्जनोपादानात् ।

अत एव कालादर्शः,
उपाकर्मणि चोत्सर्गे पौर्णमास्यां परा तिथिः ।
षण्मुहूर्तकविद्धा स्यादिति त्रेधा निरूपितः ॥
इति पौर्णमासीमात्रमेवोपाददौ ।
छन्दोगानां विशेषमाह गोभिलः,
छन्दोगा मिलिताः कुर्युः प्रातरौत्सर्गिकीं क्रियाम् ।

अपराह्णेऽप्युपाकर्म हस्तपुष्यर्क्षयोर्द्विजाः ॥
हस्ते उपाकर्म पुष्ये उत्सर्जनमित्यर्थः ।

कार्ष्णाजिनिः,

उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च ।
ऋषीन्दर्भमयान्सप्त कृत्वा तान्पूजयेत्ततः ॥ इति ।
ग्रहसंक्रान्त्याद्यत्रापि चिन्तनीयम् ।
अनुप्तबीजे नृपतौ विनष्टे सूते मृते राष्ट्रमनाकुले च ।
उत्सर्जनोपाकरणे न कार्ये ग्रस्तेन्दुसूर्ये च गुरोस्तथाऽस्ते ॥
इति वसिष्ठस्मरणात् ।

स्मृत्यन्तरं,

नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च ।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न दोषकृत् ॥

पराशरः,

उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकम् ॥ इति ।
अथ शाखाविशेषेण तत्तत्सूत्राण्युदाह्रियन्ते ।

तत्राश्वलायनगृह्यम्,

मध्यमाष्टकायामेतदुत्सर्जनमिति । मध्यमाष्टकाग्रहणं षण्मासाभ्योपलक्षणार्थम् । तेन तस्याः समीपे माघ्यां पौर्णमास्यामित्यर्थः । शाखान्तरे चैवं दृश्यते ।

पौर्णमासी तु या माघी तस्यामुत्सर्जनं भवेत् । इति ।

आचार्योऽपि,

समाप्यपौर्णमास्यां तु छन्दांस्युत्सृज्य शास्त्रवत् । इति ।

एतदुत्सर्जनमित्यस्येयं संज्ञा । ततः षण्मासान्षडङ्गान्यधीयीत । षण्मासानधीयीतेत्यारभ्य एवमन्ता धर्मा ग्रहणाध्ययनएवैते-

के। अन्ये त्वविशेषेणाहुरिति।

अथ शाङ्खायनगृह्यं,

माघशुक्लप्रतिपदीति। अस्यार्थः। छन्दसामुत्सर्गकर्म भवतीति वाक्यशेषः! अर्द्धपञ्चमान्मासानर्द्धषष्ठान्वाऽधीयीरन्निति। कृत्वोत्सर्गकर्मेति शेषः।

अथापस्तम्बसूत्रं, तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदिति। तिष्येण पुष्येण युक्ता पौर्णमासी तैषी श्रावणीवत्। तस्यां विरमेत्। उत्सर्जनं कुर्यात्। रोहिण्यां वा। अत्र रोहिणी याज्ञवल्क्यवचनानुसारेण पौषमासस्य ग्राह्या। तैषे मासि तिष्यात्पूर्वा या रोहिणी तस्यां वा विरमेत्।

अथ हिरण्यकेशिसूत्रं, तैषीपक्षस्य रोहिण्यां पौर्णमास्यां वोत्सर्गः। तैषीपक्षस्य तैषमासपूर्वपक्षस्य रोहिण्यां पौर्णमास्यां वा समाप्य त्र्यहमेकाहं क्षम्य अध्ययनाद्विरम्य यथाध्यायं यथाऽधीत्य रोहिण्यां पौर्णमास्यां वाऽध्ययनस्योत्सर्गो भवति। माघ्यामपि पौर्णमास्यामेके विदधिरे। तदप्येतेन विकल्प्यते।

अथ बौधायनसूत्रं, पौष्यां माघ्यां वोत्सृजेदिति। श्रावण्यामुपाकर्मणि माघ्यामुत्सर्जनम् आषाढ्यामुपाकर्मणि पौष्यामिति व्यवस्था।

अथ पारस्करसूत्रं, अर्द्धषष्ठान्मासानधीत्योत्सृजेयुरर्द्धसप्तमान्वाऽप्येनामृचं जपति। पौषस्य रोहिण्यां मध्यमायामष्टकायां वाऽध्यायानुत्सृजेयुरिति।

अथ मैत्रसूत्रम्, अर्धपञ्चमान्मासानधीत्योत्सृजते। अर्धं पञ्चमस्य येषां मासानां तेऽर्धपञ्चमाः। अधीत्य ब्रह्मचारी। इतरथा अधीत ब्रूयात्। उत्सृजति कतिचिद्दिवसान्नाधीयीतेत्यर्थः, न पुनः स्वाध्यायमुत्सृजेत्। उत्तरत्रानध्ययनविधानात्। अन्यः

स्तु उत्सर्गसंज्ञं कर्म करोति तदुपरिष्टाद्वक्ष्यति । तथाचयोगीश्वरः,

पौषमासस्य रोहिण्यामष्टकायामथापिवा ।

जलान्ते छन्दसां कुर्यादुत्सर्गं छन्दसां बहिः ॥ इति ।

ततोऽर्धाष्टहे उपाकर्म ।

अथ खादिरसूत्रं, तैषीमुत्सर्ग इति । तिष्यः पुष्यस्तेन युक्ता पौर्णमासी तैषी तस्यामुत्सर्जनमिति ।

अथ गोभिलसूत्रं, तैषीमुत्सृजन्ति । तिष्यः पुष्यस्तेन संयुक्ता तिथिस्तैषी । सर्वत्राविगानेनानुष्ठानात् । ग्रन्थान्तरेऽपि । प्रौष्ठपदतिष्येण बहिरित्यादि । अन्ये त्वन्यथा वर्णयन्ति । तिष्यः पुष्यस्तेन युक्ता पौर्णमासी तैषीति । तदयुक्तम् । यदुक्तं तत आपुनरुपाकरणादिदं न व्याहरेयुरन्यत्र ब्रह्मयज्ञादिति । अनेनाष्टौ मासाननध्यायः स्यादारण्यकादीनां, तस्माद्यथोक्त एवार्थः ।

अथ कौशिकार्थर्वणसूत्रं, श्रावण्यामुक्तः पौष्यामुत्सर्ग इति ।

श्रावण्यामुक्तः उपाकर्मप्रयोगः पौष्यामुत्सर्गः छन्दसां कार्य इत्यर्थः । यद्वा पौष्यामुक्त उत्सर्गः श्रावण्यामपि भवति पौष्यामकृतश्चेत् ।

तथाच स्मृत्यन्तरे ।

उत्सर्जनं पौषमासे उपाकर्मदिनेऽथवा । इति ।

इति उत्सर्जनम् ।

अथ पुनरुपनयनम् ।

तत्राश्वलायनगृह्यम्, अनुपेतपूर्वस्याथोपेतपूर्वस्य कृताकृतं केशवपनं मेधाजननं चानिरुक्तं परिदानं कालश्च तत्सवितुर्वृणीमहइति सावित्रीमिति ।

अस्यार्थः । एतदुपनयनविधानमनुपेतपूर्वस्य उत्तरविवक्षयेदमारभ्यते । अनन्तरमुपेतपूर्वस्य विशेषं वक्ष्यामः । कृताकृतमि-

ति वर्त्तते । परिदानमनिरुक्तमिति, न भवतीत्यर्थः । कालश्च उदगयनादिर्न निरुक्तः । पूर्वस्याः सावित्र्याः स्थाने एतां सावित्रीं प्रयुञ्जीत प्रायश्चित्तत्वेन पुनरुपनयनप्राप्तौ एवं कुर्यादिति । अथोपेतपूर्वस्येत्यत्र हरदत्तस्तु अथानन्तरं वेदान्तरोपेतपूर्वो यः इमं वेदमध्येतुमिच्छति तस्योपनयने विशेषो वक्ष्यते । एवं ब्रुवन् एतत् ज्ञापयति तेन प्रकारेण प्रतिवेदमुपनयनं कर्त्तव्यमिति । अन्ये तु सकृत्कृतमुपनयनं सर्ववेदार्थमिति मन्यन्ते ।

यथाह्यापस्तम्बः, सर्वेभ्यो वै वेदेभ्यः सावित्र्यनूच्यतइति हि ब्राह्मणमिति ।

स्मृतिरूपेणाप्याहाश्वलायनाचार्यः,

अध्वर्यूणां सामगानाम ऋचमध्येतुमिच्छताम् ।
क्रिया स्यात्परिदानान्ता दीक्षादिर्न विधीयते ॥
ब्रह्मौदनं च मेधा च दीक्षा च न विधीयते ।
ऋचमध्येतुकामानां दीक्षामिच्छन्ति केचन ॥
कृत्वा क्रियास्तु दानान्ता द्विजानामन्यवेदिनाम् ।
ब्रह्मौदने व्रतानां तु सावित्र्याः स्थानइष्यते ॥
हुते मार्जनसावित्री ऋषिस्थाने व्रताभिधा ।
उत्तरायणकालादिनियतिर्न विधीयते ॥
निष्कृत्यर्थोपनयने चालङ्काराश्च सुव्रताः । इति ।

शौनकोऽपि,

यो वेदान्तरमध्येतुं तत्सूक्तविधिना ततः ।
कृतोपनयनोऽधीत्य तं वेदं सकलं द्विजः ॥
द्वितीयमिव ऋग्वेदमध्येतुमभिवाञ्छया ।
एतद्गृह्योक्तविधिना पुनरप्युपनीयते ॥
केशानां वपनं तस्य न क्रियेत क्रियेत वा ।

मेधाजननकर्मापि विज्ञेयं च कृताकृतम् ॥
कर्त्तव्यपक्षाश्रयणे मेधाजननकर्मणः ।
ब्रह्मौदनस्य होमस्य त्रिरात्रादिव्रते तथा ॥
कर्मस्य ब्रह्मादिमन्त्रेण परिदानं च नेष्यते ।
तत्रोदगयनादिश्च कालो नापेक्ष्यतेऽत्र तु ॥
तत्सवितुर्वृणीमहे वयमित्येवमादिका ।
ऋक् सावित्री परिज्ञाता यद्यदन्यत्समीरितम् ॥
अथोपनयने तत्तदलंकारविवर्जितम् ।
इहापि सर्वं कुर्वन्त्युपनीतः पुनर्भवेत् ॥ इति ।
अथ पुनरुपनयने निमित्तानि ।

तत्र मनुपराशरौ,

अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ इति ।

विष्णुरपि,विड्वराहग्रामकुक्कुटगोमांसभक्षणेषु च सर्वेष्वेतेषु द्विजातीनां प्रायश्चित्तान्ते पुनःसंस्कारं कुर्यादिति ।

शातातपस्तु,

लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनम् ।
उष्ट्रमानुषकेभाश्वरासभक्षीरभोजनात् ॥
उपानयं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः । इति ।

पैठीनसिरपि, अप्युष्ट्रीमानुषीक्षीरपाने तप्तकृच्छ्रः पुनरुपनयनमिति ।

यमोऽपि,

भूसुरो मद्यपाने च कृते गोभक्षणेऽपि वा ।
तप्तकृच्छ्रपरिक्लिष्टो मौञ्जीहोमेन शुद्ध्यति ॥ इति ।

गौतमोऽपि, अमत्या मद्यपाने तप्तकृच्छ्रस्ततोऽस्य संस्कारो

मूत्रपुरीषकुणपरेतसां प्राशने चेति ।

बौधायनोऽपि, अमत्या सुरापाने कृच्छ्राष्टपादं चरित्वा पुनरुपनयनमिति ।

स्मृत्यन्तरेऽपि,

चण्डालान्नं द्विजो भुक्त्वा सम्यक् चान्द्रायणं चरेत् ।
बुद्धिपूर्वे तु कृच्छ्राब्दं पुनः संस्कारमर्हति ॥

वसिष्ठोऽपि, एतदेव चण्डालपतितान्नभोजनेषु ततः पुनरुपनयनमिति ।

बौधायनस्तु,

सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिनः ।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ॥
हिमवत्कौशिकीं विन्ध्यां पारं पद्मस्य पश्चिमम् ।
तीर्थयात्रां विना गच्छेत् पुनः संस्कारमर्हति ॥

आदिपुराणेऽपि,

सौराष्ट्रसिन्धुसौवीरानावन्त्यं दक्षिणापथम् ।
एतान् देशान् द्विजो गत्वा पुनः संस्कारमर्हति ॥

एतच्च तीर्थयात्रां विना गमने द्रष्टव्यम् ।

तथाच तत्रैव,

अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च ।
विना यात्रां तु यो गच्छेत्पुनः संस्कारमर्हति ॥
कर्मनाशाजलस्पर्शात्करतोयाविलङ्घनात् ।
गण्डकीबाहुतरणात्पुनः संस्कारमर्हति ॥

हारीतः,

गर्दभं महिषं मेषं बलीवर्दं क्रमेलकम् ।
आरुह्य ब्राह्मणो मोहात्पुनः संस्कारमर्हति ॥

दैवज्ञवल्लभः,

प्रदोषे निश्यनध्याये मन्दे कृष्णे गलग्रहे ।

मधुं विना चोपनीतः पुनः संस्कारमर्हति ॥ इति ।

पुनः संस्कारोऽत्र पुनरुपनयनम् अजिनादिपर्युदासस्यान्यत्रासंभवात् । स च समाख्याबलेनैव कर्मविशेषेण पूर्वसंस्कारनाशे पुनः संस्काराधायको न तु शोधकः । शुद्धेः प्रायश्चित्तसाध्यत्वात् । अत एव प्रायश्चित्तान्ते पुनःसंस्कारं कुर्यादित्यादिविष्ण्वादिवाक्येषु द्वयोरपि स्वस्वकार्यप्रतिपादनमुखेनैव समाख्याभ्यां क्रमेणानुष्ठानप्रतिपादनं युक्तम् ।

यत्तु यमेन,

असुरामद्यपाने च कृते गोभक्षणेऽपि वा ।

तप्तकृच्छ्रपरिक्लिष्टो मौञ्जीहोमेन शुध्यति ॥

इति मौञ्जीहोमस्य शोधकत्वमुक्तं तद् उत्तरकालानुष्ठेयकर्माधिकाराभिप्रायेण, न तु दोषनिवृत्त्यभिप्रायेण । तस्मात्पुनरुपनयने पुनः संस्काराधायकं न तु प्रकृतदोषनिवर्त्तकमिति स्थितम् । यत्र तु जातकर्मादीत्यादिविशेषः स्मर्यते तत्र तदादीनां सर्वेषामेवानुष्ठानम् । यथा,

जीवन् यदि समागच्छेत् घृतकुम्भे निमज्ज्य तम् ।

उद्धृत्य स्थापयित्वाऽस्य जातकर्मादि कारयेत् ॥

चिरप्रोषितस्य जीवद्वार्त्ताऽनाकर्णने कृतप्रेतक्रियस्य पुनरागमनेऽयं विधिः । तथा प्रव्रज्यादिप्रत्यावृत्तस्यापि प्रायश्चित्ताचरणानन्तरं जातकर्मादिभिः संस्कारमाह

वृद्धपराशरः,

जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् । इति ।

यद्यपि सर्वैरित्यविशेषेणोक्तं तथाप्युपनयनान्तानामेवानुष्ठानं ते

षामेव नियतत्वात्, अन्यथा ब्रह्मचर्यादेव प्रव्रजेदिति विरुध्येत। किं च सर्वैरित्यविशेषोपादाने संन्यासिनोऽपि विवाहादिः प्रसज्येतेत्यनर्थान्तरापातः । तथाच जातकर्मादीत्यादिशब्देनापि तत्पर्यन्तानामेवोपसंग्रहः ।

हारीतोऽपि,

शिखां छिन्दन्ति ये मोहाद्दैवादज्ञानतोऽपिवा ।

पुनः संस्करमर्हन्ति त्रयो वर्णा द्विजातयः ॥ इति ।

तत्र विशेषमाह कश्यपः; चीर्णप्रायश्चित्तः प्राच्यामुदीच्यां वा दिशि गत्वा यत्र ग्रामपशूनां शब्दो न श्रूयते तस्मिन् देशे अग्निं प्रज्वाल्य ब्रह्मासनमास्तीर्य प्राक्प्रणीतेन विधिना पुनः संस्कारमर्हन्ति ।

पराशरोऽपि विशेषमाह,

अजिनं मेखला दण्डो भैक्षचर्या व्रतानि च ।

निवर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणः ॥ इति ।

अजिनादि वपनस्याप्युपलक्षणम् ।

तदाह विष्णुः, सर्वेष्वेतेषु द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्याद्वपनमेखलादण्डभैक्षचर्याव्रतानि पुनःसंस्कारकर्मणि वर्जनीयानीति ।

व्रतानि सौम्यप्राजापत्यादीनि महानाम्न्यादीनि वा । इति पुनरुपनयनविधिः ।

अथ नैष्ठिकधर्माः ।

तत्र याज्ञवल्क्यः,

नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ ।

तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपिवा ॥ इति ।

उक्तविधिना निधनमुत्क्रान्तिकालं नयतीति नैष्ठिकः, स आ-

चार्यसान्निधौ वसेत् । न समावर्त्तेतेत्यर्थः । तदभावे आचार्यपुत्रे वसेत् । तस्याप्यभावे आचार्यपत्न्यां वसेत् । तस्या अप्यभावे वैश्वानरे वसेत् । वैश्वानरे वासस्तु आचार्यसपिण्डाभावे वेदितव्यः ।

तदाह मनुः,

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद् व्रतमाचरेत् ॥
एतेष्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥ इति ।

स्थानासनविहारवानित्यत्र कालविशेषाश्रवणादुक्तकर्मकालातिरिक्तकाले उत्थानोपवेशनगमनवानित्यर्थः । एतदप्यनूचानब्राह्मणगुर्वादिविषयम् । अन्यथा दोषश्रवणात् ।

तदाह मनुरेव,

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् ।
ब्राह्मणे वाऽननूचाने काङ्क्षंस्तु गतिमुत्तमाम् ॥ इति ।

अत्र वसतो धर्मानाह बृहस्पतिः,

उपकुर्वाणस्य तत्सर्वं समादिष्टं मया व्रतम् ।
अधुना सम्प्रवक्ष्यामि नैष्ठिकस्य समासतः ॥
सन्ध्याऽग्निकार्यं स्वाध्यायं भैक्षाधःशयनं दमः ।
आमृत्योर्नैष्ठिकः कुर्वन् ब्रह्मलोकमवाप्नुयात् ॥ इति ।

वसिष्ठोऽपि, संयतवाक् चतुर्थषष्ठाष्टमकालभोजी भैक्ष्यस्य गुर्वधीनो जटिलः शिखाजटो वा गुरुं गच्छन्तमनुगच्छेदासीनं चेत्तिष्ठेत् शयानं चेदासीन उपासीताहूताध्यायी सर्वं लब्धं निवेद्य तदनुज्ञया भुञ्जीत खट्वाशयनदन्तप्रक्षालनाभ्यञ्जनवर्जं स्थानासनशीलस्त्रिरपोऽभ्युपेयादहनीति ।

अहनि त्रिरपोऽभ्युपेयात्त्रिषवणस्नायी स्यादित्यर्थः ।

देवलोऽपि, ब्रह्मसूत्राक्षमालादण्डकौपीनकुण्डिकामौञ्जीमेखलाधारणं सकृद्भोजनमसकृदवगाहनमुभयकालमग्निहोत्रं सन्ध्योपासनमलुप्तलोमकेशनखः स्रग्गन्धमाल्याभ्यञ्जनत्रैषालङ्कारवस्त्रोपानद्वाहनलङ्घनप्लवनधावनाध्यापनचिकित्साज्योतिषलक्षणवास्तुविद्यामङ्गलपौष्टिकशान्तिककर्मगान्धर्वसङ्गसमयबन्धलिपिलेखनकारुकर्मत्रैश्मनेवद्रव्यधान्यधनपरिच्छेदशस्त्रद्यूतव्यवहारज्ञानविलोपेतिहासपणयकुहकविडम्बनविद्योत्सवपरिदेवनरोदनपादोद्वर्त्तनवर्जनमिति ।

हारीतस्त्वग्निपरिचर्यामाह, यज्ञीयाः समिध आहृत्य संमार्जनोपलेपनोद्बोधनसमूहनसमिन्धनपर्यग्निकरणपर्युपस्थानहोमस्तोत्रनमस्कारादिभिरग्निं परिचरेन्नाग्निमधितिष्ठेन्न पद्भ्यां कर्षेन्न मुखेनोपधमेन्नापश्चाग्निं च युगपद्धारयेन्नाजीर्णे भुञ्जीत नातिथिभ्यो दद्यान्न धानाभ्यो दद्यान्नाक्रामेन्न तिष्ठेदहरहर्हविर्द्धानविशेषैराग्नेयैरहरहराग्निमिन्धेदामन्त्र्य गच्छेदाहृत्य निवेदयेदिति ।

एवंविधाचरणे फलमाह मनुः,

आसमाप्तेः शरीरस्य यस्तु शुश्रूषयेद्गुरुम् ।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः शाश्वतं पदम् ॥

याज्ञवल्क्योऽपि,

अनेन विधिना देहं साधयन् विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥ इति ।

यमोऽपि,

आनिपाताच्छरीरस्य ये चरन्त्यूर्ध्वरेतसः ।
ते यान्ति ब्रह्मणः स्थानं जायन्ते न पुनर्भवे ॥

हारीतोऽपि, मृत्योः परस्तादमृता भवन्ति ये ब्राह्मणा ब-

ब्रह्मचर्यं चरन्तीति।

श्रुतिरपि, तद्रूप नैकविषयं सर्वएते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेतीति।

सर्वएते चत्वारोऽप्याश्रमिणः कर्म कुर्वाणाः पुण्यलोका भवन्ति यः पुनरेषां मध्ये ब्रह्मसंस्थो ब्रह्मनिष्ठः सोऽमृतत्वं पुनरनावृत्तिलक्षणमेतीति। इदं च नैष्ठिकत्वं पङ्ग्वादीनां नियतमित्याह संग्रहकारः,

पङ्ग्वादीनामनंशत्वादसामर्थ्याच्च शास्त्रतः।
नियतं नैष्ठिकत्वं स्यात्कर्मस्वनधिकारतः॥ इति।

कर्मसु विवाहादिषु।

विष्णुरपि,

कुब्जवामनजात्यन्धक्लीबपङ्ग्वार्त्तरोगिणाम्।
व्रतचर्या भवेत्तेषां यावज्जीवमनंशतः॥ इति।

अनंशतोऽशाभावादित्यर्थः। नचैवं पङ्ग्वाद्यतिरिक्तानां नैष्ठिकत्वं न स्यादिति शङ्कनीयम्। इतरेषामपि पाक्षिकत्वेन तद्विधानात्।

तथाच मनुः,

यदि त्वात्यन्तिको वासो रोचेतास्य गुरोः कुले।
युक्तः परिचरेदेनमाशरीरविमोक्षणात्॥ इति।

अस्मै अपङ्ग्वादिकाय। नचैवं यावज्जीवाग्निहोत्रादिविरोधः। द्विविधो ब्रह्मचार्युपकुर्वाणो नैष्ठिकश्चेति हारीतप्रतिपादितोपकुर्वाणविषयत्वेन तत्सम्भवात्। उपकुर्वाणो गार्हस्थ्याभिकामः।

तथाच जाबालश्रुतिः, गृही वनं प्रविशेद्यदि गृहमेव कामयेत्तदा यावज्जीवमग्निहोत्रं जुहुयादिति। युक्तं चैतत्। अन्यथा "यमिच्छेत्तमावसेद्यदि वेतरथा तदा ब्रह्मचर्यादेव प्रव्रजेत्"

इत्यादयोऽपि श्रुतयो बाध्येरन् । नच श्रौतेन यावज्जीवाग्निहोत्रेण स्मार्तस्य नैष्ठिकत्वस्य बाधः । तस्यापि ब्रह्मचार्याचार्यकुलवासी अत्यन्तमात्मानमाचार्यकुलेऽवसादयेदित्येतत्प्रत्यक्षश्रुतिमूलत्वेन तुल्यबलत्वात् । नच ब्रह्मचारिद्वैविध्ये चत्वार आश्रमा इत्यापस्तम्बवचनविरोधः । नित्याग्निहोत्रे इन्द्रियफलकस्य दध्न इव ब्रह्मलोकफलकस्य सङ्कल्परूपगुणस्याश्रमभेदकत्वाभावात् । यद्वाऽवान्तरभेदस्य न प्रधानभेदकत्वम् । यथा गार्हस्थ्यस्य शालीनयायावरादिभेदस्य ।

अत एव दक्षः,

द्वितीयो नैष्ठिकश्चैव तस्मिन्नेवाश्रमे स्थितः ।

इति तच्छब्दपरामर्शेनाश्रमाभेदं गमयति । तथाचोपकुर्वाणकनैष्ठिकयोर्धर्माणां समानविधिविधेयतां दर्शयति

गौतमः, तत्रोक्तं ब्रह्मचारिण इति ।

तत्रोपकुर्वाणकधर्मविधिभिरेव ब्रह्मचारिणो नैष्ठिकस्यापि कर्तव्यमुक्तमित्यर्थः ।

अथ ब्रह्मचारिणो व्रतलोपे विशेषप्रायश्चित्तानि ।

तत्र शातातपः,

ब्रह्मचारी तु योऽश्नीयान्मधु मांसं तथैवच ।
प्राजापत्यं चरेत्कृच्छ्रं मौञ्जीहोमेन शुध्यति ॥
भिक्षाशनमकृत्वा यः स्वस्थे ह्येकान्नमश्नुते ।
अस्नात्वा चैव यो भुङ्क्ते गायत्र्यष्टशतं जपेत् ॥
सूतकान्नं नवश्राद्धं मासिकान्नं तथैवच ।
ब्रह्मचारी तु योऽश्नीयात्त्रिरात्रेणैव शुद्ध्यति ॥

अङ्गिरोभावेऽपि,

एकोद्दिष्टे ब्रह्मचारी प्रजपेद् घुभिरक्तुभिः ।

पादं भुङ्क्ते लक्षसंख्या मुच्यते किल्बिषात्ततः ॥

लक्षसंख्यया इत्यस्मिन्नर्थे लक्षसंख्या इत्युक्तं छान्दसो वि-
भक्तिलोपः। पादम् ऋचश्चतुर्थांशम्।

अरिष्टेभिर्जपेत्पादं षोडशे भोजयेद्यदि।

षोडशे षोडशश्राद्धे।

पञ्चायुतं ब्रह्मचारी जले वा कल्मषं वहिः।
तच्चोमित्रो जपेत्पादं वृषोत्सर्गे च भोजयन् ॥
शिवालये ब्रह्मचारी अयुतं चेन्न दुष्कृतम्।
भग्नओजिष्ठपादं च न्यूने भुङ्क्ते जले तदा ॥
अयुतं चेद्ब्रह्मचारी तदा पापात्प्रमुच्यते।
अदितिं प्रजपेत्पादं सापिण्ड्ये भोजयेद्यदा ॥
अयुतं चेद्ब्रह्मचारी नरकान्मुच्यते तदा।
धर्मासमन्तान्मन्त्रं च शतवारं यदा तदा ॥
व्रतलोपे ब्रह्मचारी भुक्तिकाले न किल्बिषम्। इति।

वृद्धयमोऽपि,

मासिकादिषु योऽश्नीयादसमाप्तव्रतो द्विजः।
त्रिरात्रमुपवासोऽत्र प्रायश्चित्तं विधीयते ॥
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति। इति।

इदं चाकामतो भोजने द्रष्टव्यम्।

कामतस्तु स एवाह,

मधु मांसं च योऽश्नीयाच्छ्राद्धं सूतकमेव वा।
प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत् ॥ इति।

ब्रह्मचारिणोऽनृतभाषणे प्रायश्चित्तमाह
गर्गः,

त्रिरात्रमेकरात्रं वा ब्रह्मचार्यनृते चरेत्। इति।

अनृते अनृतभाषणे । उपवासं चरेदिति । त्रिरात्रैकरात्रयो-स्तु कामाकामाभ्यां व्यवस्था द्रष्टव्या । ब्रह्मचारिणः स्त्रीसङ्गे अवकीर्णित्वमाह

याज्ञवल्क्यः,

अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम् । इति ।

अवकीर्णी भवेत् क्षतव्रतो भवेत् । अवकीर्णी क्षतव्रत इति त्रिकाण्डीस्मरणात् । तत्प्रायश्चित्तमाह

मनुः,

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे ।
स्थालीपाकविधानेन यजेत्तं निर्ऋतिं निशि ॥ इति ।

याज्ञवल्क्योऽपि,

गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति । इति ।

शातातपोऽपि,

ब्रह्मचारी तु यो गच्छेत्स्त्रियं कामेन पीडितः ।
प्राजापत्यं चरेत्कृच्छ्रमब्दमेकमतन्द्रितः ॥
निर्वपेच्च पुरोडाशं ब्रह्मचारी तु पर्वणि ।
मन्त्रैः शाकलहोमीयैरग्नावाज्यं च हावयेत् ॥ इति ।

मैथुनस्याष्टविधत्वात्तद्वर्जनरूपस्य ब्रह्मचर्यस्याष्टविधत्वमाह

दक्षः,

ब्रह्मचर्यं सदा रक्षेदष्टधा वारणं पृथक् ।
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥
विपरीतं ब्रह्मचर्यं ब्रह्मा प्राह प्रजापतिः । इति ।
न ध्यातव्यं न वक्तव्यं न श्रोतव्यं कदाचन ॥

एतैः सर्वैः सुनिष्पत्तौ यतिर्भवति नाऽन्यथा । इति ।

शुना दष्टस्य ब्रह्मचारिणः प्रायश्चित्तमाह

पराशरः,

ब्रह्मचारी शुना दष्टस्त्र्यहं सायं पयः पिबेत् ।
गृहस्थस्तु द्विरात्रं चाप्येकाहं नाऽग्निहोत्रवान् ॥
नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् ।
स्यादेतत्त्रिगुणं वक्त्रे मस्तके च चतुर्गुणम् ॥ इति ।

बौधायनः, अत्र शौचाचमनसन्ध्यावन्दनदर्भभिक्षाऽग्निकार्यराहित्यशूद्रादिस्पर्शनकौपीनकटिसूत्रयज्ञोपवीतमेखलादण्डाजिनादित्यागदिवास्वापच्छत्रधारणपादुकाऽध्यारोहणवनमालाधारणोद्वर्तनानुलेपनाञ्जनजलक्रीडाद्यूतनृत्तगीतवाद्याद्यभिरतिपाषण्डादिसम्भाषणब्रह्मचारिव्रतलोपादिसकलदोषपरिहारार्थं ब्रह्मचारी कृच्छ्रत्रयं चरेत् । महाव्याहृतिहोमं च कुर्यात् । प्रथमं व्यस्तसमस्ताभिर्व्याहृतिभिश्चतस्र आज्याहुतीर्हुत्वा ॐभूरग्नये च पृथिव्यै च महते च स्वाहा ॐभुवो वायवे चान्तरिक्षाय महते च स्वाहा ॐसुवरादित्याय च दिवे च महते च स्वाहा ॐभूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा ॐपाहि नो अग्न एनसे स्वाहा ॐपाहि नो अग्ने विश्ववेदसे स्वाहा ॐयज्ञं पाहि विभावसो स्वाहा ॐसर्वं पाहि शतक्रतो स्वाहा ॐपुनरूर्जा निवर्तस्व पुनरग्न इषायुषा पुनर्नः पाह्यंहसः स्वाहा सहरय्या निवर्तस्वाग्ने पिन्वस्व धारया विश्वप्स्निया विश्वतस्परि स्वाहा ॥ पुनर्व्याहृतिभिर्हुत्वेदिति ।

एतच्चाल्पे निमित्ते । निमित्तबाहुल्ये प्रायश्चित्तान्तरमाह

शौनकः,

तंत्रोक्तिया जपेन्मन्त्रं लक्षं चैत्रे शिवालये ।

ब्रह्मचारिणो धर्मं च शून्यं चेत्पूर्णमेवाह ॥ इति ।

एतत्प्रायश्चित्तजातं नैष्ठिकस्य द्विगुणमित्याह

हारीतः,

उपकुर्वंस्तु यत्कुर्यात्कामतोऽकामतोऽपिवा ।

तदेतद्द्विगुणं कुर्याद्ब्रह्मचारी तु नैष्ठिकः ॥ इति ।

यत्तु,

आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ।

प्रायश्चित्तं न तस्यास्ति येन शुद्धो भवेत्तु सः ॥

इति शातातपीयं वचनं तदेकगुणप्रायश्चित्तनिन्दया द्विगुणप्रायश्चित्तस्यार्थवादपरं, न सर्वात्मना प्रायश्चित्तनिषेधकम् । द्विगुणप्रायश्चित्तविधिविरोधादित्यलं बहुना ।

इति ब्रह्मचारिणो विशेषप्रायश्चित्तानि । साधारणानि तु प्रायश्चित्तप्रकाशे वक्ष्यन्ते ।

अथ ब्रह्मचर्यकालावधिः ।

तत्र बौधायनः, अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् । षट्त्रिंशत् चतुर्विंशतिर्द्वादश वा प्रतिवेदमिति ।

अस्यार्थः । वेदान्वेदौ वेदं वा प्रतीति प्रतिवेदम् । तथाच

वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।

इत्येतद्वैकल्पिकपक्षाश्रयणेन यदा चतुरो वेदानधीते तदा प्रतिवेदं द्वादशाब्दानीति न्यायेनाष्टाचत्वारिंशद्वर्षाणि ब्रह्मचर्यं भवति । यदा त्रीन् तदा षट्त्रिंशत् । यदा द्वौ तदा चतुर्विंशतिः । यदा त्वेकं तदा द्वादशेति व्याख्येयं, न तु वेदं वेदं प्रतीति शङ्कनीयम् । तथा सत्येकस्मिन् वेदेऽष्टाचत्वारिंशद्वर्षाणीत्येवं न्यायेन चतुर्षु वेदेषु द्विनवत्युत्तरं शतं वर्षाणि ब्रह्मचर्यमापद्येत । तच्चासम्भवि । शतायुष्ट्वविरोधात् ।

अत एव देवलः, अतः परमष्टाचत्वारिंशद्वार्षिकीं वेदचर्यामधितिष्ठेदशक्तश्चेत्षट्त्रिंशद्वार्षिकीं चतुर्विंशतिवार्षिकीं द्वादशवार्षिकीं वेति ।

अशक्तश्चतुर्वेदाध्ययनाशक्तः । एवमुत्तरत्रापि व्याख्येयम् । एतच्चाचार्यकुले सता कार्यम् ।

तथाचापस्तम्बः, एतस्याचार्यकुले ब्रह्मचारिणोऽष्टाचत्वारिंशत्पादोनमर्द्धोनं त्रिभिर्वेति ।

पादोनं षट्त्रिंशद्वर्षाणि । अर्द्धोनं चतुर्विंशतिवर्षाणि । त्रिपादोनं द्वादशवर्षाणीत्यर्थः ।

यमोऽपि,

वसेद् द्वादशवर्षाणि चतुर्विंशतिमेव वा ।
षट्त्रिंशतं वा वर्षाणि प्रतिवेदं व्रतं चरेत् ॥ इति ।

अत्र प्रतिवेदशब्दः पूर्ववद्व्याख्येयः । अत्राध्ययशक्तस्य पक्षान्तरमाह

मनुः,

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥

अस्यार्थः । वेदत्रयाध्ययनपक्षे षट्त्रिंशदाब्दिकं ब्रह्मचर्यं कार्यम् । वेदद्वयाध्ययनपक्षे आर्द्धिकम् । अष्टाचत्वारिंशदाब्दिकस्यार्द्धं, चतुर्विंशतिवार्षिकमिति यावत् । पूर्वोक्तानेकवाक्यैकवाक्यत्वात् । एवं पादिकमपि व्याख्येयम् । षट्त्रिंशदाब्दिकस्यार्द्धपादविवक्षायां अष्टादशाब्दं नवाब्दं च ब्रह्मचर्यमापद्येत । नच तत्कस्यापि स्मृत्या संवदति । एतेनाधिकपदे प्रतिवेदं षट्षड् वर्षाणि पादिकपदे प्रतिवेदं त्रीणित्रीणि वर्षाणि ब्रह्मचर्यं चरेदिति चन्द्रिकाद्युपस्कृतमपि परास्तम् ।

याज्ञवल्क्योऽपि,

प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा ।
ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे ॥ इति ।

अथाश्वलायनानां महानाम्न्यादिव्रतानि ।

तत्राश्वलायनः, एतेन वापनादिपरिदानान्तं व्रतादेशनं व्याख्यातमिति ।

अस्यार्थः । व्रतादेशनं यस्मादेभिर्व्याख्यातं संवत्सरावमं चारयित्वा व्रतमनुयुज्येत संवत्सरमादिशेदिति च तत्राप्येतेन प्रकारेण वापनादिपरिदानान्तं कर्म कार्यम् । वापनादिग्रहणमलङ्कारनिवृत्त्यर्थम् । काय त्वा परिददामीत्येतत्परिदानान्तम् । परिदानान्तवचनमुपरितनतन्त्रनिवृत्त्यर्थम् । एषां नामानि क्रमं चाह स्मृतिरूपेण स एव,

प्रथमं स्यान्महानाम्नी द्वितीयं स्यान्महाव्रतम् ।
तृतीयं स्यादुपनिषद् गोदानाख्यं ततः परम् ॥
क्रिया व्रतानां कार्याः स्युर्यथाप्रोक्तं मया द्विजैः ॥ इति ।

तत्र तात्कालिकतिथ्यादिनिर्णयमाह नृसिंहः,

तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणम् ।
चौलवत्सर्वमाख्यातं सगोदानव्रतेषु च ॥
व्रतानां चरणं त्वेवं कृत्वा स्नानं समाचरेत् ।
द्विजानां व्रतबन्धस्तु स्वाध्यायेषु प्रशस्यते ॥
रिक्ताविष्टिविवर्ज्येषु महानाम्न्यः क्रमेण च ।
चूडाकर्मवदेतत्स्याद् व्रतबन्धस्य कालकम् ॥ इति ।

महानाम्निकामित्यनेन महाव्रतोपनिषद्गोदानव्रतानि गृह्यन्त इति ।

आश्वलायनीयं श्रौतसूत्रमपि, एतद्विदं ब्रह्मचारिणमनिराकृतिनं संवत्सरावमं चारयित्वा व्रतमनुयुज्यानुक्रोशिते प्रय-

षाड्डत्तरमहर्महानाम्नीरग्र उदगयने पूर्वपक्षे श्रोष्यन्नहिर्ग्रामात्स्थालीपाकं तिलमिश्रं श्रपयित्वेति ।

स्मृतिरूपेणाप्याह स एव,

सर्वत्र वपनं शस्तं तद्व्रतेषूपनीतिवत् ।
वापनादि प्रदानान्तं कृत्वा कर्म व्रतेषु तु ॥
तद्व्रतं वर्षमात्रं च चरस्वेति विनिर्दिशेत् ।
चरिष्यामीति शिष्यस्तु व्रतनाम्ना वदेद्गुरुम् ॥ इति ।

शौनकोऽपि,

अथोदगयने शुक्लपक्षे शोभनतारके ।
वेदव्रतानि चत्वारि विदधीत यथाविधि ॥
तेषामाद्यं महानाम्नीश्रवणं तदनन्तरम् ।
महाव्रतं ततः पश्चाद्भवेदुपनिषद्व्रतम् ॥
ततो गोदानमित्येवं कार्याण्येतान्यनुक्रमात् ।
तत्रादितो महानाम्नीश्रवणे विधिरुच्यते ॥
तत्र प्रथममाचार्यः शिष्याय व्रतमादिशेत् ।
कर्मोपनयने प्रोक्तं यत्पूर्वं वापनादिकम् ॥
परिदानान्तमेतत्तु व्रतादेशनमीरितम् ।
तस्य व्रतस्यानुष्ठानं पूर्णं वत्सरमादिशेत् ॥
ततः संवत्सरे पूर्णे सम्प्राप्ते चोत्तरायणे ।
पूर्वपक्षे प्रशस्ते च नक्षत्रेऽशे गुरोर्मुखात् ।
ऋचः श्रोष्यन्महानाम्नीर्ग्रामान्निष्क्रम्य शोभने ।
इत्यादि विशदं प्रयोगे वक्ष्यते ।

अथ गोदानव्रतम् ।

तत्राश्वलायनः, एतेन गोदानं षोडशे वर्षे केशशब्दे तु श्मश्रुशब्दान्कारयेदिहश्मश्रूणि होन्दन्ति शुन्ध शिरोमुखं मा म

आयुः प्रमोषीरिति केशश्मश्रुलोमनखान्युदक्संस्थानि कुर्वीति संप्रेष्यत्याप्लुत्य वाग्यतः स्थित्वाऽहःशेषमाचार्यसकाशे वाचं विसृजेत वरं ददामीति गोमिथुनं दक्षिणा संवत्सरमादिशेदिति ।

अस्यार्थः । एतेन गोदानं, व्याख्यातमिति शेषः । एतेनेति कृत्स्नोपदेशः । तत्र विशेषमाह, षोडशे वर्षइति । तृतीयस्यापवादः । अत्र मातुरुपस्थउपवेशनं न भवेत् । अबालत्वात् । केशशब्द इति जातावेकवचनम् । श्मश्रुशब्दानिति व्यक्तिपरो निर्देशः । ते त्रयः श्मश्रुशब्दाः "तत्र अदितिः केशान्वपतु" "वप्ता वपसि केशादीन्" "दक्षिणे केशपक्षा" इति त्रिषु ते कार्याः । मन्त्रगतस्य तृतीयस्य केशशब्दस्याभावाद्विधिगतस्य ग्रहणम् । तेन दक्षिणे श्मश्रुपक्षे इति साधितं भवति । श्मश्रूणीति शिरोमुण्डनस्यापवादः । उन्दन्ति क्लेदयन्ति । शुन्धीति । क्षुरनिमार्जनेऽयं विशेषः । केशेति शीतोष्णाभिरद्भिरवर्थ कुर्वाणोऽक्षण्वन्कुशलीकुरु केशश्मश्रुलोमनखान्युदक्संस्थानि कुर्वीति नापितशासनम् । आप्लुत्य स्नात्वेत्यर्थः । वाग्यत इत्यमन्त्रयन् । स्थित्वेति उपवेशनप्रतिषेधः । एवमहःशेषं स्थित्वा अस्तमिते आचार्यसमीपे वरं ददामीति वाचं विसृजेत् । वरद्रव्यमाह, गोमिथुनं दक्षिणा । ननु भिक्षुरयं कथं गोमिथुनसंभवः । उच्यते । यथाऽस्य प्रावरणादिसंभवस्तथैतस्यापि । एवं गोदानं कृत्वा संवत्सरं व्रतमादिशति वक्ष्यमाणेन विधिना । रात्रौ व्रतातिदेशनानुपपत्तेरपरेद्युः कार्यमिति ।

शौनकोऽपि,

गोदानं नाम यत्प्रोक्तं चतुर्थं व्रतमस्य तु ।
महानाम्न्यादिभिः सार्धं पौर्वापर्यं तु विद्यते ॥
अबालत्वाज्ञानन्यङ्क्ते नियमोऽस्यस्य नेष्यते ।
केशशब्दोक्तिदेशेषु श्मश्रुशब्दमुदीरयेत् ॥

श्मश्रूणामेव सेकोऽत्र न केशानामितीरितम् ।
केशान्वपत्वित्यत्रापि श्मश्रूणीति समीरयेत् ॥
केशपक्षे तु कर्त्तव्ये श्मश्रुपक्षे तदा चरेत् ।
क्षुराभिमर्शने मन्त्रे यत्क्षुरेणादिकेष्वपि ॥
श्मश्रूणि शुन्धीत्युक्त्वाऽथ शिरोमुखमुदीरयेत् ।
यः शीतोष्णाभिरित्यादिमन्त्रो नापितशासनः ॥
तत्र केशश्मश्रुलोमनखानीति पदात्परम् ।
उदक्संस्थानि कुशलीकुर्वित्येवमुदीरयेत् ॥
ततः स्नाते समीपस्थे तस्मिन्स्विष्टकृदादिकम् ।
उपरिष्टात्तनं तन्त्रमाचार्यस्तु समापयेत् ॥
शिष्यः स्नात्वा ततो वाचं नियम्यादिवसक्षयात् ।
तिष्ठेदस्तमिते सूर्ये गुरोरन्तिकमागतः ॥
वरं ददामीत्युक्त्वाऽथ गोवृषौ गुरवे दिशेत् ।
असंभवे गोवृषयोर्भिक्षित्वा वा गुरोर्दिशेत् ॥
उच्चरेद्गुरुरस्यास्य वत्सरं व्रतमादिशेत् ।
सर्वासु व्रतचर्यासु प्रसिद्धं केशधारणम् ॥ इति ।
एषां चाकरणे प्रायश्चित्तमाह शौनकः,
व्रतानि विधिवत्कृत्वा स्वशाखाऽध्ययनं चरेत् ।
अकृत्वाऽभ्यस्यते येन स पापी विधिघातकः ॥
प्रत्येकं कृच्छ्रमेकैकं चरित्वाऽऽज्याहुतीः शतम् ।
हुत्वा चैव तु गायत्र्या स्नायादित्याह शौनकः ॥
व्यासोऽपि,
वेदव्रतानि कृत्वैवं तथैवारण्यकव्रतम् ।
स्वशाखाविहितं सर्वं कृत्वा वेदमुपक्रमेत् ॥
अकृत्वैतानि सर्वाणि वेदो ऽभ्यस्यते यदि ।

प्रायश्चित्तानि कृत्वैव व्रतान्यपि तथा क्रमात् ॥
गोदानिकं ततः कृत्वा समावर्तनमाचरेत् । इति ।

तत्प्रायश्चित्तस्वरूपमाह देवलः,

कालातिक्रमणे कुर्यात्प्रायश्चित्तं विधानतः ।
कृच्छ्रं द्वादशरात्रं तु हुत्वा चाज्याहुतीः शतम् ॥
अष्टाविंशतिमष्टौ वा क्रमात्कुर्याद्व्रतानि हि ।
व्यत्यये यावदभ्यस्तं वेदं तावत्पुनः पठेत् ॥ इति ।

अथाश्रमसमुच्चयविकल्पौ ।

तत्र मनुः,

चतुर्थमायुषो भागमुषित्वाऽऽद्यं गुरौ द्विजः ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥
वनेषु च विहृत्यैवं तृतीयं भागमायुषः ।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गं परिव्रजेत् ॥ इति * ।

हारीतोऽपि,

अनेन विधिना यो हि आश्रमानुपसेवते ।
स सर्वकामान्निर्जित्य ब्रह्मभूयाय कल्पते ॥

आपस्तम्बोऽपि,

चत्वार आश्रमाः गृहस्थस्याचार्यकुले मौनं वानप्रस्थमिति तेषु यथोपदेशं सम्यग्वर्त्तमानः क्षेमं गच्छतीति ।

जाबालिरपि, ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेदिति ।

वसिष्ठः,चत्वार आश्रमाः ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राज

---

* एतदनन्तरम् "शतायुष्पुरुषाभिप्रायमेतत् । अन्यत्र यथासंभवं द्रष्टव्यम् आश्रमसमुच्चयस्त्वावश्यक एव इत्याधिकः पाठः पुस्तकान्तरे ।

कास्तेषां वेदमधीत्य वेदान्वा अविशीर्णब्रह्मचर्यो यमिच्छेत्तमाव-सेदिति ।

जाबालिरपि, अथवा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वनाद्वेति ।

भविष्यपुराणेऽपि,

गार्हस्थ्यमिच्छन् भूपाल कुर्याद्दारपरिग्रहम् ।

ब्रह्मचर्येण वा कालं नयेत्संकल्पपूर्वकम् ॥

वैखानसो वापि भवेत्परिव्राडथवा भवेत् ।

गौतमोऽपि, तस्याश्रमविकल्पमेके ब्रुवत इति ।

उशनाऽपि,

आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम् ।

आविमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि ॥

एतच्च नैष्ठिकाभिप्रायम् । केचित्तु गार्हस्थ्यस्यैव प्राधान्यमाहुः ।

तथाच गौतमः, ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येति ।

तुशब्दो विशेषवाची । सर्वेषु वेदशास्त्रेतिहासपुराणेषु गृहस्थधर्मा एवाग्निहोत्रादयः प्राचुर्येण विधीयन्ते । ततस्सर्व एवाचार्या गार्हस्थ्यस्यैकाश्रम्यं प्राधान्यं मन्यन्ते । तत्राशक्तानामितराश्रमधर्मा विधीयन्ते । प्रत्यक्षविधानादितराश्रमाणां प्रत्यक्षेणोपजीव्यत्वादिति ।

तथाच मनुः,

चतुर्णामपि चैतेषां वेदस्मृतिविधानतः ।

गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ॥

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।

तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥ इति ।

वसिष्ठोऽपि,

गृहस्थ एव यजते गृहस्थस्तपते तपः ।
चतुर्णामाश्रमाणां तु गृहस्थस्तु विशिष्यते ॥ इति ।
अनाश्रमित्वनिषेधमाह दक्षः,
अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः ॥
जपे होमे तथा दाने स्वाध्याये वा ततः सदा ।
नासौ फलमवाप्नोति कुर्वाणोऽप्याश्रमाच्च्युतः ॥
त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते ।
प्रातिलोम्येन यो याति न तस्मात्पापकृत्तमः ॥
यो गृहाश्रममास्थाय ब्रह्मचारी भवेत्पुनः ।
न यतिर्न वनस्थश्च सर्वाश्रमविवर्जितः ॥ इति ।
हारीतोऽपि,
अनाश्रमी व्यपेतश्च आश्रमी च निरर्थकः ।
मिथ्याश्रमी च सर्वे वै निरयं यान्ति मानवाः ॥ इति ।
अयं चाश्रमसमुच्चयो ब्राह्मणस्यैव ।
तथाच मनुः,
एष वो विहितो धर्मो ब्राह्मणस्य चतुर्विधः । इति ।
अन्ये तु त्रयाणमपि वर्णानामाहुः । अत एव काठकगृह्यम्,
त्रयाणां वर्णानां चत्वार आश्रमा इति ।

अथ समावर्त्तनम् ।

तत्र समावर्त्तनं नाम वेदाध्ययनानन्तरं गुरुकुलात्स्वगृहागमनम् । तथाच

कूर्मपुराणं,
वेदं वेदौ तथा वेदान्वेदान्वा चतुरो द्विजः ।
अधीत्य चाधिगम्यार्थं ततः स्नायाद् द्विजोत्तमः ॥ इति ।

अर्थम् अधीतानां वेदानाम् ।

तथाच स्मृत्यन्तरं, वेदमधीत्य छन्दोविषयार्थान्बुध्वा स्नायादिति ।

लघुव्यासोऽपि,

ऋचं पादमधीत्यातो न्यायतस्तु तदर्थवित् ।
सम्यग् व्रतानि संसेव्य समावर्त्तनमर्हति ॥ इति ।

न्यायतो गुरुमुखापेक्षाद्युक्तन्यायेनेत्यर्थः । इदं च समावर्त्तनं गुरोर्दक्षिणादानपूर्वकं कर्त्तव्यम् ।

तथाचाश्वलायनः,

चरित्वा चतुरो वेदांस्त्रीन्द्वौ चैकमथापि वा ।
तोषयेद्दक्षिणाभिस्तु गुरुं भक्त्या विचक्षणः ॥
धनं पित्रादिबन्धुभ्यस्समाहृत्याथवा परात् ।
राजन्यो वा गुरुं सम्यक्तोषयेत्स्नातको व्रती ॥ इति ।

शौनकोऽपि,

अधीत्य वेदशास्त्राणि कृत्वा वेदव्रतानि च ।
चत्वारि गुरवे दत्वा यथाशक्ति च दक्षिणाम् ॥
ततस्तेनाभ्यनुज्ञातः समावर्त्तनमाचरेत् । इति ।

तत्र च वेदव्रतयोस्समाप्तिरुत्तमः पक्षः । अन्यतरसमाप्तिर्मध्यमः ।

तथाच याज्ञवल्क्यः,

गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया ।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥ इति ।

तदेतत्स्पष्टमाह हारीतः, त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति ।

दक्षिणास्वरूपमाह मनुः,

क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमन्ततः ।

धान्यवासांसि शाकं वा गुरवे प्रीतिमाहरेत् ॥ इति ।

अनेन सत्यां शक्तौ गुर्वभिलषितमेव देयमित्युक्तं भवति । गुरवे तु वरं दत्त्वेति योगिस्मरणात् । वरमभिलषितम् । तदसम्भवे गौर्वा । गौर्वा वर इति श्रुतेः ।

व्यासस्मृतिरपि,

गुरुशुश्रूषया विद्यां समाप्य विधिवद्द्विजः ।

स्नायीत गुर्वनुज्ञातो दत्त्वाऽस्मै दक्षिणां हि गाम् ॥ इति । गोर्वरत्वं मात्राहीनत्वात् । गोस्तु मात्रा न विद्यतइति श्रुतेः । अत एव

लघुहारीतः,

एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।

पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा त्वनृणी भवेत् ॥ इति ।

छन्दोगश्रुतिरपि, यद्यप्यस्माइलामद्भिः परिगृहीतां धनेन पूर्णां दद्यादेतदेव ततो भूय इति ।

तापनीयश्रुतिरपि,

सप्तद्वीपवती भूमिर्दक्षिणार्थं न कल्पते । इति ।

एतच्च दक्षिणादानं न केवलं स्नानार्थमेवापित्वाश्रमान्तरपरिग्रहार्थमपीति द्रष्टव्यम् ।

तथाच नरसिंहपुराणं,

गुरवे दक्षिणां दत्वा स यमिच्छेत्तमावसेत् ।

विरक्तः प्रव्रजेद्विद्वान्सरागस्तु गृहे वसेत् ॥ इति । दक्षिणादानासमर्थस्तु तदनुज्ञामात्रेणैव स्नायात् ।

तथाच गौतमः, विद्यान्ते गुरुमर्थेन निमन्त्र्य कृतानुज्ञानस्य वा स्नानमिति ।

आश्वलायनोऽपि,

विद्यान्ते गुरुमर्थेन निमन्त्र्य कृतानुज्ञानस्य वा स्नानमिति ।

विद्यान्ते इत्यनेन पूर्वं दक्षिणादाननिषेधं गमयति ।

तथाच मनुः,

न पूर्वं गुरवे किञ्चिदुपकुर्वीत धर्मवित् ।

स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ॥ इति ।

इदं च समावर्त्तनं विवाहार्थमेव, नाश्रमान्तरपरिग्रहार्थमपि ।

गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाक्रमम् ।

उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥

इति मनुना समावर्त्तनस्य विवाहकर्तृद्विजविशेषणत्वेनाभिधानात् । नच तदाश्रमान्तरकर्तृविशेषणत्वेन श्रूयते, समावृत्तो वनं प्रविशेत् समावृत्तः संन्यसेदिति वा । प्रत्युत ब्रह्मचर्यादेव प्रव्रजेदित्यत्र ब्रह्मचर्यस्यैवापादानत्वं श्रूयते । नच तत्समावर्त्तने सति घटते । तस्मिन्सति तस्यैवाभावात् । अत एव ब्रह्मचर्यं परिसमाप्य गृही भवेदिति समावर्त्तनरूपब्रह्मचर्यपरिसमापनं गृहाश्रमायैव श्रूयते नान्यत्र । यदपि

गुरवे दक्षिणां दत्त्वा स यमिच्छेत्तमाश्रमेत् ।

इति नरसिंहपुराणे संन्यासाद्यर्थमपि ब्रह्मचारिणो गुरवे दक्षिणादानं विहितं, तन्न विरुद्धम् । दक्षिणादानस्य समावर्त्तनाङ्गत्वेन समावर्त्तनरूपत्वाभावात् । एकस्योभयाङ्गत्वे बाधकाभावाच्चेत्यलं विस्तरेण ।

अथ समावर्त्तनसम्भाराः ।

तत्राश्वलायनः, अथैतान्युपकल्पयीत समावर्त्स्यमानो मणिकुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्रगुन्मर्दनमनुलेपनमञ्जनमुष्णीषमित्यात्मने चाचार्याय च । यद्युभयोर्न विन्देताचार्यायैव-

ति । उपकल्पयीतेति शब्दोऽयं छान्दसः । समावर्त्स्यमानः समावर्त्तनं नाम संस्कारः तेन संस्क्रियमाण इत्यर्थः । अहते वाससी आच्छाद्येत्याद्युत्तरत्र विनियोगादेवोपकल्पने सिद्धे उपकल्पनवचनमात्मने चाचार्याय चैतान्येकादश द्रव्याण्युपकल्पयेदिति विधानार्थम् । यद्युभयोर्न लभेत्तदाऽऽचार्यायैव केवलायोपकल्पयेदिति ।

स्मृतिरूपेणाप्याह स एव,

आत्मने गुरवे च स्यादलाभे गुरवेऽपिवा ।
मण्याद्युष्णीषपर्यन्तद्रव्याणामुपकल्पनम् ॥ इति ।

शौनकोऽपि,

स समावर्त्स्यमानस्तु पूर्वमेवोपकल्पयेत् ।
मण्याद्युष्णीषपर्यन्तान्सम्भारान्सकलानपि ॥
गोदानेनातिदिष्टत्वात्कर्मणोऽस्योत्तरायणम् ।
पूर्वपक्षादियोगं च प्रतीक्ष्य ह्येतदाचरेत् ॥ इति ।

अथात्र कालनिर्णयः ।

तत्र नारदः,

अथोत्तरायणे जीवशुक्रयोर्दृश्यमानयोः ।
द्विजातीनां गुरोर्गेहान्निवृत्तानां यतात्मनाम् ॥ इति ।

वसिष्ठोऽपि,

सौम्यायने निर्मलयोस्सुरेज्यदैत्येज्ययोर्व्योम्नि वलक्षपक्षे ।
संत्यज्य रिक्तामवमाष्टमीं च वैनाशिकाद्याखिलऋक्षवृन्दम् ॥

इति ।

अत्रोभयोर्वाक्ययोः समावर्त्तनमण्डनं समावर्त्तनमिष्टमुक्तामित्येताभ्यां वाक्यशेषाभ्यामन्वयो बोद्धव्यः ।

अथ तिथयः ।

तत्र देवरामः,

विच्छिद्रासु विरिक्तासु तिथिषु स्नानमाचरेत् । इति ।

नारदोऽपि,

प्रतिपत्पर्व्वरिक्तामामष्टमीं च दिनक्षयम् ।

हित्वाऽन्यदिवसे कार्यं समावर्त्तनमण्डनम् ॥ इति ।

अथ वाराः ।

तत्र देवरातः,

सौम्यानामंशवारेषु शुभाः शेषेषु वर्जिताः । इति । क्रिया इति शेषः ।

अथ नक्षत्राणि ।

तत्र नृसिंहः,

त्रीण्युत्तराणि मैत्रेन्दुरोहिण्यादित्यपुष्यभाः ।

हस्तश्रवणपौष्णाश्च स्नानकर्मणि पूजिताः ॥ इति ।

वसिष्ठोऽपि,

आदित्यसौम्यसावित्रं मैत्रतिष्योत्तरात्रयम् ।

पौष्णश्रवणरोहिण्यः श्रेष्ठाः स्युः स्नानकर्मणि ॥ इति ।

आदित्यः पुनर्व्वसुः । सौम्यं मृगशिरः । सावित्रं हस्तः । मैत्रम् अनुराधा ।

नारदोऽपि,

मित्रोत्तरादितीज्यान्त्यहरीन्दुरविधातृषु ।

भेष्वर्केन्दुज्ञार्यशुक्रवारलग्नांशकेषु च ॥

अथवा बीजनक्षत्रवारलग्नांशकेष्वपि । इति ।

वसिष्ठोऽपि,

करादिपञ्चस्वादितिद्वयाश्विविष्णुत्रयध्युत्तरधातृभेषु ।

सपौष्णचान्द्रेषु शुभग्रहस्य वारे समावर्त्तनमिष्टमुक्तम् ॥

योगाश्च निषिद्धेतराः ज्ञातव्याः ।

अथ राशयः।

तत्र देवरातः,

नक्रगोयमकन्याश्च तौलिमीनौ सुपूजिताः।

शुभयुक्तं यदि स्यात्तु शेषेषु स्नानमाचरेत्॥ इति।

अथ ग्रहसंस्थानम्।

तत्र स एव,

आयारिभ्रातृगाः पापाः शुभाः केन्द्रत्रिकोणगाः।

अशुभाश्च शुभाश्चैव अष्टमे वर्जिताः सदा॥ इति।

राजमार्त्तण्डस्तु चौलोक्तमेवास्यापि कालमाह,

क्षुरकर्मणि यादिष्टं यदिष्टफलदायकं दिनाद्यं तु।

तन्मेखलाविमोक्षे भवति हितार्थं द्विजातीनाम्॥ इति।

दुर्गादित्यः,

दिनकरविप्लुतमूर्त्तिषु सुरगुरुदितिपुत्रमन्त्रिचन्द्रेषु।

कुर्यान्न व्रतबन्धं तथैव गोदानमपि न कार्यम्॥ इति।

सुरेश्वरः,

भौमभानुजयोर्वारे नक्षत्रे च यथोदिते।

ताराचन्द्रविशुद्धौ च स्यात्समावर्त्तनक्रिया॥

अत्र भौमभानुजयोर्ग्रहणं विवाहोपस्थित्यादिना वारान्तरासंभवे द्रष्टव्यम्।

दीपिकायामपि,

तृतीयलाभारिगतैरसौम्यैः केन्द्रत्रिकोणोपगतैश्च सौम्यैः।

सौरोदितर्क्षादिविलग्नयोगे मौञ्जीविमोक्षः शुभदो द्विजानाम्॥ इति।

अथ स्नातकधर्माः।

तत्राश्वलायनः, तस्यैतानि व्रतानि भवन्ति न नक्तं स्नायान्न नग्नः स्नायान्न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनाद्वर्षति न धा-

येन वृक्षमारोहेन्न कूपमवरोहेन्न बाहुभ्यां नदीं तरेन्न संशयमभ्यापद्येतेति ।

शौनकोऽपि,

न स्नायान्नक्तमित्याद्यं विहितं स्नातकव्रतम् ।

तत्तत्सङ्कल्पपूर्वं तु विधिना स समाचरेत् ॥ इति ।

याज्ञवल्क्योऽपि,

श्रुतिस्मृत्युदितं सम्यङ्नित्यमाचारमाचरेत् । इति ।

पारस्करः, स्नातकस्य यमान्वक्ष्यामः । कामादितरो नृत्यगीतवादित्राणि न कुर्यात् । न गच्छेत् । कामं तु गीतं गायति चैव गीते वा रमत इत्यपरे । क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेदिति ।

स्नातकस्य ब्रह्मचर्यात्समावृत्तस्य यमान् व्रतानि वक्ष्यामः । कामत इच्छया नृत्यगीतवादित्राणि न कुर्यात् । न गच्छेत, द्रष्टुमिति शेषः । इतरो ब्रह्मचारी । सोऽपि न कुर्यात न गच्छेदित्येव । इच्छया गायेत शृणुयात । यथाऽश्वमेधे दिवा ब्राह्मणो गायतीति यजमानं श्रावयति चेति गाने श्रवणे चाधिकारः, एवमन्यत्रापि यत्र विशेषविधिरस्ति तत्रैवाधिकारो नान्यत्रेत्यर्थः । क्षेमे सति नक्तं ग्रामान्तरं न गच्छेत् । क्षेमे आपदभावे सति । न च धावेत् । क्षेमे सतीत्यनुषङ्गः । तथा उदपानावेक्षणवृक्षारोहणफलप्रचयनसन्धिसर्प्पणविवृतस्नानविषमलङ्घनशुक्तवदनसन्ध्यादित्यप्रेक्षणमाभीक्ष्ण्येन न कुर्यात । उदपानं कूपादि । वृक्षाग्रोपरिगमनेन फलप्रचयनं फलग्रहणम् । सन्धिसर्प्पणं सन्धिभूमिगमनम् । अथवा सन्ध्यायामपमार्गेण गमनम् । विवृते वर्त्मादौ स्नानम् । विषमं गर्त्तादि । शुक्तमश्लीलम् । तद्विधं लज्जाकरं दुःखकरम् अमङ्गलसूचकं च । अभीक्ष्णं वारंवारम् आदित्यमण्डलं न पश्येदित्यर्थः । तथा न हवै स्नात्वा भिक्षेत अपिह

वै स्नात्वा भिक्षां जपतीतिश्रुतेः। नैर्ऋत्यपात्रो व्रजेदयं मे वज्रः पाप्मानमपहनत्विति। अप्स्वात्मानं नावेक्षेत। अजातलोम्नीं विपुंसीं षण्ढं च नोपहसेन्न च गच्छेद् गर्भिणीं विजन्येति ब्रूयात्सकुलमिति नकुलं भगालमिति कपालं मणिधनुरितीन्द्रधनुर्गां धयन्तीं परस्मै नाचक्षीतोर्वरायामनन्तर्हितायां च भूमावुत्सर्पस्तिष्ठन्न मूत्रपुरीषे कुर्यात्स्वयं शीर्णेन काष्ठेन लोष्ठेन प्रमृजीत गुदं विकृतं वासो नाच्छादयीत दृढव्रतो वधत्रः स्यात्सर्वत आत्मानं गोपायेत्सर्वेषां मित्रमिव वधात्पापात्त्रायत इति वधत्रः। इत्यादिव्रतलोपे एकरात्रं त्रिरात्रं वा व्रतं चरेत्।

बृहस्पतिः,

सख्यं समेधकैः कुर्यादुपेयादीश्वरं सदा।
वैरं निर्हेतुकं वादं न कुर्यात्केनचित्सह॥

वसिष्ठः,

आहारनिर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्याः।
वाग्बुद्धिकार्याणि तपस्तथैव धनायुषी गुप्ततमे तु कार्ये॥ इति।

आहारो भोजनम्। निर्हारो मूत्रपुरीषोत्सर्गः। विहारः स्त्रीसङ्गः। योगः समाधिः। सुसंवृताः गुप्ताः। वाग्गुप्तिः आलापादिपरिवर्जनेन। बुद्धिगुप्तिः अशुभसंकल्पादिपरिवर्जनेन।

विष्णुपुराणे,

विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः।
विवाहश्च विवादश्च तुल्यरूपैर्नृपेष्यते॥
नारभेत कलिं प्राज्ञः शुष्कवैरं च वर्जयेत्।
अप्यल्पहानिः सोढव्या वैरेणार्थागमं त्यजेत्॥
जीवेति क्षुवतो ब्रूयाज्जीवेत्युक्तः सहेतिच।

मनुः,

भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् ।
शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ॥ इति ।

पैठीनसिः,

अनिन्द्या ब्राह्मणा गावः काञ्चनं सलिलं स्त्रियः ।
पृथिवी च षडेतानि यो निन्दति स निन्दितः ॥

मार्कण्डेयः,

वेद एव द्विजातीनां साधुः सत्यं तपस्विनाम् ।
गुरोः पतिव्रतायाश्च तथा यज्ञतपस्विनाम् ॥
परिवादं न कुर्वीत परिहासे ऽपि पुत्रक ।
कुर्वतामविनीतानां श्रोतव्यं न कथंचन ॥

हारीतः,

विवादं वर्जयेद्विप्रे सर्वेषां चैव सूचनम् ।
परिभोगं यथोक्तेषु मत्सरं पुत्रशिष्ययोः ॥ इति ।

याज्ञवल्क्योऽपि,

मातृपित्रतिथिभ्रातृजामिसम्बन्धिमातुलैः ।
वृद्धबालातुराचार्यवैद्यसंश्रितबान्धवैः ॥
ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः ।
विवादं वर्जयित्वा तु सर्वान् लोकान् जयेद् गृही ॥

मनुरपि,

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ।
वृद्धबालातुरैर्वैद्यैर्ज्ञातिसम्बन्धिबान्धवैः ॥
मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ।
दुहित्रा वा स्ववर्गेण विवादं न समाचरेत् ॥
एतान् विवादान् सन्त्यज्य सर्वपापैः प्रमुच्यते ।
एतैर्जितश्च जयति सर्वान् लोकानिमान् गृही ॥ ति ।

एतैस्सह विवादवर्जने कारणमाह स एव,

आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ।
अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः ॥
जामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः ।
सम्बन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ ॥
आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः ।
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्विका तनुः ॥
छाया स्वा दासवर्गस्तु दुहिता कृपणः परः ।
तस्मादेतैरधिक्षिप्तस्सहेतासंज्वरस्सदा ॥ इति ।

पैठीनसिः,

मत्तप्रमत्तोन्मत्तैस्सह सम्भाषं न कुर्वीत न परस्त्रियं रहसि सम्भाषेत ।

मत्तो मदनीयद्रव्येण, प्रमत्तो ग्रहावेशादिना, उन्मत्तो वातादिना ।

सांख्यायनगृह्ये, सूतिकोदक्याभ्यां न संवदेत ।

गौतमः, न म्लेच्छाशुच्यधार्मिकैस्सह सम्भाषेत, सम्भाष्य पुण्यकृतो मनसा ध्यायेत् ब्राह्मणेन सह सम्भाषेत ।

यमः,

तिथिं पक्षस्य न ब्रूयान्नक्षत्राणि न निर्दिशेत् । इति ।

महाभारते,

सम्पन्नं भोजने ब्रूयात् पानीये तर्पणं तथा ।
सुशृतं पायसे ब्रूयाद्यवाग्वां कृसरे तथा ॥
महात्मनां च गुह्यानि न वक्तव्यानि कर्हिचित् ।
त्वङ्कारं नामधेयं च ज्येष्ठानां परिवर्जयेत् ॥
अवराणां समानानामुभयेषां न दुष्यति ।

नारदोऽपि,

गुरोर्ज्येष्ठकलत्रस्य भ्रातुर्ज्येष्ठस्य वाऽऽत्मनः।
आयुष्कामो न गृह्णीयान्नामातिकृपणस्य च ॥ इति।

कूर्मपुराणं त्वन्यानपि स्नातकधर्मानाह,

यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्।
छत्रं चोष्णीषममलं पादुके चाप्युपानहौ ॥
रौक्मे च कुण्डले वेदं क्लृप्तकेशनखः शुचिः।
स्वाध्याये नित्ययुक्तः स्याद् बहिर्माल्यं न धारयेत् ॥
शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः।
न जीर्णमलवद्वासा भवेत्तु विभवे सति ॥
न रक्तमुल्वणं चान्यधृतं वासो न कुण्डिकाम्। इति।

कुण्डिका कटिसूत्रम्।

बौधायनोऽपि, स्नातकोऽन्तर्वासा उत्तरीयं वैणवं दण्डं धारयेत्सोदकं च कमण्डलुं द्वे यज्ञोपवीते उष्णीषमजिनोत्तरीयोपानहौ छत्रं चेति।

वसिष्ठः, नावृतो यज्ञं गच्छेद्यदि गच्छेत्प्रदक्षिणं पुनराव्रजेदिति।

नावृतोऽनिमन्त्रितः।

द्वौ विप्रौ विप्रवह्नी च दम्पत्योः स्वामिनोस्तथा।
अन्तरेण न गन्तव्यं हरस्य वृषभस्य च ॥ इति।

पैठीनसिरपि, न गोब्राह्मणाग्न्यन्तरे व्यवधेयादनुज्ञाप्य वा व्रजेदिति।

अथानाक्रमणीयानि।

तत्र मनुः,

देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा।

नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च ॥

बभ्रुः कपिलः।

याज्ञवल्क्योऽपि,

देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः।

नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्त्तनानिच ॥ इति।

विष्णुपुराणे,

पूज्यदेवध्वजज्योतिश्छायां नातिक्रमेद् बुधः।

देवीपुराणे,

न चैव गोः प्रसूताया विश्वसेत्स्त्रीजनस्य च।

न मुखेन धमेदग्निं न खट्वां लङ्घयेत्तथा ॥ इति।

याज्ञवल्क्यः,

पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत। इति।

यमः,

स्वां तु नाक्रामयेच्छायां क्लीबेन पतितेन वा।

चण्डालेन द्विषद्भिश्च नित्यं रोगान्वितेन च ॥ इति।

अथानधिष्ठेयानि।

तत्र मनुः,

मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम्।

सन्ध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ॥

उद्वर्त्तनमपस्नानं विण्मूत्रं रक्तमेवच।

श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः ॥

वैरिणं नोपसेवेत सहायं नैव वैरिणः।

अधार्मिकं तस्करं च परस्यैव च योषितम् ॥

उद्वर्त्तनं विलेपनम्।

अपस्नानं स्नानादधः पतितं जलम्। निष्ठ्यूतम् उद्गीर्णं

पूत्कारादि ।

विष्णुः, न चतुष्पथमधितिष्ठेत् न रात्रौ वृक्षमूलं शून्यालयं न तृणं न बन्धनागारम् ।

तृणं तृणकूटः । आसनार्थे तु न निषेधः ।

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।

एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥

इति मनुना आसनत्वेन तस्य विधानात् ।

शङ्खलिखितौ, नोद्धतकुहकैः सहैकत्र तिष्ठेत् ।

उद्धतोऽविनीतः । कुहकः वशीकरणादिनिष्ठः ।

हारीतः, आवपनापमार्जनापस्नानतुषभस्मास्थिकपालसंचयं नाधितिष्ठेदिति ।

आवपनं गोपादिभाण्डम् । अपमार्जनं संमार्जनी । कपालसंचयः खर्परसमूहः ।

याज्ञवल्क्यः,

विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरम् ।

केशभस्मतुषाङ्गारकपालेषु च संस्थितिम् ॥ इति ।

विरुद्धम् आर्याचारविरुद्धम् ।

तथाच मार्कण्डेयः,

म्लेच्छभाषा न वक्तव्या म्लेच्छवेषं न कारयेत् ।

नासंवृतमुखः कुर्याद्धास्यं जृम्भां तथैवच ॥

पानीयस्य क्रिया नक्तं न कार्या भूतिमिच्छता ।

शूर्पवातं नखाग्राम्बुस्नानवस्त्रघटोदकम् ।

मार्जनीरेणुकेशाम्बु हन्ति पुण्यं पुरा कृतम् ॥ इति ।

क्रिया स्नानाहरणादिः । घटोदकं स्नानघटावशिष्टम् ।

शातातपोऽपि,

अजाश्वरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते ।

श्वकाकोष्ट्रखरोलूकशूकरग्राम्यपक्षिणाम् ॥ इति ।

वसिष्ठः, नेष्टकाभिः फलानि शातयेदिति ।

विष्णुः,

न संहताभ्यां पाणिभ्यां शिर उदरं च कण्डूयेदिति ।

अथानीक्षणीयानि ।

तत्र मनुः,

नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।

नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥ इति ।

विष्णुरपि, नोद्यन्तमादित्यमीक्षेत नास्तं यान्तं नोपरक्तं न वाससा तिरोहितं नचादर्शजलाद्युपगतं न मध्येऽह्नि ।

याज्ञवल्क्यः,

नेक्षेतार्कं न नग्नां स्त्रीं नच संसृष्टमैथुनाम् ।

नच मूत्रं पुरीषं वा नाशुची राहुतारकाः ॥ इति ।

विष्णुः, न क्रुद्धस्य गुरोर्मुखं न तैलोदकयोः स्वां छायां मलवत्यादर्शे, न पत्नीं भोजनसमये, न स्त्रियं नग्नां, न किञ्चन गुह्यमानां, न बालां, न भ्रष्टं कुञ्जरं, न वा विषमस्थो वृषादियुद्धं, नोन्मत्तं न मत्तमिति ।

मनुः,

नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीम् ।

क्षुवतीं जृम्भमाणां च न चासीनां यथासुखम् ॥

नाञ्जयन्तीं स्वके नेत्रे नचाभ्यक्तामनावृताम् ।

न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तमः ॥ इति ।

मार्कण्डेयपुराणे,

देवतापितृसच्छास्त्रयज्ञमन्त्रादिनिन्दकैः ।

कृत्वा स्पर्शनमालापं शुध्येतार्कावलोकनात् ॥
अवलोक्य तथोदक्यामन्त्यजं पतितं शठम् ।
विधर्मिसूतिकाषण्ढविवस्त्रान्त्यावसायिनः ॥
मृतनिर्यातकांश्चैव परदाररतांस्तथा ।
एतदेव हि कर्तव्यं प्राज्ञैः शोधनमात्मनः ॥

स्कान्दे,

कृतघ्नं मानवं दृष्ट्वा नरकेष्वपि कुत्सितम् ।
शुद्ध्यर्थं देवि द्रष्टव्यास्सोमानलदिवाकराः ॥ इति ।

सोमादीनां यथासंभवो विकल्पः । अत्र चार्कावलोकनस्य प्रायश्चित्तविधानादेतेषामप्यनवलोकनीयत्वं सिध्यति । एवमन्येऽपि स्नातकधर्माः स्मृत्यन्तरेषु द्रष्टव्याः, विस्तरभयान्नोल्लिख्यन्ते । एषां च स्नातकधर्माणां गृहस्थादिसाधारणत्वमवगन्तव्यम् । स्नानादारभ्य प्रवृत्तत्वात् ।

अथैषां लोपे प्रायश्चित्तम् ।

तत्र मनुः,

वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे तु प्रायश्चित्तमभोजनम् ॥ इति ।

एतच्च स्नातकव्रतानुष्ठानं ब्राह्मणक्षत्रिययोरेव । गौतमेन पूर्वाध्याये प्रक्रान्तौ ब्राह्मणक्षत्रियौ उत्तराध्याये तच्छब्देन परामृश्य स्नातकव्रताभिधानात् ।

स्नातकव्रतलोपे तु प्रायश्चित्तं विधीयते ।
राजब्राह्मणयोरेव नेतरेषां कथञ्चन ॥
इति स्मृत्यन्तराच्चेति हरदत्तः ।

अन्ये तु मन्वादिस्मृतिषु त्रैवर्णिकोपक्रमात् त्रिष्वपीत्याहुः ।

अथ क्षत्रियस्य कच्छबन्धः ।

तत्र दीपिका,

श्रीण्युत्तराण्यदितिपौष्णमघाधनिष्ठा
पुष्याश्विनी हिमकरादपि पञ्च भानि ।
एतानि कच्छविधिबन्धनसंमतानि
सौम्यग्रहस्य दिवसे च सिते च पक्षे ॥

अथ छुरिकाबन्धनम् ।

तत्र नारदः,

छुरिकाबन्धनं वक्ष्ये नृपाणां प्राक्करग्रहात् ।
विवाहोक्तेषु मासेषु शुक्लपक्षेऽप्यनस्तगे ॥
जीवे शुक्रे च भूपुत्रे चन्द्रताराबलान्विते ।
मौञ्जीबन्धनऋक्षेषु कुजवर्जितवासरे ॥
व्रतलग्नोदये कर्तुरष्टमोदयवर्जिते ।
धनत्रिकोणगैः सौम्यैः पापैर्भत्ररिपुत्रिगैः ॥
छुरिकाबन्धनं कार्यमर्चयित्वाऽमरान्पितॄन् ।
अर्चयेच्छुरिकां सम्यक् देवतानां च सन्निधौ ॥
व्रतलग्ने च बध्नीयात्कट्यां लक्षणसंयुताम् । इति ।

इति छुरिकाबन्धः ॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजित-
चरणकमल
श्रीमन्महाराजाधिराजप्रतापरुद्रतनूज
श्रीमन्महाराजमधुकरसाहसूनु
श्रीमन्महाराजाधिराजचतुरुदधिवलयवसुन्धराहृदयपुण्डरीक-
विकासदिनकर
श्रीवीरसिंहाबोजित

श्रीहंसपण्डितात्मज

श्रीपरशुराममिश्रसूनुसकलविद्यापारावारपारीणजगद्दारिद्र्यम-

हागजपारीन्द्रविद्वज्जनजीवातु

श्रीमन्मित्रमिश्रकृते श्रीवीरमित्रोदयनिबन्धे संस्कारप्रकाशे उपनयनप्रकरणं समाप्तम् ।

अथ विवाहप्रकरणम् ॥

तत्र विवाहशब्दो वह प्रापणे इत्यस्माद्धातोर्भावे घञि कृते वहनं वाहः विशिष्टो वाहो विवाह इति व्युत्पत्त्या निष्पद्यते । वैशिष्ट्यं च प्रतिग्रहाद्यष्टविधोपायान्यतमोपायेन स्वीकृतायां होमादिसप्तपदीनयनान्तकर्मभिस्संस्कृतत्वम् । तथाच विवाहपदार्थो द्विरूपः सिध्यति, स्वत्वोत्पादनं संस्काराधानं चेति । तदेतत्स्पष्टीकृतं

पारस्करेण, पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामतीत्युपक्रम्य प्रदक्षिणमग्निं पर्याणीयैके इत्यादिनाऽऽचार्याय वरं ददातीत्यन्तेन सूत्रेण । आदाय प्रतिगृह्य । गृहीत्वा हस्ते धृत्वा ।

परिशिष्टेऽपि,

गान्धर्वासुरपैशाचा विवाहा राक्षसाश्च ये ।
पूर्वं परिणयस्तेषां पश्चाद्धोमो विधीयते ॥ इति ।

परिणयः स्वीकरणम् । एवं च स्वीकृताऽप्यसंस्कृता संस्कृताऽप्यस्वीकृता वा न भार्या भवतीति निश्चीयते । विशिष्टस्य विवाहपदार्थत्वात् । तमेवार्थं स्पष्टयति

वसिष्ठः,

बलादपहृता कन्या यदि मन्त्रैर्न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥ इति ।

अपहारोऽत्र प्रतिग्रहादिसप्तविधस्वत्वोपायानामुपलक्षणम् ।

पूर्वदलार्थं स्पष्टयति यमः,

नोदकेन विना चार्यं कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥ इति ।

उदकम् उदकपूर्वकं दानम् । अलङ्कृत्य कन्यामुदकपूर्वां दद्यादित्याश्वलायनस्मरणात् । एतेन ब्राह्मादिपक्षके नित्यवदानश्रव-

पादासुरादित्रये

गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु ।

इति नारदेन पाक्षिकदानविधानाच्च दानमपि तृतीयं दलं सिध्यति । वस्तुतस्तु उदकपदं स्वीकारपरम् । अतश्च दलद्वयमेव विवाहपदार्थः । अन्यथा दानस्यापि तत्त्वे आसुरादिष्वव्याप्तिः । ततश्चानुत्पादितस्वत्वायाः कन्यायाः पाणिग्रहणसंस्कारात् पतिः स्वामी स्वत्ववांश्च । सप्तमे पदे पतित्वं पतिसंस्कारश्च न । ततश्च स्वीकृतायामेव संस्कारोत्पत्तिरित्यर्थः । नन्वत्र भार्यात्वं सप्तमे पदे इति वक्तव्यम् । उद्वहेत द्विजो भार्यामित्यत्र द्वितीयया भार्याया एव संस्कार्यत्वाभिधानात् । न तु पत्युः । तस्य द्विज इति प्रथमया संस्कारकर्तृत्वप्रतीत्यैकस्य कर्तृकर्मभावविरोधेन संस्कार्यत्वायोगाच्चेति चेत् । मैवम् । पतित्वस्य उद्वाहविधिभाव्यभार्यात्वनान्तरीयकत्वेन तद्बोधकपतित्वशब्दोपादानेऽपि बाधकाभावात् । ननु पतित्वं भार्यात्वानुनिष्पादीति न वक्तव्यम् । विन्देत सदृशं पतिमित्यादिस्वविधिप्रयुक्तत्वात् । यथोद्वाहेन वरो भार्यां कुर्यादिति विध्यर्थः तथा कन्याऽप्युद्वाहेन वरं कुर्यादिति विध्यर्थस्तुल्य एव । तस्माच्चानुनिष्पादि पतित्वमिति चेत् । सत्यम् । अस्ति विधिः, परं तु नोद्वाहविषयः । उद्वाहस्य मन्त्रसाध्यत्वात् । स्त्रीणां चामन्त्रत्वात् । नच प्रधानविधिबलादेव मन्त्रकल्पनम् । प्रधानविधेरेव वराभ्युपगममात्रविषयत्वेनोद्वाहविषयत्वाभावात् । नचाभ्युपगमो विवाहं लक्षयिष्यति । विधौ लक्षणानङ्गीकारात् । किंच । दातृभावे ऋतुदर्शनादिनिमित्तकोऽयं विधिः न सर्वकालं कन्याकर्तृकतां पतित्वस्य गमयितुमीष्टे । तस्मात्सिद्धं भार्यात्वानुनिष्पादि पतित्वमिति । वस्तुतस्तु शाखान्तरे नाम्ना मन्त्राभिधानाद्विनिगमनाविरहेण च पतित्वस्यैव

भार्यात्वानुनिष्पादकत्वे प्रमाणाभावादुभयथाविधिदर्शनाच्चोभयमपि उद्वाहभाव्यम् । अतश्च पतित्वं सप्तम पदे इति युक्तमेवोक्तमिति । नचैवं कर्तृकर्मविरोधः । एकस्मिन् वाक्ये उभयोरनुपादानेन शाब्दबोधे तस्याभावात् । वास्तवस्य च कर्तृकर्मभावस्य यजेत स्वर्गकाम इत्यत्र स्वर्गकामे गुणप्रधानभावस्येवाविरोधः । तच्च यथोक्तविधिना सप्तमपदप्रापणात्सिध्यति ।

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥

इति मनुस्मरणात् । यद्वा कन्यायाः पितृगोत्राद्यथोक्तविधिना भर्तृगोत्रप्रापणं विवाहः । तदपि सप्तमपदप्रापणेनैव ।

स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ।

इति स्मरणात् । इदं च शाखान्तरविषयम् । आश्वलायनानां तु त्रिरात्रादिव्रतान्ते पितृगोत्रनिवृत्त्या भर्तृगोत्रप्राप्तिर्भवतीति वेदितव्यम् । अत ऊर्ध्वमक्षारालवणाशिनावित्युपक्रम्य त्रिरात्रं द्वादशरात्रं संवत्सरं वैकोऋषिर्जायतइत्याश्वलायनस्मरणात् । नियमान्ते एकऋषिकत्वः संपद्यते । पितृगोत्रं विहाय सा पतिगोत्रं भजतइत्यर्थ इति वृत्तिकृद्व्याख्यानाच्च । उद्वाहशब्देऽप्ययमेवार्थः । यद्यपि परिणयनशब्दे परिणीयपरिणीयाश्मानमारोहयतीत्यादिसूत्रस्था अग्निप्रदक्षिणीकरणमेवार्थः प्रतीयते तथाप्यङ्गशब्दोऽव्यभिचरिताङ्गसंबन्धिप्रधानमेवाभिधत्ते । यथा वसन्तेवसन्ते ज्योतिषा यजेतेत्यत्र ज्योतिःशब्दो ज्योतिष्टोमम् । एवं पाणिग्रहणादिशब्देऽप्युन्नेयम् । तथाचैते शब्दाः यौगिकन्यायेन कर्मनामधेयानि भवन्ति । स च विवाहः पुरुषार्थतया पुरुषं प्रति विधीयते ।

यथाऽऽह मनुः,

गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि ।

उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥ इति ।

अत्र द्विजोपादानम् उक्तविशेषणविशिष्टस्यैव तस्य उद्वाहाधिकारप्रतिपादनार्थम् । न पुनर्द्विजमात्रस्य तदधिकारप्रतिपादनार्थम् । उपनीतस्यासमावृत्तस्य तदधिकारापत्तेः । नापि परिसंख्यार्थम् । शूद्रादीनामविवाहापत्तेः । तस्मात्कर्तृविशेषविशिष्टकर्मविधिरयमभ्युपगन्तव्यः । भार्यामिति भाविसंस्कारनिमित्ता संज्ञा । यूपं तक्षतीत्यादिवत् । ततश्चोद्वाहेन भार्यां कुर्यादित्यर्थः संपद्यते । भार्यादिशब्दस्य संस्कारनिमित्तत्वात् । सवर्णामिति मुख्यत्वप्रतिपादनार्थम् । नासवर्णपरिसंख्यार्थम् । तदुद्वाहस्याप्यभ्यनुज्ञानात् ।

याज्ञवल्क्योऽपि,

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । इति ।

अविप्लुतब्रह्मचर्य इति विशेषणं ब्रह्मचर्यस्खलने कृतप्रायश्चित्तस्यैव विवाहाधिकार इति बोधयितुम् । अन्यथा ऽनधिकारिणा कृतेनापि विवाहेन भार्यात्वानुत्पत्तेः ।

व्यासोऽपि,

स्नात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम् । इति ।

दक्षोऽपि,

वेदानधीत्य यत्नेन पाठतो ज्ञानतस्तथा ।
समावर्त्तनपूर्वं तु लक्षण्यां स्त्रियमुद्वहेत् ॥ इति ।

अथ उद्वाहस्य कुलपरीक्षापूर्वकत्वात्कुलपरीक्षा तावन्निरूप्यते ।

तत्राश्वलायनः, कुलमग्रे परीक्षेत ये मातृतः पितृतश्चेति यथोक्तं पुरस्तादिति ।

अत्राग्रइति वचनं समस्तेषु वधूवरगुणेषु कुलस्य प्राधान्यं बोधयितुम् ।

तथाच विष्णुः,

ब्राह्मणस्य कुलं ग्राह्यं न वेदाः सपदक्रमाः ।
कन्यादाने तथा श्राद्धे न विद्या तत्र कारणम् ॥ इति ।

ये मातृतः पञ्चभिः पुरुषैः पितृतश्च पञ्चभिः पुरुषैः प्रसिद्धाः विद्याचारादिसंपन्नास्तेषां कुलं ग्राह्यमिति शेषः । यथोक्तं पुरस्तात् दशमे येषामुभयतो नाब्राह्मण्यं पितृत एके इत्यादिना । यद्यप्येतत् शुद्धिमते कन्यां प्रयच्छेदिति वाक्यशेषाद्वरकुलविषयमिति प्रतीयते, तथाप्यपेक्षातौल्येन सामर्थ्यात्कन्याकुलविषयमपीति गम्यते ।

तथाच याज्ञवल्क्यः,

लक्षण्यां स्त्रियमुद्वहेदित्युपक्रम्य
दशपूरुषविख्यातात् श्रोत्रियाणां महाकुलात् । इत्याह ।

मनुरपि,

उत्तमैरुत्तमो नित्यं संबन्धानाचरेत्सदा ।
निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ॥ इति ।

उत्तमानाह स एव,

विशुद्धाः कर्मभिश्चैव श्रुतिस्मृतिनिदर्शितैः ।
अविप्लुतब्रह्मचर्या महाकुलसमन्विताः ॥
महाकुले ये संबद्धा महत्वे च व्यवस्थिताः ।
संतुष्टास्सज्जनहितास्साधवः समदर्शिनः ॥
लोभरागद्वेषामर्षमानमोहादिवर्जिताः ।
अक्रोधनाः सुप्रसादाः कार्यास्संबन्धिनः सदा ॥

अधमानाह स एव,

ये स्तेनाः पिशुनाः क्लीबा ये च नास्तिकवृत्तयः ।

विकर्मणा च जीवन्तो विकृताकृतयस्तथा ॥
प्रबद्धवैराः शूरैर्ये राजकिल्बिषिणस्तथा ।
मद्यस्वादननित्याश्च कदर्याश्च विगर्हिताः ॥
अप्रजा येषु वंशेषु स्त्रीप्रजाप्रसवास्तथा ।
पतिघ्न्यश्च सुवासिन्यस्तांश्च यत्नेन वर्जयेत् ॥ इति ।

याज्ञवल्क्यः,

स्फीतादपि न सञ्चारिरोगदोषसमन्वितात् । इति ।

मनुरपि,

महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः ।
स्त्रीसंबन्धे दशैतानि कुलानि परिवर्जयेत् ॥
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ।
क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥ इति ॥

हीनक्रियं यागादिक्रियारहितम् । निष्पुरुषं स्त्रीमात्रशेषम् । निश्छन्दो वेदाध्ययनवर्जितम् । शेषं प्रसिद्धम् ।

यमोऽपि,

चतुर्दश कुलानीमान्यविवाह्यानि निर्दिशेत् ।
अनार्षेयं ब्राह्मणानामृत्विजां चैव वर्जयेत् ॥
अत्युच्चमतिह्रस्वं च अतिवर्णं च वर्जयेत् ।
हीनाङ्गमतिरिक्ताङ्गमामयाविकुलानि च ॥
श्वित्रिकुष्ठिकुलादीनां कुर्याद्धि परिवर्जनम् ।
सदाकामकुलं वर्ज्यमागमानां च यत्कुलम् ॥
अपस्मारिकुलं यच्च यच्च पाण्डुकुलं भवेत् । इति ।

अनार्षेयम् अवरणीयार्षेयं चतुरार्षेयादि । न चतुरो वृणीते न पञ्चातिवृणीते इति श्रुतेः । इदं चेत्थमेव व्याख्येयम् । अन्यथा गोत्राणाम् ऋष्यपत्यत्वेनानार्षेयत्वासंभवात् । प्रवररहितगोत्रासंभ-

वाच । अनार्षेयमविज्ञातप्रवरमिति चन्द्रिकाकारः । ब्राह्मणोपादानं क्षत्रियादीनां स्वभावतोऽनार्षेयत्वेऽप्यपरिहारार्थम् । ऋत्विजां कुलपरम्पराहृतानाम् । अत्युच्चमतिदीर्घपुरुषम् । अतिह्रस्वम् अतिह्रस्वपुरुषम् । अतिवर्णं वर्णमतिक्रान्तम् अतिगौरातिकृष्णादि । सदाकामाः कामप्रधानाः तेषां कुलम् । आगमानां श्रौतस्मार्त्तकर्मपरित्यागेन केवलागमविहितकर्मानुष्ठातॄणां, वामागमवर्त्तिनां वा । हीनाक्रियादिकुलपरिहारे प्रयोजनमाह

हारीतः, कुलानुरूपाः प्रजाः सम्भवन्तीति ।

व्यासोऽपि,

मातुलान् भजते पुत्रः कन्यका भजते पितॄन् ।
यथाशीला भवेन्माता तथाशीला भवेन्नृप ॥

मनुरपि,

पितुर्वा भजते शीलं मातुर्वोभयमेव वा ।
न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति ॥ इति ।

विष्णुः,

अश्वं पित्रा परीक्षेत मात्रा कन्यां परीक्षयेत् ।
तृणाद् भूमिं परीक्षेत आचारेण कुलं तथा ॥

कुलापकर्षणनिमित्तान्याह

मनुः,

कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥
शिल्पेन व्यवहारेण शूद्राऽपत्यैश्च केवलैः ।
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणा ।
कुलान्यकुलतां यान्ति यानि हीनानि मन्त्रतः ॥ इति ।

कुलोत्कर्षनिमित्तमाह स एव,

मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ।

कुलसंख्यां च गच्छन्ति वर्षन्ति च महद्यशः ॥ इति ।

अथ गोत्रप्रवरपरीक्षा ।

तत्र शातातपः,

आदौ गोत्रविशुद्धिः स्यात्ततस्सप्तमपञ्चमम् ।

राशिकूटं ततश्चैव त्रेधासम्बन्धलक्षणम् ॥ इति ।

गोत्रविशुद्धिरसमानगोत्रत्वेन । असगोत्रा च या पितुरिति मनुस्मरणात् । तस्याश्चादावित्यनेनावश्यकत्वमुक्तम् । तदभावेऽपत्यस्य चण्डालत्वस्मरणात् ।

तथाच बौधायनः,

आरूढपतितापत्यं ब्राह्मण्यां यस्तु शूद्रजः ।

सगोत्रोढासुतश्चैव चण्डालास्त्रय ईरिताः ॥ इति ।

गोत्रमिति प्रवरस्याप्युपलक्षणम् । असमानार्षगोत्रजामिति याज्ञवल्क्यस्मरणात् । आर्षं च गोत्रं चार्षगोत्रे, समाने आर्षगोत्रे यस्यासौ समानार्षगोत्रः, न समानार्षगोत्रः असमानार्षगोत्रः, असमानार्षगोत्राज्जाता असमानार्षगोत्रजा । ततश्च गोत्रप्रवरयोः पृथक्पृथक् कन्यापर्युदासे निमित्तत्वं सिध्यति ।

तथाच गौतमः, असमानप्रवरैर्विवाह इति प्रवरमात्रस्यैव पर्युदासनिमित्ततां प्रकटयति । ततश्च गोत्रभेदेऽपि प्रवरैक्ये न विवाहः । तद्यथा, यस्कवाधूलमौनमौकशार्कराक्षिशार्ष्टिसावर्णिशालङ्कायनदैवत्यायनानां गोत्राणां भेदेऽपि भार्गववैतहव्यसावेतसेति प्रवरैक्ये । तथा प्रवरभेदेऽपि गोत्रैक्ये । तद्यथा, तित्तिरिकपिभूमिस्वान्दतखण्डितानां गोत्राणामाङ्गिरससैन्यगार्ग्येति आङ्गिरास्तित्तिरिः कपिभूमिरितिचेति गोत्रैक्येऽपि वैकल्पिकप्रवरभेदे ।

यत्तु हरितुकुत्सपिङ्गशङ्खदर्भभैमगवानामाङ्गिरसाम्बरीषयौवनाश्वेति मान्धात्रम्बरीषयौवनाश्वेति वैकल्पिकप्रवरभेदादसमानार्षत्वेन विवाहप्रसक्तौ गोत्रैक्येन तन्निषेध इत्याधुनिकैरुदाहृतम् । तन्न सुन्दरम् । आङ्गिरसमान्धात्रोर्विकल्पेन भेदेऽपि अम्बरीषयौवनाश्वयोर्द्वयोरभेदेन विवाहाप्रसक्त्या प्रकृतोदाहरणत्वासम्भवात् ।

तथाच प्रवरनिर्णयकाराः स्मरन्ति,

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।
भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वारयेत् ॥ इति ।

यत्तु समानम् आर्षं यस्य तत्समानार्षं, समानार्षं च तद्गोत्रं च समानार्षगोत्रं, समानार्षगोत्रे जाता समानार्षगोत्रजा, न समानार्षगोत्रजा असमानार्षगोत्रजेति प्राचां समासकरणम् । तन्न सुन्दरम् । विशिष्टनिषेधे गोत्रैक्येऽपि प्रवरभेदे विवाहप्रसङ्गात् । यथा त्तित्तिरिकपिभूम्याद्युक्तोदाहरणे । नचेष्टापत्तिः । " न सगोत्राय दुहितरं प्रयच्छेदिति " गौतमेन गोत्रमात्रस्यैव पृथक् निषेधात् ।

तत्र गोत्रलक्षणम् ।

अगस्त्याष्टमसप्तर्ष्यन्यतमापत्यं साक्षात्परम्पराजातं यत्तद्गोत्रमुच्यते ।

तथाच स्मृतिः,

जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमाः ।
वसिष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते । इति ।

गोत्रकारिणो गोत्रप्रवर्त्तका इत्यर्थः । यत्प्रवर्त्तकमेषां तानि कानि गोत्राणीत्यत आह, एतेषां यान्यपत्यानीति । अत्र गोत्रभूतमपत्यमनन्तरमपि, न तु पाणिनीयेव पारिभाषिकं पौत्रप्रभृत्येव ।

तथात्वे प्रमाणाभावात् । नच कृत्रिमाकृत्रिमन्यायस्यात्र प्रसङ्गोऽस्ति। कृत्रिमपरिभाषायास्तथाविधाया बौधायनाश्वलायनादीनां केषाश्चिद्दर्शनात् । सत्त्वे वा पाणिनेरिवापत्याधिकाराभावेन तस्य नियमेनाग्रहणात् । किञ्च व्याकरणेऽप्यपत्याधिकारस्यासत्त्वे लौकिकगोत्रस्यापत्यमात्रस्य ग्रहणमेव युक्तम् । अपत्याधिकाराद्न्यत्र लौकिकस्यैव गोत्रस्य ग्रहणमिति भाष्यकैयटपदमञ्जर्यादिषु स्थितत्वात् ! दृश्यतेऽपि तत्कचित् । अत्र गोत्रभुता एव केचित्प्रवरास्ते च ऋष्यार्षेयशब्दवाच्या इति ऋषिभूतं सर्वं तदिति न भ्रमितव्यम् । किं तु वंशपरम्पराप्रसिद्धमेव । यच्च सूत्रादिषु गोत्रपरिगणनं तदपि प्रसिद्धिमूलकमेव । एतदेवाभिप्रेत्य निबन्धेषु गोत्रम् ऋषिवंशपरम्परेति व्याख्यातम् ।

अत्र केचिदेवं व्याचक्षते । गोत्रशब्दः सम्बन्धिशब्द इति किं केषां गोत्रमिति जिज्ञासायामगस्त्याष्टमसप्तर्षीणां यान्यपत्यानि तेषां गोत्रमेते सप्त ऋषय इति । एवं च भरद्वाजादिषु शिष्टानां गोत्रव्यवहारोऽप्युपपद्यते भरद्वाजगोत्रा वयं वसिष्ठगोत्रा वयमित्यादि । तन्न । सन्दर्भविरोधात् । न हि घट इति वक्तव्ये अनघट इति विद्वांसो वदन्ति । तेषां च गोत्रत्वे गोत्राण्यष्टसंख्याकानि स्युः । ततश्च

गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।

इति सूत्रविरोधः । कथं तर्हि विश्वामित्रादिषु गोत्रव्यवहारः । आरोपात् । सर्वेषां तेषां गणानां परस्परं विवाहो नास्तीत्यवान्तरऋषिषु गोत्रत्वविवक्षायां प्रयोजनाभावात् । यत्र तु प्रयोजनमस्ति ऋषिष्वेव गोत्रविवक्षा यथा जमदग्निव्यतिरिक्तभृगुगणेषु केवलाङ्गिरोगणेषु च केषु चित् । अन्यथा तत्र गोत्रप्रवरसाम्याभावाद्विवाहः प्रसज्येत । तस्मादगस्त्याष्टमसप्तर्ष्यपत्यमेव गोत्रम् ।

तत्केषामिति जिज्ञासायां केचिदेवमाहुः । पूर्वेषां परेषां चेति । तेषामुत्पादकत्वेनोत्पाद्यत्वेन चोपस्थितत्वात् । एवं च वत्सगोत्रा वयमित्यादिव्यवहारो बहुव्रीहिणा भविष्यति । वत्सादिषु तु जमदग्निगोत्रा इत्यादिव्यवहारः षष्ठीतत्पुरुषेण । गोत्रशब्दः पुल्लिङ्गोऽपीति । तदसत् । जमदग्निगोत्रा इत्यत्र गोत्रपदस्य सप्तर्ष्यपत्ये शक्तत्वेन प्रतिसम्बन्ध्यपेक्षायां सप्तर्षिभिरेव शान्तत्वाज्जमदग्नेस्तत्र प्रतिसम्बन्धित्वेनान्वयायोगात् । गोत्रशब्दे पुल्लिङ्गस्यानुशासनाभावाच्च । कथं तर्हि जमदग्निगोत्रत्वादिव्यवहारो वत्सादिषु । इदानींतनेष्विव बहुव्रीहिणा भविष्यति । अनादौ हि संसारे जमदग्नेरपि पूर्वपूर्वजमदग्न्यपत्यत्वम् । तथाच जमदग्निर्गोत्रं सप्तर्ष्यपत्यं जनकतया येषामिति व्युत्पत्त्या वत्सादिष्वपि जमदग्निगोत्रसम्बन्धो निर्बाधः । तस्मादगस्त्याष्टमसप्तर्ष्यपत्यतदपत्यभूतानां परेषामेव गोत्रम् । तथापि जमदग्न्यपत्यव्यतिरिक्तभृगुगणेषु केवलाङ्गिरोगणेषु च कथं गोत्रव्यवहारः । तेषामगस्त्याष्टमसप्तर्ष्यपत्यत्वाभावात् । किञ्च

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ।

तावत्समानगोत्रत्वमित्युक्ते एक एव अगस्त्याष्टमसप्तर्ष्यन्यतम एव तिसृभिः कोटिसंख्याभिः संख्यातानां वक्ष्यमाणानां गोत्राणां मध्ये यावत्संख्याकानां गोत्राणाम् एकद्वित्रिपञ्चसंख्यान्यतमसंख्याकेषु प्रवरेष्वनुवर्त्तते तावतां गोत्राणां तत्समानगोत्रत्वम् । तत्रान्यत्र भृग्वाङ्गिरसां गणादिति पर्युदासः श्रूयते, स कथं स्यात् । तेषु गोत्रसामान्याभावे तद्व्याप्यस्य समानगोत्रत्वस्य सुतरामप्रसक्तेः । न चायं पर्युदासो जामदग्न्यभृगुगणगौतमभरद्वाजाङ्गिरोगणविषय एव स्यात्, सप्तर्ष्यपत्यत्वेन तेषां गोत्रत्वसम्भवात् । समानगोत्रता चास्ति अन्यगोत्रवदेकमात्रप्रवरानुवृत्त्याऽपि क्रियमाणतया वेति

वाच्यम्। एवं हि तत्र प्रक्रियाऽस्ति, त्रिपञ्चार्षेयाणां द्वित्रिप्रवरसाम्ये एव समानगोत्रत्वम्। एवं सति क्वचिद् द्वित्रिप्रवरसाम्याभावेन समानगोत्रत्वाभावे प्रवरसाम्यमेवाविवाहप्रयोजकमङ्गीकर्त्तव्यम् । प्रवराणामपि त्रिपञ्चार्षेयाणां द्वित्रिसंख्यानामेव साम्यं तथा वाच्यं, न त्वितरवदेकमात्रस्यापि ।

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।
भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वारयेत् ॥

इति वचनात् । एवं चापस्तम्बादिसूत्रानुरोधात्केषुचित् त्र्यार्षेयेषु जमदग्निगणेषु पञ्चार्षेयेषु गौतमभरद्वाजगणेषु केषुचित् भृग्वङ्गिरोगणेषु द्वित्रिप्रवरसाम्याभावात्सगोत्रत्वसप्रवरत्वयोर्द्वयोरप्यभावाद्विवाहप्रसङ्गः । अस्त्विति चेत्, न। गौतमानां सर्वेषां भरद्वाजानां सर्वेषां वत्सा विदा आर्ष्टिषेणा इत्येतेषामविवाह इति बौधायनेन निषिद्धत्वात् । तस्मात्तेषु सगोत्रत्वादेव अविवाहः । स्मृत्यर्थसारादिभिरप्येवमेवोक्तम्। तस्मादन्यत्रभृग्वङ्गिरसादिति पर्युदासो जामदग्न्यगौतमभरद्वाजभृग्वङ्गिरोगणविषय इति पूर्वोक्तानुपपत्तिस्तदवस्थैव ।

अत्राश्वलायनसूत्रवृत्तिकाराः समादधुः । जमदग्निगौतमभरद्वाजानां भृग्वङ्गिरोगणानां पूर्वापरीभूतगोत्रमध्यपाठाद्गोत्रत्वात्तत्साहचर्यादासन्नत्वेन विवेकाग्रहात्तद्भिन्नानामपि तद्गणानां गोत्रत्वभ्रान्तिर्भवति । तथैव च मित्रयुगोत्रा वयं मुद्गलगोत्रा वयमित्येवमादिप्रयोगोऽपि भवति । एवंविधभ्रान्तिरूपां प्रसक्तिमादायायं पर्युदासः । यथा श्राद्धे कुण्डगोलकादीनां प्रतिषेधः ।

स्मृतिचन्द्रिकायां तु गोत्रशब्दः प्रवरपरतया व्याख्यातः । युक्ता च प्रवरलक्षणा गोत्रशब्दे । प्रवरभूतानाम् ऋषीणां गोत्रापत्यत्वात् । दृष्टा च । यावतोऽनन्तरिताः समानगोत्रास्तावतां स-

कृदित्याश्वलायनसूत्रे समानगोत्राः समानप्रवरा इति व्याख्यानात् । युक्तं चैतद्व्याख्यानम् । प्रवराणां पूर्वमुपक्रमेन तत्साम्यस्यैवावगमात् । गोत्रलक्षणस्य त्वन्तेऽभिधास्यमानत्वात् । अग्रे च भृग्वङ्गिरसो भिन्नविवाहं कुर्वते नचेदित्यादिना समानप्रवरत्वविषयत्वेनैव पर्युदासाभिप्रायप्रकाशनात् । अत्र पक्षे एक एवेत्यत्र नागस्त्याष्टमसप्तर्ष्यन्यतमस्यैव ग्रहणं, किं तु प्रवरऋषिमात्रस्य । व्रियमाणतया वापीत्यभियुक्तगोत्रलक्षणे तु तस्यैवेति गमयितव्यम् । अग्रे चेदं स्पष्टयिष्यते । यत्तु न पर्युदासस्य प्राप्त्यपेक्षा यथा प्रतिषेधस्य । अन्यथा "यजतिषु येयजामहं करोति नानुयाजेषु" इत्यादौ पर्युदासेऽपि विकल्पः प्राप्नोति । तन्निवृत्तये "नार्षेयं वृणीते" "नानुयाजेषु" इत्यादिषु पर्युदासे लक्षणाऽङ्गीकारो न स्यादिति । तन्न मनोरमम् । निषेधे प्रापकस्य निवर्त्तकस्य च वाक्यस्य भेदात् अनुवादार्थं वाक्यान्तरकृता निश्चयरूपा प्राप्तिर्यथाऽपेक्षिता न तथा पर्युदासे इति यद्यपि, तथापि यदीदं विशेषणं न स्यात्तदा प्राप्नुयादिति सम्भावनारूपा प्राप्तिर्वाच्यैव । नच तादृश्यप्यत्र प्राप्तिरस्ति ।

अत्र गोत्राणां समानत्वं क्वचिदेकत्वं क्वचित्सादृश्यम् । तत्राद्यम् एकैकगणान्तःपातिनां गोत्राणाम् । यथा मूलभूतस्य वत्सादेः प्रसिद्धस्य गोत्रस्यैकत्वम् । गणान्तरऋषीणामपि यत्र गोत्रत्वं तत्रापि तेषां स्वपरम्परां प्रत्येकत्वमप्रतिहतमेव । द्वितीयं तु गोत्ररूपाणामृषीणां भिन्नभिन्नगणनिविष्टानां तन्मूलभूतानामवान्तराणां वा । तदप्यगस्त्याष्टमसप्तर्ष्यन्यतमैकऋषेरपत्यत्वरूपयाऽनुवृत्त्या । तदनुवृत्तिज्ञानं च बहुधा प्रवरान्तर्भावादेव । सूत्रादिगतानुक्रमणेषु तु क्वचित्तथाविधपूर्वापरीभूतगोत्रपाठान्तर्भावात् ।

तथा चोक्तं,

व्रियमाणतया वापि सत्तया वाऽनुवर्त्तनम् ।

एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते ॥ इति ।

तद्गोत्रं तस्य ऋषेरपत्यं कथ्यते इति। तेन रूपेण तेषां गोत्राणां समानत्वमित्यर्थः । सत्तयेति वदता व्रियमाणतयेत्यस्य बौधायनोक्तेतन्मूलभूते एक एव ऋषिरिति लक्षणे प्रवरोऽस्त्वित्यस्य चोपलक्षणत्वेन यथाकथञ्चिदेकस्यानुवर्त्तनं सूचितं भवति । उत्पाद्योत्पादकभावः सत्ता । भू सत्तायामिति स्मृतेः । क्वचित्तु स्वतयेति पाठः । तत्रापि यमभिकृत्य ये पठितास्ते तस्य स्वे आत्मीया इत्यक्षरानुसारेण तत्रैव पर्यवस्यति। एतदुक्तं भवति। यथा पारिभाषिकं गोत्रं तथा समानगोत्रत्वमपि । इतरथा तस्यानिर्वचनात् ।

तथाहि । यदि समानं गोत्रं येषामिति व्युत्पत्तिस्तदा येषु गोत्रभूतस्य वत्सादेरनुवृत्तिस्तेषामेव वात्स्यमार्कण्डेयादीनां स्वे स्वे गणे प्रत्येकमन्योन्यं वा सगोत्रता स्याद् न तु परस्परं वत्सविदयोः । नच क्वचिदेकगोत्रत्वं क्वचित्सदृशगोत्रत्वं समानगोत्रत्वमित्यननुगम इति वाच्यम् । अगस्त्याष्टमसप्तर्ष्यन्यतमापत्यरूपऋषिगोत्रकत्वस्यानुगतत्वात् ।

ननु सूतकादावेकगोत्रत्वेनैव शिष्टानां समानगोत्रत्वव्यवहारादत्रापि तदेवास्तु । नचैवं भिन्नभिन्नगणनिविष्टानामेकगोत्राभावेन समानगोत्रत्वाभावात्परस्परं विवाहः प्रसज्येत । एकैकगणनिविष्टानामपि सप्तर्ष्यपत्यभिन्नभृग्वङ्गिरोगणानां गणप्रवर्त्तकस्य ऋषेरगस्त्याष्टमसप्तर्ष्यपत्यबाह्यत्वेन गोत्रत्वाभावात्सगोत्रत्वाभावेऽपि समानप्रवरत्वादेव परस्परं यथाऽविवाहस्तथाऽत्रापि भविष्यति ।

अत्र वदन्ति। यत्र न गोत्रैक्यं न वा प्रवरैक्यं तथाविधान्यपि कानिचिद् गोत्राणि सन्ति । यथा भरद्वाजगणेषु केषुचिच्च विश्वामित्रगणेषु, नच तत्र विवाहः, तदर्थं सदृशगोत्रत्वमपि समा-

नगोत्रत्वं वाच्यम्। अन्यथा तत्र विवाहः स्यात्। नच तत्र समानप्रवरत्वादेव न भविष्यति, यतः समग्रैर्विश्वामित्रस्य सर्वेषु विश्वामित्रगणेषु भरद्वाजस्य च कपिव्यतिरिक्तभरद्वाजगणेषु च व्रियमाणतया त्र्यादिप्रवरसंख्यापूरकतया च प्रवरत्वस्याप्यावश्यकत्वादिति वाच्यम्।

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ।

तावत्समानगोत्रत्वमिति समानगोत्रत्वलक्षणं बौधायनेन कृतम्। तच्चागस्त्याष्टमसप्तर्षीनधिकृत्य। तत्प्रयोजनं च अगस्त्याष्टमसप्तर्ष्यनुवृत्तिरत्र यथा स्यादिति समानगोत्रलक्षणस्यैतद्घटितत्वेनाभिधानात्समानप्रवरलक्षणेऽगस्त्याष्टमसप्तर्षिभिन्नतदपत्यरूपऋषेरेव व्रियमाणत्वेनानुवृत्तिरवगम्यते। तथाचाविवाहहेतुत्वेन ऋषिभिर्निबन्धृभिर्वा गोत्रेण सङ्कीर्णमसङ्कीर्णं वा समानप्रवरत्वं तत्रैवोच्यते यत्रैकादिसंख्यस्यागस्त्याष्टमसप्तर्ष्यतिरिक्तऋषेरेव व्रियमाणत्वेनानुवृत्तिर्दृश्यते। एतदभिप्रायेणैव यद्यपि विश्वामित्रगणमध्ये सर्वत्र विश्वामित्रानुवृत्तिरस्ति तथापि तेष्वेव केषु चिद्गणेषु आश्वलायनसूत्रे माधुच्छन्दसप्रवरानुवृत्तिदर्शनात्क्वचिदेव प्रवरैक्यमविवाहकारणत्वेन स्मृत्यर्थसारे उक्तम्। ननु महर्षेर्यत्र सत्तयैवानुवृत्तिस्तत्र तस्य न प्रवरत्वमिति स्वापत्यभूतेषु तस्याविवाहप्रयोजकता गोत्रनिमित्तैव, यत्र पुनर्व्रियमाणत्वं तत्र प्रवरनिमित्तैवेति चेत्। मैवम्। यद्यपि महर्षेस्तत्र प्रवरत्वं नास्ति तथापि तदपत्यानामवान्तरऋषीणां व्रियमाणत्वेन प्रवरत्वाङ्गीकारात् तत्र तदभेदादेवाविवाहस्य निष्पत्तेस्तत्स्थले सगोत्रताया अविवाहनिमित्तत्वं न स्यात्। न च महर्षेः सत्तयाऽनुवृत्तावपि न व्रियमाणैक्यमित्येवंविधो विषयः कश्चिदस्ति। किञ्च महर्षेः सत्तामात्रानुवृत्त्या सगोत्रत्वे उच्यमाने भिन्नगणान्तःपातिभिस्तस्य

विवाहः प्रसज्येत । तस्य सत्तयाऽपि तत्रानुवृत्त्यभावेन गोत्रत्वाभावात् । अतः सदृशगोत्रत्वं सगोत्रत्वमवश्यं वाच्यमेव । तदयं निर्गलितोऽर्थः । यत्र महर्षिर्व्रियमाणस्तत्र तस्य वरणेनानुवृत्त्या प्रवरत्वात्प्रवरसंख्यापूरकत्वाच्च स्वापत्यभूतेषु ऋषिषु झटिति साम्यस्योपस्थितत्वादविवाहनिमित्तं सगोत्रत्वमेव, सप्तर्षिभिन्नस्य वरणानुवृत्तौ सप्रवरत्वमपीति ।

एवं गोत्रस्वरूपं समानगोत्रत्वं च निरूपितम् । इदानीं प्रवरस्वरूपं तत्समानत्वं च निरूप्यते ।

तत्र प्रवरान्व्याख्यास्यामः, समानप्रवराः, त्र्यार्षेयः प्रवरः, पञ्चार्षेयः प्रवर इत्यादिषु प्रवरशब्दः प्राव्रियतइति कर्मव्युत्पन्नः । प्रवरणं प्रवर इति भावव्युत्पन्न इति भार्गवच्यावनाप्नवानौर्वजामदग्न्येति जमदग्निवदूर्ववदप्नवानवच्च्यवनवद्भृगुवदितितद्धितप्रत्ययान्तप्रयोगेणाग्नेः प्रकर्षेण वरणानि । प्रार्थनापर्यायः प्रवरशब्दो भावव्युत्पन्न इति प्रवरमञ्जरीकारः । ननु गोत्रत्वेन परिगणिताः केचिदृषय एव गोत्रसम्बन्धिनः पितृपुत्रपौत्रक्रमेणावस्थिताः प्रवरास्तथैव दर्शपूर्णमासाङ्गभूतहोत्रध्वर्य्वादिवरणविधानाल्लिङ्गादवसीयते ।

तथा मत्स्यपुराणेऽपि,

भृगुः पुलोम्नश्च सुतां दिव्यां भार्यामविन्दत ।
यस्यामस्मात्ततो ऽपत्यभूता द्वादशदेवताः ॥
पौलोम्यजनयद्विप्रान् देवानां तु कनीयसः ।
च्यवनं तु महाभागमप्नवानं तथाऽप्यसौ ॥
आप्नवानात्मजश्चैव जमदग्निस्तदात्मजः ।
इति तदपत्यभूता ऋषय इत्युक्तम् ।

तद्गोत्रप्रवरान्वक्ष्ये इत्युपक्रम्य च्यवनादीनुक्त्वा इत्येते प्रव-

रा मता इत्युपसंहृतम् ।

तथा विष्णुपुराणेऽपि, पुरुवंशानुकीर्त्तने दुष्यन्ताच्चक्रवर्त्ती भरतो नाम बभूवेत्युपक्रम्य यन्नामानो यत्क्रमका यावन्तश्च भरद्वाजानां प्रवरर्षयः प्रवरसमाम्नाये श्रुतास्तन्नामानस्तत्क्रमकास्तावन्तश्च पराशरेणोपदिष्टा वंशानुपूर्व्या। तत्र प्रथमोऽङ्गिरास्ततो बृहस्पतिः ततो भरद्वाजस्तत आमहव्यस्तत उरुक्षयस्ततः कपिरुत्पन्न इति । तस्माद् गोत्रीभूतानामेव वंश्याः केचिदृषयः प्रवराः कर्मकरणव्युत्पत्त्या उक्ता इति चेत् । सत्यमुक्ताः, परं तु विशेषणविधया न विशेष्यतया । तथाहि, होत्रा पूर्वमग्ने महां असि ब्राह्मण भारतेत्युक्त्वा यजमानार्षेयवरणं भार्गवच्यावनादिशब्दसहितं क्रियते । पश्चाद्देवेद्धो मन्विद्ध इत्यादीनि निवित्पदानि प्रयुज्यन्ते । तत्र चाग्निरेव पूर्वोत्तरपदैः प्रकाश्यते । तन्मध्यपतितैर्भार्गवादिपदैरपि सम्बुध्यन्तैरग्निरेवावश्यं वक्तव्यः पूर्वोत्तरपदान्वयार्थम् । कथमित्यपेक्षायां भार्गवादिना यजमानेनोत्पादितत्वात्तत्सादृश्याद्वोपचारात्तैः पदैः सम्बोध्यते । तस्य चैतत्प्रयोजनं, यथा देवानुद्दिश्य भार्गवादिभिस्त्वयि प्रक्षिप्तं हविस्त्वया हव्यवाहनाम्ना देवानामुह्यते, स्वीक्रियते च तद्देवैः, तथा तदपत्यभूतेन भोज्यान्नेन तत्र चोत्पादकत्वेन मातृपितृरूपेणातएव त्वयि प्रक्षेपयोग्येनानेनापि यजमानेन प्रक्षिप्तं त्वयि हविस्त्वया देवेभ्यो वोढव्यं तैश्चाङ्गीकर्त्तव्यमित्येवं होत्रा हवनीयोऽग्निः प्रव्रियते प्रार्थ्यते । एवमध्वर्युप्रवरेऽपि स एवाहवनीयोऽग्निः प्रव्रियते । एवं चात्राग्निरेव प्रार्थनारूपवरणविशेष्यः ऋषयस्तु तत्र विशेषणभूता एव ।

अध्वर्युप्रवरमन्त्रश्चाग्निर्देवो होता देवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवत् इत्येतदनन्तरं यथायोग्यं प्रवरानुक्त्वा ब्रह्मण्वदाच्च वक्षत् ब्राह्मणः अस्य यज्ञस्य प्रावितार इत्युक्त्वा यथायोग्यममुक-

शर्मा मानुष इति ।

अस्यार्थः । भो अस्य यज्ञस्य प्रावितारो ब्रह्मप्रभृतयो ब्राह्मणा यथा अग्निर्देवसंबन्धी होता चिकितमनुभरतानामेतद्यजमानपूर्वजानां जमदग्न्यादीनां ब्रह्मणश्च देवताः यजमानाश्चाधिकारिणां विद्वान्देवानिन्द्रादीन् यक्षच्च तथाऽमुकशर्माऽयं मानुषोऽपि होता तदपत्यत्वेन तत्सदृशस्य यजमानस्यापि यज्ञे देवहोत्रग्न्यधिष्ठानबलेनैव विद्वान्यजतु आवहतु चेति मानुषहोत्रधिष्ठितो गिरेवानेन प्रकारेण प्रार्थ्यते । अत एवावाहनमन्त्रे होताऽग्नेरेवावाहने सत्कारं करोति । तथाचात्राप्यग्नेरेव प्राधान्येन वरणम् ।

नन्वेवं बहुसूत्रविरोधः प्रसज्यते । तथाहि । इत एवोर्ध्वानध्वर्युर्वृणीते अमुतोऽर्वाञ्चो होता वृणीत इति आपस्तम्बः । अथातोऽत ऊर्ध्वानध्वर्युर्वृणीते अमुतोऽर्वाञ्चो होतेत्येष एवोभयोः सर्वत्रोदेश इति बौधायनोक्तेः । अस्यार्थः । पुत्रः पिता पितामहः प्रपितामह इत्युत्पाद्योत्पादकतयाऽवस्थितेषु प्रवरसङ्कीर्त्तनमियन्त एव कीर्त्तनीया इति नियमाय तत्र क्रमविशेष उच्यते इतः प्रत्यक्षाद्यजमानादूर्ध्वानारोहेणावस्थितान् जमदग्निवदूर्ववदप्नवानवच्च्यवनवद्भृगुवदित्येवमध्वर्युर्वृणीते होता तु अदसो विप्रकृष्टार्थत्वादमुतो यजमानविप्रकृष्टाद् भृग्वादितः प्रभृति अर्वाञ्चोऽवरोहेण भार्गवच्यावनाप्नवानौर्वजामदग्न्येत्येव वृणीतइति । तत्रापि होता तद्धितवदामन्त्रितवच्चेति कातीयसूत्रात्तद्धितान्तसम्बुद्ध्यन्तेन होतुर्वरणम् । अध्वर्योस्तु वत्यन्तेनेति । नचौर्ववदित्यादिर्वतुपो निर्देशः । तथात्वे जमदग्निवदित्यादावित्रिकारान्ते व्रीहिमादितिवद्वादेशो न स्यात । मवर्णावर्णान्तान्मवर्णावर्णोपधादेव "मादुपधायाश्च मतोर्वोऽयवादिभ्य" इति वादेशस्य विधानात् । एवं भृगुवदित्यादावपि । अत्र सर्वत्र मन्त्रदृशामेव एकद्वित्रिपञ्चसंख्यानामृषीणां वरणकर्मता

प्रतीयते । तेषां द्वितीयानिर्दिष्टत्वात् । नाग्नेराहवनीयस्य । अग्निर्देवो दैव्यो होता देवान्यक्षदित्यत्रापि होतुरेव वरणकर्मता प्रतीयते नाग्नेः । किञ्च यद्यपि प्रवरपदानां पूर्वोत्तरपदैकवाक्यतया स्वसामर्थ्येन चाग्न्यभिधायित्वं प्रतीयते तथापि यजमानस्यार्षेयान्वृणीते इत्युक्त्वा मन्त्रकृतो वृणीते यस्य यावन्तः स्युरिति श्रुतौ स्वार्थे तद्धितमङ्गीकृत्य गोत्रभूतऋषेरिमे आर्षेया इति व्युत्पत्त्या सप्तर्ष्यपत्यत्वेन वा ऋषीणामेव वरणकर्मत्वं श्रुतितः प्रतीयते । तदनुरोधेन प्रवरपदानामपि तत्परत्वमेव कथञ्चित्कल्प्यमिति चेत् ।

अत्र प्रवरमञ्जरीकारः। सर्वैः सूत्रकारैर्वृणीतइत्युक्त्वा केन प्रकारेणेति प्रकारचिन्तायामग्निप्रकाशकमन्त्रमध्ये तद्धितवत्प्रत्ययान्ततया तत्प्रकार उक्तः । नच तत्र ऋषीणां प्रवरकर्मत्वं प्राधान्येनावगम्यते किं तु गुणभावेन । अपत्यत्वसादृश्यनिरूपकत्वात्, पूर्वोत्तरपदैकवाक्यत्वस्यावश्यम्भावाच्च । अग्निप्रकाशनार्थसामिधेनीमन्त्रलिङ्गात्प्रवरविधायकब्राह्मणेभ्यश्चायमर्थोऽवगम्यते । तत्रामिं दूतं वृणीमहे वृणीध्वं हव्यवाहनमित्यादिभिर्मन्त्रलिङ्गैराहवनीयस्याग्नेर्वरणकर्मत्वमुच्यते । द्वितीयानिर्देशात् । तथा दर्शपूर्णमासयोः प्रवरविधिपरं तैत्तिरीयब्राह्मणं " वृणीध्वं हव्यवाहन " इत्यस्यैतमेवार्थमाह । त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितॄणां सहरक्षा असुराणां तएतर्ह्याशंसन्ते मां वरिष्यन्ते मामिति वृणीध्वं हव्यवाहनमित्याह य एव देवानां तं वृणीते आर्षेयं वृणीते बन्धोरेव नैत्यथो सन्तत्याइति । अत्राप्याहवनीयाग्निरेव वरणकर्म । देवानां यो हव्यवाहनस्तमार्षेयमिति द्वितीयानिर्देशात् । वाजसनेयिब्राह्मणमप्येतमर्थमाह । अथार्षेयं वृणीते ऋषिभ्यश्चैवेनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति । अस्यार्थो मञ्जर्यामुक्तः । आर्षेयमृष्यपत्यमाहवनीयमग्निं यजमानेनो-

स्याद्वितस्त्वाद्यजमानस्य च ऋषिसन्तानत्वात्तं वृणीते । किमर्थमि-त्याशङ्क्य प्रयोजनमाह । ऋषिभ्यश्चैवैनं यजमानं देवेभ्यश्च निवे-दयत्ययं महावीर्यो ब्राह्मणो यज्ञं प्रापदिति । यस्मादेवं सप्रयोजनः प्रवरस्तस्मादार्षेयं प्रवृणीतइति । तस्मात्तदविरोधाय सूत्रकार-वचनानि किंचिदध्याहृत्य व्याख्येयानि ।

तथाहि । इतो यजमानादूर्ध्वान् यजमानस्यार्षेयान् सङ्कीर्त्य यजमानद्वारा तदपत्यत्वादेव तत्सादृश्येन हे अग्ने त्वं भृगुवदसी-ति वृणीते । तथा अमुतोऽर्वाञ्चो होतेत्यत्रापि तानेव सङ्कीर्त्य यजमानद्वारा तदपत्यत्वादाहवनीयमेव योग्यत्वाद् वृणीते प्रार्थयते । भार्गव भृगोरपत्य देवेभ्यो हव्यं वहेति । ननु "ऐन्द्र्या गार्हपत्यमुप-तिष्ठत"इत्यनेन "कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे" इत्येषा ऋगैन्द्री गार्हपत्योपस्थाने विनियुक्ता । तत्रेन्द्रपदेन गौण्या वृत्त्या गार्हपत्यप्रकाशनं क्रियते । नच मन्त्रे यथा वृत्त्यन्तरं कल्प्यते तथा गार्हपत्यमिति द्वितीयाश्रुतेर्लक्षणयाऽधिकरणपरत्वेन गार्हपत्यस-मीपे इन्द्रमुपतिष्ठेत इति किं न स्यादिति वाच्यम् । मन्त्रब्राह्मणयो-र्विरोधे मन्त्रएव ब्राह्मणप्रापितार्थप्रकाशके तदधीनप्रामाण्ये च वृत्त्यन्तरं कल्पनीयं न ब्राह्मणे इति ऐन्द्र्याधिकरणे सिद्धान्तितम् । तदाहुराचार्याः,

गौणत्वं नाम यत्र स्यान्मन्त्रब्राह्मणयोः क्वचित् ।

तत्रानुवादरूपत्वान्मन्त्राणां गौणतेष्यते ॥ इति । तन्न्यायेन विध्यनुरोधान्मन्त्रस्यैवान्यथात्वमुचितं न तु मन्त्रानुरोधेन विधि-वाक्यस्येति चेत् । सत्यमेतत्,तथापि भार्गवादिपदानां तद्धितवत्प्र-त्ययान्तानामग्निप्रकाशकमन्त्रमध्यपतितानामृषिप्रधानत्वं न कथ-ञ्चित्सम्भवतीति

आनर्थक्यप्रतिहतानां विपरीतं बलाबलम् ।

इति न्यायेन विधेरेवान्यथात्वमाश्रयणीयम् । एतदेवाभिप्रेत्य प्रवराणामाहवनीयसंस्कारत्वं, प्रवरावृत्तिकारणत्वे यजमानानां प्रतिगोत्रं प्रवरा आवर्त्तेरन् । कुतः, आवापधर्मित्वात् । उच्यन्ते इत्यावापा आहवनीयाः, अग्निं समावपेयुरिति वचनात् । अथवा उच्यन्ते हवींषि येष्वित्यावापाः आहवनीयाः । तेषामाहवनीयानामावापानां प्रवरान्प्रति धर्मित्वात् । तेषां चाहवनीयधर्माणां प्रवराणां प्रतिप्रधानमावृत्तिर्युक्ता । प्रधानवशवर्त्तित्वादङ्गानाम् । अथवा माऽस्त्वध्याहारः । प्रार्थनात्मकवरणं प्रति ऋषीणामभिविशेषणत्वेनानीप्सितकर्मत्वम् । एवं च ऋषिपरप्रवरपदप्रयोगोऽप्युपपन्न इत्यग्नेरेवेप्सितकर्मत्वम् । ऊर्ध्वमासीनं होतारमित्यत्रापि होतृशब्देनाग्निरेवाभिप्रेतो न ऋत्विग्विशेषः । अग्निर्देवो होतेत्यादिषु होतृशब्दस्याग्निपरत्वं ब्राह्मणेन विवृतम् । तस्मादग्नेरेव प्रार्थनं सङ्कीर्त्तनं कथंचिदृषिसंबन्धेन प्रवरा इति कर्तृभेदेन तेष्वेव क्रमविशेषे नियमः, इत ऊर्ध्वानध्वर्युर्वृणीते अमुतोऽर्वाञ्चो होतेति । शब्दप्रयोगप्रकारनियमोऽपि जमदग्निवद्भार्गववदित्यादिः भार्गवच्यावनेत्यादिः । नन्वेतावता प्रबन्धेन यत्राहवनीयोऽस्ति दर्शपूर्णमासादौ तदङ्गभूतएव वरणे तद्धितान्तत्वेन वत्यन्तत्वेन च होत्रध्वर्य्वोः प्रवरोच्चारणं नियतं स्यात्, न कन्यादानऋत्विग्वरणादौ । तत्राहवनीयाभावात् । शिष्टास्तु होतृवदेव सङ्कीर्त्तयन्ति, तत्कथमुपपद्यतइति चेत् । अत्र केचित् । द्वितीयाध्यायारम्भे बौधायनेन अथात उद्देश इत्युक्त्वा अत ऊर्ध्वानध्वर्युर्वृणीते अमुतो ऽर्वाञ्चो होतेति दर्शपूर्णमासयोर्वरणे क्रमविशेषमुक्त्वा "एष एव सर्वत्रोद्देश" इति सूत्रमुक्तम् । तद्यत्र प्रवरसंकीर्त्तनं विहितं क्रमविशेषश्च नोक्तः कन्यादानऋत्विग्वरणादौ तत्रापेक्षितत्वात्स विधिः प्रवर्त्तत इत्युन्नीयते । तत्रापि होतृक्रमं विशेषेऽनन्तरं, नाध्वर्युक्रमं व्यवहितम् । तथाचाहवनीयाभावेऽपि भा-

र्गवच्यावनाप्नवानौर्वजामदग्न्येतिपञ्चप्रवरः पञ्चप्रवराय कन्यां संप्रददे इत्यादौ पञ्च प्रवरा यस्येति बहुव्रीहिणा पञ्चप्रवरतया कीर्त्तनीयाहवनीययोग्यत्वात्तत्सम्बन्धी तद्वान्वरादिरभिधीयतइति होतृप्रत्ययासिद्धिः। प्रवरमञ्जर्यां त्विदं सूत्रमेवं व्याख्यातम्। एष एव क्रमविशेषो होतुरध्वर्योश्चाध्यायपरिसमाप्तेः सर्वत्रोपदेष्टव्य इति। अत्र केचित्। पूर्वमत ऊर्ध्वानिति सामान्येनोपदेशात्प्रत्यध्यायं चाग्रे भृगूणामादितो व्याख्यास्याम इत्याद्युपक्रम्य मार्कण्डेया माण्डव्या इत्यादिना तत्तत्संख्याकं गणमुक्त्वा इत्येते विदाः तेषां पञ्चार्षेयः प्रवरो भवति। भार्गवच्यावनाप्नवानौर्वजामदग्न्येति होता विदवदूर्ववदप्नवानवच्च्यवनवद्भृगुवदित्यध्वर्युरित्येवंजातीयकसन्दर्भवद्भिः सूत्रकाण्डशेषैर्विशेषतोऽपि क्रमविशेषविशिष्टप्रवरवरणस्योपदेक्ष्यमाणत्वादेष एव सर्वत्रोदेश इत्यस्यानुवादमात्रतया प्रवृत्तिविशेषकरत्वाभावादानर्थक्यापत्तेः। तस्मात्सुष्ठूक्तं यत्र यत्र प्रवरकीर्त्तनं स्मृतितः प्राप्तं तत्र तत्र होतृप्रत्ययतासिद्ध्यै प्रवृत्तमिदं सूत्रम्। परिभाषारूपत्वाच्च न प्रकरणेन नियम्यते। यथा,

अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते।

इति श्राद्धप्रकरणाधीतमपीति।

ते च प्रवरा द्विविधाः, समाना असमानाश्च। तत्र समानत्वं नामैकद्व्यादिसंख्यैकऋषिसम्बन्धित्वम्। यथा सावर्णिजीवन्तिजाबालयतिशायनवैरोहित्यावटमण्डूकमाण्डूकमाण्डव्यप्राचीनयोग्यमार्कण्डेयादिगोत्रभेदानां भार्गवच्यावनाप्नवानौर्वजामदग्न्यानाम्। असमानास्तु नामसंख्याक्रमाणामन्यतमेनैकेन द्वाभ्यां त्रिभिर्वा भिन्नाः। तत्राप्यगस्त्याष्टमसप्तर्ष्यन्यतमैकऋषिसम्बन्धादेव यथा गोत्राणां समानत्वं न तथा प्रवराणां, किं तु तदन्यैकऋषिसम्बन्धादपि।

ततश्च जामदग्न्यभिन्नभृगुगणेषु केवलाङ्गिरोगणेषु च समानप्रवरत्वं भवति, तेषामगस्त्याष्टमसप्तर्ष्यपत्यबाह्यत्वात् । इदं चैतेष्वेकप्रवरमात्रसाम्ये न प्रवरसाम्यं, किं त्वेकगणस्थेषु सर्वप्रवरसाम्यादेव । भिन्नभिन्नगणस्थेषु तु पञ्चप्रवरेषु प्रवरत्रयसाम्येन, त्रिप्रवरेषु प्रवरद्वयसाम्येन । अत एव ये सप्तर्ष्यपत्यबाह्या वीतहव्यशुनकवाध्र्यश्ववैन्यहरितकुत्सकण्वरथीतरमुद्गलविष्णुवृद्धास्तद्विषयं सूत्रवयं बौधायनेनोक्तम् । भृग्वङ्गिरसो भिन्नविवाहं कुर्वते न चेत्समानार्षेया बहवः स्युरिति, त्र्यार्षेयसन्निपातेऽविवाहस्त्र्यार्षेयाणाम्, त्र्यार्षेयसन्निपातेऽविवाहः पञ्चार्षेयाणामिति । तत्राद्यं सूत्रं मञ्जरीकृता द्वेधा व्याख्यातम् । एकं तावत् एतेषु परिगणितेषु गोत्रेषु भृगवोऽङ्गिरसश्च जमदग्निगौतमभरद्वाजव्यतिरिक्ता वीतहव्यशुनकमित्रयुवैन्यहरितकुत्सकण्वरथीतरमुद्गलविष्णुवृद्धादयो भृगुत्वेनाङ्गिरसत्वेन चाभिन्ना अपि सन्तो भिन्नविवाहं कुर्वते । भिन्नवद्विवाहो भिन्नविवाहः भिन्नश्चासौ विवाहश्चेति वा भिन्नविवाहः । यथाऽगस्त्याष्टमसप्तर्षिगोत्राः परस्परं भिन्नगोत्रीयाः स्वसमानगोत्रमेव हित्वा भिन्नगोत्रैः सह विवाहं कुर्वते एवं भृग्वङ्गिरसोऽपीत्यर्थः । अपरः प्रकारः अभिन्नमिति छेदः । भृगवो भृगुत्वेनाभिन्ना अपि स्वस्वगणान्त्यस्का गणान्तरीयैर्भृगुभिरेवाभिन्नविवाहं कुर्वते । अभिन्नानां विवाहोऽभिन्नविवाहः । एवमङ्गिरसोऽपि । तत्र भृग्वङ्गिरसोः सप्तर्षिबाह्यत्वेन तत्पक्षीयाणां गोत्रत्वाभावेन समानगोत्रत्वाभावान्मिथो विवाहे नास्ति दोषः । असमानप्रवरत्वादसमानगोत्रत्वाच्च । अस्यापवादः, न चेत्समानार्षेया बहवः स्युरिति । विदार्ष्टिषेणानां पञ्चानाम् ऋषित्रयसाम्यं समानर्षिबहुत्वम् । त्र्यार्षेयाणां हरितकुत्सानामृषिद्वयसाम्यं समानर्षिबहुत्वम् । तदुभयं येषां नास्ति भृग्वङ्गिरसां ते परस्परं विवाहं कुर्वते कुर्युरि-

त्यर्थः । सङ्ग्रहेऽप्युक्तम्,

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।

भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वारयेत् ॥ इति ।

इदं च जमदग्निगौतमभरद्वाजव्यतिरिक्तेष्वपि भृग्वङ्गिरोगणेषु समानप्रवरत्वे समानम् । अत एव तेष्वविवाहप्रयोजकत्वेन समानप्रवरत्वमेतद्विशेषसहितमेव प्रवरमञ्जरीकृता अभिहितमिति तत्रैवायं विशेषो यद्यपि वक्तुं युक्तः तथापि तेष्वेकमात्रप्रवरसाम्येऽपि सर्वेषामसाम्येऽपि वा सगोत्रत्वादेवेतरगोत्रवदविवाहसम्भवाद्भेतस्य विधानस्य तत्र व्यतिरेकतः किञ्चित्प्रयोजनमस्तीति तद्भिन्नभृग्वङ्गिरोगणविषयतया व्याख्यातम् । यत्र विशेषविधिर्नास्ति तत्रैकप्रवरसाम्येऽपि समानप्रवरत्वं, यथा भृग्वङ्गिरोगणभिन्नेषु । शेषेष्वेकोऽपि वारयेदिति वचनात् । एवं च केवलभृग्वङ्गिरसां गोत्रत्वाभावादसङ्कीर्णः प्रवरसाम्यादेवाविवाहः ।

नन्वेतेषां गोत्रत्वाभावे हरितमुद्गलादीनां सकलार्यावर्तवर्तिशिष्टाहताविगीतगोत्रत्वस्मृतिः कथमपलपितुं शक्या कथं वा गोत्रस्य प्रवरोपपत्तिः । द्वयोर्मुद्गलयोर्हरितयोरेव वा विवाहे सगोत्रविवाहनिमित्तं प्रायश्चित्तं च कथं स्यात् । कन्यादाने च हरितमुद्गलादीनां वरत्वे हरितगोत्रायेत्याद्यभिलापः शिष्टैश्च कथंकारं क्रियतेति चेत् ।

यदि बहुतरशिष्टानां निबन्धकृतां वाऽत्राभिनिवेशस्तदैवमुपपाद्यम् ।

तथाहि । सत्याषाढसूत्रे परिभाषायां प्रवरान्व्याख्यास्याम इत्युक्त्वा तेर्गोत्राणीति वचनादिति स्वरूपतः समानतया च गोत्रज्ञाने प्रवराणां हेतुत्वोक्त्या प्रवरत्वमेव गोत्रलक्षणमुक्तं भवति । ततश्च यमेवैकमधिकृत्य प्रवराम्नानं सोऽधिकृतो गोत्रम् । तस्यैव वा-

थिकृतस्य येषु स्वस्वगणान्तर्गतेषु अनुवृत्त्याऽयं साम्यं ते सगोत्रा इत्युक्तं भवति। तथाच हरितादिषु गोत्रव्यवहारः समञ्जसो भवति। अतोऽन्यत्र भृग्वङ्गिरसां गणादिति पर्युदासोऽप्युपपन्न इत्याहुः।

अन्ये त्वाहुः। यदुक्तं प्रवरत्वं गोत्रत्वं, यच्च तत्रोपपादकमुक्तं, तत्सर्वं स्मृतिचन्द्रिकास्मृत्यर्थसाराश्वलायनापस्तम्बकात्यायनादिसूत्रभाष्यादिसर्वप्रामाणिकनिबन्धादृतबौधायनोक्तलक्षणविरोधादुपेक्षणीयमेव। सत्याषाढवचनं तु क्वापि निबन्धे अदर्शनादनाकरमेव। साकरत्वेऽपि बौधायनोक्तगोत्रलक्षणाविरोधाय एक एव ऋषिर्यावदित्येतद्वचनसमानार्थतया सूत्रं व्याख्येयम्। तैः प्रवरैः समानैर्गोत्राणि समानानि अविवाहकारकाणि। अवश्यं चैवमेव सूत्रं व्याख्येयम्। कथमन्यथाऽगस्त्याष्टमानामित्यं गोत्रमित्याश्वलायनापस्तम्बादीनामुक्तिविरोधः परिह्रियेत। अननुष्ठानात्मकत्वेन च लक्षणविकल्पायोगात्। तथैव तद्विवरणे व्याख्यातं च, प्रवरैः गोत्राणां गणव्यवस्था समानता चेति। तेषां गोत्रत्वाभावेऽप्यन्यत्र भृग्वङ्गिरसां गणादिति पर्युदासोऽप्युपपद्यत एव। तथा गोत्रव्यवहारोऽपि। यत्तु भ्रान्तिप्रसक्त्या पर्युदासोऽयं न घटते। जमदग्निर्भरद्वाज इत्यादिपूर्वग्रन्थेन सप्तर्ष्यपत्यमेव गोत्रमित्यवधारिते पुनरुत्तरग्रन्थे भ्रान्त्युत्पादके प्रमाणाभावात्। न हि लोकान्वेष्यं गोत्रत्वं येन भ्रान्त्युत्पत्तिः स्यादिति। तदेतदनवधाननिबन्धनम्। यद्यपि लोकान्वेष्यं न गोत्रं किं तु सप्तर्ष्यपत्यमेव तथापि वस्तुतो गोत्ररूपाणां भृग्वङ्गिरोगणानां गोत्रसंदंशेन पाठात्तत्त्वादृश्यमेवात्र भ्रान्त्युत्पादकमस्तीति न प्रमाणाभावः। अत्र पक्षे दृष्टान्तासङ्गतिः।

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मण इति शास्त्रीयलक्षणात्कुण्डगोलके ब्राह्मण्यप्रसक्तेर्निषेध उपपन्नः। नचास्मादेवास्वरसात्समान-

प्रवरत्वमिति पक्षान्तरम् । सर्वत्र ह्यन्यथाऽनुपपत्तिप्रसूता लक्षणा । अत्र चोक्तरीत्योपपत्तौ सत्यां किमर्थं लक्षणास्वीकारः । तात्पर्यानुपपत्त्या लक्षणेत्याश्रयणेऽपि दृष्टान्तवैषम्यम् । यावन्तोऽनन्तरिताः समानगोत्रास्तावतां सकृदिति आश्वलायनसूत्रे आर्षेयाणि गृहपतेः प्रवरित्वा ब्रह्मादीनां मुख्यानामेवं द्वितीयतृतीयचतुर्थानामिति ग्रन्थेन वरणं क्रमेणोक्त्वा वरणे पक्षान्तरं तन्त्रमुक्तं यावन्तोऽनन्तर्हिता इत्यादिना ग्रन्थेन । वरणं तु प्रवराणामेवातः समानप्रवरेषु तन्त्रमुपपद्यतइति कृत्वा लक्षणा युक्ता । केवलभृग्वङ्गिरोगणेषु गोत्रताऽनाश्रयणेन प्रयाजाप्रीसूक्तव्यवस्था न स्यात् । कुतः, आश्वलायनेन सर्वे समानगोत्राः स्युरिति गाणगारिमतमुपन्यस्य कथं चाप्रीसूक्तानि भवेयुरित्यादिना तत्रानुपपत्तिं प्रतिसन्धाय नानागोत्राः स्युरिति शौनकमतमुपन्यस्तम् । अतश्चैवं गम्यते,गोत्रप्रयुक्ता प्रयाजादिव्यवस्था भृग्वाङ्गिरसादौ तु गोत्राभावादित्याद्यनुष्ठानवैकल्यं प्रसज्येतेत्याहुः । यदि तत्रापि गोत्रशब्दस्य प्रवरपरत्वं सप्रमाणकं तदा न चाशङ्का नचोत्तरम् । कपीनां भरद्वाजगर्गादिभिः सहाविवाहे सगोत्रत्वमेवासङ्कीर्णं प्रयोजकं न प्रवरसाम्यम् । कपीनां हि प्रवरा आङ्गिरसामहय्यौरुक्षय्येति भरद्वाजानामाङ्गिरसबार्हस्पत्यभारद्वाजेति । गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यसैन्येति आङ्गिरसगार्ग्यसैन्येति वा । ऋक्षाणामाङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातवचसेति । एवं शौङ्गशैशिरप्रभृतिद्व्यामुष्यायणानामपि प्रवरा उदाहर्तव्याः । यद्यपि कपिप्रवरेष्वाङ्गिराः समानो नेतरप्रवरस्तथाऽप्याङ्गिरोगणस्थत्वादेकमात्रप्रवरसाम्येनाविवाहप्रयोजकं सप्रवरत्वं भवति । नन्वगस्त्याष्टमसप्तर्ष्यन्यतमानुप्रवेशेन सगोत्रत्वं पूर्वमभिहितं तत्र कपिप्रवरेषु भारद्वाजस्य वरणाभावो ध्रियमाणतया भारद्वाजस्यानुप्रवेशाभावात्कथं कपीनां भारद्वाजग-

र्गादिभिः सगोत्रत्वम् । न च व्रियमाणतयाऽनुप्रवेशाभावेऽपि सत्तयाऽनुप्रवेशस्य सत्त्वात्तत्स्यात् । सत्तयाऽनुप्रवेशस्याविवाहाप्रयोजकत्वात् । अन्यथा ऽतिप्रसङ्गात् ।

अत्रेरेव परं वंशं तव वक्ष्यामि भारत ।
अत्रेः सोमः सुतः श्रीमान् तस्य वंशोद्भवो नृपः ॥
विश्वामित्रः सुतपसा ब्राह्मण्यं समवाप्तवान् ।
तस्य वंशमहं वक्ष्ये तन्मे निगदतः शृणु ॥

इति मत्स्यपुराणे विश्वामित्रस्यात्रिवंश्यत्वाभिधानाद्विश्वामित्रप्रवरेष्वत्रेः सत्तयाऽनुवृत्तेर्विश्वामित्राणामत्रिभिरप्यविवाहः स्यात् । किञ्च । भरद्वाजस्य पुत्रो भवमन्युस्तस्य महावीर्यनरगर्भाद्याः पुत्राः । तत्र महावीर्यादुरुक्षयः उरुक्षयात्कपिप्रभृतयः । तथा नरात्सङ्कृतिः सङ्कृतेर्गुरुवीतिरन्तिदेवप्रभृतयः । तथा गर्भात्सिनिः सिनेः सैन्यः सैन्याद्गर्गाद्याः । तत्र यथा भरद्वाजस्य कपिप्रवरेषु सत्तयाऽनुवृत्तिस्तथा सङ्कृतिप्रवरेष्वपि तस्य सत्तासम्भवाद्भारद्वाजानां सङ्कृतिभिरपि विवाहो न स्यात् । अपिच । सत्तयाऽनुवृत्तेरविवाहनिमित्तत्वे प्रवरविकल्पव्यवस्था न स्यात् । सत्तयाऽनुवृत्त्या प्रवराणां सर्वत्र साम्याद्विकल्पस्यैवाभावात् । यदि तु व्रियमाणतयाऽनुवृत्त्या विकल्पव्यवस्थोच्यते तर्हि तादृश्या एवानुवृत्तेरविवाहनिमित्तत्वं वक्तुमुचितम् । अन्यथाऽतिप्रसङ्गस्य दुर्वारतापत्तेः । अन्यच्च । भरद्वाजादीनामनुवृत्तिर्न सप्तर्षित्वेन प्रमाणाभावात्, किं तु प्रवरत्वेनैव वाच्या । तथाचोक्तम्,

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ।
तावत्समानगोत्रत्वमिति ।

तथाच व्रियमाणतयैव प्रवराणामविवाहनिमित्तत्वं न स-

त्तया । अन्यथा ऽनार्षेयसन्निपाते पञ्चार्षेयाणामविवाहः स्यादेवमसन्निपाते ऽनार्षेयाणामविवाह इति नियमो न स्यात् । सत्तयाऽनुवृत्त्या प्रवराणां सर्वत्र साम्यात् । तथाच सगोत्रत्वेऽपि क्रियमाणतयैवानुवृत्तिरङ्गीकार्येति । अथ यस्मिन्वंशे य उत्पन्नस्तस्य तेन सहाविवाह इति तद्वंशोत्पन्नत्वमेवाविवाहप्रयोजकं, तर्हि भरद्वाजवंशोत्पन्नत्वात्सङ्कृतीनामपि भरद्वाजैर्विवाहो न स्यात् । तथाऽङ्गिरसो बृहस्पतिस्तस्माद्भरद्वाज इति अङ्गिरोवंश्यैर्गौतमादिभिरपि भरद्वाजानां विवाहो न स्यात् । विश्वामित्राणामत्रिभिरपि विवाहो न स्यात् । किमपरमाङ्गिरसानां सर्वेषां भार्गवाणां च सर्वेषां परस्परमविवाहः स्यात् । तस्मात्सत्तयाऽनुवृत्तिरविवाहे न निमित्तमिति ।

अत्र वदन्ति,

भरद्वाजाश्च कपयो गर्गा रौक्षायणा इति ।
चत्वारोऽपि भरद्वाजा गोत्रैक्यान्नान्वियुर्मिथः ॥

तथा,

भरद्वाजर्क्षकपयो गर्गा रौक्षायणा द्विजाः ।
पञ्चैते हि भरद्वाजा गोत्रैक्यान्नान्वियुर्मिथः ॥

तथा,

कपिगर्गभरद्वाजा मिथो रौक्षायणा द्विजाः ।
नोद्वहेयुः सगोत्रत्वात्प्रवरैक्याच्च न क्वचित् ॥

एवमादीनि स्मृत्यर्थसारकारादीनामतिप्रामाणिकशिष्टपरिगृहीतानां वचनानि कपिभरद्वाजयोर्विवाहनिषेधबोधकानि सन्तीति तयोरेव परस्परमविवाह इति निर्णीयते । सङ्कृत्यादिभिस्तु तथा निषेधाभावाद्भवति । नचास्मादेव निषेधबलात्तयोरविवाहे सिद्धे सत्तयाऽनुवृत्तिकथनमभियुक्तानां व्यर्थं स्यात् । नानेन वाक्येन

निषेधः कपिभरद्वाजत्वेनोच्यते किं तु सगोत्रत्वेन । तस्य च त्रियमाणतयाऽनुप्रवेशाभावेनासम्भवान्निषेधोऽनर्थकः स्यात् । अतस्तदन्यथाऽनुपपत्त्या तद्धेतुभूते सगोत्रत्वेऽपि परमशिष्टैर्यथा त्रियमाणतयाऽनुवृत्तिरनपभ्रष्टस्मरणपरम्परामूलककल्पसूत्रानिबद्धैव सगोत्रत्वनिमित्तमङ्गीक्रियते तथा सत्तयाऽनुवृत्तिरपि तादृश्येव तथेति विज्ञायतइति नास्त्यतिप्रसङ्गः । अस्ति च भरद्वाजस्य कपिषु तादृशी सा । भरद्वाजानां सर्वेषामविवाह इति बौधायनसूत्रमप्येतदभिप्रायमेव । तत्र सत्तयाऽनुवृत्तिः

स्मृत्यर्थसारे

उक्ता,

जमदग्निभरद्वाजविश्वामित्रात्रिगौतमाः ।
वसिष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते ।
त्रियमाणतया वापि सत्तया वाऽनुवर्त्तनम् ॥
एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते । इति ।

प्रवरमञ्जरीकारेणापि,

गर्गा अपि भरद्वाजा भारद्वाजानुवर्तिनः ।
पञ्चप्रवरगर्गेभ्यो भिन्नेष्वस्यानुवर्त्तनम् ॥
सत्तयाऽस्त्येव सैन्यस्य त्रिमुनिष्वपि दर्शनात् । इति ।

तथाऽनपभ्रष्टस्मरणपरम्परापि । तथाहि । आपस्तम्बेन भरद्वाजद्व्यामुष्यायणशौङ्गशैशिरिरुक्षान् क्रमेणोक्त्वा गर्गात्पूर्वम् अथ कपीनामित्यादिग्रन्थेन भारद्वाजमध्ये कपीनामुक्तत्वात् तथा कात्यायनेन भारद्वाजान् द्विप्रकारान् गर्गानुक्त्वा तत्संलग्नतयैव कपीनामुक्तत्वाद्भरद्वाजापत्यत्वनिर्णयात् । अत्रार्थे पुराणानामप्यविप्रतिपत्तिः । तथैव भगवता मात्स्येन भरद्वाजगर्गौ क्रमेणोक्त्वा गर्गसं-

ऽङ्गिरसैव कपिरुक्तः। विष्णुपुराणं त्वत्यन्तमत्रार्थेऽनुकूलम्। अङ्गिरसो बृहस्पतिस्ततो भरद्वाजस्तत आमहय्यस्तत उरुक्षय्यस्ततः कपिरिति वंशानुपूर्व्यास्तत्राभिधानात्। ननु स्मृत्यर्थसारादिषु गर्गादिभिः सह यो विवाहनिषेधः स गर्गान्तर्गतकपिविषयो भविष्यति। तथाहि। इह द्वौ कपी एको गर्गवंशीयः स सर्वात्मना गर्गसादृश्याद्गर्गान्तर्गतत्वात्तैः सह विवाहं नार्हति। अपरः केवलाङ्गिरोमध्यवर्त्ती उरुक्षय्यरूपविलक्षणप्रवरो भिन्नगणः सर्वभरद्वाजादिभिः सह विवाहमर्हति। अत एव

पृषदश्वा मुद्गला विष्णुवृद्धाः
कण्वोऽगस्त्यो हरितः सङ्कृतिः कपिः।
यस्कश्चैषां मिथ इष्टो विवाहः
सर्वैरन्यैर्जामदग्न्यादिभिश्च॥

इति वचनेऽपि आदिपदेन चकारेण वा गौतमभरद्वाजानामपि ग्रहणम्। अत एव आश्वलायनसूत्रे भरद्वाजकुले केषांचिद्विवाहाभावमुक्त्वा कैश्चिदिदं वचनं पठ्यते।

एतेषां तु विशेषो ऽयमामहय्याभिधानकैः।
उरुक्षय्यैश्च कपिभिर्विवाहस्त्रिषु इष्यते॥

इति स्वतन्त्रकपीनां भारद्वाजैः सह विवाहः कण्ठरवेणैवोक्त इति चेत् न। गर्गवंशे कपिभूमिगोत्रमस्ति न तु कपिगोत्रमिति न निषेधस्य तद्विषयत्वम्। अथवा गर्गवंशे एककपिव्यक्तिसत्त्वेऽपि न तन्मात्रेण निषेधस्यान्यथा सिद्धिर्वक्तुं युज्यते। निषेधवाक्येषु तुल्यकक्षयोः कपिभरद्वाजगणयोरेव निषेधप्रतीतेः। यदि च स्वतन्त्रः कपिगणो न स्यात्तदा गर्गवंशीयकपिगोत्रव्यक्तिमात्रेण निषेधस्यान्यथासिद्धिः कल्पयितुमपि शक्येत, न त्वन्यथा। किञ्च गर्गान्तर्गतपरतन्त्रकपेर्गणवाचकगर्गपदेनै-

व भरद्वाजैर्विवाहनिषेधसिद्धेः कपिपदं कथं न व्यर्थं स्यात् । कथंतरां चापस्तम्बादिप्रवरग्रन्थविरोधश्च न स्यात् । तस्मात्पृषदश्वेत्यादिवाक्यद्वयं पूर्वोक्तदोषकलापादनादरणीयमेव । नच बौधायनेन भरद्वाजगणमध्ये तस्यापाठो भरद्वाजत्वाभावसाधकः । ऋक्षेष्वतिप्रसङ्गात् । न हि सर्वे सर्वैर्निबध्यन्ते । नच पूर्वोक्तं श्लोकद्वयमाश्वलायनीयम् । भाष्यकारादिभिरव्याख्यातत्वात् । प्रत्युत तैः कपीनां भरद्वाजत्वस्यैवोक्तत्वात् । गोत्रप्रवरानुक्रमणसमाप्त्यनन्तरमभिधानात् अनन्वितार्थत्वेनासङ्गतेश्च । यच्चोक्तं सत्तया तु प्रवेशस्याविवाहनिमित्तत्वे प्रवरविकल्पव्यवस्था न स्यादिति । तदपि न । प्रवरेषु सत्तयाऽनुप्रवेशानङ्गीकारात् । तस्मात्कपिषु सत्तया भरद्वाजानुवृत्त्या भरद्वाजगोत्रत्वात्प्रवरभेदसत्त्वेऽप्यसंकीर्णात्सगोत्रत्वादेव तदन्यैर्भरद्वाजैः सहाविवाह इति सिद्धम् ।

तथाच प्रवरमञ्जरीकारः

शिष्टसंमतिमाह,

शुद्धाङ्गिरोगर्गमध्ये कपयः पठिता अपि ।
आचार्यैरुपवर्षाद्यैर्भरद्वाजाः स्युरेव ते ॥
भरद्वाजगणे यस्मादापस्तम्बोऽपठत्कपीन् ।
पराशरश्चतुर्थेऽशे भरद्वाजान्वये कपीन् ॥
नामसंख्याक्रमेणैव पुराणे वैष्णवेऽवदत् ।
मत्स्यो हरिरिदं मात्स्ये पुराणे स्पष्टमब्रवीत् ॥
मार्गमेनमजानन्तो मूढा मन्वादिभाषितम् ।
भरद्वाजकपीनां तु प्रवदन्ति मिथोऽन्वयम् ॥
निबन्धिनो हि नेच्छन्ति सर्वे नारायणादयः ।
अविगीतसमाचारविरोधोऽपि भवेदिह ॥
गणभेदभ्रमान्मूढा विवाहं कारयन्ति चेत् ।

भरद्वाजत्वगर्गत्वकपित्वैः सहगोत्रताम् ॥
अथो मौख्यांश्च संवीक्ष्य गुरुरल्पगमन्वयम् ।
प्रयोक्तृवक्तृकर्त्तारः प्राप्नुवन्त्यन्वये स्फुटम् ॥
गर्गा अपि भरद्वाजा भरद्वाजानुवर्त्तिनः ।
पञ्चार्षगर्गेभ्यो भिन्नेष्वस्यानुवर्त्तनम् ॥
सत्तयाऽस्यैव सैन्यस्य त्रिमुनिष्वपि दर्शनात् ।
द्विविधानपि गर्गास्तानुपवर्ण्य महामुनिः ॥
अनुक्रम्य त्वेवैवाद्यान्भरद्वाजतया जगौ ।
किंचित्त्रिमुनिगर्गाणां भरद्वाजर्षिवर्णिनाम् ॥
अविवाहं स्तुवन्गार्ग्यो भरद्वाजत्वमिच्छति ।
अतो यथा सगोत्रत्वादत्र्यादौ वर्गपञ्चके ॥
न विवाहस्तथा सर्वभरद्वाजगणेष्वपि ।
सप्तर्षित्वादनुद्वाहः सिद्ध इत्युपरम्यते ॥

एवमन्यदप्येवंजातीयकमसङ्कीर्णं सगोत्रत्वस्योदाहरणमूह्यम् । स्मृतिचन्द्रिकाकारस्त्वाह । एकस्यैव गोत्रस्य यत्र विकल्पेन प्रवरभेदः भृग्वङ्गिरोगणान्तर्गतस्य वा त्र्यार्षेयस्य द्विप्रवरभेदः पञ्चार्षेयस्य त्रिचतुरप्रवरभेदस्तत्र भिन्नभिन्नप्रवरपरिग्राहिणां प्रवरभेदे सत्यप्यसंकीर्णात्सगोत्रत्वादेव परस्परमविवाह इति ।

अत्रेदं सिद्धम् । जामदग्न्यभिन्नभृग्वपत्येषु गौतमभरद्वाजभिन्नाङ्गिरोऽपत्येषु चैकैकगणान्तःपातिनामविकल्पितैकरूपप्रवराणां सर्वप्रवरैक्यादविवाहः । येषां तु विकल्पिता अभिन्नरूपा भिन्नभिन्नगणस्थाश्च प्रवरास्तेषां परस्परं त्र्यार्षेयपञ्चार्षेयभेदेन द्वित्रिप्रवरसाम्यात्, एकैकगणान्तःपातिनामगस्त्याष्टमसप्तर्ष्यपत्यानां गोत्रसाम्यात्, अविकल्पितप्रवराणां सर्वप्रवरसाम्याच्चाविवाहः । भृग्वङ्गिरसां तु विकल्पितप्रवराणां द्वित्रिप्रवरसाम्यात्, इतरेषामेकप्रवरैक्याद-

पि । भिन्नभिन्नगणनिविष्टानां तु गोत्रसाम्यात्प्रायशः प्रवरैक्या-च्च । भृग्वाङ्गिरोगणतदतिरिक्तभेदेन प्रवरसाम्यं भाग्वत । क्वचि-त्समानगोत्रत्वादेवेति ।

इदानीं गोत्राणि तद्गणाश्च संख्याविशेषविशि-ष्टास्तथा तत्प्रवराश्च स्वरूपतत्संख्याविकल्पविशिष्टा निरूप्यन्ते ।

ननु गोत्रप्रवराणां शाखोपशाखाभेदेनानन्त्याद् बौधायनाप-स्तम्बकात्यायनाश्वलायनकल्पसूत्रमत्स्यपुराणादिषु चैकत्राश्रुता-नामप्यन्यत्र श्रवणादानन्त्यावगमात्तत्तन्महर्षिगणान्तर्गतानां गो-त्राणां प्रवराणामपि स्वरूपक्रमविशेषेषु गोत्रप्रवरऋषिनामधेय-वर्णेषु च संवादाभावाच्चाशक्यं सामस्त्येन निरूपणमिति चेत्, न ।

गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।

ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥

इति बौधायनोक्तप्रवरसंख्यानुसारेणैव निरूपणात् । अत एव स्मृत्यर्थसारकृता बौधायनानुसरणमेव कृतम् ।

मुनिप्रणीतप्रवरैरूनपञ्चाशता वयम् ।

अनन्तान्यपि गोत्राणि वर्गीकृत्याभिदध्महे ॥

इत्यादिना बौधायनवाक्यस्यार्थो मञ्जर्यां कृतः । दशगुणि-तं सहस्रमयुतमुच्यते । दशगुणितमयुतं लक्षात्मकं नियुतमुच्यते । दशगुणितं नियुतं प्रयुतमुच्यते । दशगुणितं प्रयुतमर्बुदं कोट्यपरप-र्यायमुच्यते । सहस्रप्रयुतार्बुदशब्देषु बहुत्वविशेषविवक्षायां त्रिष्वपि त्रिगुणीकृतेषु तदर्थेषु गोत्राणां तिस्रः कोटिसंख्या भवन्ति । त-दविवक्षायां पुनरधिकान्यपि तानि भविष्यन्तीति कियत्यः को-टिसंख्या इति नावधारयितुं शक्यते । अत्र संख्याविवक्षायां गो-त्राणां सान्तत्वेऽप्यनन्तानीत्यभ्युपेत्यत्वाद्तया ऽपिशब्दो व्याख्ये-

यः । मुनिप्रणीतेत्यनेन ऋषिदर्शनादित्यस्यार्थ उक्तः । ततश्च यद्यपि अपत्यापत्यवद्भावेन साक्षात्परम्परयाऽवस्थितेषु ऋषिषु एतान्येतावन्ति च गोत्राणि एते एतावन्तश्च प्रवरा इति विवेकेन शीघ्रं निरूपयितुं न शक्यन्ते तथापि प्रवराध्यायकर्तृभिर्ऋषिभिर्ये प्रणीताः प्रणयनेन नियमिताः ऊनपञ्चाशत्संख्यया भार्गवादिरूपेण स्वरूपविशेषतश्च परिच्छिन्नाः प्रवराः तैर्वर्गीकृत्यावान्तरभेदभिन्नानि कृत्वाऽनन्तान्यपि गोत्राणि अभिदध्महे इति स्मृत्यर्थसारवचनस्यार्थः । वर्गाः वंशा गणा इति पर्यायाः । ननु प्रवराणामूनपञ्चाशत्त्वं न नामतो नियन्तुं शक्यम् । अष्टनवतिसंख्ययाऽऽश्वलायनेन प्रतिपादनात् । आपस्तम्बकात्यायनसत्याषाढादिभिर्न्यूनाधिकसंख्याभिरप्यभिधानादिति चेत् । नैष दोषः । बौधायनक्रममाश्रित्यैवोनपञ्चाशदिति संख्योच्यते । तत्क्रमे च वक्ष्यमाणगणानां मध्ये तत्तद्गणे क्रियमाणत्वेन समुदायीकृत्योक्तानां प्रवराणां तादृशान्समुदायानाश्रित्येति अन्यत्र गणानां न्यूनाधिकसंख्ययाऽभिधानेऽपि न काचित् क्षतिरिति बहवः । अस्माभिस्त्वाश्वलायनादिप्रणीतानां सर्वेषामपि गोत्रप्रवरनिबन्धनानां प्रामाण्याविशेषात्प्रसिद्ध्यविशेषाच्च बौधायनेनानुक्तमपि क्वचित्क्वचिद् गोत्रतद्गणप्रवरविकल्पादिकमाश्वलायनादिसूत्रान्तराद्युक्तोपसंहारेण गोत्राणि प्रवराश्चोच्यन्ते ।

तत्र पूर्वं भृगुगणाङ्गिरोगणौ महागणौ निरूप्येते । तत्र भृगवो द्विविधाः जामदग्न्या अजामदग्न्याश्च । तत्र जामदग्न्येषु वत्सबिदौ द्वौ गणौ । द्वितीये तु पञ्च गणाः । ते च आर्ष्टिषेणाः यस्काः मित्रयुवो वैन्याः शुनका इति । एते एव केवलभृगव इति व्यवह्रियन्ते । तत्रास्मिन् गणसप्तके पञ्चार्षेयं गणत्रयं, ततस्त्र्यार्षेयं गणत्रयं, तत एक एकार्षेयः । तत्र जामदग्न्याः मार्कण्डेयाःमाण्डव्या माण्डूके-

पाः काशेयाः कासयः आलेखनाः दार्भायणाः शार्कराक्षा देवन्तायनाः* शौनकायनाः माधूकेयाः पार्षिकाः साङ्क्याः 'कांसा इत्यपि क्वचित्' मभायनाः पैलाः पैङ्गलायनाः दार्भेषकयो बाभ्रकयो वैश्वानरयो वैहीनरयो विरोहिता बाभ्रा प्रभ्रा इत्यपि गौञ्जायणाः हैकयः काशकृत्स्ना बादूभूतकाः कृतभागाः पैतिशायना जानायनाः पाणिनिः वाल्मीकिः स्थौलपिण्डयः सैषातथा जिह्वीतयः सावर्णिकायनाः वालायनाः सौकृतयो मण्डत्रिव सौविष्टयो हस्त्यग्नयो हस्ताग्नयः शौद्धकयः शौद्धाकयः वैकर्ण्या द्रोणजिह्वयः औरसयः काम्बरोदरयः कम्बोरकुद्दहलिर्विरूपाक्षा ष्टकाश्वा उच्चैर्मन्यवो हैमत्याः आर्यायणा मार्कायणाः काहायना वापवाः दैवमत्याः आर्कयणाः काङ्कायनाः वायनीनः शार्ङ्गरवाः करवचन्द्रमसो गाङ्गेयाः नौपेयाः याज्ञियाः जाबालिः बाहुमित्रायणाः आपिशलयः वैष्टपुरेयाः लोहितायनाः उद्गाक्षाः मालायनाः शारद्वतायनाः राजतवाहाः वासाः वात्स्यायना नालायना वागायना नुसातकयो जैग्नातिजीवन्तयः काम्बलोदरयो वैहीनरिवैरोहित्या रेखायनिपार्षतिवैश्वानरिवैरूपाक्षिपाणिलिष्टकाश्वकानामुच्चयमानसात्यकर्णिवैष्टपुरेयिवालाकितौलकेशिनाम् तभागार्तभागाजिहीतिथयः स्थौमाङ्गिरयः स्थौलसौरवा बर्हिषः देवमतयः गार्ग्यायणा गार्भायणा गोष्ठायना वैशम्पायनाः गालवाः साङ्कृत्यः रैतिकायणाः भ्राष्ट्रेयाः भ्राक्षेया लाक्षेया लाकुचयो ललाटयः पारिमण्डलयो बयो गौवयः सौष्मिकयः सात्यकायनाः कीचहस्तयः अनुलोमिनः कोठाः श्रौक्षाः कौश्वाक्षयः स्मरध्वजयः बासा छेपना नैकर्षयः शाकरयाः पाकानुमतयः जैकजिह्वयः जैवाष्मनय आश्मकमा निरापयो वासयः सादनाः स्योषाः स्यन्दनयः क-

* देवतायना इति प्रवरमञ्जर्यां पाठः ।

ण्ठेरणयो भत्रेरणयः मौंगोलयो माध्योदा दार्भिर्नडायनो वैराय-णो वैन्यो रौहित्यायनिः कपानीलुः सावर्णिर्विकस्वरुर्विष्णुस्तौ-लकेशिर्जङ्घतो वीजिनः फेनपाः स्थलिनः शिखापत्तिर्जलधिः सेन-जित् कृत्स्नः पौङ्गल्यायनिर्दिवपतिः ऋषभः स्तुतलवः कोपियज्ञो मित्रयज्ञो हायनिर्वैकर्णेयिर्भाल्लकायनिर्लाक्षण्यः शाल्यायनिः मा-ल्यायनिः कौटिलिः सौक्तिः कोटरः साक्षी सान्द्रमणिः जैकशून्यः केयलेडिः हिकश्वरिः सारध्वजिर्नैमिश्यो लोष्टाक्षिर्गैवेरणिः पौर्ण-सौगन्धिः काशकृत् विलभृत् सौमदायना वैरायणाः स्वानुमतयो मण्डविग्राः शौक्रायणास्त्वाष्ट्रयाः कौवहुण्डयः शौनायनाः शाकपौ-र्णयः वीहमतयः मायामतिराध्रेवकिः कौशनोऽशोकन इत्यपि क्व-चित् मौद्गल्यः कारवचः सान्तपनायना गेह्वा भैहिकिकिरुपस्त-स्वत औ ल्यग्निर्धर्वारागिराणिः श्येनपा गतिर्नैकपिः (नैकर्षिः) शौ-द्कर्णिर्निडायनश्रीवत्समण्डूका इत्यादयो वत्साः ।

तत्र ये जामदग्न्या वत्सास्तेषां पञ्चार्षेयः प्रवरो भार्गवच्यावनाप्नवानौर्वजामदग्न्येति होता, जमदग्निवदूर्ववदप्नवा-नवच्च च्यवनवद् भृगुवदित्यध्वर्युरिति । लौगाक्ष्यापस्तम्बाश्व-लायनबौधायनानुसारिणां भृगुवच्च्यवनवदप्नवानवदूर्ववज्जमद-ग्निवदित्यध्वर्युरिति । कात्यायनानुसारिणां भार्गवौर्वजाम-दग्न्येति त्र्यार्षेयोऽपि क्वचित् । अत्र जामदग्न्यस्य सप्तर्षेः प्रवरे-ऽनुवृत्त्या परस्परं सगोत्रत्वाज्जामदग्न्यैस्तथोक्तैः परस्परं स्वेस्वे गणे न विवाहः, समानर्षिबहुत्वात् । अजामदग्न्यानां वत्सानां त्र्यार्षेय एव भार्गवच्यावनाप्नवानेति ।

विदाः शैला अवटाः शैलाः प्राचीनयोग्याः अ-भयदानाः काण्डरथयो वैतभृताः पुलस्तयः ताम्राय-णाः नाष्ट्रयणाः क्रौञ्चायणाः कामलाः पौलस्त्या वेदभृताः

अभयजातास्त्रैकायनाः भ्राजोत्याः भाद्न्त्याः ष्टैकागनाः भृआ-पना इत्यादयो विदाः। तेषां भार्गवच्यावनाप्नवानौर्वैवैदेति होतुः पञ्च प्रवरा भवन्तीति बौधायनाश्वलायनौ। विदवदूर्ववदप्नवानवच्च्यवनवद् भृगुवदित्यध्वर्युः। भार्गवौर्वजामदग्न्येति त्र्यार्षेयोऽपि क्वचित्। द्विविधा अप्येते विदा जामदग्न्या एव। पञ्चार्षेयेष्वपि और्वशब्दसमन्वयात् जमदग्नेः सत्तयाऽनुवृत्तिप्रतीतेस्तस्य जामदग्न्येष्वेव दृष्टत्वात्। तथाचौर्वजामदग्न्यशब्दौ जामदग्न्यत्वप्रयुक्ताविल्याश्वलायनसूत्रवृत्तिकारेणोक्तम्।

अथाजामदग्न्याः। आर्ष्टिषेणाः नैरयथो ग्राम्यायणयः काण्वायनाः क्वचित्कार्णायनाः क्वचित्कात्यायना इति वा पाठः चान्द्रायणाः पौटकलायनाः सिद्धाः सुमनायनाः गौराग्भिर्भृग्वन्दीयो मार्गपथो नैकासिरापस्तम्भिर्भालिवः कार्दमायनिः गार्दभिरनूपश्चद्वायनिः कविराश्वाभिराधितापिरित्यादय आर्ष्टिषेणाः। तेषां पञ्चार्षेयः प्रवरः भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति होता, अनूपवदार्ष्टिषेणवदप्नवानवच्च्यवनवद्भृगुवदित्यध्वर्युः। भार्गवार्ष्टिषेणानूपेति त्र्यार्षेयोऽपि क्वचित्। वत्सविदार्ष्टिषेणानां परस्परमविवाहः। कुतः, पञ्चार्षेयाणां भार्गवच्यावनाप्नवानेति त्र्यार्षेयसाम्यात्। त्र्यार्षेयाणां द्व्यार्षेयसाम्यात्। वत्सविदयोर्जामदग्न्यत्वेन सगोत्रत्वात्पञ्चप्रवरे त्रिप्रवरसाम्येन च न विवाहः। तत्रागस्त्याष्टमसप्तर्षेर्जमदग्नेर्वत्सेषु क्रियमाणतयाऽनुवृत्तेर्जमदग्निमुपक्रम्य विदानामप्युक्तत्वात्सत्तया तस्यैवानुवृत्तेः तेषां सगोत्रत्वम्। ननु वत्सविदाभ्यामार्ष्टिषेणस्यानुद्वाहनिमित्तं न सगोत्रत्वमस्याजामदग्न्यत्वात्। नापि प्रवरसाम्यं, वत्सविदयोर्भार्गवौर्वजामदग्न्येति, आर्ष्टिषेणानां भार्गवार्ष्टिषेणानूपेति त्रिप्रवरपक्षे भेदादिति चेत् न। वत्सा विदा आर्ष्टिषेणा इत्येतेषामविवाह इति बौ

यापनोक्तेः । अजामदग्न्यवत्सेऽप्येषामेते पञ्चावत्तिन इति बौधायनोक्त्यैव पञ्चावत्तिनो भवन्ति । यत्त्वार्ष्टिषेणेष्वपि केषांचि ज्जामदग्न्यवत्सव्यवहारः स पञ्चावत्तित्वसाम्यादविवाहसाम्याच्च । न त्वेषां वस्तुतस्तत्त्वम् । तथात्वे मानाभावात् । स्वेस्वे गणे सर्वत्राविवाह इति स्पष्टमेवेति न विचारार्हम् । भार्गवच्यावनाप्नवानेति वात्स्यानां त्रिप्रवराः भार्गवच्यावनाप्नवानवत्सपुरोधसेति वत्सपुरोधसकयोः पञ्च प्रवरा भवन्ति । बैजवनिमथितयोर्भार्गवच्यावनाप्नवानबैजवनमथितेति पञ्च प्रवराः । क्वचिदिदं त्रयम् । अर्षेयसाम्याच्चयाणामेषां परस्परं वत्सादिभिश्च पूर्वोक्तैस्त्रिभिः परस्परमविवाहः ।

यस्को मौनो मूको वाधूलो वर्षपुष्पो भागलेयो भागवित्तयो हुर्दिनो भास्करो देवन्तायनो वार्कलयो माध्यमेया वासयः कौशाम्बेयाः कौटिल्याः सत्यकयः चित्रसेनाः भागुरिकयो वीतहव्याः भागुरा मौसलाः जीवन्तायनाः अर्थलेखयो हकाश्मकयो मदोकयो वरेयो गौरीक्षिता दैर्घचिताः पञ्चालवाः पौवला गोदायनाश्चण्डमोदनो भागालिर्भागवित्तिः पिलिङ्गिलिः काश्यपिः वालेयिः समदागेयिः सौरिज्वरिः भागन्तयः सानुष्टयो मादायनाः शालङ्कायनाः तर्क्याः मावारेयाः शार्कराक्षिः कौटिल्यो भिलेभिर्वाह्यो हालेयो दीर्घचितः सार्ष्टिः सावेतस इत्येते यस्कात्रिप्रवराः ।

भार्गववैतहव्यसावेतसेति होता, सवेतसवद्वीतहव्यवद्भृगुवदित्यध्वर्युः । यस्कादिगणानामुत्तरैर्मित्रयुवादिभिः पूर्वैर्वत्सादिगणैश्च विवाहः, असगोत्रत्वात् । भ्रियमाणतया सत्तया चैकस्यानुप्रवेशाभावात् । न च भार्गवैकप्रवरसाम्यादविवाहः ।

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।

भृग्वङ्गिरोगणेष्वेवमिति नियमात्तृतीयप्रवरसाम्याभावेन स-

मानार्षत्वाभावात् । परं तु तेषां सर्वप्रवरसाम्यात्स्वगणे एव परस्परमविवाहः । स्वगणान्तःपातिनां हि यस्कमौनमूकवाधूला-दीनां गोत्राणां भार्गववैतहव्यसावेतसेति प्रवरैक्यमिति स्पष्टमेव ।

मित्रयुवो रौक्ष्यायनाः सापिण्डनाः सुरभिनेयाः माल्याया वास्याया वाल्याया महावाल्याः तार्क्ष्यायणा रौक्षायणा वाजायनाः उक्षायणाः कैतवायनाः खालायनाः शकटाक्षा मैत्रेयाः साचर्या द्वैनायनाः आपिशलाः आठिकायनाः हंसजिह्वा रौप्यायणाः सापिण्डिनः पिकाक्षा मोदायनाः कापिशायनाः वाण्डेयाः सक्षिता मैत्रयुज आपिशायनाः पाटिकायना माध्यश्वो वाध्र्यश्व इत्यपि क्वचित् दिवोदास इत्येते मित्रयुवाः । तेषां त्र्यार्षेयः प्रवरो भवति । भार्गववाध्र्यश्व दैवोदासेति होता, दिवोदासवद्वाध्र्यश्ववद् भृगुवदित्यध्वर्युः । दिवोदासा एते इत्यपि केचित् । एतएव प्रवराः । वाध्र्यश्वेत्येकार्षेयो वा । एतेषां परस्परमविवाहः समानर्षिबहुत्वात् । पूर्वोक्तैश्च विवाहः सगोत्रत्वाभावात् । एवमुत्तरत्र भृगुगणसमाप्तिपर्यन्तं ज्ञेयम् ।

वैन्याः पार्थाः बाष्कलाः श्येताः एते वैन्याः । ते त्रिप्रवराः । भार्गववैन्यपार्थेति होता, पृथुवद्वेनवद् भृगुवदित्यध्वर्युः ।

शुनकाः गार्त्समदाः यज्ञपयः सौगन्धयः खार्दमायना गार्भायणा भार्गायणा इति क्वचित् क्वचिदाग्रायना इत्यपि मत्स्यगन्धाः मत्स्यूषाः कार्दमायनाश्चोक्षाः श्रोण्याः वात्स्यायना राजबन्धवयाः एते शुनकाः

तेषामेकः प्रवरः । शौनकेति होता, शुनकवदित्यध्वर्युः । गार्त्समदेति होता, गृत्समदवदित्यध्वर्युरिति वा । द्विप्रवरो वा । भार्गवगार्त्समदेति होता, भृगुवत् गृत्समदवदित्यध्वर्युः । त्रिप्रवरो वा । भार्गवशौनकगार्त्समदेति होता, भृगुवच्छुनकवत्

गृत्समदवत् इत्यध्वर्युः । भार्गवशौनहोत्रगार्त्समदेति त्रिप्रवरा इति केचित् । अत्र केचित् । शुनकानां जनकभेदेन चतुर्विधत्वात्तत्तच्छुनकवंश्यानां तत्तत्प्रवरकल्प इत्येवं व्यवस्थितविकल्प इति । शुनकादेवोत्पन्नाः केचिद् गृत्समदादेव केचिद् भृगोः केचित्, भृगोरपत्यं शुनहोत्रस्तदपत्यं गृत्समद इति । तत्र शुनकनामधेयमात्रमेकं वंशास्तु भिन्ना एव । नन्वेवं भृगोरपत्यं शुनकस्तदपत्यं गृत्समदस्तदपत्यं शुनका इत्येक एव वंशः कस्मान्न कल्प्यते । नैतत्सुष्ठूच्यते । सत्याषाढवचनविरोधात् । तथाहि । सत्याषाढो वदति र्षीननन्तरानत ऊर्ध्वान्मन्त्रकृतो ऽध्वर्युर्वृणीते अमुतोऽर्वाञ्चो होतेति । अत्रानन्तरानित्यस्यायमर्थो व्याख्यातो भाष्यकारेण मातृदत्तेन, मन्त्रदृग्भिरन्यैरव्यवहितानिति । तत्रैकवंशत्वे सति मन्त्रदृग्भिरेव व्यवधानं कल्पितं स्यात् । तस्माद्युक्तो व्यवस्थितविकल्पः । एवं वक्ष्यमाणानामपि गर्गहरितकण्वरथीतरशाण्डिल्यादीनां वंशभेदकल्पनया प्रवरविकल्पा व्याख्येया इति । तदसत् । तत्र हि वंशभेदः कल्प्यते यत्रानादिपरम्परया ऽविगीता स्मृतिः । यथा वत्सानां, वयं जामदग्न्या वत्साः वयमजामदग्न्या इति । नैवं शुनकेषु तादृशी स्मृतिरस्ति । न च प्रवरभेद एव तत्कल्पकः । तस्य प्रयोगभेदादेवोपपत्तेः व्रीहियवयोरिव । न च तत्कल्पकमन्यत्प्रमाणमस्ति । तस्माद्व्यवस्थित एवायं विकल्प इति वृत्तिकारः । इदानीन्तनेषु तु पूर्वपूर्वपरिग्रहवशाद्व्यवस्था युक्ता । एतेन सर्वे विकल्पा व्याख्याताः । एते चत्वारोऽपि भिन्नगोत्राः स्वस्वगणे सगोत्राः सर्वप्रवरसाम्यादविवाह्याः । प्रवरविकल्पेऽप्येकत्र द्विप्रवरसाम्यं सर्वत्राविवाहप्रयोजकम् । विकल्पाभिधायिभिरपि कात्यायनादिभिरेतेषामविवाह इत्युक्तत्वाच्च । अत एव साम्यादेवंजातीयकेष्वपि गोत्रत्वप्रसिद्धिर्लौकिकानाम् । वैदविश्वज्योतिषां त्र्यार्षेयः प्रवरः । भार्गववैदविश्व-

ज्योतिषेति। शाठरमाठराणां त्र्यार्षेयः प्रवरः, भार्गवशाठरमाठरेति। क्वचिदेतद्गणद्वयम्। इति बौधायनोक्तो भृगुगणनिर्णयः।

अथापस्तम्बेनोक्तो भृगुगण उच्यते। स षड्गणो विदवर्जितः। यथा जामदग्न्या वत्सास्ते पञ्चप्रवराः। भार्गवच्यावनाप्नवानौर्वजामदग्न्येति होता, जमदग्निवदूर्ववदप्नवानवच्च्यवनवद् भृगुवदित्यध्वर्युः। त्र्यार्षेयमुहैके। भार्गवौर्वजामदग्न्येति होता, जमदग्निवदूर्ववद् भृगुवदिति अध्वर्युः एष एवाधिकृतः सावर्णिजीवन्तिजाबाल्यैतिशायनवैरोहित्यावटमण्डप्राचीनयोग्यानाम्। अथार्ष्टिषेणानां पञ्च प्रवराः। भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति होता, अनूपवदृष्टिषेणवदप्नवानवच्च्यवनवद् भृगुवदिति अध्वर्युः। त्रिप्रवरा इत्येके। भार्गवार्ष्टिषेणानूपेति, अनूपवदार्ष्टिषेणवद् भृगुवदिति।

अथ वीतहव्याः। यस्कवाधूलमौनमौकास्त्रिप्रवराः। भार्गववैतहव्यसावेतसेति होता, सावेतसवद्वीतहव्यवद् भृगुवदिति अध्वर्युः। अथ गार्त्समदाः शुनकास्ते एकप्रवराः। गार्त्समदेति होता, गृत्समदवदिति अध्वर्युः। अथ वाध्र्यश्वा मित्रयुवा एकप्रवराः। वाध्र्यश्वेति होता, वध्र्यश्ववदित्यध्वर्युः। अथ वैन्याः पार्थास्त्रिप्रवराः। भार्गववैन्यपार्थेति होता, पृथुवद्वेनवद् भृगुवदिति अध्वर्युः। अत्र त्रिप्रकारा अपि ये वत्सास्तेषां बौधायनेनोक्ताः कियन्तो ये सावर्ण्यादिभेदास्तदतिरिक्ताश्चोक्ताः आर्ष्टिषेणाः पुनर्निर्भेदाः केवलाः। यस्कगणः पुनर्वीतहव्यगणत्वेन व्यवहृतः। शुनकादयश्च पुनरेकैकभेदा एव। तत्रापि मित्रयुववैनगणावेकप्रवरौ एव न बौधायनवत्त्रिप्रवरौ। अत्र गोत्रप्रवरेषु क्वचित्काचिद्वर्णक्रमभेदेऽपि प्रत्यभिज्ञानाद् स्वरूपं निर्णेयं शाखान्तरीयमन्त्रवत्। इत्यापस्तम्बोक्तो भृगुगणः।

अथ लौगाक्षिगणीयो भृगुगण उच्यते। सप्तविधोऽयं गणः।

तत्र जामदग्न्यौ द्वौ पञ्चाजामदग्न्याः । भृगवो जमदग्नयो वत्साः दार्भिर्नाळायना वागायना नुसातकिजैम्रतिपौलशौनकायनिजीवन्तिकाम्बलोदरिवैहीनरिवैरोहित्या रेखायनिपार्पितिवैश्वानरिवैष्पाक्षिपार्पिळिद्वकाश्वकानासुच्चयमानसात्यकर्णिवैष्टपुरेपिवाळाकितीळकेशिनामृतभागार्त्तभागमार्कण्डेयमाण्डूकेयमाण्डठपमाण्डकेयाजिहीतातिथीनां स्थौमाङ्गिरिस्थौलसौखबर्हिशार्कराक्षिदेषमतीनां मार्कायणा हायना गार्भायणा गोष्ठ्यायनवैशम्पायनशार्ङ्गरवगाळवचापूकेयवैकर्णिसाङ्कृत्येतिकाण्वायनानां पाक्षेयभ्राष्ट्रेयभ्रात्रेयलाक्षेयळाळविळाळाटिपारिमण्डलीनां मालायनौलुन्थिमौधिसोलिमकानां पैङ्गळायनसात्यकायनकौचहस्तिचान्द्रमसानुलोमिकौश्वकौश्वाक्षिकासारध्वजिवाल्यालेपायनैकर्षिशाकल्योष्ट्राक्षिपाकानुमतिजैकजिह्विजैह्वाष्मन्याष्मजमनिराणिवासिमादनस्योपस्यन्दनिकण्ठेरणिसौगोलिकाक्षक्रस्नमाध्योदा इत्येतेषामविवाहः ।

तेषां पञ्चार्षेयः प्रवरो भवति । भार्गवच्यावनाप्नवनौर्वजामदग्न्येति होता, भृगुवच्च्यवनवदप्नवानवत् ऊर्ववत् जमदग्निवदित्यध्वर्युः । प्रथमो गणः ।

अथ जमदग्नयो विदाः प्राचीनयोग्याः पौलस्त्याः वैदभृतः क्रौञ्चायनाः अभयजातास्तैकायना अवटाः भ्राजन्त्याः । एते न वीपायनवत्पञ्चार्षेयाः, किन्तु त्र्यार्षेयाः । भार्गवौर्वजामदग्न्येति, भृगुवदूर्ववज्जमदग्निवदिति । एतेषामविवाहः । द्वितीयो गणः ।

अथाजामदग्न्याः वात्स्या निर्भेदास्त्रिप्रवराः । भार्गवच्यावनाप्नवानेति, भृगुवत् च्यवनवदप्नवानवदिति । तृतीयो गणः ।

भृगवन्दाया मार्गपथा ग्राम्यायणिरध्वनैकशिरापस्तम्बिवर्णालिनः कार्दमायनिःआर्ष्टिषेणिगर्दभिरानूपा इत्येते पञ्च प्रवराः।भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति,भृगुवत् च्यवनवदप्नवानवदार्ष्टिषेणवदनूपवदिति।

एतेषामविवाहः । इति चतुर्थो गणः ।

आश्वलायनाः साकिताक्षा मैत्रया असाचर्या द्रोणायना गोग्रायना आपिशलाः पाटिकायना हासजिह्वाः इत्येते त्रिप्रवराः । भार्गवदैवोदासवाध्र्यश्वेति, भृगुवद्दिवोदासवत् वाध्र्यश्ववत् इति । एतेषामविवाहः । इति पञ्चमो गणः ।

वीतहव्या यस्का वाधूला माधूला मौद्गला वन्यायना अर्थलेगि भागलेयभागवित्तेयजैवन्त्यायनिजैमिनिकौशाम्बेयपृकाशरविमदोकिवारेयिगैरिक्षितदीर्घचितपश्चालवपौष्णाववारमौदायना इत्येते त्रिप्रवराः । भार्गववैतहव्यसावेतसेति, भृगुवत् वीतहव्यवत् सावेतसवदिति । एतेषामविवाहः । इति षष्ठो गणः ।

याज्ञपयः सौकराः मासगन्धाः कर्दमायनाः श्रौक्षाः श्रोत्रियाः अत्यूषाः गृत्समदाः इत्येते एकप्रवराः । गार्त्समदेति, गृत्समदवत् इति । द्विप्रवरा वा । भार्गवगार्त्समदेति, गृत्समदवद्भृगुवदिति । अविवाहस्त्वेषाम् । इति सप्तमो गणः ।

अत्र कात्यायनपाठक्रमेणाध्वर्युप्रवरक्रम उक्तः । लौगाक्षिपाठे तु बौधायनादिभिरुक्तेऽध्वर्युप्रक्रमेऽनुरक्ता द्रष्टव्याः । कात्यायनमते तु भृगोर्द्वादश गणाः । तत्र जामदग्न्याः चतुर्विधाः अजामदग्न्यास्त्वष्टैव । तत्र चत्वारो जामदग्न्याः । वात्स्यायनाः पञ्चप्रवराः भार्गवच्यावनाप्नवानौर्वजामदग्न्येति । आचार्व्यास्त्रिप्रवरा भार्गवच्यावनाचार्व्येति । बैजवा निर्भेदाः पञ्चप्रवराश्च । भार्गवच्यावनाप्नवानबैजवनैमथितेति । शाठरमाठरास्त्रिप्रवरा निर्भेदाश्च । भार्गवशाठरमाठरेति । अजामदग्न्यास्त्वष्टौ । तत्र विदास्त्रिप्रवरा, भार्गवच्यावनाप्नवानेति । आर्ष्टिषेणास्तु पञ्चप्रवरा बौधायनवदेव । वत्सपुरोधसा निर्भेदाः पञ्चप्रवरा, भार्गवच्यावनाप्नवानवात्सपौरोधसेति । त्रिप्रवरा वा । भार्गववत्सपु-

रोथमेति । वैदा विश्वज्योतिषा निर्भेदास्त्रिप्रवरा, भार्गववैदवैश्व-ज्योतिषेति । पार्श्वश्वेता निर्भेदास्त्रिप्रवराः, भार्गववैन्यपार्थेति । भापिशायनास्त्रिप्रवरा, भार्गववाध्र्यश्वदैवोदासेति । वीतहव्यास्त्रिप्रवराः, भार्गववैतहव्यसावेतसेति । गार्त्समदा एकप्रवरा, गार्त्समदेति । द्विप्रवरा वा । भार्गवगार्त्समदेति । इति लौगाक्षिकात्यायनप्रणीतो भृगुगणः ।

अथ आश्वलायनोक्तो भृगुगण उच्यते । स च सप्तविधः । तत्र वत्साः निर्भेदाः द्विविधाः । जामदग्न्या अजामदग्न्याश्च । तत्र जामदग्न्याः पञ्चप्रवराः, भार्गवच्यावनाप्नवानौर्वजामदग्न्येति । अजामदग्न्याः त्रिप्रवराः, भार्गवच्यावनाप्नवानेति । षट् तु अजामदग्न्या एव । तत्र आर्ष्टिषेणा विदाश्च निर्भेदाः पञ्चप्रवराः, भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति । विदानां तु भार्गवच्यावनाप्नवानौर्ववैदेति । यस्कानां भार्गववीतहव्यसावेतसेति । वैन्यानां भार्गववैन्यपार्थेति । मित्रयुवा एकप्रवरा, वाध्र्यश्वेति । त्रिप्रवरा वा, भार्गवदैवोदासवाध्र्यश्वेति निर्भेदाः । शुनका अपि निर्भेदा एकप्रवरा, गृत्समदेति । त्रिप्रवरा वा । भार्गवशौनहोत्रगृत्समदेति । सत्याषाढोऽपि सप्त गणा इत्याह किंचिद्भेदेन । तत्र वत्सा द्विविधा आश्वलायनवत् । षट् त्वजामदग्न्या एव । शुनकास्तु भार्गवशौनहोत्रगार्त्समदेति त्रिप्रवराः । गृत्समदभार्गवेति द्विप्रवरा वा । गार्त्समदेत्येकप्रवरा वेति । तदेवं द्विविधानामपि भृगूणां द्व्यामुष्यायणत्वाभावात्तान्विनैव सप्त भृगोर्वंशा उक्ताः ।

इदानीमङ्गिरस उच्यन्ते । अङ्गिरसस्त्रिविधाः, गौतमाः भरद्वाजाः केवलाङ्गिरसश्च । तत्र गौतमाः सप्त, भरद्वाजाश्चत्वारः, केवलाङ्गिरसः षडिति । गौतमास्तावत्, आयास्या आणिचेया मूढरथाः काचाक्षयः स्वैदेहाः कौमारवत्याः ताण्डिः तौडेरयपि

क्वचित् दर्भिर्दर्वाकिः सात्यमुग्रिको बाह्याः बौभ्याः नैकरुष्टिर्नैकारि-रित्यापि क्वचित् स्तैषकिः किरालयः कारुणिः कठोरिः काशी-याः काक्षीवाः पार्थिवा इत्येते आयास्या गौतमाः त्रिप्रवराः । आ-ङ्गिरसायास्यगौतमेति होता, गौतमवत् आयास्यवदाङ्गिरोवदि-त्यध्वर्युः । प्रथमो गणः ।

शरद्वन्ता अभिजिता रोहिण्याः क्षीरकरम्भाः सौमुचयः सौयामुनाः औपबिन्दवो रहूगणा गणयो माषण्याः तौले-याः नेकरयः करभोगिण्याः चाङ्कुराः सैन्धवा गतवाः साङ्कुराः सौमिनयः पौष्यण्डयो भागलाः कुण्डवाः कारो-ढाः काशवारयो माथर्षा इषवो रोहितायना अङ्गारकाः क्रो-लायनाः कास्तोष्णयो रुणयः पार्थिवा मौदहायनाः स्कान्दाः सराकाः कौटिल्या वासमूलयो वासपुष्पयो वासस्तेवयो वासभू-पयः काचाक्षयः क्षया वारपयः करेलयः करालय इतथ्या बौधयो नगाः सुगोमाक्षयः क्षिरिटाष्टिकयो राहुकर्णयः सौपुत्रयः साम-लोमकयः पौष्कजितयो भागलाश्चण्डाहुका सुतपा सुरौषिणो रौ-हिणायनयः क्रौष्णा आरुणायनयः सौदामनयः कासोरवः कौशा-ल्या रौहिणेयाः कारेधनयो मूलयो वासवाः पुष्पवन्तः पपत्रिका रेवयः औपमा न्याष्टिकाः शौनरयो शालायनाः वार्शयः सोरवः खारिका नै-कषयः तौलेयाः बाल्योदा इत्यादयः शारद्वन्ता गौतमाः ।

ते त्रिप्रवरा भवन्ति । आङ्गिरसगौतमशारद्वन्तेति होता, शारद्वत् गौतमवत् अङ्गिरोवदित्यध्वर्युः । औतथ्या गौतमा इति केचित् । तेषामाङ्गिरसौतथ्यगौतमेति होता, गौतमवदौतथ्यवदाङ्गि-रोवदित्यध्वर्युः । द्वितीयो गणः ।

कौमण्डाः मामन्त्रेषणा मासुराक्षाः काष्ठरेषयः आश्रायनाः वा-श्रायनाः काक्षीवताः औशिजा मासुरेषयो वाशरय इत्येते कौमण्डास्ते

पञ्चप्रवराः। आङ्गिरसौतथ्यकाक्षीवतगौतमकौमण्डेति होता, कुमाण्ड-वद्गौतमवत्कक्षीवतवदुतथ्यवदङ्गिरोवदित्यध्वर्युः। एते काक्षीवना गौतमास्तेषां चाङ्गिरसौतथ्यगौतमौशिजकाक्षीवतेति प्रवरा इत्याश्वलायनः। आयास्यौशिजा इति केचित्। तेषामाङ्गिरसायास्यौशिजगौतमकाक्षीवतेति पञ्चार्षेयप्रवरः। औशिता इत्यपि केचित्। तेषामाङ्गिरसौशितकाक्षीवतेति त्र्यार्षेयः प्रवरः। इति तृतीयो गणः।

दीर्घतमसो गोतमाः पञ्चप्रवरा भवन्ति। आङ्गिरसौतथ्यकाक्षीवतगौतमदीर्घतमसेति होता, दीर्घतमोवद्गौतमवत्कक्षीवतवदुतथ्यवत् अङ्गिरोवदित्यध्वर्युः। त्र्यार्षेया वा। आङ्गिरसौतथ्यदैर्घतमसेति। इति चतुर्थः।

वामदेवास्त्रिप्रवराः आङ्गिरसगौतमवामदेवेति होता, वामदेववद् गौतमवदङ्गिरोवदित्यध्वर्युः। इति पञ्चमः।

औशनसा दिश्याः प्रशस्ताः शुद्धपाक्षा महोदयः विकंहताः सुबुध्या निहताः इत्येते औशनसा गौतमास्ते त्रिप्रवराः। आङ्गिरसगौतमौशनसेति होता, उशनोवत् गौतमवदङ्गिरोवदित्यध्वर्युः। इति षष्ठः।

करेणुपालयो वास्तव्याः श्वेतीयाः पौष्पिञ्जा औदजायना मान्धुक्षाराः अजगन्धयः इत्येते करेणुपालयो गौतमास्ते त्रिप्रवराः। आङ्गिरसगौतमकारेणुपालेति होता, करेणुपालवद् गोतमवदङ्गिरोवदित्यध्वर्युः। इति सप्तमः।

सप्तानामपि गौतमगणानां सप्तर्ष्यन्यतमगौतमापत्यत्वेन सगोत्रत्वात्कचित् द्वित्रिप्रवरसाम्याच्च सर्वेषां परस्परमविवाहः। गौतमानां सर्वेषामविवाह इति बौधायनोक्तेश्च। इतरैः सर्वैरपि पूर्वोक्तैरसमानगोत्रत्वादसमानप्रवरत्वाच्च विवाहः।

आपस्तम्बेन तु गणचतुष्टयमुक्तम्। आङ्गिरसायास्या गौतमास्ते

त्रिप्रवराः । आङ्गिरसायास्यगौतमेति, गौतमवदायास्यवदङ्गिरोवदिति । औतथ्यास्त्रिप्रवराः । आङ्गिरसौतथ्यगौतमेति, गौतमवदौतथ्यवदङ्गिरोवदिति । औशिजा अपि त्रिप्रवराः । आङ्गिरसौशिजकाक्षीवतेति होता, कक्षीवतवदुशिजवदङ्गिरोवदिति अध्वर्युः । वामदेवा अपि त्रिप्रवराः । आङ्गिरसवामदेव्यबार्हदुक्थेति, बृहदुक्थवद्वामदेववदङ्गिरोवदिति ।

कात्यायनो गणचतुष्टयमाह । तत्रौतथ्यास्त्रिप्रवरा आङ्गिरसौतथ्यगौतमेति, अङ्गिरोवदुतथ्यवद् गौतमवदिति । एतेषामविवाहः । इति प्रथमः ।

दीर्घतमसस्त्रिप्रवराः । आङ्गिरसौतथ्यदीर्घतमसेति, अङ्गिरोवद्दीर्घतमोवदुतथ्यवदिति । इति द्वितीयः ।

आयास्या गौतमास्त्रिप्रवराः । आयास्यगौतमाङ्गिरसेति, गौतमवदायास्यवदङ्गिरोवदिति । अविवाह एषाम् । इति तृतीयः ।

औशिजाः पञ्चप्रवराः । आङ्गिरसायास्यौशिजगौतमकाक्षीवतेति, कक्षीवतवद्गौतमवदुशिजवदायास्यवदङ्गिरोवदिति । इति चतुर्थः ।

आश्वलायनस्त्वष्ट गणानाह । गौतमानामाङ्गिरसायास्यगौतमेति, उतथ्यानामाङ्गिरसौतथ्यगौतमेति, रहूगणानामाङ्गिरसराहूगण्यगौतमेति, सोमराजकानामाङ्गिरससोमराजगौतमेति, वामदेवानामाङ्गिरसवामदेव्यगौतमेति, बृहदुक्थानामाङ्गिरसबार्हदुक्थगौतमेति, पृषदश्वानामाङ्गिरसपार्षदश्ववैरूपेति, ऋक्षाणामाङ्गिरबार्हस्पत्यभारद्वाजवान्दवनमातवचसेति, कक्षीवतामाङ्गिरसौतथ्यगौतमौशिजकाक्षीवतेति पञ्च प्रवराः, दीर्घतमसामाङ्गिरसौचथ्यदीर्घतमसेति त्रिप्रवराः । ननु कथमष्टगणत्वं ऋक्षपृषदश्वाभ्यां दशगणीत्वात् । नैष दोषः । आपातत इदमुक्तं न तु वस्तुतोऽनयोर्गौतमत्वम् । असाधारणप्रवरानुप्रवेशाभावात् । आङ्गिरसत्वं तु न नियतं

गौतमलिङ्गम्। भरद्वाजादिसाधारण्यात्। अतो यत्रानयोर्नियतं लिङ्गं तत्रोत्कर्षो भविष्यति। तत्र ऋक्षाणां भरद्वाजत्वमवसीयते। आद्य-भरद्वाजगर्गाभ्यां निश्चितभरद्वाजाभ्यामाङ्गिरसबार्हस्पत्यभारद्वाजेति त्रिप्रवरसाम्यात्। किञ्च बौधायनोऽप्येकदेशविकृतमनन्यवद्भवतीति न्यायमाश्रित्य ऋक्षानेव रौक्षायणशब्देनैतत्प्रवरपञ्चकेनाह। पृषदश्वास्तु केवलाङ्गिरसेषूत्कृष्यन्ते। बौधायनेनोक्तैः केवलाङ्गिरसै रथीतरैः सार्द्धमाङ्गिरसवैरूपेति प्रवरद्वयसाम्यात्। आपस्तम्बेन तु आङ्गिरसवैरूपपार्षदश्वेति रथीतराणां प्रवरविकल्पाभिधानात् प्रवरत्रयस्यापि पक्षे साम्यस्य सत्त्वात्। अतोऽन्येषां केवलाङ्गिरसां स्वस्वगणएवाविवाहः प्रवरसाम्यात्। गणानां तु परस्परं विवाह एव। रथीतरपृषदश्वयोस्तु स्वेस्वे गणेऽपि परस्परमविवाहः। केवलाङ्गिरसत्वेऽपि पाक्षिकप्रवरसाम्यादिति। सत्याषाढेनापि बृहदुक्थं त्यक्त्वाऽष्टादंष्ट्रं प्रक्षिप्य दश गणा निर्भेदा उक्तास्तत्रापि पूर्ववद्दक्षपृषदश्वयोरुत्कर्षो बोध्यः। अन्यत्समानम्। तदेवं गौतमाङ्गिरसो निरूपिताः। द्व्यामुष्यायणास्तु तेषां न सन्ति।

इदानीं भरद्वाजा निरूप्यन्ते।

ते च चतुर्विधाः। केवलभरद्वाजा रौक्षायणाः गर्गाः कपय इति। तत्र प्रथमे सप्ततिगोत्राणि, अष्ट द्वितीये, त्रिंशतिस्तृतीये, चतुर्थे द्वादश। तद्यथा भरद्वाजाः क्षाम्यायणाः मण्डा देवाश्वा उद्वहव्याः प्राग्वंशयः बाहलभावाः त्रागवसितायनाः स्तैदेहा आत्रा औक्षा भूरयः परिणद्धेयाः केशस्वेयाः शौद्धयः उरूढाः स्वारिग्रीवयः औपसयः वयोक्षिभेदाः आग्निवेश्याः ङ्ययाः त्वेषा इत्यपि क्वचित् शठाः गौरिवायनाः लेखायनाः खेलका इत्यपि क्वचित् स्तनकर्णा स्तनवर्णा इत्यपि क्वचित् ऋक्षा माणभिस्ता कण्ठादकाः स्तौञ्ज्वलय वैलाश्वाः रुढा देवयो

भ्र रुण्डयो भाद्रपद्मयः सौरभराः शुङ्गा देवमतयः इषुमताः औद्मेघयः मत्राहणेयाः कुल्माषाः राजस्तम्भयः सुधूकतयः वाराहयः वलभीकयः रुद्राङ्गपथाः शालाहलयः वेदवेलाः भृत्यायनाः शालालयः शार्दूलयः शाकलाः बाष्कलाः सैंहिकेयाः क्रौडायनाः कौण्डिल्याः ब्रह्मस्तम्भाः राजस्तम्भाः वायुस्तम्भाः सूर्यस्तम्भाः सोमस्तम्भाः विष्णुस्तम्भाः इन्द्रस्तम्भा आपस्तम्भा ये चान्ये स्तम्बशब्दान्ताः स्तम्भशब्दान्ताश्च तेऽपि आरणाः सिन्धवः कौमुदगन्धयः शिखायनाः आत्रेयायणाः भामान्याः कुक्षाः कौकाक्षयो नेतुन्तयो दार्भयः श्यामेयाः मत्सक्राथाः कारुणायनाः कारुपथयः कारिपायणाः काम्बाल्याः बालिशायनयः सौद्धयो वाराहयो विधिपयः शिलालयः पैलाः शालङ्कायनयो जैह्मलायनयः साष्टकयो लभायनयः आपस्तम्बयो धौताम्बकयो जिह्मद्रोणयो घाह्मगच्छयो व्यढाकयः स्वारग्रीवयो वाजदृष्टयः मत्राहयो दशादीकयस्तूर्णकर्णयः काम्बयो देवगारयो हारिकर्णयः सपौलयः सांगेया मालोहराः शाङ्खायनाः सौविष्टा हालोहराः सात्यमुग्रयो लेखायनाः कारुणायनाश्चेला रूक्षाः किकायनाः बालक्षला गौरिवाः सैापयाः सौभराः सौबुद्धयः धौरयः कुलिकाः विकाजाः कुपिना मालहत्याः श्रीपथा निद्राङ्गवधाः शेखेया माधूकर्ण्याः काण्डण्या औवेया मैथुनमतयः कौरुक्षजयः खारणादयो देवस्थानयः शालुहयो वालुहयो गोस्वपिङ्गलयो गङ्गोदकयोऽधिकारग्रीवयो यवकयो माषायणाः शक्ताः काजाः सौविश्वाः कामुकायनाः सिन्धवः सारावरयो वाहयः सामस्तम्बयः सोमस्तम्बयः सोपस्तम्बयः ब्रह्मस्तम्बयः आश्वलायना मार्कण्डेयाः कुशाः सौगय औजायना इत्येते भरद्वाजाः ।

ते त्रिप्रवराः । आङ्गिरसबार्हस्पत्यभारद्वाजेति होता, भार-

द्वाजवद् बृहस्पतिवदङ्गिरोवादित्यध्वर्युः । इति प्रथमः ।

रौक्षायणाः कपिलाः शिफिलाः शैफिलाः वैफिडाः कौथुमा अग्निजिह्वाः चकणिः सूतिश्चेति रौक्षायणाः । ते पञ्चप्रवराः । आङ्गिरसबार्हस्पत्यभारद्वाजवान्दवनमातवचसेति होता, मतवचोवद्वन्दवनवद्भरद्वाजवद् बृहस्पतिवदङ्गिरोवदित्यध्वर्युः । इति द्वितीयः ।

गर्गाः साम्भरायणाः सांख्यायनाः गन्धरायणाः वालुकयो भ्राष्टकाः भ्राष्टबिन्दवाः क्रोष्टयः सौयामुनिः भ्राजिनाक्षयः होत्रापचयः सत्यापचयः जवा नवपलाशाः शाखावतयः सङ्कृहकुल्याः वेणुभिरिः सौदग्रकारिः रौतिः क्रौञ्चाल्या राजवस्यो लवा इत्येते गर्गाः पञ्चप्रवराः । आङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यसैन्येति होता, सिनिवद्गर्गवद्भरद्वाजवद् बृहस्पतिवदङ्गिरोवादित्यध्वर्युः । त्रिप्रवरा वा । आङ्गिरससैन्यगार्ग्येति होता, गर्गवत्सिनिवदङ्गिरोवदित्यध्वर्युः । तित्तिरिः कपिभूमयः खण्डिता इत्येतेषां तु गर्गाणां त्र्यार्षेय एव प्रवरः । आङ्गिरससैन्यगार्ग्येति, आङ्गिरसतैत्तिरिकापिभुवेति वा । इति तृतीयः । कपिवैनलायनपतञ्जलीनां तारास्विनां ताडिनां भोजसीनां सारङ्गरवाणां खराशिखण्डिनां मौशितकिः शंशयः पौष्पयः मैतिशायनाः इत्येते कपयः । त त्रिप्रवराः । आङ्गिसमहीयवौरुक्षय्येति होता, आङ्गिरसामहीवयौरुक्षयसेति आश्वलायनपाठः । उरुक्षयोवद्महीयववदङ्गिरोवदित्यध्वर्युः । इति चतुर्थः । इति बौधायनोक्तो भारद्वाजगणः ॥

अथापस्तम्बोक्ता भरद्वाजाः । ते च त्रिभिर्द्व्यामुष्यायणैः सह निर्भेदा दश गणाः । तत्र भरद्वाजास्त्रिप्रवराः । आङ्गिरसबार्हस्पत्यभारद्वाजेति होता, भरद्वाजवद् बृहस्पतिवदाङ्गिरोवदिति अध्वर्युः । कुत्साग्निवेश्योद्वयनानां सर्वेषां च स्तम्बस्तम्भशब्दानामेष एवाधिकारः ।

द्व्यामुष्यायणा यथा, शौङ्गशिशिरयो, भरद्वाजाः शुङ्गाः, कताः शैशिरयः। तेषां पञ्चार्षेयः। आङ्गिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेति, अक्षीलवत्कतवद्भरद्वाजवद् बृहस्पतिवदङ्गिरोवदिति। अथ ऋक्षाणां पञ्चार्षेयः, आङ्गिरसबार्हस्पत्यभारद्वाजवान्दवनमातवचसेति, मतवचोवद्वन्दवनवद्भरद्वाजवद् बृहस्पतिवदङ्गिरोवदिति। त्र्यार्षेयमुहैके, आङ्गिरसवान्दवनमातवचसेति, मतवचोवद्वन्दवनवदङ्गिरोवदिति। कपयस्त्रिवराः, आङ्गिरसामह्यौरुक्षय्येति, अङ्गिरोवदमहीयवदङ्गिरोवदिति। गर्गास्त्रिप्रवराः, आङ्गिरसगार्ग्यसैन्येति, सिनिवद्गर्गवदङ्गिरोवदिति प्रवरमञ्जरीकृता उक्ताः। अत्र शुङ्गकतशिशिरीणां भरद्वाजवंशोत्पन्नशुङ्गादुत्पन्नविश्वामित्रवंशस्थकतगणान्तर्गतशिशिरस्य क्षेत्रे उत्पन्नत्वात् द्व्यामुष्यायणत्वम्। तेषां च चतुर्विधैर्भरद्वाजैर्दशविधैश्च विश्वामित्रैरविवाहः। सगोत्रत्वात्, कप्यन्यैस्त्रिभिर्भरद्वाजैः कतैश्च विश्वामित्रैः सह समप्रवरत्वदिति।

अथ कात्यायनलौगाक्षिप्रणीता भरद्वाजाः। ते च संकृतिशौङ्गशिशिरिभिः सहाष्टगणाः। आद्या भरद्वाजाः,ततो गर्गाः पञ्चप्रवराः, ततो गर्गगण एव तृतीयस्त्रिप्रवरः, ततः कपयः, ततः संकृतयः, ततो हिरण्यस्तम्बयः, ततो भेरुण्डाः, ततः शौङ्गशिशिरयः। आत्रेयायनय स्त्रिप्रवराः, आङ्गिरसबार्हस्पत्यभारद्वाजेति, अङ्गिरोवद् बृहस्पतिवद्भरद्वाजवत् इति। एतेषामविवाहः। कालायनाः, पञ्चप्रवराः आङ्गिरसभारद्वाजबार्हस्पत्यसैन्यगार्ग्येति, अङ्गिरोवद्भरद्वाजवद् बृहस्पतिवत्सिनिवद्गर्गवत्। एतेषामविवाहः। तैत्तिरीयास्त्रिप्रवराः, आङ्गिरससैन्यगार्ग्येति, अङ्गिरोवत्सिनिवद्गर्गवत्। एतेषामविवाहः। स्वस्तन्त्रकपयास्त्रिप्रवराः आङ्गिरसामह्यउरुक्षय्येति, अङ्गिरोवदमहय्यवदुरुक्षय्यवत्। सङ्कृतीनां त्रिप्रवराः, आङ्गिरससांकृत्यगौरवीत्येति। एतेषामविवाहः। अङ्गिरोवत्सङ्कृतिवद्गुरुवीतिवत्। हिरण्यस्तम्बयास्त्रिप्रवराः,

आङ्गिरसभार्म्यश्वमौद्गल्येति । एतेषामविवाहः । अङ्गिरोवत् भर्म्यश्ववत् मुद्गलवत् । भेरुण्डाह्निप्रवराः आङ्गिरसाजमीढकाण्वेति । एतेषामविवाहः । अङ्गिरोवदजमीढवत्कण्ववत् । अथ शौङ्गशैशिरयो भरद्वाजा द्व्यामुष्यायणाः । ते पञ्चप्रवराः, आङ्गिरसबार्हस्पत्यभारद्वाजशौङ्गशैशिरेति । एतेषामविवाहः । अङ्गिरोवत् बृहस्पतिवत् भरद्वाजवत् शुङ्गवच्छिशिरिवत् । सङ्कृत्यादीनां त्रयाणां यद्यपि भरद्वाजसम्बन्धोऽस्ति तथापि ते केवलाङ्गिरसेषूत्कृष्टव्याः । भरद्वाजस्य प्रवरेष्वननुवृत्तेः । न च कपिषु भरद्वाजा इत्युपक्रमोपसंहारो भरद्वाजत्वनिर्णायको यथाऽस्ति तथैषां भरद्वाजत्वनिश्चायकं किञ्चिदस्ति । या तु कात्यायनादीनां भरद्वाजोक्तिः सा वरणमात्राभिप्रायिका । किञ्चैषां भरद्वाजत्वे बौधायनेन सङ्कृत्यादिभिः सह विवाहोक्तेर्बौधायनविरोध आपद्येत । लौगाक्षिसूत्रमप्येवमेव वर्णनीयम् ।

अथाश्वलायनोक्ता भरद्वाजगोत्रप्रवरा उच्यन्ते ।

भरद्वाजाग्निवेश्यानामाङ्गिरसबार्हस्पत्यभारद्वाजेति । मुद्गलानामाङ्गिरसभार्म्यश्वमौद्गल्येति । तार्क्ष्यं हैके ब्रुवतेऽतीत्याङ्गिरसं, तार्क्ष्यभार्म्यश्वमौद्गल्येति । विष्णुवृद्धानामाङ्गिरसपौरुकुत्स्यत्रासदस्यवेति । गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यसैन्येति, आङ्गिरससैन्यगार्ग्येति वा । हरितकुत्सपिङ्गशङ्खदर्भभैमगवानामाङ्गिरसाम्बरीषयौवनाश्वेति । मांधातारं हैके ब्रुवतेऽतीत्याङ्गिरसं, मान्धात्राम्बरीषयौवनाश्वेति । सङ्कृतिपूतिमाषतण्डिशम्बुशैवगवानामाङ्गिरसगौरिवीतसाङ्कृत्येति । शाक्त्यो वा मूलं शाक्त्यगौरिवीतसाङ्कृत्येति । कण्वानामाङ्गिरसाजमीढकाण्वेति । घोरमुहैके ब्रुवतेऽवकृष्याजमीढम्, आङ्गिरसघौरकाण्वेति । कपीनामाङ्गिरसामहय्योरुक्षय्येति । एतेषां सर्वेषां भर-

द्वाजगणानां परस्परमविवाहः । म्रियमाणतया सत्तया वा भरद्वाजानुवृत्तेः सगोत्रत्वात्कचिच्च प्रवरसाम्यादपि भरद्वाजानां सर्वेषामविवाह इति बौधायनवचनाच्च । इति भरद्वाजाः ।

अथ केवलाङ्गिरस उच्यन्ते ।

तत्र पञ्च गणाः विष्णुवृद्धकण्वहरितरथीतरमुद्गलाः । तत्राद्यो गणस्त्रयोदशविधः, द्वितीय एकादशविधः, तृतीयो विंशतिधा, चतुर्थो दशधा पञ्चमोऽष्टधा । तत्र हरितास्त्रिप्रवराः, आङ्गिरसाम्बरीषयौवनाश्वेति, युवनाश्ववदम्बरीषवदङ्गिरोवदित्यध्वर्युः । मांधात्राम्बरीषयौवनाश्वेति, युवनाश्ववदम्बरीषवन्मान्धातृवदिति वा । कुत्सानामाङ्गिरसमान्धात्रकौत्सेति, कुत्सवन्मांधातृवदङ्गिरोवदिति वा । कण्वास्त्रिप्रवराः । आङ्गिरसाजमीढकाण्वेति, कण्ववदजमीढवदङ्गिरोवदिति । आङ्गिरसघौरकाण्वेति, वा कण्ववद्धोरवदङ्गिरोवदिति । रथीतरास्त्रिप्रवराः । आङ्गिरसवैरूपरथीतरेति, रथीतरवद्विरूपवदङ्गिरोवदिति । आङ्गिरसवैरूपपार्षदश्वेति, पृषदश्ववद्विरूपवदङ्गिरोवदिति वा । अष्टादंष्ट्रवैरूपपार्षदश्वेति, पृषदश्ववद्विरूपवदष्टादंष्ट्रवदिति वा । विष्णुवृद्धास्त्रिप्रवराः, आङ्गिरसपौरुकुत्सत्रासदस्यवेति, त्रसदस्युवत्पुरुकुत्सवदङ्गिरोवदिति । मुद्गलास्त्रिप्रवराः, आङ्गिरसभार्म्यश्वमौद्गल्येति, मुद्गलवद्भर्म्यश्ववदङ्गिरोवदिति । तार्क्ष्यभार्म्यश्वमौद्गल्येति, मुद्गलवद्भर्म्यश्ववत्तार्क्ष्यवदिति वा । आङ्गिरसताण्डिमौद्गल्येति, मुद्गलवत्ताण्डिवदङ्गिरोवदिति वा । सङ्कृतयस्त्रिप्रवराः, आङ्गिरससाङ्कृत्यगौरवीतयेति, गुरुवीतिवत्सङ्कृतिवदङ्गिरोवदिति । कपयस्त्रिप्रवराः, आङ्गिरसामहय्यौरुक्षयेति, उरुक्षयवदामहय्यवदङ्गिरोवदिति । हरितकण्वरथीतरविष्णुवृद्धमुद्गलानां स्वस्वगणे सर्वप्रवरसाम्यादविवाहः । परस्परं तु विवाहो भवत्येव । द्वित्रिप्रवराणां

समानत्वाभावात् । सगोत्रताऽप्यङ्गिरोऽपत्ये नास्ति । अङ्गिरसोऽगस्त्याष्टमसप्तर्षिबाह्यत्वात् । सङ्कृतीनां वसिष्ठैरपि न विवाहः । द्विवंश्यत्वात् ।

तथोक्तं,

सङ्कृतीनां द्विवंश्यत्वाद्वसिष्ठैश्च चतुर्विधैः ।
स्ववर्गीयैः सगोत्रत्वात्प्रवरैक्याच्च नान्वियुः ॥

ते चत्वारो गणाः । तत्राद्यगणेऽष्टपञ्चाशद् गोत्राणि, द्वितीयतृतीयगणौ निर्भेदौ, चतुर्थे द्वादश गोत्रभेदा इति ।

आपस्तम्बमते केवलाङ्गिरस उच्यन्ते । हरितास्त्रिप्रवराः, आङ्गिरसाम्बरीषयौवनाश्वेति । आङ्गिरसं त्यक्त्वा मान्धातारं प्रवेश्य तएव वा कुत्सास्त्रिप्रवराः, आङ्गिरसमांधात्रकौत्सेति । अथाजमीढकण्वाः । तेषां त्र्यार्षेयः प्रवरः आङ्गिरसाजमीढकाण्वेति । विरूपा रथीतरास्ते त्रिप्रवराः, आङ्गिरसवैरूपपार्षदश्वेति । आङ्गिरसस्थाने अष्टादंष्ट्रमित्यप्याहुः । मुद्गलास्त्रिप्रवराः, आङ्गिरसभार्म्यश्वमौद्गल्येति । विष्णुवृद्धास्त्रिप्रवराः, आङ्गिरसपौरुकुत्सत्रासदस्यवेति । सङ्कृतयस्तु नोक्ताः । कात्यायनलौगाक्षिभ्यां मुद्गलाः कण्वाः सङ्कृतयश्च द्व्यामुष्यायणा इति त्रय एवोक्ताः । आश्वलायनमते मुद्गलास्त्रिप्रवराः । आङ्गिरसभार्म्यश्वमौद्गल्येति, तार्क्ष्यभार्म्यश्वमौद्गल्येति वा । विष्णुवृद्धा आङ्गिरसपौरुकुत्सत्रासदस्यवेति । गर्गा आङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यसैन्येति, आङ्गिरससैन्यगार्ग्येति वा । हरितकुत्सपिङ्गशङ्खदर्भभैमगवानामाङ्गिरसाम्बरीषयौवनाश्वेति, मान्धात्राम्बरीषयौवनाश्वेति वा । सङ्कृतिपूतिमाषतण्डिशम्बुशैवानामाङ्गिरसगौरिवीतसाङ्कृत्येति, शाक्त्यगौरिवीतसाङ्कृत्येति वा । कण्वानामाङ्गिरसाजमीढकाण्वेति, आङ्गिरसघौरकाण्वेति वा । कपीनामाङ्गिरसामहीयवोरुक्षयसेति । इत्यङ्गिरसः ।

अथात्रयः ।

अत्रयस्त्रिप्रवराः आत्रेयार्चनानसश्यावाश्वेति, अत्रिवदर्चनानसवच्छ्यावाश्ववदित्यध्वर्युरिति कात्यायनानाम् । श्यावाश्ववदर्चनानसवदत्रिवदित्यध्वर्युरिति लौगाक्ष्यादयः। एवमन्यथ्यथाप्रवरमितरत्समानमावंशसमाप्तेः । धनञ्जया अप्येतन्मध्ये, आत्रेयार्चनानसधानञ्जयेति च प्रवर इत्यपि कश्चित् । वाद्भूतकाः त्रिप्रवराः, आत्रेयार्चनानसवाद्भूतकेति । गविष्ठिरास्त्रिप्रवराः, आत्रेयार्चनानसगाविष्ठिरेति बौधायनाश्वलायनापस्तम्बमतेन । आत्रेयगाविष्ठिरपौर्वातिथेति कात्यायनलौगाक्षिमतेन । मुद्गलास्त्रिप्रवरा आत्रेयार्चनानसपौर्वातिथेति । एतएव पूर्वातिथयः अतिथयश्च आपस्तम्बमतेन, आत्रेयार्चनानसातिथेति चेति प्रवरः । वामरथ्यसुमङ्गलबीजवापा एतएवेति केचित् । सुमङ्गलानामात्रेयसुमङ्गलश्यावाश्वेतीत्यपि कश्चित् । वाद्भूतकपुत्रिकापुत्रावधिकाविति केचित्।तत्र वाद्भूतकाः पूर्वमुदाहृताः । वालेयादयस्तु अत्रेः पुत्रिकापुत्रास्त्रिप्रवराः । आत्रेयवामरथ्यपौत्रिकेति । एतेषां चात्रीणां परस्परं सप्तर्षेरत्रेरनुवृत्तेः सगोत्रत्वात्समानप्रवरत्वादविवाहः। अत्रीणां सर्वेषामविवाह इति बौधायनवचनाच्च । वैश्वामित्रधनञ्जयेन वासिष्ठजातूकर्ण्यैश्चाविवाह इति केचित् । इतरैः पूर्वोक्तैः सर्वैरपि विवाहा भवन्ति ।

अथ विश्वामित्राः ।

तेषां दश गणाः। तत्र प्रथमे गणे पञ्चत्रिंशद्गोत्राणि, द्वितीये षट्, तृतीये त्रीणि, चतुर्थे षट्, पञ्चमे दश, षष्ठे सप्त, सप्तमे एकम्, अष्टमेऽप्येकं, नवमे द्वे, दशमे एकम् ।

कुशिकास्त्रिप्रवराः, वैश्वामित्रदेवरातौदलेति होता, विश्वामित्रवद्देवरातवदुदलवदित्यध्वर्युरिति कात्यायनानुसारिणाम् ।

उद्दलवद्देवरातवद्विश्वामित्रवदिति बौधायनानुसारिणाम् । एवम-न्यग्रथाप्रवरमावंशसमाप्तेः ।

लौहिताः त्रिप्रवराः, वैश्वामित्राष्टकलौहितेति । एतएवा-ष्टका वा त्रिप्रवराः वैश्वामित्रलौहिताष्टकेति । वैश्वामित्रमा-धुच्छन्दसाष्टकेति वा । वैश्वामित्राष्टकेति ह्यार्षेयो वा ।

रौक्षकास्त्रिप्रवराः, वैश्वामित्ररौक्षरैवणेति, वैश्वामित्रगा-थिनरैवणेति वा ।

देवश्रवसः त्रिप्रवराः, वैश्वामित्रदैवश्रवसदैवतरसेति । का-मकायना अप्येतएव तेषामप्येतएव प्रवराः । श्रौमता एते इत्यपि केचित । प्रवरास्तूक्ता एव ।

अजास्त्रिप्रवराः, वैश्वामित्रमाधुच्छन्दसाजेति ।

आघमर्षणास्त्रिप्रवराः, वैश्वामित्राघमर्षणकौशिकेति ।

पूरणा द्विप्रवराः, वैश्वामित्रपौरणेति ।

इन्द्रकौशिका द्विप्रवराः, वैश्वामित्रैन्द्रकौशिकेति ।

कतास्त्रिप्रवराः, वैश्वामित्रकात्याक्षीलेति। रौहिणास्त्रिप्रवराः, वैश्वामित्रमाधुच्छसरौहिणेति,वैश्वामित्रमाधुच्छन्दसाघमर्षणेति वा।

धनञ्जयास्त्रिप्रवराः, वैश्वामित्रमाधुच्छन्दसधनञ्जयेति, वैश्वा-मित्रमाधुच्छन्दसाघमर्षणेति वा ।

काथकास्त्रिप्रवराः, वैश्वामित्रकाथकक्राथकेति ।

आश्मरथ्याः त्रिप्रवराः, वैश्वामित्राश्मरथ्यवाधुलेति ।

साहुलास्त्रिप्रवराः, वैश्वामित्रसाहुलमाहुलेति ।

गाथिनास्त्रिप्रवराः, वैश्वामित्रगाथिनरैणवेति ।

रैणवास्त्रिप्रवराः, वैश्वामित्रगाथिनरैणवेति ।

वेणवास्त्रिप्रवराः, वैश्वामित्रगाथिनवैणवेति ।

हिरण्यरेतसो द्विप्रवराः, वैश्वामित्रहैरण्यरेतसेति ।

सुवर्णरेतसो द्विप्रवराः, वैश्वामित्रसौवर्णरेतसेति ।
कपोतरेतसो द्विप्रवराः, वैश्वामित्रकपोतरेतसेति ।
कौशिकास्त्रिप्रवराः, वैश्वामित्रशालङ्कायनकौशिकेति ।
घृतकौशिका द्विप्रवराः, वैश्वामित्रघृतकौशिकेति ।

विश्वामित्राणां सर्वेषामपि परस्परमविवाह । विश्वामित्रस्य सर्वेषः प्रवरेष्वनुवृत्तेः सगोत्रत्वात्, स्वस्वगणे समानप्रवरत्वाच्च । स्ववंशान्तर्भूतैः शिशिरिक्षेत्रोत्पन्नैः शौङ्गशैशिरिभिर्द्व्यामुष्यायणैश्चाविवाहः । देवरातस्य शुद्धजामदग्न्यैरप्यविवाहः । तथा शुद्धविश्वामित्राणां गर्गवर्गगतकपिधनञ्जयेन जातूकर्ण्येन अत्रिभिश्चाविवाह इति केचित् । अन्ये तु तन्नेच्छन्ति ।

धनञ्जयस्य भिन्नत्वात् प्रवराणां तु भेदतः ।
पूर्वोक्तैर्विवाहः स्यात्सगोत्रत्वाद्यभावतः ॥ इति ।

तेषां त्रयो गणाः निध्रुवा रेभाः शाण्डलाश्चेति । तत्र प्रथमगणे एकाशीतिर्गोत्रभेदाः, द्वितीयगणो निर्भेदः, तृतीयस्तु त्रिंशत्प्रकारः । इति विश्वामित्रस्य गणाः ।

अथ कश्यपाः ।

आपस्तम्बस्तु पञ्चाह गणान्मापांस्तु रोहितान् ।
कात्यायनश्च लौगाक्षिः पञ्चाहाथ च शैशिरान् ॥
वैश्वामित्रगणानाह द्वादश त्वाश्वलायनः ।
सत्याषाढो द्वादशैव आश्वलायनवत्त्रिमान् ॥

कश्यपास्त्रिप्रवराः, काश्यपावत्सारनैध्रुवेति होता, निध्रुववद्वत्सारवत्कश्यपवदित्यध्वर्युरिति बौधायनलौगाक्ष्यादयः । कश्यपवद्वत्सारवन्निध्रुववदित्यध्वर्युरिति कात्यायनादयः । एवमन्यथाप्रवरमितरत्समानमावंशसमाप्तेः ।

रेभास्त्रिप्रवराः, काश्यपावत्साररैभेति ।

शण्डिलास्त्रिप्रवराः, काश्यपावत्सारशाण्डिलेति, काश्यपासितदेवलेति वा, दैवलासितेति त्र्यार्षेयो वा ।

द्व्यामुष्यायणा लौगाक्ष्यादयस्त्रिप्रवराः, काश्यपावत्सारवासिष्ठेति । लौगाक्षिसहितानां सर्वेषामपि कश्यपानां परस्परमविवाहः । कश्यपस्य सप्तर्षेर्म्रियमाणतया सत्तयोत्पादकतया च शण्डिलानां चतुर्थप्रवरविकल्पपक्षे सत्तयैवैकस्य प्रवरेष्वनुवृत्तेः सगोत्रत्वात्, स्वगणे समानप्रवरत्वाच्च । चतुर्थप्रवरवतां शाण्डिलानामन्यैः सहाविवाहे समानप्रवरत्वं न कारणं, किं तु सगोत्रत्वमेव, तद्भिन्नानां समप्रवरत्वमपीति विवेकः । लौगाक्ष्यादीनां द्व्यामुष्यायणत्वेन सर्वैरपि वसिष्ठैः सङ्कृतिपूतिमाषादिभिश्चाविवाहः। अन्यैः सर्वैरपि विवाहा भवन्ति । इति कश्यपस्य ।

अथ वसिष्ठस्य ।

ते चतुर्विधाः । तत्राद्यगणो द्वात्रिंशद्गोत्रः, द्वितीय एकोनविंशतिः, तृतीयश्चतुर्विंशतिः, चतुर्थस्त्रिंशत् ।

वसिष्ठा एकप्रवराः, वासिष्ठेति होता, वसिष्ठवदित्यध्वर्युः । एवमन्यत्रयथाप्रवरमावंशसमाप्तेः। वासिष्ठभरद्वास्विन्द्रप्रमदेति त्रिप्रवर इत्येके ।

कुण्डिनास्त्रिप्रवराः, वासिष्ठमैत्रावरुणकौण्डिन्येति ।

उपमन्यवस्त्रिप्रवराः, वासिष्ठभरद्वास्विन्द्रप्रमदेति।

पराशरास्त्रिप्रवराः, वासिष्ठशाक्त्यपाराशर्येति ।

जातूकर्ण्यास्त्रिप्रवराः, वासिष्ठात्रिजातूकर्ण्येति । अयमेकोऽधिकः । वसिष्ठानां जातूकर्ण्यसहितानां सर्वेषामपि परस्परं संकृतिभिर्लौगाक्षिभिश्चाविवाहः । वसिष्ठस्य सप्तर्षेः सर्वत्रानुवृत्तेः सगोत्रत्वात्स्वस्वगणे समानप्रवरत्वाच्च । जातूकर्ण्यानामत्रिभिरप्यविवाहः । अन्यैः पूर्वापरैः सर्वैरपि विवाहः । इति वसिष्ठस्य ।

अथागस्त्यस्य।

आगस्त्यास्त्रयः । तत्राद्यगणे विंशतिगोत्राणि, द्वितीयतृतीयगणौ निर्भेदौ ।

आगस्त्यास्त्रिप्रवराः, आगस्त्यदार्ढच्युतेध्मवाहेति होता, इध्मवाहवद् दृढच्युतवदगस्तिवदित्यध्वर्युरिति बौधायनादयः। अगस्तिवद् दृढच्युतवदिध्मवाहवदित्यध्वर्युरिति कात्यायनः । अन्यथाप्रवरमितरत्सगानमावंशसमाप्तेः । एकार्षेयो वा अगस्त्येति ।

साम्भवाहास्त्रिप्रवराः, आगस्त्यदार्ढच्युतसाम्भवाहेति । अगस्त्यविस्तारेऽप्येते वक्ष्यन्ते ।

सोमवाहास्त्रिप्रवराः, अगस्तिदृढच्युतसोमवाहेति ।

यज्ञवाहास्त्रिप्रवराः, अगस्तिदृढच्युतयज्ञवाहेति ।

भिन्ना अप्यगस्त्य उक्तास्तेऽपि त्रिप्रवराः, आगस्त्यमाहेन्द्रमायोभुवेति ।

तदाद्या इध्मवाहाः पौर्णमास्याः पारणाश्च त्रिप्रवराः, आगस्त्यपौर्णमासपारणेति ।

अक्राणामागस्त्यहैमवर्चिहैमोदकेति ।

विमलीनामागस्त्यपैनायकपाणिकेति त्रिप्रवराः । एतौ गणौ क्वचित्।एतेषां सर्वेषामगस्तीनां परस्परमविवाहः । अगस्तेरनुवृत्तेः समानगोत्रत्वात्स्वस्वगणे समानप्रवरत्वाच्च । अन्यैः सर्वैरपि विवाहो भवति ।

आपस्तम्बस्त्वाद्यभेदमेवैकार्षमपीहते ।
कात्यायनश्च लौगाक्षिस्त्रीनेवाह गणानिह ॥
आश्वलायनस्त्वाद्यमेकमेव गणं परम् ।
सत्यापाढोऽप्याद्यमाह आर्षेयं चापि पाक्षिकम् ॥

इत्यगस्त्यस्य ।

ननु बौधायनेन जामदग्न्यगणद्वयमुक्तं वत्सविदाविति, कात्यायनेन तु चत्वारो जामदग्न्यगणा उक्ताः आचाऽन्या-दयस्ते कुतो नोक्ता इति चेत् सत्यम् । ये प्रसिद्धास्तइहोक्ताः, अप्रसिद्धास्त्विहैवान्तर्भूता इति ज्ञेयम् ।

तदाहुः,

वर्गा एकोनपञ्चाशत्प्रसिद्धा मुनिभिः स्मृताः ।
अप्रसिद्धाः परे वंशा अन्तर्भूता इहैव ते ॥ इति ।

अथ द्विगोत्राः ।

तत्र शौङ्गशैशिरयः पञ्चप्रवराः, आङ्गिरसबार्हस्पत्यभा-रद्वाजशौङ्गशैशिरेति आङ्गिरसबार्हस्पत्यभारद्वाजकात्यात्कीलेति वा । त्रिप्रवरो वा आङ्गिरसकात्यात्कीलेति । स च भा-रद्वाजाच्छुङ्गाद्वैश्वामित्रस्य शैशिरेः क्षेत्रे उत्पन्नः, उभयतो गोत्र-लक्षणत्वाद्गोत्रमिति । सर्वैर्भरद्वाजैर्विश्वामित्रैश्चैषामविवाहः । सगोत्र-त्वात् । कैश्चित्समप्रवरत्वाच्च ।

तदुक्तं स्मृत्यर्थसारे,

भरद्वाजेन शुङ्गेन वैश्वामित्रस्य शैशिरेः ।
क्षेत्रजातो द्विगोत्रर्षिः प्रोच्यते शौङ्गशैशिरिः ॥
विश्वामित्रभरद्वाजै तज्जानां तेन नान्वयः । इति ।

एवं वक्ष्यमाणेष्वपि द्रष्टव्यम् । यत्तु कश्चिदाह, एवं कापि-ला अपि ।

तदुक्तं तत्रैव,

कापिलानां भरद्वाजैर्विश्वामित्रैश्च नान्वयः । इति ।

तदसत् । कापिलानां क्वचिदपि सूत्रे पुराणे वा प्रवरप्रश्न-र्वादिषु वा द्व्यामुष्यायणत्वेनानभिधानात् । प्रक्षिप्तमिदं श्लोकार्द्ध-मिति वदन्ति । संकृतीनां कात्यायनेन प्रसिद्धद्विगोत्रशौङ्गशैशि-

रिणा सह पाठाद्विगोत्रत्वं, गणद्वयमध्ये पठितत्वाच्च । वसिष्ठगणे आपस्तम्बादिभिः पठितत्वाद्वासिष्ठस्य शक्तेर्विकल्पेन वरणाच्चो-भयथापि वसिष्ठस्यानुवृत्तेः प्रतिसन्धानात् । तथा आङ्गिरसत्वमपि, केवलाङ्गिरसां मध्ये पाठात् । बौधायनाङ्गिरसप्रवरसाम्याच्च । तेनै-तेषां वसिष्ठगणैः सर्वैः स्वस्वगणस्थैः सह वसिष्ठैर्लौगाक्षिभिश्च सह परस्परमविवाहः । स्वगणे सगोत्रत्वात् सर्वप्रवरसाम्यादन्यत्र किञ्चित्प्रवरसाम्याच्चेति । नैषां भरद्वाजता, तथा पाठाभावात् । क्वचित् पाठेऽपि वरणाभावात् । न च सत्तानुवृत्तिज्ञापकः सर्वैक-वाक्यतया कपित्वत् प्रसिद्धभरद्वाजसन्दंशपाठोऽप्यस्ति । प्रत्युत केव-लाङ्गिरससन्दंशपाठस्यैव दृष्टत्वात् । पुराणगतवंशमध्यपाठस्य कल्प-भेदेन नाममात्रसाम्येन वाऽवश्यमुपपत्तेः । अन्यथा तस्याव्यवस्थि-तत्वेन बहुविप्लवः स्यात् । एवं सति केवलाङ्गिरसमध्यपाठस्य प्रयो-जनं चिन्त्यमित्याहुः ।

त्रिकाण्डमण्डनस्तु दिवोदासा वीतहव्या लौगाक्षिणा सधर्मिण इत्याह । तदसंबद्धम् । संबन्धलेशस्यापि तत्राभावात् । द्व्यामुष्यायणानां प्रयाजादिव्यवस्थैवं, शौङ्गशैशिरेस्तनूनपात्प्रयाजः तस्य तु द्वयो-रपि सत्त्वाद्विश्वामित्रभरद्वाजयोराप्रीसूक्तमिति विकल्पः, संकृत्या-दिषु बौधायनादिभिर्नराशंसस्योक्तेः स्वीयाप्रीसूक्ते नराशंसाभा-वादाप्रीसूक्तं वसिष्ठस्यैव । एवञ्चाश्वलायनसूत्रमप्युपलक्षणविधया बौधायनादिभिरेकवाक्यतया व्याख्येयमिति केचिदाहुः । यथा तनूनपाद्देवतायुक्ता ऋक् तथा नाराशंसदैवतयुक्ताऽपि ऋगस्ति कण्वाङ्गिरसाप्रीसूक्तयोः अत उपांशुयाजदेवतावद्विकल्पः । स च व्य-वस्थितो ज्ञेयः । तत्तत्सूत्रकारपरिग्रहवशात् । तथाच येन सूत्रकारेण संकृतेर्नराशंस उक्तः तस्य वसिष्ठोक्ताप्रीसूक्तमेव, येन तनूनपादु-क्तस्तस्याङ्गिरसोक्तमेवेति व्यवस्थितविकल्पः । एवमन्येषां प्रयाज-

व्यवस्थया ऽऽप्रीसूक्तव्यवस्थेत्यन्ये । यद्गणान्तर्वर्ती यः स्वा-
यद्गणोक्ताप्रीसूक्तं तस्येति, सूत्रकारैर्यामुष्यायणत्वेनानुक्तत्वा-
दित्यपरे ।

अथ कात्यायनलौगाक्षिप्रणीतभरद्वाजगोत्रप्रवरानुदाहरि-
ष्यामः। आत्रेयायनिमार्कण्डिबालिशायनिसौपिष्टसौगेयाग्निवेश्या-
नां शाङ्खारिसारावरिवाहिसौक्तितृणकर्णिनृपाकर्णिप्रावाहणेया-
नायाश्वलायनिवावश्रौगिभ्यधिकारग्रीविणां मैथुनमतिसाष्टङ्कि-
घकिकायनानां तैतुरिथौरिधौताश्वकीनां सामस्तम्भिब्रह्मस्तम्भि-
तौल्वलितौच्छलियुगाद्रेपीणां साल्हिवाल्हिसौबुद्धिकाभारद्वाजौ-
दमेधियटेषुमतिदेवागारिदेवस्थानिहरिणकार्णिध्वाङ्क्षिश्रौगयकौसु-
द्गन्धिसात्यमुग्रिमात्स्यक्षीकमालोहरह्यालोहरगङ्गोदकिकौक्षेत्रि-
द्रौणिजैत्रिजित्वत्सायमानां कार्ष्णिजालिरापस्तम्भिसौजपृश्नि-
पौलिखाङ्कलायना इत्येते आत्रेयाः ।

कालायनाः केशमथा वाच्यतमरायणा भ्राष्टकद भ्रष्टुभिवि-
दिवेन्द्रलिबालङ्कायनाः कौलाखाक्रियाश्वाक्रीवकालकन्मातुषावक-
म्राल्हविरोपयकटमेष्यगपैंगलायनश्यामायना गार्ग्याः सांपरिवाराः
इत्येते कालायनाः ।

तैत्तिरिः कपिभूमिः खाण्डितः खान्दनः गर्ग इत्येते तित्तिरयः।

कपिः तित्तिरिः चिदिवण्डिः शक्तिः पतञ्जलिः भूयसीतिवर-
न्धिश्वैतकिरध्वाप्सुराजकेशिकलासिकाङ्कोरिरयो वान्यायनाः का-
त्यायना इत्येते कपयः ।

संकृतिपूतिमाषतण्डिमैथयनजानाकितैराघतरव्यग्रऋषिभिचारा-
यणिसहिगङ्गिगाक्षिताक्षागनहीत्येते संकृतयः ।

हिरण्यस्ताम्भिसात्यमुग्रिमुद्गलायना इत्येते मुद्गलाः ।

भेरुण्डाश्च भारुण्डाश्च तृतीयः शाकटायनः ।

ततः प्रमादसौनारी मर्कटो रमणः सणः ॥

कण्वो मार्कटयो रमणा इत्येते भेरुण्डाः । शौङ्गशिशिरा द्व्यामुष्यायणाः ।

इति भरद्वाजाः ।

अथ केवलाङ्गिरसः ।

हरिताः शाङ्खदर्भयः सौभगा भैमगवाः मनायवो वाकोदरा महोदराः नैमिश्रयो मिश्रोदकाः कौतमाः कारिवयः कौलवः पौलयः पोटलाः मत्स्या मान्धातारो माण्डकारवः खण्डायनाः माण्डसालयो गवेरणयो मात्स्यमालयो गाणगारयो भद्रमारयो कुत्साहसा हस्तिवासाः पैङ्गलाः पिङ्गाः पलाशिनो दार्दुला हस्तिनः कौमारहारिताः इलाः आम्बरीषा इत्यादयो हरिताः ।

काण्वा औपमर्कटायना वाकलाः पौलाहालिनो मौञ्जिमाश्रयो मौञ्जिगन्धा त्रिजिवाजया वाजश्रवसो भारुण्डा भरुण्डा रमणाः मर्कटा गर्धभाः माकाराः शाकटायना गोदायनाः शाकायनाः रावायणाः सौवेरिणो नारिणः आर्योदपश्चतुराः श्यामायनय इत्यादयः कण्वाः ।

रथीतरा हस्तिदासिका हायना नैतिरक्षयः शैलालयो शैलयो बिलीभायनाः तावहा भैक्षवाहा हेगवा वैरूप्या विरूपा अष्टुष्टाः अष्टादंष्ट्राः पृषदश्वा इत्यादयो रथीतराः ।

विष्णुवृद्धाः शठाः मरणाः मद्रणा भद्रणाः भद्रयो बादरायणा बात्समायणाः सात्यकयः सात्यकायना नैतुण्ड्याः स्तुत्याः भारुण्याः वैहोढा दैवस्थानयः क्षत्रिणाः छत्रिणा होत्रिणाः पुत्रिणाः जन्त्रिणाः वज्रिणाः कर्तृणाः शाम्बरायणाः औपमीतयः इत्यादयो विष्णुवृद्धाः ।

मुद्गलाः सात्यमुग्रयः हिरण्यस्तम्बयो हंसजिह्वा देवजिह्वा आलवालत्रा विडादयः आयाग्नयः स्तनयः छत्रहयाः स्तरणाः कार्यभासिता हिरण्याक्षा दीर्घजङ्घा हिरण्यदर्भाः भिन्दयः इत्यादयो मुद्गलाः।

संकृतयो मलकाः पौलस्ताण्डिशम्बुशैभवयः परिभत्रास्तारकाद्या हरिग्रीवाः शेशयाः श्रौतायना आग्रायणाः आग्रापयः पूतिमाषाः इत्येते संकृतयः।

कपयः स्वस्तिरयो बिन्दवो दाण्डिनो दिक्स्वशक्तयः पतञ्जलयो भूयसिनः स्तैवरन्धयश्चैतकयः ऊर्ध्वास्ता राजकेशिनः कलशिनः कण्ठाः कारीरयाः वान्यायना आमावास्यानाः कपेतराः स्वदायितराः जलसिञ्चयः कुसीदरयः स्तौजटयः सासवयः सलुयः क्षण्वाः सावस्यायनयः रुक्षेयाः इत्यादयः कपयः।

अथात्रेयाः।

अत्रयो भूरयः छान्दयश्छन्दोगेयाः पौष्पिकाः मौद्गलयः सौपाच्छालाः छागलास्तृणबिन्दवः भार्गतयो मालरुचो व्यालयः सांवच्यानयः कामर्यायणयो दाक्षयः सैदेहाः गाधिपतयः औद्दालिकयो द्रोणभावा गौरिग्रीवयो माविच्छिराः शिशुपालाः कृष्णात्रेया गौरात्रेया ऋक्षात्रेया नीलात्रेयाः श्वेतात्रेयाः श्यामात्रेयाः महात्रेयाः गालेयाः बालेयाः शौभ्रेयाः वामरथ्याः श्वेतभावाः शाद्रेयाः काद्रेयाः गोपवनाः कालापत्नयो नीलायना आनङ्गयो दीरङ्गयः सौरङ्गयो गौरङ्गयः पुष्पयः सौपुष्पयः साकेतायनाः भारद्वाजायनाः इन्द्रातिथयः शाम्बरय आह्वायनाः पवनाशाः क्रिविदिकयः शौनकर्णयः सौश्रुतयः गौरग्रीवयः कैरक्षयो जैत्रायणाः श्वेतकयो बाहुतन्त्रा वाहमित्राः जानुकयः एनअना भागमादनाः सांकृयेयाः सारायणाः सौक्तचराः अर्धपन्थाः

गौपन्याः कानजिह्वाः उदरग्रीवयो वैहालयः शाकलायनाः आत्रेयाः गौणीपन्थाः जलदाः भगपादाः शाकटायनाः अघ्र्यायणाः वादर्यायणाः माङ्गलाः बाहुपयाः शामलयो बाहुदन्तयो भागलयो रुणात्रेया दत्तात्रेयाः स्वस्त्यात्रेयाः शेखयः कीरायणाः नीशायनाः दार्भ्या दुलादुपा भात्ररथा गणपतयो वैश्वानकेयशैलूषकयो निकला इत्यादयोऽत्रयः ।

दक्षयो भलन्दना और्णनाभयश्चन्द्रात्रेयाः बैजवापयो मौञ्जकेशा गविष्ठिराः पूर्वातिथयः श्यामपुष्पयः शिलन्दलयो ब्रह्मपुष्पयो व्याघ्रपुष्पयः सौपुष्पयः कृष्णशीर्षका हिरण्यपुष्पयः कालासयः काकशीर्षयः पक्षयो बलयो धृतयः पार्ष्णयः कटुकयो मैत्राण्या शिरीषका इत्येते गविष्ठिराः ।

मुद्गला व्यालिमन्धयः अर्णवा बौधाक्षा वैतवाहाः शिरीषयः शालिमताः गौरिताः गौरकयो वाजवना इत्येते मुद्गलाः ।

वालेया हालेयाः कौद्रेयाः शौभ्रेयाः वामरथ्याः गोपवना इत्येते अत्रेः पुत्रिकापुत्राः ।

अथ विश्वामित्राः ।

कुशिकाः पर्णजङ्घाः वारक्याः औदलयो माणयो बृहदग्नयः आजवयः आश्वहयः आमस्तथ्याः कामन्तकाः बद्धकथाः श्विकिताः लामकायनाः शालकायनाः स्पाङ्कायनाः लौकागाराः सौगन्तव्याः यमदूताः आनभिम्लास्तारकायणाः श्वौवला जाबालयो याज्ञवल्क्याः वितण्डा नुवलयः सौश्रुतयः औपगहनयः उदम्बरयः श्राद्धक्याः श्यामेयाश्चैत्रयास्तालोचता मयूराः सौमत्याश्चित्रमतयः स्येतन्तायनाः मनवस्तन्तवो मान्तवो पक्षान्यत्वशब्दा बाभ्रव्याः कालाया उत्सरयो देवराताः औलूकयः उलूकाः धन्नवः शाला विशाशालाः कालववाः सैन्धवायनाः सौर-

रथयः कारीषयः संस्तुत्याः औलोप्याः पार्योदरयः पाडलयो गालवा वैद्रतयो यतण्डाश्वशाङ्कवः श्यामायनाः काला वालखिल्याः पाञयः सौभेयाः आश्वलायनाः आत्राहाः उलूखला जैमिनयः संकृतयः औथेयाः आर्जुनाक्षय इत्यादयः कुशिकाः।

लोहिता दण्डकयश्चाक्रवर्णायना बभ्रायना वासयोऽष्टका इत्येते लोहिताः।

रौक्षकाः स्वोत्वहला रैवणा इत्येते रौक्षकाः।

देवश्रवसो देवतरसाः श्रौमता श्यामकायना कामकायना इत्येते देवश्रवसः।

मार्गमित्रा माधुच्छन्दसा अजा इत्येते अजाः।

अघमर्षणाः कुशिका इत्यघमर्षणाः।

पूरणा वारिधय इति पूरणाः

इन्द्रकौशिका विश्वामित्रा इति इन्द्रकौशिकाः।

औदुम्बरयः शैशिरयः तैकायनयः तौकायनयः ताक्ष्यार्यणयः कात्यायनयः करीराभयो लावकयः शालङ्कायना मौञ्जायनाः कताः गङ्गायनयः कालवो वेदायनयो गोदायनयो मोदायनयश्चोदायनयो वेनायनयो रावणयो रातयो मौजायनय इत्यादयः कताः।

धनञ्जयाः पार्थिवा मदकबन्धुलाः पाणिनाश्चैत्रेयाः परिकुटय इत्यादयो धनञ्जयाः।

कथकक्राथका आद्धया उदग्रूर्णया इत्येते कथकाः।

आश्मरथ्याः घोरमुखाः कामुकायनाः कामलायनाः बन्धुलाः पाणिनयो नेतुलाङ्कुलवः कौशिका इत्येते आश्मरथ्याः।

साहुला राहुला माहुलाः काहुलाः कागुला औमिसा औहलाः द्रुहलाः शातातयः कोमलायनाः सातवयो आसवय इत्येते सा-

हुलाः ।

औद्दालकयः उद्वासा रौक्षका आज्योद्वहा रेणुका गाथिन इत्येते गाथिनः ।

शालङ्कायनाः शालाक्षाः लौहिताक्षा लौहिता जह्नव इत्येते कौशिकाः ।

अथ कश्यपाः ।

काश्यपाश्चाङ्गिरयो मङ्गरा ऐतिशायना आभूत्या वैशिप्रा धूम्रा धूम्रायणाः सौम्या धर्म्यायणा सौवटक्षा राग्रायणाः वैवकयः प्रावर्याः हृद्रोगा आमयाः पाश्चायनिकाः मेषाम्तकयः सागसयो माघसरावयः सैन्धवयः सायस्या आसुरायणाः छागव्याः सौनद्याः स्थौलकेशयः वार्धकय औपव्या लाक्षायणाः क्रोष्टुजीवनयः स्वाद्रायणा रौहितायना मितकुम्भाः पिङ्गलाक्षयः औदुलयो मारायणाः पौलयो वैकर्णेयाः कौशीतकेयाः धूमलहाणयः सुरा गौरिवायनाः महाचक्रेयाः पैठीनस्याः यानस्या विषगणा दाक्षमाणयो भालन्दनाः शाङ्गमित्रेयाः हरित्या जारमात्स्या रमाणयः साविश्रवसो वैशम्पायनाः खेरङ्कयः कासेलय उल्कायणयो मार्जनायनाः कांसलायना देवाहोतारः सुवयः खरेभाः अयःस्थूणाः भागुरयः पाथिकपाटलयो गोमायना हिरण्यवायाः अग्नयो देवयः सौर्या मुसला आविश्रेण्या उत्तरतोगण्डेपवः उदरामन्त्रिता वैकर्णयः स्थूलबिन्दवः आयायणा मौपका रीतिकायना औषमतिमाः सरागोजा वीराध्रारायणयः साराहरेयाः कैरआश्वैकेता मातपस्त्रैकयो भौवनाश्वैवगाव्या हगायकाः देवयाताः सोमयागाः उपश्वाया वयश्चेदुर्गव्यायनाः भक्तुहया हृत्रोगः काचायणाश्चक्रधर्मिणो महाचक्रधर्मिणः श्रपयणः हार्करयो दाक्षायणयो हास्तयो दासयो वात्स्या

यानयो हास्तलायनाः त्यक्तवः स्वत्रभ्रष्टा आश्वत्तायनाः कौसी-ध्रकाः स्वगादाः अग्निशर्मायणाः मौरूज्याः कैकसेयाः काश्वहायना द्विहायना हस्त्याः सानुश्रुता हरितायना मातङ्गाः सोमश्रुत्रो ग्रा-मराधाः श्यामा यक्षाः सासिसाः स्वयशान्ताः हस्तिदाः स्वासो-वजत्रो वाजिहायना बद्धकायना भौमनयो मौष्ठायना मौपरयो वा-त्स्यायनाः शेरकाः काष्ठायनाः नागशिरसः शौकयाः पाचामनयो ग्रावहस्तयो भवनन्दयो भृयोगराः प्रतिश्रवाः मीतिथेयाः कैजा-लयः काण्डवायनयः कैरिह्ना पैलमैलयश्चाक्रायणाः पद्मोडलाय-नाः कौषीतका मारीचा कामेया नक्रयो वेलर्णाभिक्षया भूताशत्र इत्यादयो निध्रुवाः ।

शाण्डिलाः कोहलाः पापकाः वापिका मेघाः सौरानवः सा-वणाः कारेयाः कौकुण्डयस्तैक्षिमाहकया महोदयकयः कोशयो मौ-जायना भाणवंशाः स्वार्तमानया गङ्गायना वात्सभालयो गोभिला वेदायना वात्स्यायना बद्रूहरयो भागुरयः स्वादन्तीमुखा हिरण्य-बाहवस्त्वैदेहा योमूत्रा वात्स्यशाठो जानन्धरयो धन्वन्तरयो वृक-खण्डा गर्भदा मुखा जावंशास्तृणविन्दवः कौकिलाः पैपल्यादयो जलन्धरा गोशालाः ग्रातुतापनाः जीमार्पिप्पलाः शआः केशिलाः मुञ्जमयूराः वैदानवाः कौवलयः कौरुण्डजा उत्तराः सुजातपूराः पर्यामाः गर्दभाश्चेरलाः सुकेतवः कुहकाः संपचाश्चुलुभयो ब-हुपिण्डा द्वैपुराश्चटायना महाकौरलयाः कुहला मगला भगला कै-राताः पर्यश्वा भुजाजलयः पारात्वारिण इत्यादये शाण्डिलाः ।

वैतालकवरा ग्रालला गौरिश्रवस आश्वलायनाः कपिष्ठलाः सावित्रक्षाः व्याघ्रपादा वाह्यकायनयो गायनयो नयाव्या जातूक-र्ण्या औभ्रामयः कोभाजयः कौलायना सुन्दरहारीताः काण्डेहू-ह्यः सोपवत्सायनाः आलम्भायनाः लोमायन्याः स्वस्त्पाक-

पिताः देवन्ताः पार्णकायनाः पार्णवल्का देवनीगौरव्या विश्वायना वाहकथयः अवाकितयो वस्त्रयाजयाः पूतिमाषाः सप्तवेलाः वासिष्ठाः औपगवा वैष्णवाः प्लावनायना औडिलोमा गोपायनाः पौवयो वाम्रकृतः कालोहवयः पालिसया वाग्रथयः आपस्थूणेयाः ब्रह्मपुरेयाः स्वस्तिकाः पाण्डुलयो गौधिलयो चौविलयो मालोहवयः सौमनसायना ब्रह्मवलयः श्रौलयः पौष्टिश्रवसो याज्ञवल्क्याः रावणयो मौलयः कौलयो औपलोमाः अध्वदा वसदाकराः आश्वलायना मिथोवलपाश्चण्डाद्यौ गौडिलयो व्यालोहपयः श्यामुनाश्वाः शुपाचयो विदयो दासव्या भालिसव्या आर्जनाक्षय इत्यादयो वसिष्ठाः ।

कुण्डिना लौहायना गुगुलयोऽश्वत्था नैकर्णयः औपस्वस्थाः अश्वरथाः वाहवः क्रौञ्चोरयाः साङ्कृतिनः कापटवः पेटकानयः आमा हिरण्याक्षायणाः पैप्पलादयः सौगयोक्षिता माध्यन्दिनाः सोमपक्षयः स्वस्थयो भूतयः आकोहालादयः मैश्रुङ्गाः लोभायमना गोपना विधकषयो मैत्रावरुणा इत्यादयः कुण्डिनाः ।

उपमन्यव औदलया माण्डलेखयः कापिञ्जलाः जलागतास्तपोलोकाश्लेवर्णाः पार्श्वगिरयः साराक्षरा पौलालया महाकण्वायना बालशिखा औद्वाहयानयः आश्वलायना भागवित्तायनाः कुण्डोदरायणाः लाक्ष्मणेया वाल्लकयो वार्कयः आलवचाः कापिकेशाः शीलालवः शाकाधियो दाकायना बलेखला लम्बायना प्रसचयाः शाकोहयाः सरावपाः काण्वायनाः कालाक्षा क्षोरकाः कृष्णास्तरायणाः पालङ्कायनाः उद्वाहाः कौरव्याः क्रोधिनो मानेया ब्रह्मवलयो मापद्मवयाः सांरूपायनाः कालाक्षाः भालम्बायना गोरथाः शुहकाः श्यामयो रास्येया औपलेखयो गोपो-

दन्तयः कौमाशः काण्डोदरयः चक्रदर्भयः कारपुरेयः कौलकलेयः शाङ्ग्रायना रौक्षहेमणयो नाहुलयो बाहुलयो काजपायना भागुरायणाः शाङ्कुर्या मुञ्जकायनाः पादकायनाः स्काम्भायनाः पार्थश्रवसो मारायणा धातुहयो भागहयः कौरकृतः कशानेयाः इत्यादय उपमन्यवः ।

काण्डूशायो वाजयो वाजिमन्तयो भैमतायना गोवालयः प्रागेहयाः वैकलय लाक्षयः कौकुचादयो हार्यश्वयः कल्पायनयो गोपयः स्पातयो वारुणयो भालुक्या वाजरयः क्राहयनाः क्रौकुलयः क्रौमतयः कृष्णासिताः कापिसुखाः स्वास्यायनयः श्वेतयूपयः पौष्णरसादयो गार्ग्यायनयः स्तार्णेयाः श्मागेयाः श्रोतहयः सहचौलया वादनयो नेमयः पार्थेयाः कौरुजायनाः कार्ष्णायनाः शैकयो वार्ष्यायणाः कपितोताः स्कम्भिन्या माण्डिक्यः श्यानयातयः पटिका वधिका तिल्वयूपयः खारयायनाः क्षौमयो हर्यत्वयः श्वित्रयः उपीकहस्ता इत्यादयः पराशराः ।

जातूकर्ण्या अथर्वोघाः पाटलादयो लवसौक्तिकाः खगा इत्येते जातूकर्ण्याः । इति वसिष्ठाः ।

अथागस्तयः ।

अगस्तयो विशालाद्याः सालायनाः औपदहनयः कुल्माषा दण्डयो लावणयो लाव्या वरण्डयो वैरणयो बुदोदरयः सैत्रपथयः शाल्यातपाः मौञ्जिकयः पार्थोहिता हारिग्रीवाः रौहिण्या मौसलयः सैत्रकाः सौभरायणाः वैकर्णायनाः मार्गायणाः प्राषार्याः शालङ्कायनय उपकलमकायनयो वारिणयो वाह्लायनया मासकयः क्षौमितया लाशयः साकक्षयस्तन्द्रयो लाव्यायनयो हद्रागयः मातुराक्षयो रम्याक्षयः पण्डोद्धृताः कुड्याक्षयः उप-

कुला अर्बुदाः शैत्रायुधाः पटहस्ताः वैहोरन्नयः औकुला वैर-ण्डयो गोव्यादयो दामोष्णीषास्तन्नराः सौम्यानयाः ब्राह्मण्याः पुत्रयो वाशिपायणाः शारङ्गराः फाण्टावता इत्येते अगस्तयः ।

अन्ये निर्भेदाः अगस्तयः ।

करम्भयः कौशल्याः सुमेधसो मयोभुवो गान्धरायणाः पुलस्तयः पुलहाः क्रतवः कार्णाटा माहेन्द्रा इत्यादयो वा अ-गस्तयः ।

इध्मवाहास्तद्याद्याः । अक्राः शक्राः शुका हंसाः श्वासा भासा हिमोदकाः हेमचर्चयः इत्येते अक्राः ।

विमलयो मामभितकयः पाणिक्राः पिनायकाः नन्दयो विलयश्चिलय इत्येते विमलयः । इत्यगस्तयः ।

लौगाक्षयो दार्भायणाः मैत्रादयो देहकालेयाः कापुटयः कलयाः कंसपत्राः भालकायनया नित्यरास्ताचयः नुदकयः का-नामकयः सौनयः सैतिकपष्ठिमेरा निष्ठयः छोपिकयः सौमुकयः सैरन्धयः श्रोष्यमाणा योधकालकयो राजवाहय आनष्टयो भुकु-रयो राजवन्तयः सौरयः सैकयः सासुचयः शरद्वन्ता औपपत्य-कयः सौतया इत्यादयो लौगाक्षयः ।

लौगाक्षायणानां सर्वैः कश्यपैः सर्वैश्च वसिष्ठैः सङ्कृतिभिश्च सह परस्परमविवाहः सगोत्रत्वात् । सप्रवरत्वाच्च ।

तदुक्तं स्मृत्यर्थसारे,

वसिष्ठैः कश्यपैर्नित्यं लौगाक्षीणामनन्वयः ।
सङ्कृतीनां द्विवंश्यत्वाद्वसिष्ठैश्च चतुर्विधैः ॥
स्ववर्गीयैः सगोत्रत्वात् प्रवरैक्याच्च नान्वयः ।
एते त्रयो द्विगोत्राः सर्वसंमताः ।
धनञ्जयाः सर्वैर्विश्वामित्रैरत्रिभिश्च सगोत्रत्वादविवाह्याः ।

उक्तं च स्मृत्यर्थसारे,

विश्वामित्रात्रिगोत्रेण नोद्वहेयुर्धनञ्जयाः । इति ।

जातूकर्ण्यानां वसिष्ठैरत्रिभिश्च सर्वैः परस्परमविवाहः । यद्य-पि सूत्रकारैर्द्विगोत्रत्वेनैते त्रयो नोक्तास्तथापि केषुचित्सूत्रेषु ग-णद्वये पाठाद्विगोत्रत्ववाचोयुक्तिः अत्रिपुत्रिकापुत्राणाम् । वामर-थ्यादीनां सर्वैरत्रिभिर्वसिष्ठैरत्रिभिश्च परस्परमाविवाहः । जमद-ग्निसगोत्रिणां देवरातादीनां विश्वामित्रगणे उत्पन्नत्वाद्विश्वामि-त्रैः सहाविवाहः ।

तथाच प्रयोगपारिजाते,

जमदग्निगणस्यापि विश्वामित्रगणस्य च ।

न देवरातगोत्रेण विवाहः स्यात्परस्परम् ॥ इति ।

वस्तुतस्तु बह्वृचब्राह्मणे सहोवाच शुनःशेपः स वै यथा नो ज्ञपयेत्यस्या गाथायाः पूर्वैः सङ्क्षिप्याभिप्रायो दर्शितः ।

पुरात्मानं नृपं विप्रं तपसा कृतवानसि ।

एवमाङ्गिरसं मां त्वं वैश्वामित्रमृषे कुरु ॥ इति

देवरातेनोक्ते स होवाच विश्वामित्रो ज्येष्ठो मे त्वमित्यादिना विश्वामित्रेण स्वपुत्रत्वसंपादनानुरूपाशीर्वादं दत्वाऽन्ते उपसंहृतम् ।

अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः ।

जह्नूनां चाधिपत्ये दैवे वेदे च गाथिनाम् ॥ इति ।

अयमेवार्थः सर्वानुक्रमणीकारेण श्रुत्यर्थं संगृह्योक्तः । कश्यपं चोनाजीगर्तिः शुनःशेपः स कृत्रिमो विश्वामित्रो देवरात इति । भाष्यकारेणाप्येतदेवं व्याख्यातम् । तेनायमङ्गिरोगणोत्पन्नः । त-त्रापि सह देवरातो वैश्वामित्र आस तस्यैते कापिलेयबाभ्रवा इत्य-स्य यतोऽयं विश्वामित्र आस अतोऽस्यैकतः कापिलगोत्रोत्पन्ना एकतो बभ्रुगोत्रोत्पन्ना बन्धवो ऽभवन्निति भाष्यकारव्याख्यानेन

कपिलस्य भरद्वाजगणे दर्शनात् बभ्रोर्विश्वामित्रगणदर्शनाद्भरद्वाजगणोत्पन्नोऽयं, तेनायं देवरातो भरद्वाजेन विश्वामित्रेण चाविवाह्य इति । पुराणे तु देवरातस्य जमदग्निसंबन्धकीर्त्तनं तत्कल्पान्तरविषयं द्रष्टव्यम् । पुराणानामव्यवस्थितत्वात् इत्याहुः ।

अत्रानुक्तानामपि कतानामाश्वलायनसूत्रे शौङ्गशैशिरमध्यपाठाद्बौधायनादिषु विश्वामित्रगणे पाठाद्विश्वामित्रैर्भरद्वाजैरविवाहः।

अन्ये तु एतेषां गणद्वयपाठाभावेऽपि स्मृत्यर्थसारसंग्रहे चोक्तत्वाद् द्विगोत्रत्वम् । एतेनैतदुक्तं भवति न केवलं पाठमात्राद् द्विवंश्यता किं तर्हि द्विवंश्यत्वेन गणितानामेवेति ।

लौगाक्षयस्त्रिप्रवराः काश्यपावत्सारवासिष्ठेति होता, वसिष्ठवद्वत्सारवत्कश्यपवदिति अध्वर्युर्वासिष्ठावत्सारकाश्यपेति होता, कश्यपवदवत्सारवद्वसिष्ठवदित्यध्वर्युः ।

एते ऽहर्वसिष्ठाः रात्रौ कश्यपाः । अहर्वसिष्ठा इत्यनेन विवाहातिरिक्तं वसिष्ठकार्यं वसिष्ठशब्देनोच्यते । एवं नक्तं कश्यपा इत्यत्रापि । तेन दिनकर्मणि वसिष्ठगोत्रप्रयुक्तप्रयाजादिकार्यं रात्रिकर्मणि कश्यपगोत्रप्रयुक्तं तत्कार्यम् । तत्तद्द्विगोत्राणां यथा तत्तदेकगोत्रैः सहाविवाहस्तथा तत्तदेकगोत्राणामपि तत्तद्द्विगोत्रैः सहाविवाहः यथा तत्तदेकगोत्रैः। तत्तद्द्विगोत्रविशेषाणामन्योन्यं यथैकगोत्राणां तथा द्विगोत्राणामपि। वसिष्ठभरद्वाजत्वादिगोत्रस्याविशेषात् ।

अथ द्व्यामुष्यायणप्रसङ्गाद्दत्तकादिविचारः प्रस्तूयते ।

तत्रेदानीन्तनानां दत्तकस्वयंदत्तकृत्रिमादीनामनयैव रीत्या पितृद्वयस्य सगोत्रैः सहाविवाहो द्रष्टव्यः । नच

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

इत्येवं विधलक्षणलक्षितद्व्यामुष्यायणस्यैवैतदुक्तं तस्योभयसंबन्धित्वात् न तु दत्तकादेस्तस्यैकमात्रसंबन्धित्वादिति वाच्यम्। एवं हि देवरातादीनामपि द्विगोत्रता न स्यात्। शौङ्गशैशिरिसंकृत्यादीनाम् अथेमानि द्व्यामुष्यायणकुलानि भवन्तीत्युपक्रम्याभिधानात् तेषां लक्षितद्व्यामुष्यायणत्वं स्यादपि न तु स्वयंदत्तादिरूपाणां देवरातादीनाम्। ननु

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः।

इति वचनाज्जनकगोत्रनिवृत्तेः कथं जनकसगोत्रैरविवाह इति चेत्। नैष दोषः। आर्षेयवरणाभिवादनादौ जीवतो दत्तकादेः मृतस्य च श्राद्धदेवतात्वे जनकगोत्रसंबन्धाभावार्थं तद्वचनं न त्वविवाहार्थम्। विवाहे तु जनकसगोत्राया वरस्य जनकगोत्रसंबन्धाभावेन स्वसगोत्रत्वाभावेऽपि पितृसगोत्रत्वप्रयुक्त एव निषेधः। असगोत्रा च या पितुरिति वचनात्। तत्रत्यपितृपदप्रयोजनमप्येतदेवेत्युक्तं स्मृतिचन्द्रिकाकारेण। प्रवरमञ्जरीकारस्याप्येतदभिमतम्। एवं पुत्रिकापुत्रदत्तक्रीतपुत्रादीनामपि। द्वयोरपि गोत्रयोरविवाह इति तदुक्तेः। न च दत्तक्रीतादयो द्व्यामुष्यायणाः स्वतो द्विगोत्रा वेत्येवं प्रतिपादितं कैश्चित्। तदपरे न क्षमन्ते। अपुत्रेण परक्षेत्रे इत्यादिलक्षणलक्षितस्य द्व्यामुष्यायणत्वेन लक्ष्यत्वात्। विज्ञानेश्वरेण चेदमेवं व्याख्यातम्।

क्रियाभ्युपगमात्क्षेत्रं बीजिने यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥

इति मनुवाक्ये क्रिया अत्रोत्पन्नमपत्यमावयोरुभयोरिति संवादरूपा विवक्षितेति याज्ञवल्कीयमपि तद्विषयमेवेति तेषामेव द्व्यामुष्यायणता नत्वन्यत्र।

फलं त्वनभिसन्धाय क्षेत्रिणा बीजिना तथा।

प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी ॥ इति

मनुवाक्ये फलानभिसन्धानं नामात्रोत्पन्नमपत्यमावयोरुभयो-रित्येवं संवादाभावरूपं विवक्षितम्। तेन तदुत्पन्नो न द्व्यामुष्यायणः किं तु क्षेत्रजः। इदमेवाभिसन्धाय याज्ञवल्क्योऽप्याह,

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥
आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथा भवेत् ।
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ॥ इति ।

तथाचोभयोरप्ययमिति संवादे दत्तकादिरपि द्व्यामुष्यायणः। तदभावे प्रतिग्रहीतुरेव। द्व्यामुष्यायणानां शौङ्गशैशिरिवन्निर्णयः। अन्येषां तु क्षेत्रजदत्तकादीनां गोत्ररिक्थे जनयितुरित्यादिमनुवाक्येन जनकगोत्रनिवृत्तौ नोभयतः प्रवृणीतइत्यादिना। नन्वेवं जनककुले सगोत्रत्वनिमित्तो विवाहनिषेधो न स्यात्। सापिण्ड्यनिमित्त एव तर्हि भविष्यति। नचैवं पिण्डो व्यपैतीत्यस्य सापिण्ड्यं निवर्त्तत इति मिताक्षराव्याख्यानेन विरोधः। सामान्यवाक्यस्यास्य "ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्चेति" गौतमवाक्येन विवाहविषये बाधितस्याशौचविषये संकोचेन व्यवस्थापनादिति सर्वमकलङ्कम्।

अन्ये तु शिष्टपरिगृहीतत्वात्प्रथमपक्षमेवाद्रियन्ते। युक्तश्चायम्। गोत्ररिक्थे इत्यत्र यथा सापिण्ड्यशब्दस्य सामान्यत्वेन गौतमीयविशेषवचनेन तदितरविषयत्वं, तथा सगोत्रेष्वत्र पितृग्रहणात्तत्र गोत्रशब्दस्यापि तदितरविषयत्वं युक्तम्।

तदुक्तं प्रयोगपारिजाते स्मृत्यन्तरे,

गोत्रद्वयेऽप्यनुद्वाहः शुङ्गशैशिरयोर्यथा।

न चात्र मातृग्रहणं व्यर्थम्। मातृद्वारकसापिण्ड्यस्य विवक्षित

त्वादित्याहुः ।

यत्तु भरद्वाजस्य बृहस्पतेः सकाशान्ममतासंज्ञकोतथ्यक्षेत्रजातत्वेनोतथ्यप्रवराणां गौतमानां भरद्वाजानां च सर्वेषां परस्परमविवाह इति कश्चित् । तदसत् । तस्य क्षेत्रजातत्वेऽपि द्व्यामुष्यायणत्वाभावात् । न च तत्र प्रमाणमस्ति । इदमावयोरपत्यमस्त्विति संवादेन विष्णुपुराणेऽनुक्तेः । प्रत्युत द्व्यामुष्यायणत्वाभावे एव प्रमाणं सम्भाव्यते । सर्वेषु प्रवरसूत्रेषु भरद्वाजानां द्व्यामुष्यायणत्वेनाप्रतिपादनात् । बौधायनेन च पूर्वैर्गौतमैरुतथ्यैश्च केवलाङ्गिरोभिः सह विवाहोक्त्या विष्णुपुराणमपि द्व्यामुष्यायणरूपक्षेत्रजत्वप्रतिपादनपरमिति वर्णनीयम् । किञ्च । गोत्रप्रवराभिधानपरपुराणभागस्यातिसंवादाभावात् पौराणिकस्य वंशानुपूर्वीमध्यगतजन्मक्रमस्यात्यव्यवस्थितत्वात्तस्य सुतरामतिप्रसङ्गापादकत्वात्तदनुरोधेन गोत्रप्रवरनिर्णयस्याकिञ्चित्करत्वादिति दिक् । तदत्र द्व्यामुष्यायणानामुभयेऽपि प्रवराः कीर्त्तनीयाः । तथाच उभयतः प्रवृणीतैकमितरतो द्वावितरतः द्वौ वेतरतस्त्रीनितरतः न हि चतुर्णाप्रवरोऽस्ति न पञ्चानामतिप्रवरणमाङ्गिरसबार्हस्पत्यभारद्वाजकात्यात्कीलेत्याश्वलायनः । अस्यार्थः । द्व्यामुष्यायणानां प्रवरकरणेऽनियमप्रसक्तौ उभयतः प्रवृणीतेति विहिते आङ्गिरसबार्हस्पत्यभारद्वाजेति पितुः वैश्वामित्रकात्यात्कीलेति क्षेत्रिण इत्येवमुभयतः षड्वरणे प्रसक्ते न पञ्चानामतिवरणमिति षड्वरणे प्रतिषिद्धे उभयतो वरणविधानात् "समं स्यादश्रुतित्वादिति"न्यायेन द्वयोर्द्वयोरुभयतो वरणे प्राप्ते न हि चतुर्णां प्रवरोऽस्तीति निषिद्धे कथं तर्ह्युभयतः प्रवृणीतेत्याकाङ्क्षायामेकमितरत इत्यादिना पक्षद्वयमुक्तम् । तत्रापि पूर्वं जनकस्य ततोऽन्यस्य त्रयाणां च सम्भवे पञ्चानां कीर्त्तनम् । तत्रापि त्रिपक्षे

जनकस्य द्वावाद्यौ प्राथम्यात् । उत्तरस्य एकः । पञ्चपक्षे च शाङ्गशिशिरिवदेव जनकस्य त्रयः भरद्वाजस्य द्वावाद्यावेव प्राथम्यात् तदतिक्रमे कारणाभावाच्च ।

अथ क्षत्रियवैश्यानां गोत्रमुच्यते ।

ऐलाद्याः पुरूरवाश्च क्षत्रियास्तेषां मनुर्गोत्रं त्रिप्रवराः मानवैलपौरूरवसेति होता, मनुवदिलवत्पुरूरवोवदित्यध्वर्युरिति कात्यायनानुयायिनः । पुरूरवोवदिलवन्मनुवदिति लौगाक्ष्यादयः ।

वैश्याः भालन्दनादयस्तेषां भलन्दनो गोत्रं भालन्दनसाम्प्रमाङ्कीलेति होता, भलन्दनवत्सप्रवन्मङ्कीलवदित्यध्वर्युरिति कात्यायनादयः । मङ्किलवत् सप्रवद्भलन्दनवदित्यध्वर्युरिति लौगाक्ष्यादयः । वात्सप्रेत्येकार्षेया इति त्रिप्रवरा वेति दक्षः ।

तत्र द्विविधाः क्षत्रियाः केचिद्विद्यमानमन्त्रदृशः केचिदविद्यमानमन्त्रदृशः । तत्र विद्यमानमन्त्रदृशः स्वीयानेव प्रवरान्प्रवृणीरन् । ये त्वविद्यमानमन्त्रदृशास्ते पुरोहितप्रवरान्प्रवृणीरन् । स्वीयप्रवरसत्त्वेऽपि स्वस्वपुरोहितगोत्रप्रवरपक्ष एव मिताक्षराकारमेधातिथिप्रभृतिभिराश्रितः । आपस्तम्बेनापि पक्षद्वयमुक्त्वा निर्णीतम् । स पुरोहितप्रवरो ऽस्त्येव न्यायेनेति । अयं च न्यायः मन्वादिषु गोत्रप्रवरलक्षणाभावः अगस्त्याष्टमसप्तर्षीणां ब्राह्मणत्वेन तदपत्यत्वाभावात् क्षत्रियवैश्ययोर्गोत्रत्वाभावात्प्रवरत्वस्य सुतराम् भावः । नापि सर्वे मन्त्रकृत इति । यच्चात्र प्रवरमञ्जरीकारादय ऊचुः, सर्वेषां राजन्यवैश्यानामेकरूपगोत्रप्रवरत्वे सर्वेषां परस्परमविवाहप्रसङ्ग इति न्यायः, स विशेषरूपेण सवर्णाविवाहोपदेशेन सामान्यरूपसगोत्रसप्रवरविवाहनिषेधबाधात्सुपरिहर इत्याहुः । तस्मात्सर्वैः क्षत्रियवैश्यैर्वा वरणे यः पुरोहित उपात्तस्तद्गोत्रप्रवरैरेव तेषां कर्मानुष्ठानं विवाहाविवाहौ चेति । इति क्षत्रियवैश्यानाम् ।-

अथाविदितस्वगोत्रप्रवरविशेषाणां ब्राह्मणानामप्याचार्यगोत्रप्रवरास्तैरेव कर्माणि विवाहाविवाहौ च। अथासंप्रज्ञातबन्धुराचार्यामुष्यायणमनुब्रुवीताचार्यप्रवरं वृणीतेति बौधायनवचनात् । अस्यार्थः । बन्धुर्गोत्रं प्रवरो वा सम्यक् न प्रज्ञातो येन सोऽसंप्रज्ञातबन्धुर्यथा सत्यकामो जाबालो गौतममाचार्यमुपेयिवान् भगवान्मेत्युक्त्वा शरणं प्रपन्नो गौतमेन च किङ्गोत्रो नु सौम्यासीति गोत्रं पृष्टः सन् नाहमेतद्वेद भो यद्गोत्रोऽहमस्मीति एवमसम्प्रज्ञातबन्धुराचार्यामुष्यायणमाचार्यस्य गोत्रं चानुब्रुवीतानुपूर्व्या ब्रूयात् आचार्यप्रवरं वृणीतेति तदेवं विवृतम् । एवं च सति यो वा अन्यः सन्नन्यस्यार्षेयं प्रवृणीते स वा अस्य तद्पिरिष्टं वीतं गृहइत्यादिदोषश्रवणं प्रज्ञातगोत्रप्रवरविषयम् । तेषां त्वाचार्यकन्यामात्रं निषिद्धं न सर्वा तद्गोत्रा ।

तथाच स्मृतिः,

गायत्रीं यस्य यो दद्यात्तत्कन्यां न विवहेन्न सः ।
तद्गोत्रे तत्कुले चापि विवाहो नैव दुष्यति ॥ इति ।

एतदनन्तरं गुरुगोत्राज्ञानेत्यादि गुरुगोत्राज्ञाने दानादिनाऽन्यगोत्राः स्युरित्यपि केचित् । आदिशब्दः क्रयोपलक्षणम् ।

यद्वा स्वप्रवराज्ञाने जमदग्नीनुपाश्रयेत् ।
गोत्रकार्येषु सर्वेषु किन्तु नैवोद्वहेत्क्वचित् ॥

इति त्रिकाण्डमण्डनः ।

गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमिष्यते ।

इति यत् तदाचार्यगोत्रस्याप्यपरिज्ञाने विवाहातिरिक्तविषयं च शूद्रवदिति ज्ञेयमिति सङ्क्षेपः ।

* तथाचोक्तं स्मृत्यर्थसारे प्रायश्चित्तविधाने ऊढ्वोपगच्छती-

---

* अत्र ग्रन्थः अलग्न इव भाति ।

ति । मैवम् । गुरुतल्पव्रतातिदेशप्राप्तस्य सगोत्राग्रहणस्य गन्तृपरिणीतसगोत्राविषयत्वे मानाभावात् । समानप्रवरामित्यत्रापि उद्वाह एव चान्द्रायणस्योक्तत्वादिति परस्परव्यभिचारिनिमित्तसन्निपातात्प्रायश्चित्तद्वयं कर्त्तव्यम् । सगोत्रायामज्ञानादुत्पन्नस्य काश्यपगोत्रेण व्यवहारः कार्यः । गर्भो न दुष्यति काश्यप इति विज्ञायत इति बौधायनवचनात् । जनकशुद्धिश्चान्द्रायणत्रयेण ।

तथोक्तं स्मृत्यर्थसारे,

अज्ञानादैन्दवैः शुद्ध्येत्त्रिभिर्गर्भस्तु काश्यपः । इति ।

ऐन्दवैरिति बहुवचनं त्रित्वमात्रपर्यवसायि । कपिञ्जलाधिकरणन्यायात् । अल्पाभ्यासे एकस्मिन् चान्द्रायणे प्राजापत्यत्रयम् । बह्वभ्यासे एकस्मिन्प्राजापत्याष्टकमित्येवं कल्पनीयम् । ज्ञानतस्तूत्पत्तौ चाण्डालत्वमेव ।

तथाच यमः,

आरूढपतितापत्यं ब्राह्मण्यां यश्च शूद्रजः ।
सगोत्रोढासुतश्चैव चण्डालास्त्रय ईरिताः ॥ इति ।

त्रिकाण्डमण्डनोऽपि,

सगोत्रायां प्रजां जातां चाण्डालेषु विनिक्षिपेत् ।
गुरुतल्पव्रतं कृत्वा तां रक्षेज्जननीमिव ॥ इति ।

गुरुतल्पव्रतं द्वादशवार्षिकम् । एतस्य गोत्रप्रवरविवेकज्ञानस्य तु फलं विधिनिषेधविषयपरिज्ञानमेव । प्रवरसूत्रकारैस्तु ब्रह्मलोकावाप्त्यादिफलमित्युक्तं तत् पूर्णाहुत्या सर्वान्कामानवाप्नोतीतिवत्पूर्वकर्मानुष्ठानफलस्यैव स्तुत्यर्थमिति संक्षेपः ।

प्रोक्तो बौधायनादीनां रीत्या गोत्रविनिर्णयः ।
वक्ष्ये मत्स्यपुराणोक्तं गोत्रप्रवरनिर्णयम् ॥

सूत उवाच ।

इत्याकर्ण्य स राजेन्द्र ॐकारस्य च वर्णनम् ।
ततः पप्रच्छ देवेशं मत्स्यरूपं जलार्णवे ॥
मनुरुवाच ।
ऋषीणां नामगोत्राणि वंशावतरणं तथा ।
प्रवराणां तथा साम्यमसाम्यं विस्तराद्वद ॥
महादेवेन ऋषयः शप्ताः स्वायंभुवेऽन्तरे ।
तेषां वैवस्वते प्राप्ते सम्भवं मम कीर्तय ॥
दाक्षायणानां च तथा प्रजाः कीर्तय मे प्रभो ।
ऋषीणां च तथा वंशं भृगुवंशविवर्द्धनम् ॥
मत्स्य उवाच ।
मन्वन्तरेऽस्मिन्संप्राप्ते प्राप्ते वैवस्वते पुरा ।
अश्वमेधेतु वितते ब्रह्मणः परमेष्ठिनः ॥
महादेवस्य शापेन त्यक्त्वा देहान्समन्ततः ।
ऋषयश्च समुद्भूता हुते शुक्रे यथेच्छया ॥
देवानां मातरो दृष्ट्वा देवपत्न्यस्तथैव च ।
स्कन्नं शुक्रं महाराज ब्रह्मणः परमेष्ठिनः ॥
तं जुहाव ततो ब्रह्मा ततो जातो हुताशनः ।
ततो जातो महातेजा भृगुः स तपसां निधिः ॥
अङ्गारेष्वङ्गिरा जातस्तृतीयोऽत्रिस्तथैवच ।
मरीचिभ्यो मरीचिश्च ततो जातो महातपाः ॥
कुशैस्तु कपिलैर्जातः पुलस्त्यस्तु महातपाः ।
वसुमध्यात्समुत्पन्नो वसिष्ठश्च तपोधनः ॥
भृगुः पुलोम्नश्च सुतां दिव्याम्भार्यामविन्दत ।
यस्यामस्मात्ततो जाता देवास्तु द्वादशात्मकाः ॥
भुवनो भावनश्चैव सुजन्यः सुजनस्तथा ।

शुचिः क्रतुश्च मूर्द्धा च याजश्च वसुदश्च ह ॥
प्रभवश्चाव्ययश्चैव दक्षो द्वादशमस्तथा ।
इत्येते भृगवो नाम देवा द्वादश कीर्त्तिताः ॥
पौलोम्यजनयद्विप्रं देवानान्तु कनीयसाम् ।
च्यवनं तु महाभागमाप्नवानन्तथाप्यसौ ॥
आप्नवानात्मजश्चौर्वो जमदग्निस्तथाऽऽत्मजः ।
और्वगोत्रकरस्तस्य भार्गवाणां महात्मनाम् ॥
तद्गोत्रप्रवरान्वक्ष्ये भृगोर्दीप्तौजसस्त्वहम् ।
भृगुश्च च्यवनश्चैव आप्नवानस्तथैवच ॥
ऊर्वश्च जमदग्निश्च वत्सो दाभिर्नडायनः ।
वैशयनो वैतिहयः पैलश्चैवाथ सात्याकिः ॥
शौनकायनिजीवन्तिकम्बोदाः पार्पतिस्तथा ।
वैहीनरिविरूपाक्षौ रोहित्यायनिरेवच ॥
वैश्वानारिः कथानीलुर्वसावाणिर्विकस्वरुः ।
विष्णुः पौलोमिवालाकिनौलिकेलान्तभाविनः ॥
ऋताभागोऽथ मार्कण्डिः जह्निनो वीतितस्तथा ।
मण्डूमाण्डव्यमाण्डूकफेनपा गनिभस्तथा ॥
स्थौलपिण्डिः शिखापत्तिः शार्कराक्षिस्तथैवच ।
जलधिः सौध्वजिः कृत्स्नस्तथाऽन्यः पागलायनिः ॥
मार्कायणो दिवपतिर्मण्डूकिर्वर्षाभिः स च ।
लवः साङ्कृत्यसालाकिस्तथाचैवानुशातकिः ॥
कोपियज्ञो मित्रयज्ञस्तथाचैवामिलायनः
गार्ग्यायणो हायनश्च ऋषिर्गोदायनस्तथा ॥
गोष्ठायनो हायनिश्च वैशम्पायनगालवौ ।
वैकर्णयः शार्ङ्गरवो याज्ञेयिभ्राण्यकायानिः ॥

लालाद्दिर्लाङ्कुविश्चैव लक्ष्मणपपरिमण्डलः ।
शाल्पायनिर्नालायनिः कौटलश्चलहस्तिकः ॥
शौक्तिः सकोटरश्चैव साक्षिसान्द्रमणिस्तथा ।
जेकाजिह्विर्जकशून्यः केह्वलेठिर्हिकस्वरः ॥
सौरद्वतिः सनैमिश्यो लोष्ठाक्षिश्च भवेरणिः ।
वागायनिः स्वानुमतिः पौर्णसौगन्धिकासिकव ॥
समव्यगस्तथैतेषां पञ्चार्षप्रवरो मतः ।
भृगुश्च च्यवनश्चैव आप्नवानस्तथैवच ॥
और्वश्च जमदग्निश्च पञ्चैते प्रवरा मताः ।
परस्परमविवाह्या ऋपयः परिकीर्त्तिताः ॥
भृगवन्दीया मार्गरथो ग्राम्यायनिरथायनी ।
आपस्तम्बस्तथा भाल्विर्नैकार्षिः कपिरेवच ॥
आर्ष्टिषेणो गार्दभिश्च कार्दमायनिरेवच ।
आश्वलायनिरथानूपः पञ्चार्षेयाः प्रकीर्त्तिताः ॥
भृगुश्च च्यवनश्चैव आप्नवानस्तथैवच ।
आर्ष्टिषेणस्तथाऽनूपः प्रवराः पञ्च कीर्त्तिताः ॥
परस्परमविवाह्या ऋपयः परिकीर्त्तिताः ।
यास्का वाचो वीतहव्या मागन्थश्चण्डमोदनः ॥
जीवन्त्यायनिर्मौपिलिश्च शलिश्चैव खलिस्तथा ।
भागलिर्गार्गवीतिश्च कौशाम्बेयिश्च काश्यपिः ॥
वामेयिः समदागेयिः सौरिज्वरिस्तथैवच ।
परस्परमविवाह्या ऋषयः परिकीर्त्तिताः ॥
शात्यायनो यक्षपातिर्मत्स्यगन्धिस्तथैवच ।
प्रत्यूहश्च तथा श्रौण्यश्चाक्षिश्च कार्दमायनिः ॥
तथा गृत्समदो राजन् शुनकश्च महर्षिकः ।

परस्परमविवाह्या ऋषयः परिकीर्त्तिताः ॥
एते नवोक्ता भृगुवंशजाता महानुभावा नृप गोत्रकाराः।
तेषां तु नाम्नां परिकीर्त्तनेन पापं समग्रं विजहाति जन्तुः ॥
इति मत्स्यपुराणोक्तभृगुगोत्रप्रवरनिर्णयः।

अथ मत्स्यपुराणोक्तत्रिविधानामङ्गिरसां गोत्रप्रवरनिर्णय उच्यते ।

मत्स्य उवाच,

मरीचितनया राजन् सुरूपा नाम विश्रुता ।
भार्य्या त्वङ्गिरसो देवी तस्याः पुत्रा दश स्मृताः ॥
आत्मा ह्यायुर्मनो दक्षो दमः प्राणस्तथैवच ।
हविष्मांश्च हविष्ठश्च क्रतुः सत्यश्च ते दश ॥
इत्येतेऽङ्गिरसो नाम देवा वै सामगायनाः ।
सुरूपा जनयामास ऋषीन्सर्वेश्वरानिमान् ॥
बृहस्पतिं गौतमं च संवर्त्तं च महाऋषिम् ।
आयास्यं वामदेवं च उतथ्यमुशिजं तथा ॥
इत्येते ऋषयः सर्वे गोत्रकाराः प्रकीर्तिताः ।
तेषां गोत्रसमुत्पन्नान् गोत्रकारान्निबोध मे ॥
उतथ्यो गौतमश्चैव तैलेयोऽभिजितस्तथा ।
सार्धनेमिः सुगो माक्षिः क्षिरिटोटकिरेवच ॥
राहुकर्णिश्च सौपुत्रिः कैरातिः सामलोमकिः।
पौष्काजिर्भगवो वै ऋषिश्चण्डालकस्तथा ।।
करोटसुतपा वीर उपविन्दः सुरैपिणः ।
राहिणेयो निवेराणिः कौष्ठश्चैवारुणायनिः ॥
सोमो दायानिकः सोरुः कौशिल्यः पार्थिवस्तथा ।
रौहिण्यो निरोधश्च मूलपो वासुरेवच ॥

कार्पासः पुष्पवांश्चैव क्षारकारण्डिरेवच ।
क्षया विश्वन्तिरेविश्च पाविका रेविरेवच ॥
ऽयार्षेयप्रवरा ह्येते तेषां वा प्रवरान् शृणु ।
अङ्गिराश्च वचोतिश्च उशिजश्च महान् ऋषिः ॥
परस्परमविवाह्या इत्येते परिकीर्त्तिताः ।
आत्रेयायनिसौवत्सावग्निवेशः शिलाथिलिः ॥
वालिशायनिवाराही चित्रिपित्र्याष्कालिस्तथा ।
सौठिश्च तृणकर्णिश्च प्रवाहिश्च लभायनिः ॥
ब्राह्मगाच्छिर्दशादीकिः स्वारग्रीवस्तथैवच ।
जित्यद्रोणिर्घटाकिश्च जैक्षलायनिरेवच ॥
आपस्तम्बिर्वाजवृष्टिः गौस्वपिङ्गलिरेवच ।
पैलश्चैव महातेजाः शालङ्कायनिरेवच ॥
ऽयार्षेयः प्रवरश्चैव सर्वेषां प्रवरोत्तमः ।
अङ्गिराः प्रथमस्तेषां द्वितीयोऽथ बृहस्पतिः ॥
तृतीयश्च भरद्वाजः प्रवराः परिकीर्त्तिताः ।
कण्वायनाः कौञ्जवयस्तथा वत्सतरायणाः ॥
भ्राष्ट्रकृदभ्रविष्पी च लैन्यालिः शाकलायनिः ।
क्रौंडश्चाष्पी च वाष्पी च तातकृन्मधुरावहः ॥
लोपकुद्दालविकुर्पो मर्कटः पौलिकायनः ।
मृत्मङ्गश्च तथाद्दार्भिगर्गाभिः श्यामायनिस्तथा ॥
बालकिः साहनिश्चैव पञ्चार्षेयाः प्रकीर्त्तिताः ।
अङ्गिरास्तु महातेजाः देवाचार्यो बृहस्पतिः ॥
भरद्वाजो गर्गसैन्यो समानप्रवरस्त्वतः ।
सगोत्रत्वात्मका एते परस्परमनन्वयाः ॥
पतञ्जलिर्दिश्वक्षाक्तिः स्वदीनरकचेतरौ ।

भूयसी जनसिञ्चिश्च विन्दुर्दाजकुसीदरिः ॥
उर्धतो राजकेशी च सौजटिः सासात्रिस्तथा ।
सलिश्च कलसी कण्व ऋषिकारी रयस्तथा ॥
क्ष्वङ्यो वाऽयायनिश्चैव सावस्यायनिरेवच ।
ऽयार्षेयः प्रवरस्तेषां ऋषीणां भूमिपोत्तम ॥
आमहय्योऽङ्गिरा मुख्य उरुक्षयस्तृतीयकः ।
सगोत्रत्वादिमे सर्वे परस्परमनन्वयाः ॥
ज्ञात्वायतो हरिकर्णो मत्स्यः पौगेल एवच ।
हस्तिवासो मास्यालिर्माडिलिश्च गवेरणिः ॥
शाङ्कर्दभिर्भीमगवः सर्वे त्रिप्रवरा मताः ।
आङ्गिरा अम्बरीषश्च यौवनाश्वस्तृतीयकः ॥
परस्परमविवाह्याः समानप्रवरत्वतः ।
बृहदुल्को वामदेवस्तथा त्रिप्रवरौ मतौ ॥
अङ्गिराबृहदुल्को वै वामदेवस्तृतीयकः ।
परस्परमवैवाह्या गोत्रे स्वे परिकीर्त्तिताः ॥
कुम्भगोत्रोद्भवश्चैव तथा त्रिप्रवरो मतः ।
अङ्गिरास्त्रसदस्युश्च पुरुकुत्सस्तृतीयकः ॥
कुत्साः कुत्सैरवैवाह्याः एवमाहुः पुराविदः ।
ततो रथीतराणां च ऽयार्षेयः प्रवरः स्मृतः ॥
आङ्गिरा हि विरूपोऽपि तृतीयो हि रथीतरः ।
रथीतरा अवैवाह्याः नित्यमेव रथीतरैः ॥
विष्णुवृद्धिः सतोमद्भिर्जेतृणः कर्तृणस्तथा ।
अत्रिवाचो महातेजाः तथा चैत्रापरायणः ॥
ऽयार्षेयो हि मतश्चैषां सर्वेषां प्रवरो नृप ।
आङ्गिरा हि विरूपश्च पृषदश्वस्तृतीयकः ॥

ऋषयोऽमी सगोत्रत्वादवैवाह्याः परस्परम् ।
सत्वमग्निर्महातेजा हिरण्यस्ताम्बिमुद्गलौ ॥
त्र्यार्षेयो हि मतस्तेषां सर्वेषां प्रवरः शुभः ।
अङ्गिराश्चैव भार्म्याश्वो मुद्गलः सुमहातपाः ॥
परस्परमवैवाह्या इत्येते परिकीर्त्तिताः ।
हंसजिह्वा देवजिह्वा आलवालविडालयः ॥
आयाग्नयः शुनपश्च पौराण्यान्तानि मुद्गलाः ।
त्र्यार्षेयो हि मतश्चैषां सर्वेषां प्रवरः शुभः ॥
अङ्गिराश्चैव ताविश्च मौद्गल्यश्च महातपाः ।
ऋषयोऽमी सगोत्रत्वादवैवाह्याः परस्परम् ॥
पादश्च चतुरश्चापि तृतीयः शाकटायनः ।
ततः प्रागादसौनारी मर्करो रमणः ससाः ॥
कण्वः कर्मटयश्चैव तथा गादायनो रथिः ।
श्यामायनिस्तथैवैषां त्र्यार्षेयः प्रवरो मतः ॥
अङ्गिराश्चाजमीढश्च कण्वश्चैव महातपाः ।
सगोत्रत्वादिमे सर्वे परस्परमनन्वयाः ॥
तित्तिरिः कपिभूश्चैव गार्ग्यश्चैव महानृषिः ।
परस्परमवैवाह्याः समानप्रवरत्वतः ॥
अत्वरिश्च भरद्वाजः क्रथिश्चात्मा भवस्तथा ।
ऋषिर्मैत्रावरश्चैव पञ्चार्षेयाः प्रकीर्त्तिताः ॥
अङ्गिराश्च भरद्वाजस्तृतीयोऽथ बृहस्पतिः ।
ऋषिर्मैत्रावरस्तुर्यो मुनिरात्मा भवित्तमाः ॥
प्रवरैक्यस्वमुख्यत्वादवैवाह्याः परस्परम् ॥

सर्वे तइमेऽङ्गिरसास्त्रिप्रोक्ता महानुभावा नृप गोत्रकाराः ।
एषां तु नाम्नां परिकीर्त्तनेन पापं समग्रं पुरुषो जहाति ॥

इति मत्स्यपुराणे प्रवरकीर्त्तने सर्वेषां त्रिविधाङ्गिरसां प्रवराध्यायो द्वितीयः समाप्तः ।

इति मत्स्यपुराणोक्ते सर्वेषां त्रिविधाङ्गिरसां प्रवरकाण्डे प्रकीर्त्तितानां प्रवराणां मध्ये येषां प्रवरेषु गौतमः सप्तर्षिर्म्रियमाणतया सत्तया वाऽनुवर्त्तते तेषां परस्परमविवाहः। समानगोत्रत्वात्। गौतमानां सर्वेषां परस्परमविवाह इति बौधायनवचनाच्च। तथा येषां गोत्राणां प्रवरेषु भरद्वाजः सप्तर्षिर्म्रियमाणतया सत्तया वाऽनुवर्त्तते तेषां परस्परमविवाहः । समानगोत्रत्वाद्भरद्वाजानां सर्वेषां परस्परमविवाह इति बौधायनवचनाच्च । तदितरेषां तु सप्तर्षिबाह्यानां केवलाङ्गिरसां हरितकुत्सकण्वरथीतरपृषदश्वमुद्गलवृद्धादीनां परस्परं स्वेच्छया विवाहः। सगोत्रत्वाभावात् । स्वस्वे गणे पुनः सुतरामविवाहः सगोत्रत्वादिति समुदायार्थो निरूढ इति । इति मत्स्यपुराणोक्तप्रवराध्याये त्रिविधानामङ्गिरसां गोत्रप्रवरनिर्णयस्तृतीयः समाप्तः ।

अथ मत्स्यपुराणोक्तः अत्रिगोत्रप्रवरनिर्णय उच्यते ।

मत्स्य उवाच ।

अत्रिगोत्रसमुत्पन्नान् गोत्रकारान्निबोध मे ।
कामयायनिसांख्येयौ तथा सारायणाश्च ये ॥
औद्दालकिः सौनकर्णिरथो सौक्तवराश्च ये ।
गौरग्रीविकेयोरञ्जिरथो जैत्रायणाश्च ये ॥
अर्द्धरथो वामरथो गोर्यन्यतृणबिन्दवः ।
कारजिह्वोद्गरग्रीवौ वैडालिः शाकटायनिः ॥
नैलेयश्च सचैलेयो न्यत्रिगोणीपथस्तथा ।
जलदो भगपादश्च सौपुष्पिश्च महातपाः ॥
छान्दोगेयस्तथैतेषां त्र्यार्षेयः प्रवरो मतः ।

श्यावाश्वश्च तथाऽत्रिश्च तथा चैवार्चनानसः ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
अत्रेस्तु पुत्रिकापुत्राः तत ऊर्ध्वं निबोध मे ॥
कालेयश्च सवालेयो वामरथ्यस्तथैवच ।
सौत्रेयश्चैव शौभ्रयस्त्र्यार्षेयाः परिकीर्त्तिताः ॥
अत्रिश्च वामरथ्यश्च पौत्रिकश्च महानृषिः ।
परस्परमविवाह्याः समानप्रवरत्वतः ॥
इत्यत्रिगोत्रप्रभवास्तथोक्ता महानुभावा नृप गोत्रकाराः ।
येषां तु नाम्नां परिकीर्त्तनेन पापं समग्रं पुरुषो जहाति ॥
इति मत्स्यपुराणोक्तात्रिगोत्रप्रवरनिर्णयः ।
अथ मत्स्यपुराणोक्तो विश्वामित्रगोत्रप्रवरनिर्णय उच्यते ॥

मत्स्य उवाच,

अत्रेरेव परं वंशं तव वक्ष्यामि पार्थिव ।
अत्रेः सोमः सुतः श्रीमांस्तस्य वंशोद्भवो नृपः ॥
विश्वामित्रः सुतपसा ब्राह्मण्यं समवाप्तवान् ।
तस्य वंशमहं वक्ष्ये तन्मे निगदतः शृणु ॥
विश्वामित्रो देवरातस्तथा वै कृतिगालवौ ।
तदश्च बलशङ्कुः स्यादाश्वलातायनास्ततः ॥
श्यामायना याज्ञवल्क्या जाबालाः सैन्धवायनाः ।
बाभ्रव्याश्च करीशा हि ससृत्या अथ संसृताः ॥
औलोप्या औपगहनाः पार्षोदरपपाशयाः ।
रक्षपाः पाडलीभावा यमदूता मयूरकाः ॥
त्र्यार्षेयः प्रवरस्तेषां सर्वेषां परिकीर्त्तितः ।
विश्वामित्रो देवरात उद्दलश्च महातपाः ॥
परस्परमविवाह्याः समानप्रवरत्वतः ।

मार्गमित्रो तथाऽजाश्च माधुच्छन्दस एवच ॥
ऽयार्षेयप्रवरा ह्येते ऋषयः परिकीर्त्तिताः ।
विश्वामित्रस्तथोजश्च मधुच्छन्दास्तथैवच ॥
परस्परमविवाह्या ऋषयः परिकीर्त्तिताः ।
धनञ्जयः कामधवः परिकूटश्च पार्थिव ॥
पाणिनीयस्तदीयाश्च ऽयार्षाः सर्वे प्रकीर्त्तिताः ।
विश्वामित्रो मधुच्छन्दास्तृतीयोऽप्यघमर्षणः ॥
सगोत्रत्वादिमे सर्वे परस्परमनन्वयाः ।
कामुकायनयश्चैवमश्वरथ्यास्तथैवच ॥
माधुलाः कौशिकाश्चैव ऽयार्षेयाः प्रवरा मताः ।
विश्वामित्राश्मरथयो वाधुलिश्च महातपाः ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
अवैवाह्याः पूरणश्च वारिधापयता मिथः ॥
लोहिता अष्टकाश्चैषां ऽयार्षेयाः परिकीर्त्तिताः ।
विश्वामित्रो लोहितश्च अष्टकश्च महातपाः ॥
अष्टका लोहितैर्नित्यमविवाह्याः परस्परम् ।
उदवासोऽपि कथक ऋषिरौदालकिस्तथा ॥
ऽयार्षेया हि मताश्चैषां सर्वेषां प्रवरः शुभः ।
क्रथका ग्रन्थिनश्चैव विश्वामित्रस्तथैवच ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
औदुम्बरिः सौसवटिर्त्रर्षिपिस्ताक्ष्यार्यणिस्तथा ॥
कात्यायनिः करीराभिः शालङ्कायनिलानकी ।
मौजायनिश्च भगवान् ऽयार्षेयः परिकीर्त्तितः ॥
स्वसनिश्च सुविद्धारिर्विश्वामित्रस्तथैवच ।
परस्परमवैवाह्याः ऋषयः परिकीर्त्तिताः ॥

एते तवोक्ताः कुशिका नरेन्द्र महानुभावाः सततं द्विजेन्द्राः ।
येषां तु नाम्नां परिकीर्त्तनेन पापं समग्रं पुरुषो जहाति ॥

अत्र विश्वामित्रगणेषु ये देवरातादयः परिगणिताः तेषां परस्परमविवाहः । स्वेस्वे गणे च समानप्रवरत्वात्सुतरामविवाहः ।

यावतां प्रवरेष्वेको विश्वामित्रोऽनुवर्त्तते ।
न तावतां सगोत्रत्वाद्विवाहोऽस्ति परस्परम् ॥

इति मत्स्यपुराणोक्तो विश्वामित्रगोत्रप्रवरनिर्णयः ।

अथ मत्स्यपुराणोक्तः कश्यपगोत्रप्रवरानिर्णयः ॥

मत्स्य उवाच,

मरीचेः कश्यपः पुत्रः कश्यपस्य महाकुले ।
गोत्रकारानहं वक्ष्ये तेषां नामानि मेश्रृणु ॥
आग्रायणा त्रिषगणा मेषः क्रिरिटिकायनाः ।
भवनन्दिर्महाचक्रिर्दाक्षणायनिरेवच ॥
क्रोष्टयना ह्यक्रिरयो हस्तिदास्तु तथैवच ।
वात्स्यायनाल्पनिकृतो हास्तलायनिनस्तथा ॥
कौशीतकाः स्वापशान्ता आग्निशर्मायणाश्च ये ।
मौनिखरः कैकसयास्तथाचैव सुगन्धयः ॥
पौलयो ज्ञानरायाश्च अग्रयः सर्वएवतु ।
श्यामायनिः शिरायक्षस्तथा यद्वोडलायनः ॥
कशायनाश्वमारीषा आजिहा यानहास्तिकः ।
त्रिशीर्णयाः काश्यपाश्च सामिसा हारितायनाः ॥
मतमसावष्टगवः श्यार्पेयाः परिकीर्त्तिताः ।
अवत्सारः कश्यपश्च निध्रुवश्च महातपाः ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
नेहास्यमांख्यमित्राश्च श्यार्ष्याः सर्वे प्रकीर्त्तिताः ॥

अवत्सरः कश्यपो मुख्यो निध्रुवस्तु तृतीयकः ।
सगोत्रत्वादवैवाह्या ऋषयोऽमी परस्परम् ॥
अतः परं प्रवक्ष्यामि ह्यामुष्यायणगोत्रजान् ।
अनुष्टयो भागुरयः तानयो रसवत्तयः ॥
सौरिः स्विरो वहोहाश्च सैरन्ध्ररोपवत्सकिः ।
साग्नाक्षिः साद्पिङ्गाक्षिराजातम्बिस्तथैवच ॥
दिवा वसिष्ठा इत्येते नक्तं ज्ञेयास्तु कश्यपाः ।
त्र्यार्षेयो हि मतश्चैषां सर्वेषां प्रवरः शुभः ॥
कश्यपोऽवत्सरश्चैव वसिष्ठश्च महातपाः ।
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ॥
सम्पातिश्च बलिश्चोभौ पिप्पलोऽथ जलन्धरः ।
सुजातः पूरपूर्वश्च गर्दभो गर्दभीमुखः ॥
हिरण्यबहुकैरातावुभौ कश्यपशोभिनौ ।
कुलहोऽदषदण्डश्च मृगेतुश्च तथोत्तरः ॥
सद्दपोसस्तवस्तोगमहाकैरलयाश्च ये ।
शाण्डला वैदीनवसौ दनवो वै दयातवः ॥
पैप्पलादिस्तोयपर्य्यायः ऋषिर्वा परिकीर्त्तितः ।
ऋषिप्रधानस्य तु कश्यपस्य दाक्षायणीभिः सकलं प्रसूतम् ।
जगत्सहस्रं यदुसिंहमुख्य किं ते प्रवक्ष्याम्यहमुत्तरं नृप ॥
इति मत्स्यपुराणोक्तः कश्यपगोत्रप्रवरनिर्णयः ।
अथ मत्स्यपुराणोक्तवसिष्ठगोत्रप्रवरनिर्णयः ।

मत्स्य उवाच,

वसिष्ठवंशजान् विप्रान् सर्वान्निगदतो मम ।
शृणुष्वैकार्षप्रवरो वसिष्ठानां प्रकीर्त्तितः ॥
वसिष्ठा एव वासिष्ठा अवैवाह्या वसिष्ठजैः ।

व्याघ्रपादा औपगवा वैष्णवाः सातुलायनाः ॥
कपिष्ठला औडलोमा अध्वला वसदाध्वसः ।
गोपायना धोत्रयश्च दासव्या अथ बाभ्रकृत ॥
वालिसयाः पालिसयास्ततो वाग्ग्रन्थयश्च ये ।
आयस्थूणा शितिवृक्षास्तथा ब्रह्मपुरायकाः ॥
लोभायनाः स्वस्तिकाश्च चाण्डालिर्गौडिलिस्तथा ।
व्यालोहकिः स्थामुनाश्च सुपाचिर्धिद्विरेवच ॥
मिथोवालिब्रह्मानली पौलश्रवस एवच ।
पौडेयो याज्ञवल्क्यश्च एकार्षेया महर्षयः ॥
वसिष्ठ एषां प्रवरस्त्वनैवाह्याः परस्परम् ।
सौलालयो महाकण्वः कौरव्याः क्रोधिनस्तथा ॥
कपिञ्जलो वालाशिखिभार्गवी नायकाश्च ये ।
कौमारोवा रावणका लाक्षौकृष्णास्तरायणाः ॥
शाकाहयाः शाकधियाः काण्वा उपलयाश्च ये ।
शाकायनाः सुहाकाश्च अथ मालशरावयः ॥
दाकामना वालवयो वाकयो गौरथास्तथा ।
आलम्बायना वाशयो यत्रक्रोढा नैराणयः ॥
लम्बायनाश्च ऋषय औपमन्यव एवच ।
सांख्यायनाश्च ऋषयस्तथा पञ्च दशेरकाः ॥
पालङ्कायन उद्गाहा ऋषयश्च वलश्वलाः ।
ब्रह्मचयश्च मानेयाः पार्णगारिस्तथैवच ॥
आर्षेयो हि मतश्चैषां सर्वेषां प्रवरः शुभः ।
आभरद्वसुवासिष्ठा वैन्द्रः प्रमद एवच ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
औपस्वस्थाः स्वस्थलयाः वालोहा लोहलाश्च ये ॥

माध्यन्दिनो याज्ञिनयाः पैप्पलादिवचद्रूपी ।
त्रैशृङ्गिर्गोपनः सौगिर्लुब्धागुद्विनसोत्तमाः ॥
ऽयार्षेयो ह मतश्चैषां सर्वेषां प्रवरः शुभः ।
वासिष्ठमैत्रावरुणौ कौडन्यो हि तदुत्तमः ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
जातुकर्णो वसिष्ठोऽपि दयालुः सौक्तिकः खगः ॥
वसिष्ठात्रिप्रवरास्त्र्यार्षास्तज्ज्ञाः सर्वे द्विगोत्रजाः ।
जातुकर्ण्यवसिष्ठौ द्वावुत्तमोऽत्रिश्च पार्थिव ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
पौत्रिकेयास्तद्वदत्रेर्नामरथ्यकुलोद्भवाः ॥
वसिष्ठवंशेऽभिहिता मयैते ऋषिप्रधाना नृप गोत्रकाराः ।
येषां तु नाम्नां परिकीर्त्तनेन पापं समग्रं पुरुषो जहाति ॥
इति मत्स्यपुराणोक्तवसिष्ठगोत्रप्रवरनिर्णये प्रथमोऽध्यायः ।
मत्स्य उवाच ।
वसिष्ठस्तु महातेजा महान्पुरोहितो निमेः ।
बभूव पार्थिवश्रेष्ठ यज्ञस्तस्य समन्ततः ॥
श्रान्तात्मा पार्थिवश्रेष्ठ विशश्राम तदा गुरुः ।
तं गत्वा पार्थिवश्रेष्ठो निमिर्वचनमब्रवीत् ॥
भगवन्यष्टुमिच्छामि त्वं मां याजय मा चिरम् ।
तमुवाच महातेजा वसिष्ठः पार्थिवोत्तमम् ॥
किञ्चित्कालं प्रतीक्ष्योऽहं तव यज्ञे भृशं नृप ।
श्रान्तोऽस्मि राजन्विश्रम्य सम्यग्याजयितास्मि ते ॥
एवमुक्तः प्रत्युवाच वसिष्ठं नृपसत्तमः ।
पारलौकिककार्येषु कः प्रतीक्षितुमुत्सहेत् ॥
न कस्य सौहृदं ब्रह्मन् कृतान्तेन बलीयसा ।

धर्मकार्ये त्वरा कार्या चलं यस्माद्धि जीवितम् ॥
धर्मपथ्याशनो जन्तुर्मृतोऽपि सुखमश्नुते ।
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥
न हि प्रतीक्षते मृत्युः कृतं वापि न वा कृतम् ।
क्षेत्रग्रामगृहासक्तमन्यत्र गतमानसम् ॥
वृकीवोरणमासाद्य मृत्युरादाय गच्छति ।
भार्या मे पुत्रो मे धनपशू मे स्वजनो मे बन्धुवर्गो मे ।
एवं मे मे कुर्वाणं पशुमिव बध्नाति नियतं कालः ॥
नैकान्तेन प्रियः कश्चिद् द्वेष्यश्चास्य न विद्यते ।
आयुष्ये कर्मणि क्षीणे प्रसह्य हरते कुलम् ॥
प्राणो वायुश्चलत्वं च वायोर्विदितमेव ते ।
यदत्र जीव्यते ब्रह्मन् क्षणमात्रं तदद्भुतम् ॥
शरीरं शाश्वतं मन्ये विद्याभ्यासे धनार्जने ।
अशाश्वतं धर्मकार्ये तृणवत्स्वामिसंकटे ॥
सोऽहं संभृतसम्भारो भवन्मूलमुपागतः ।
न चेद्याजयसे मां त्वमन्यं याचामि याजकम् ॥
एवमुक्तस्ततस्तेन निमिना ब्राह्मणोत्तमः ।
शशाप तं निमिं क्रोधाद्विदेहस्त्वं भविष्यसि ॥
श्रान्तं मां त्वं समुत्सृज्य यस्मादन्यं द्विजोत्तमम् ।
धर्मज्ञस्त्वं नरेन्द्रेन्द्र याजकं कर्तुमिच्छसि ॥
निमिस्तं प्रत्युवाचाथ धर्मकार्यरतस्य मे ।
विघ्नं करोषि नान्येन यजनं च तथेच्छसि ॥
शापं ददामि यस्मात्त्वं विदेहोऽथ भविष्यसि ।
एवमुक्ते तु तौ जातौ विदेहौ द्विजपार्थिवौ ॥
देहहीनौ तयोर्जीवौ ब्रह्माणमुपजग्मतुः ।

आगतौ तौ समीक्ष्याथ ब्रह्मा वचनमब्रवीत् ॥
अद्य प्रभृति ते स्थानं निमे जीव ददाम्यहम् ।
नेत्रपक्ष्मसु सर्वेषां त्वं वसिष्यसि पार्थिव ॥
त्वत्संबन्धात्तथा तेषां निमेषः संभविष्यति ।
चालयिष्यन्ति तु तदा नेत्रपक्ष्माणि मानवाः ॥
एवमुक्ते मनुष्याणां नेत्रपक्ष्मसु सर्वशः ।
जगाम निमिजीवस्तु वरदानात्स्वयम्भुवः ॥
वसिष्ठजीवं भगवान् ब्रह्मा वचनमब्रवीत् ।
मित्रावरुणयोः पुत्रो वसिष्ठस्त्वं भविष्यसि ॥
वसिष्ठेति च ते नाम तत्रापि च भविष्यति ।
जन्मद्वयमतीतं च तत्रापि त्वं स्मरिष्यसि ॥
एतस्मिन्नेव काले तु मित्रश्च वरुणस्तथा ।
बदर्याश्रममासाद्य तपस्तेपतुरव्ययौ ॥
तपस्यतोस्तयोरेव कदाचिन्माधवे ऋतौ ।
पुष्पितद्रुमसंस्थाने शुभे दायितमारुते ॥
उर्वशी तु वरारोहा कुर्वन्ती कुसुमोच्चयम् ।
सुसूक्ष्मरक्तवसना ऽनयोर्दृष्टिपथं गता ॥
तां दृष्ट्वेन्दुमुखीं सुभ्रूं नीलनीरजलोचनाम् ।
उभौ चुक्षुभतुर्धैर्यात्तद्रूपपरिमोहितौ ॥
तपस्यतोस्तयोर्वीर्यमक्षरच्च मृगासने ।
स्कन्नं रेतस्ततो दृष्ट्वा पापभीतौ परस्परम् ॥
तोयपूर्णे चिक्षिपतुः कलशे तौ मनोरमे ।
तस्मान्नरवरौ जातौ तेजसाऽप्रतिमौ भुवि ॥
वसिष्ठश्चाप्यगस्तिश्च मित्रावरुणयोर्द्वयोः ।
वसिष्ठस्तूपयेमेऽथ भगिनीं नारदस्य तु ॥

अरुन्धतीं वरारोहां तस्यां शक्तिमजीजनत् ।
शक्तेः पराशरः पुत्रस्तस्य वंशं निबोध मे ॥
यस्य द्वैपायनः पुत्रः स्वयं विष्णुरजायत ।
प्रकाशो जनितो येन लोके भारतचन्द्रमाः ॥
पराशरस्य तस्य त्वं शृणु वंशमनुत्तमम् ।
बाङ्कशयो वाहरयो जैमतो भैमतायनाः ॥
गोपालिरेषां पञ्चैमे एते रक्ताः पराशराः ।
प्रागेहया वाग्नतयः पार्थयाः कौरुजायनाः ।
द्वैर्यत्रिरेषां पञ्चैमे एते नीलाः पराशराः ।
काष्र्णायनाः कापिमेवाः काकेयस्या नयातयाः ॥
पुष्करः पञ्चमश्चैषां कृष्णा ज्ञेयाः पराशराः ।
आविष्टयायना वाल्येयाः स्वायथाश्वोकयश्च ये ॥
इषीकहस्तः पश्चैते श्वेता ज्ञेयाः पराशराः ।
पटिका बादरिश्चैव स्तम्भव्याः क्रौञ्चकायनाः ॥
क्षौमिरेषां पञ्चमश्च श्यामा एते पराशराः ।
खल्वायनिवार्ष्णायनैर्नायाः खलु मुपातयः ॥
एतेषां पञ्चमस्तापिरेते धूम्राः पराशराः ।
पराशराणां सर्वेषां त्र्यार्षेयः प्रवरो मतः ॥
पराशरश्च शक्तिश्च वसिष्ठश्च महातपाः ।
परस्परमवैवाह्याः सर्व एव पराशराः ॥
उक्तास्तएते नृप वंशमुख्याः पराशराः सूर्यसमप्रभावाः ।
येषां तु नाम्ना परिकीर्त्तितेन पापं समग्रं पुरुषो जहाति ॥
इति मत्स्यपुराणोक्तवसिष्ठगोत्रप्रवरनिर्णये द्वितीयः परिच्छेदः ।
अथ मत्स्यपुराणोक्तोऽगस्त्यगोत्रप्रवरनिर्णयः ।
मत्स्य उवाच ।

अतः परमगस्त्यस्य वक्ष्ये वंशोद्भवान् द्विजान् ।
अगस्तयः करभयः कौशल्याः करटस्तथा ॥
सुमेधसो मयोभुवस्तथा गन्धारकारणाः ।
पौलस्त्याः पौनहाश्चैव क्रतुवंशभवस्तथा ॥
ऽयार्षेयो हि मतश्चैषां सर्वेषां प्रवरः शुभः ।
अगस्त्यश्च महेन्द्रश्च ऋषिश्चैव मयोभुवः ॥
परस्परमवैवाह्याः पौर्णमासास्तु पारणैः ।
एतदुक्तमृषीणां तु वंशमुक्तमपौरुषम् ॥
अत परं प्रवक्ष्यामि किं तवानघ कथ्यताम् ।

मनुरुवाच ।

पुलहस्य पुलस्त्यस्य क्रतोश्चैव महात्मनः ।
अगस्त्यस्य तथा चैव कथं वंशस्तदुच्यताम् ॥

मत्स्य उवाच ।

क्रतुः खल्वनपत्योऽस्मिन् जन्म वैवस्वतेऽन्तरे ।
इध्मवाहं स पुत्रत्वे जग्राह ऋषिसत्तमम् ॥
अगस्त्यपुत्रं धर्मज्ञमागस्त्यं कृतवांस्ततः ।
पुलहाच्च तथा पुत्राः तिर्यञ्चः पृथिवीपते ॥
तेषां ते जन्म वक्ष्यामि उत्तरत्र यथाविधि ।
पुलहस्तु प्रजां दृष्ट्वा नातिप्रीतमनाः स्वकान् ॥
अगस्त्यजं दृढच्युतं पुत्रत्वे कृतवांस्ततः ।
पौलहाश्च तथा राजन्नागस्त्याः परिकीर्त्तिताः ॥
पुलस्त्योऽन्वयसम्भूतान्दृष्ट्वा रक्षःसमुद्भवान् ।
अगस्त्यस्य सुतान्धीमान्पुत्रत्वे कृतवांस्तथा ॥
पौलस्त्याश्च तथा राजन्नागस्त्याः परिकीर्त्तिताः ।
सगोत्रत्वादिमे सर्वे परस्परमनन्वयाः ॥

एते तवोक्ताः प्रवरा द्विजानां महानुभावा नृप गोत्रकाराः।
येषां तु नाम्नां परिकीर्त्तनेन पापं समग्रं पुरुषो जहाति॥
इति मत्स्यपुराणोक्तो गोत्रप्रवरनिर्णयः।

समानार्षगोत्रयोः प्रत्येकं परिणयने प्रायश्चित्तमाह

शातातपः,

परिणीय सगोत्रां तु समानप्रवरां तथा।
त्यागं कृत्वा द्विजस्तस्यास्ततश्चान्द्रायणं चरेत्॥ इति।
कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं विशोधनम्।

इति माधवीयः पाठः। चान्द्रायणातिकृच्छ्रे सगोत्रादिपरिणयनमात्रे। तदुपगनापत्योत्पादनयोस्तु ब्राह्मण्यहानिरेव।

तथाचापस्तम्बः,

समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च।
तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते॥ इति।

त्यागश्चोपभोगधर्मकार्ययोः। न तु तस्याः। मातृवत् परिपालनस्मरणात्।

तथाच शातातपः,

समानप्रवरां कन्यामेकगोत्रामथापि वा।
विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिम्॥
उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत्। इति।

इदं चामत्या। सगोत्रां चेदमत्योपयच्छेन्मातृवदेनां बिभृयादिति बौधायनस्मरणात्। अमतिः शास्त्रार्थापरिज्ञानं, ब्राह्मादिविवाहे कन्यादानकालएव गोत्रादिस्वरूपपरिज्ञानात्। गान्धर्वरा
क्षसपैशाचेषु गोत्रादिस्वरूपापरिज्ञानं वा।

यत्तु

विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा।

इत्युपक्रम्य,

ऊढा ऽपि देया सा ऽन्यस्मै सप्रावरणभूषणा ।

इति कात्यायनीयं सगोत्रोढायाः पुनर्विवाहस्मरणं, तद्युगान्तरविषयम् । कलौ तु

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥

इति ब्रह्मपुराणेन साक्षात् पुनर्विवाहस्य निषेधात् । तस्मात्परिपालनं परिशेषेण कलिविषयमवतिष्ठते इत्याहुः ।

अत्रेदं प्रतिभाति । ऊढायाः पुनरुद्वाहमित्ययं निषेधो न सगोत्रोढापुनर्विवाहं विषयीकरोति । तस्या ऊढात्वाभावात् । विवाहो नाम संस्कारविशेषजनिका क्रिया । न च सगोत्रायां संस्काराः उत्पद्यन्ते । असगोत्रामित्यनेन तस्याः पर्युदस्तत्वात् । न च "ऊढा ऽपि देया सा ऽन्यस्मै" "उत्सृज्य तां ततो भार्याम्" इत्यादिप्रयोगान्यथानुपपत्त्या तस्यामपि संस्कारसिद्धिः, तस्य प्रवृत्तिनिमित्तत्वादिति वाच्यम् । गौणतया ऽपि प्रयोगोपपत्तेः । संस्कारवत् क्रियामात्रस्यापि प्रवृत्तिनिमित्तत्वे विवाहशब्दस्य नानार्थत्वापत्तेः । तस्मात्सगोत्रायां संस्कारानुत्पत्त्या ऊढात्वाभावात् न पुनर्विवाहनिषेधः प्रवर्त्तते । निषेधस्तु

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इत्याद्युत्पन्नसंस्कारस्त्रीविषयत्वेनाप्युपपद्यतइति । तथाच सगोत्रोढायां पालनविवाहयोर्विकल्प एव सिद्ध्यति ।

ननु मा ऽस्तूढायाः पुनरुद्वाहमित्यस्य निषेधस्यायं विषयः ।

दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ।

इत्यस्य तु निषेधस्य विषयो भविष्यत्येव । सगोत्रोढायां प-

र्युदस्तत्वेन संस्कारानुत्पत्त्या विवाहप्रसक्तावपि दानपदार्थोत्पत्तौ बाधकाभावेनैतन्निषेधप्रवृत्तेरव्याहतत्वात् । दानपूर्वकत्वाद्विवाहस्य दाननिषेधे विवाहस्यापि निषेधसिद्धेः। न च दानेऽपि सगोत्रपर्युदासोऽस्ति । येन दानं न सिद्ध्येत् । यद्यपि न सगोत्राय दुहितरं प्रयच्छेदिति दानेऽपि सगोत्रपर्युदासोऽस्त्येव, तथाऽप्यसावदृष्टार्थो न दानपदार्थोत्पत्तौ बाधकः । तस्य लौकिकत्वात् ।

अत एव,

नटचारणमल्लेभ्यो दत्तं भवति निष्फलम् ।

इति निष्फलतामेवाभिधत्ते न दानानिष्पत्तिम् । अत एव वैधावैधदानभेदेन दत्तानपाकर्म दत्ताप्रदानिकमिति संज्ञाभेदोऽप्युपपन्नः । अदृष्टं चात्र संस्कार एव । स च भार्यास्वरूपः । तदर्थकएव दानेऽयं पर्युदासो न दानमात्रे । अन्यथा दत्तपुत्रीकरणेऽपि सगोत्राय दुहितृदानं न स्यात् । तस्मात्सगोत्रेऽपि कन्यादाननिष्पत्त्या तस्याः पुनर्दानं कलौ निषिध्यते । तन्निषेधेनैव विवाहनिषेधोऽप्यर्थसिद्ध एव । दानपूर्वकत्वाद्विवाहस्य । यद्येवं तर्हि सगोत्रोढायां गान्धर्वादिविवाहः कुतो नेष्यते, तस्य दानपूर्वकत्वाभावादिति चेन्न । ऊढायाः पुनर्गान्धर्वादिविवाहानिषेधेऽपि ब्राह्मादिविवाहस्यैव मया निषेधोपगमादिति प्राप्तेऽभिधीयते ।

दत्ताशब्दो विवाहपर एवावश्यं वाच्यः । दानमात्रपरत्वे वाग्दत्तायाः वरदोषदर्शने वरान्तरायापि पुनर्दानं न स्यात् । न च तत्र शिष्टाः कलिदोषं मन्यन्ते । दानशब्दोऽप्येष लक्षणया विवाहमेवाभिधत्ते । ऊढायाः पुनरुद्वाहमित्यनेनैकवाक्यतालाघवात् । अन्यथा श्रुत्यन्तरकल्पना स्यात् । ततश्च सगोत्रायां दानपदार्थनिष्पत्तावपि संस्कारानिष्पत्त्या ऊढात्वाभावात्कलि-

निषेधाभावात्तया पुनर्विवाहः केन वारणीय इति ।

यत्तु दत्ताक्षतेति वाक्यं ब्राह्मादिचतुष्टयविषयम् । ब्राह्मादिचतुर्णां दानपूर्वकत्वात्पुनर्दाननिषेधोपपत्तेः । न गान्धर्वादित्रिषयम् । तत्र दानाभावात् । ऊढायाः पुनरिति वाक्यं तु गान्धर्वादिचतुष्टयविषयम् । सामान्यवाक्यत्वादिति व्यवस्थापनम् ।

तदप्येतेनैकमूलकल्पनालाघवेन निरस्तम् । एतेन

बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः ।

इत्यादीन्यपि वाक्यानि सगोत्रापरतया व्याख्यातानि ।

अथ मातृगोत्रामप्यपरिणेयां केचिदिच्छन्ति ।

तथाच शातातपः,

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैवच ।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ॥

सुमन्तुरपि,

पितृष्वसृसुतां मातृष्वसृसुतां मातृसगोत्रां तथैवच समानप्रवरां विवाह्य चान्द्रायणं चरेदिति ।

व्यासः,

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि ।
जन्मनाम्नोरविज्ञानादुद्वहेदविशङ्कितः ॥ इति ।

अत्र च मातृगोत्रमेव वर्जनीयं न प्रवराः ।

तथाच काठकगृह्ये,

पितृगोत्रप्रवरसमां नोद्वहेत्तथा मातृगोत्रमात्रसमाम् । तथा,
प्रवरान्पितृगोत्रेषु मातृगोत्रेष्वचिन्तनम् । इति ।

यत्तु,

नैकस्मिन्प्रवरे तुल्ये मातृगोत्रे वरस्य च ।
तमुद्वाहं न कुर्वीत सा कन्या भगिनी भवेत् ॥

इत्यभियुक्तोदाहृतं वचनं, तत्पुत्रिकापुत्रविषयम् ।

इदं च मातृगोत्रवर्जनं माध्यन्दिनीयानामेव नान्येषाम् । तथाच वर्जनीयमित्यनुवृत्तौ सत्याषाढः, मातृगोत्रं माध्यन्दिनीयानामिति । अपुत्रायास्सापत्नमातुरपि गोत्रं वर्जनीयम् । अपुत्रायाश्चेति तस्यैव स्मरणात् । ननु मातृसगोत्रामित्यनुपपन्नम् । मातुः पितृगोत्रत्वेन पृथग्गोत्राभावात् । न च भूतपूर्वगत्या लक्षणया वा मातामहगोत्रं विवक्षितमिति वाच्यम् । मातामहगोत्रनिषेधेनैव सिद्धौ पृथङ्मातुलसुतानिषेधानर्थक्यात् । न च प्रायश्चित्तविशेषार्थस्स इति वाच्यम् । चान्द्रायणस्योभयत्र तुल्यत्वात् । तस्मात्कथं मातृसगोत्रापदं व्याख्येयमिति चेत् । अत्र केचिदाहुः । गोत्रपदेनात्र नाम विवक्षितम् । गोत्रं नाम्नि च पर्वते इति कोषात् । तेन मातृसनाम्नीं नोद्वहेदित्यर्थः सिद्ध्यति ।

नोद्वहेद्भगिनीनाम्नीं न च मातृसनामिकाम् ।
मातामहीपितामह्योः पितृष्वसृसनामिकाः ॥

इति स्मरणात् । तन्न भव्यम् । उदाहृतवचनस्य मूलापरिज्ञानात् ।

जन्मनाम्नोरविज्ञानादुद्वहेदविशङ्कितः ।

इत्यपवादे जन्मपदवैयर्थ्याच्च । न हि जन्मनः पृथङ् निषेधोऽस्ति । गोत्रपरत्वे तु मातामहगोत्रस्य सम्बन्ध्यसम्बन्धिसाधारण्येन निषेधे प्राप्ते असम्बन्धिनि जन्मनाम्नोरविज्ञानात्प्रतिप्रसवो घटते । किं च गोत्रपदस्य नामपरत्वे गोत्रनिषेधे प्रवरप्रतिप्रसवो नोपपद्येत ।

प्रवरान्पितृगोत्रेषु मातृगोत्रे न चिन्तयेत् ।
गोत्रमेव त्यजेन्मातुरिति कात्यायनोऽब्रवीत् ॥ इति ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकःस्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एव ग्रन्थो मुद्यते।

२ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्यन्ते

३ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति।

७ साम्प्रतं मुद्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला। गोपीनाथभट्टकृता (संस्कारः) २

(२) शब्दकौस्तुभः। भट्टोजिदीक्षितकृतः (व्याकरणम्) १०

(३) श्लोकवार्तिकम्। भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम्। सम्पूर्णम्। (मीमांसा) १०

(४) भाष्योपबृंहितं तत्त्वत्रयम्। विशिष्टाद्वैतदर्शनप्रकरणम्। श्रीमल्लोकाचार्यप्रणीतम्। श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाशसहितम्। सं० (वेदान्त) २

(५) करणप्रकाशः। श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १

(६) भाट्टचिन्तामणिः। महामहोपाध्याय-श्रीगागाभट्ट विरचितः। तर्कपादः (मीमांसा) २

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा) २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम्। सम्पूर्णम्। (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णा। (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम्। सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः। श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः। आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः। सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम्। श्रीमप्पयदीक्षितकृतम्। सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । } मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । } (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशाऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । } (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् । श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यास प्रणीतस्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्का-चार्यविरचितभाष्यसहितम् । १२

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्ण-विरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । } (वेदान्तः) १०

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्यया-ऽवतरणिकया च सहितम् । } ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता । (वेदान्त) २

(२५) काडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च काडपत्राणि । (न्यायः) १

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्। श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नव्याख्यव्याख्या० २

(२७) षड्दर्शनसमुच्चयः । बौद्ध नैयायिक कापिल्य जैन वैशेषिक जैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । } १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याः जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ७

(३१) स्मृतिसारोद्धारः । विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । २

(३२) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्य-कृता । १

पत्रादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी

THE

CHOWKHAMBA SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 140.

वीरमित्रोदयः ।

महामहोपाध्यायश्रीमित्रमिश्रविरचितः ।

पर्वतीयनित्यानन्दशर्मणा संशोधितः ।

VÎRAMITRODAYA,

BY

MAHÂMAHOPÂDHYÂYA PANDIT MITRA MISRA,

EDITED BY

Parvatiya Nityânanda Sarmâ.

FASCICULUS VIII.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT BOOK-DEPOT.

BENARES:

AGENTS: OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY.

PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Harikrishna Dâs, Proprietor

AT THE VIDYA-VILAS PRESS.

BENARES.

Price Rupee One.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तबकः—१४०

तस्मान्मातृपदं मातामहपरमेव व्याख्येयम् । तथैव शिष्टाचारात् । यत्तु मातामहगोत्रनिषेधेनैव मातुलकन्यानिषेधसिद्धौ पृथग्वचनमनर्थकमित्युक्तम् । तत्रोच्यते । यो मातुलोऽन्यस्य दत्तकीकृतः तस्य पितृगोत्रनिवृत्तावपि मातुलत्वानिवृत्त्या पृथग्वचनं घटते । यद्यपि सपिण्डनिषेधेनायमपि निषिद्धस्तथाप्यदत्तमातुलनिषेधवद्दत्तकनिषेधोऽपि समाधेय इत्यलं पल्लवनेन ।

अथ क्रमप्राप्तं सापिण्ड्यं निर्णीयते ।

तत्र एकपिण्डान्वयनिमित्तको विवाहादिप्रतिबन्धकः पूर्णाशौचप्रयोजको धर्मविशेषः सापिण्ड्यम् । पिण्डशब्दश्चायं नानार्थः ।

पिण्डो देहे जपापुष्पे निर्वापे सिह्लकेऽपि च ।

इति विश्वकोषात् । तत्रात्मयपिण्डविवक्षया केचित्सापिण्ड्यं वर्णयन्ति ।

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥

इति मत्स्यपुराणवचनात् ।

पिता पितामहश्चैव तथैव प्रपितामहः ।
पिण्डसम्बन्धिनो ह्येते विज्ञेयाः पुरुषास्त्रयः ॥
लेपसम्बन्धिनश्चान्ये ये वृद्धप्रपितामहात् ।
प्रभृत्युक्तास्त्रयस्तेषां यजमानश्च सप्तमः ॥
इत्येष मुनिभिः प्रोक्तः सम्बन्धः साप्तपौरुषः ।

इति मार्कण्डेयपुराणवचनाच्च ।

अस्यार्थः । एकस्यां पिण्डदानक्रियायां दातृत्वेन यजमानस्य, देवतात्वेन पितृपितामहप्रपितामहानां, लेपभाक्त्वेन प्रपितामहस्य पितृपितामहप्रपितामहानां चानुप्रवेशात्सप्तपुरुषं व्याप्य सापिण्ड्यं भवति । एवं भ्रातॄणामपि सापिण्ड्यं योज्यम् । देवदत्तकर्तृकपि-

ण्डदानक्रियायां येषामनुप्रवेशः तेषामेव यज्ञदत्तकर्तृकपिण्डदानक्रियायामनुप्रवेशात्। एवमेषां पण्णां मध्ये यत्कर्तृकपिण्डदानक्रियायामन्यतमस्याप्यनुप्रवेशस्तेषां सर्वेषां सापिण्ड्यम्। तेन च मातुलमातामहादिभिरपि सापिण्ड्यं योज्यम्। समानोद्देश्यकपिण्डदानक्रियान्वयात्। भ्रातृभार्याणां तु स्वस्वभर्तृकर्तृकपिण्डदानक्रियायां सहकर्तृत्वेन। एवं यत्र यत्र सापिण्डशब्दप्रयोगस्तत्र तत्र साक्षात्परम्परया वा एकपिण्डदानक्रियान्वयोऽवगन्तव्य इति। नेदं चतुरस्रम्। विकल्पासहत्वात्। तथाहि। किमत्र पितृशब्दो जनकमात्रमभिधत्ते आहोस्वित्प्रमीतमात्रम्। न तावदाद्यः। भ्रातृपितृव्यादीनामजनकत्वेनासापिण्ड्यप्रसङ्गात्। समानोद्देश्यकपिण्डदानक्रियाद्यन्वयेन सापिण्ड्यविवक्षायां प्रमाणाभावात्। नापि सापिण्ड्यान्यथानुपपत्तिरेव मानम्। तस्यावयवान्वयेनाप्युपपत्तेः। नापि द्वितीयः। गुरुशिष्यसहाध्यायिमित्रादिभिरपि पिण्डदानक्रियान्वयेन सापिण्ड्यप्रसङ्गात्। किञ्च। मातामहप्रमातामहादीनां देवदत्तकर्तृकपिण्डदानक्रियायां कथमप्यनन्वयेन सर्ववादिसम्प्रतिपन्नमपि सापिण्ड्यं न स्यात्। दत्तकादिपुत्राणां

गोत्ररिक्थे जनयितुर्न भजेद्दात्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥

इति मनुवचने जनकपिण्डदानक्रियानिवृत्त्या तत्सापिण्ड्याभावप्रसङ्गाच्च। न चेष्टापत्तिः।

दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता।
पञ्चमी सप्तमी तद्वद्गोत्रं तत्पालकस्य च॥

इति, ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्चेति बृहन्मनुगौतमादिवचनविरोधात्। वस्तुतस्तु सापिण्ड्यशब्दोऽत्र नोक्तलक्षणं सम्बन्धविशेषमभिधत्ते, किन्तु सपिण्डीकरणम्। तस्यैवोपक्रमात्।

तथाहि। मत्स्यपुराणेऽष्टादशेऽध्याये सपिण्डीकरणं प्रक्रम्य

त्रिभिस्सापिण्डीकरणैराशौकहतयेतिवा।
यदा प्राप्स्यति कालेन तदा मुच्येत बन्धनात् ॥
मुक्तोपलेपभागित्वं प्राप्नोति कुशमार्जनात्।
लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः॥
पिण्डदस्सप्तमस्तेषां सापिण्ड्यं साप्तपूरुषम्। इति

पठितम्। तत्रोपक्रमस्थसपिण्डीकरणशब्दार्थपरतयैवोपसंहारस्थः सापिण्ड्यशब्दो वर्णनीयो नाप्रस्तुतसम्बन्धविशेषतयेति न्यायविदां घण्टाघोषोऽपि बाधक एव भवद्व्याख्याने। तस्मादन्यथा सापिण्ड्यं वर्णनीयम्। तत्र प्रामाणिकाः पिण्डशब्दं शरीरपरतया व्याचक्षते। समानः एकः पिण्डो देहो येषां ते सपिण्डाः तेषां भावस्सापिण्ड्यम्। समानाः सत्समैके स्युरिति त्रिकाण्डीस्मरणात्।

पिण्डो देहे जपापुष्पे निवापे सिह्लकेऽपिच।

इति विश्वकोषाच्च। तच्चैकशरीरत्वं द्वयोर्बहूनां वा न संभवतीत्यारम्भकशरीरैक्यं विवक्षितम्। तच्चावयवद्वारैव सम्भवति।

तथाच श्रुतिः। एतत्षाट्कौशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतस्त्वग्मांसरुधिराणि मातृत इति।

अत एव स एवायं विरूढः प्रत्यक्षेणोपलभ्यतइत्यभेदोपचारः। नन्वेवमवयवान्वयसिद्धावपि तस्य सापिण्ड्यप्रयोजकत्वं कुत इति चेत्।

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिषु॥
दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता।
पञ्चमी सप्तमी तद्वद्गोत्रं तत्पालकस्य च ॥ इति
ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्चेति शङ्खवृहन्मनुगौत-

मादित्रयेषु जन्यजनकभावस्य सापिण्ड्यप्रयोजकत्वप्रतिपादनादिति ब्रूमः। तत्रैकशरीरारब्धत्वं साक्षात्पुत्रशरीरे परम्परया पौत्रादिशरीरेष्विति पुत्रपौत्रादीनां पितृपितामहादिभिः सह सापिण्ड्यं सिद्ध्यति। एवं पुत्रेऽपि पित्रादीनां सापिण्ड्यं सिद्ध्यति। अवयवान्वयमात्रस्याभिप्रेतस्योभयनिरूप्यत्वात्। भ्रात्रोरेकशरीरारब्धत्वेन, दंपत्योस्तु एकशरीरारम्भकत्वेन। भ्रातृभार्ययोस्तु एकशरीरारब्धाभ्यां सहैकशरीरारम्भकत्वेन। एवं स्नुषाश्वशुरयोः श्वशुरशरीरारब्धेन सह पुत्रशरीरारम्भकत्वेन। एतेषाञ्च प्रकाराणामेकशरीरावयवान्वयत्वेनानुगमः। यद्येवं तर्हि सहोदयोः सापिण्ड्यं स्यात्। भ्रातृभार्ययोरिव एकशरीरारब्धाभ्यां भगिनीभ्यां सह स्वस्वपुत्रशरीरारम्भकत्वात्। तथा दंपत्योरिव दंपतिपित्रोरपि। कन्यापुत्रद्वारा एकशरीरारम्भकत्वात्। स्यादेतत् यदि यत्र यत्र शरीरावयवान्वयस्तत्र तत्र सापिण्ड्यमिति व्याप्तिः स्यात्। नत्वेवं, किं तु यत्रयत्र सपिण्डशब्दप्रयोगस्तत्रतत्र साक्षात्परम्परया वा एकशरीरावयवान्वयः। यत्रैकशरीरावयवान्वयो नास्ति तत्र सपिण्डशब्दप्रयोगोऽपि नास्तीत्यन्वयव्यतिरेकव्याप्तिस्वीकारेण व्यापकव्यभिचारस्यादोषत्वात्। यथा पङ्कजपदे कुमुदसाधारणो योगो रूढ्या नियम्यते तथाऽत्रापीति नातिप्रसङ्गः। नन्वेवं दत्तकस्य प्रतिग्रहीत्रा पित्रा सह सापिण्ड्यं न स्यात्। अवयवान्वयाभावात्। न चेष्टापत्तिः। लोके अनादिवृद्धव्यवहारे च सपिण्डशब्दप्रयोगसद्भावादिति चेन्मैवम्। द्विविधो हि दत्तको भ्रातृपुत्रः सपिण्डोऽसपिण्डश्चेति। तत्राद्ययोः पितामहमूलपुरुषयोरवयवान्वयेनास्त्येव पालकदत्तकयोः सापिण्ड्यमिति नास्त्येव दोषः। अन्यत्र तु अवयवान्वयाभावादलक्ष्यत्वमेव न दोषः। प्रतिग्रहीत्रवयवान्वयाभावात्।

अत एव वृद्धगौतमः,

स्वगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः।
विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते ॥ इति।

ये दत्तादयः सुताः स्वगोत्रेषु स्वगोत्रमध्ये कृता ह्यत्र विधिना गोत्रतां सन्ततित्वं यान्ति, परं तु तैः सह विधिना सापिण्ड्यं न विधीयते नोत्पाद्यते इत्यर्थः। स्वगोत्रेष्वपि सापिण्ड्यानुत्पत्तौ परगोत्रे सुतरां सापिण्ड्यानुत्पत्तिरुक्ता।

अत एव देवलः,

धर्मार्थं वर्द्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत्।
अंशपिण्डविभागित्वं तेषु केवलमीरितम् ॥

इति केवलशब्देन सापिण्ड्यमेव निरस्तवान्। गोत्रांशपिण्डानां विधानात्। नन्वेतत्प्रकृतार्थानुपयोगि, धर्मपुत्रविषयत्वात्। तथाहि। तत्तद्गोत्रेण तस्यतस्यैव गोत्रेण ये पुत्रवद्धर्मार्थं वर्द्धितास्तेषु पुत्रेषु केवलम् अंशपिण्डविभागित्वमेव न वर्द्धकसापिण्ड्यमित्यर्थात्। तेनैतद्धर्मपुत्रस्यैव वर्द्धकसापिण्ड्याभावं बोधयति, न दत्तकस्येति चेत्। मैवम्।

पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः।

इति परिसंख्याविरोधेन धर्मपुत्रानभ्युपगमात्। अभ्युपगमेऽपि वा पत्न्यादिष्वगणनेनांशभागित्वासम्भवात्। अप्रसक्त्या सापिण्ड्यनिषेधासङ्गतेश्च। तस्माद्दत्तकादिपुत्रविषयमेवैतत्। अंशभागित्वप्रदर्शनात्। धर्मार्थं स्वस्यालोकतापरिहारकधर्मसम्पत्त्यर्थं तत्तद्गोत्रेण जनकापेक्षया भिन्नभिन्नगोत्रेणापि परिग्रहीत्रा पुत्रवत् पुत्रप्रतिनिधितया परिगृह्य ये पुत्राः वर्द्धितास्तेषु केवलं परिग्रहीत्रंशपिण्डविभागित्वमेव न सापिण्ड्यमिति। तस्मान्न दत्तके परिग्रहीतृसापिण्ड्यम्। किं तु जनककुल एव साप्तपुरुषं सा-

पिण्डद्वयमिति सिद्धम् । नन्वत्र तच्छब्देन सन्निधानाद्वीप्सापेक्षितश्रुतबहुत्वानां पुत्राणामेव परामर्शो गम्यते, न वर्द्धकानां पुत्रिणाम् । व्यवहितत्वात् । संदिग्धबहुत्वानां वीप्सान्वयायोग्यत्वात् । आत्मनि परोक्षवन्निर्देशकतच्छब्दान्वयानुपपत्तेरपरोक्षनिर्देशकस्वशब्दस्यैवौचित्याच्चेतिचेत्, मैवं वादीः । सर्वनाम्नां बुद्धिस्थे शक्तिरिति न्यायेन बुद्धिस्थतयाः प्राधान्यायत्तत्वात्प्राधान्यस्य च संस्कार्यत्वेन फलान्वयेन वा सम्भवात् ।

पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया ।

इत्यादिवचनपर्यालोचनया पुत्रकर्तृकपिण्डदानादिक्रियया पितुः संस्कार्यत्वावगमात् पुत्रेण लोकान् जयतीत्यादिवचनबलात्पितुरेव पुत्रकरणकभावनाभाव्यलोकरूपफलयोगितया प्राधान्यात्तच्छब्देन परामर्शो युज्यते । यथा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेत्यत्रामिक्षायाः संसृष्टदधिपयोरूपत्वेन सान्नाय्यविकारत्वे स्थिते, पूर्वपक्षिणा सप्तमीनिर्दिष्टस्य पयसो गुणत्वेन द्वितीयानिर्दिष्टस्य दध्नः प्रधानत्वात्तस्यैव तच्छब्देन परामृष्टस्य देवतासम्बन्धात्सायन्दोहविकारत्वमित्युक्ते, सिद्धान्तिना कर्मीभूतेनापि दध्ना पयसो व्याप्यमानत्वेन दध्ना पयः संस्कुर्यादिति वाक्यार्थपर्यवसानेन पयस एव प्रधानत्वात् तस्यैव तच्छब्देन परामृष्टस्य देवतासम्बन्ध इति प्रातर्दोहविकारत्वं साधितम् । तद्वत्प्रकृतेऽपि पितुः संस्कार्यत्वेन प्रधानत्वात्तच्छब्देन तस्यैव परामर्श इति युक्तम् । नन्वेवं दत्तकस्य प्रतिग्रहीतृकुले सापिण्ड्याभावे कथं विवाहो न स्यादिति चेत् । सगोत्रत्वादिति ब्रूमः । तर्हि तद्भगिन्यादिसन्ततौ विवाहोऽस्तु सगोत्रत्वसापिण्ड्यत्वयोरभावात् । न चाहत्य निषेधकं वचनमुपलभामहे । प्रत्युत

सावित्रीं यस्य यो दद्यात्तत्कन्यां न विवाहयेत् ।

तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृत् ॥

इत्याद्यनुकूलमेव मरीचिवचनमस्ति । न चेष्टापत्तिः । अविच्छिन्नाविगीतसकलदेशीयशिष्टाचारविरोधात् । तस्मात्किं तत्राविवाहे निमित्तमिति ।

अत्राहुः । त्रिविधा हि पर्युदसनीया सपिण्डा । तत्राद्या पितुः स्वस्य च सपिण्डा । द्वितीया पितुरसपिण्डा स्वस्य सपिण्डा । तृतीया पितुः सपिण्डा स्वस्यासपिण्डा । तत्राद्या यथा, जननीपरिणेतुर्जनकस्य या सपिण्डा सा स्वस्यापि सपिण्डा । द्वितीया यथा, पालकस्य पितुरसपिण्डा जनकस्य पितुस्सपिण्डा सा पितुरसपिण्डा सती स्वस्य सपिण्डा । तृतीया यथा, पालकस्य पितुस्सपिण्डा स्वस्यासपिण्डा । दत्तके पालकावयवान्वयाभावात् । एवं च पितुरपि चातुर्विध्यं सिध्यति । जननीपरिणेता सन् जनकः, क्षेत्री, बीजी, पालकश्चेति । दत्तकजनकस्त्वाद्यएवान्तर्भूतः । तत्र जनकबीजिभ्यां साक्षादवयवसम्बन्धादौरसक्षेत्रजयोस्सापिण्ड्यं क्षेत्रिणा तु क्षेत्रद्वारा क्षेत्रजस्य सापिण्ड्यम् । क्षेत्रक्षेत्रिणोरेकशरीरत्वप्रतिपादनात् । तादृशीनां तिसृणामपि स्वसपिण्डानाम् असपिण्डां यवीयसीमित्यादिवचनेनैव पर्युदासः । पालकसपिण्डा तु दत्तकस्यासपिण्डेति न असपिण्डां यवीयसीमित्यनेन पर्युदसितुं शक्यते । तदर्थं पितुरसपिण्डेति वचनमन्वेष्टव्यम् ।

तदाह मनुः,

असपिण्डा च या मातुरसगोत्रा च या पितुः ।

सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ इति ।

अत्र वाक्ये गौणस्यापि पितुः साप्तपुरुषं सापिण्ड्यं विवाहे वर्जनीयमिति गम्यते । अन्यथाऽसपिण्डामित्यनेनैव सिद्धौ मातापितृपदोपादानवैयर्थ्यात् । न च पितृद्वारा अष्टमस्य वरस्य मातृ-

द्वारा षष्ठ्याः कन्यायाः विवाह्यत्वं प्रसक्तं तन्मा प्रसाङ्क्षीदित्येतदर्थं पितुरसपिण्डेति वक्तव्यमिति वाच्यम् ।

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ।

इत्याद्यनेकवाक्याविरोधात् । तस्मात् पातीति पितेति व्युत्पत्त्या प्रतिग्रहीतुरपि पितृत्वात्सापिण्ड्यनिवर्त्तनायैतद्वचनारम्भ इत्यवश्यं वक्तव्यम् । न च तातस्तु जनकः पितेति कोशात्सर्वेषां शब्दानां मुख्ये सम्भवत्यय इति न्यायाच्च सर्वत्रापि पितृपदं जनकपरमेवेति वाच्यम् । ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्चेत्यत्र गौतमवाक्ये पितृपदेनैव बीजिनः प्राप्तत्वेन पृथग्बीजिग्रहणानर्थक्यापत्त्या गोबलीवर्दन्यायेन पितृपदस्य जनकातिरिक्तपितृपरत्वावश्यंभावात् । ततश्च मनुवाक्ये पालकपितृसपिण्डाया अपि वर्जनीयत्वान्नोक्तदोषावसर इति ।

तन्न युक्तम् । असपिण्डादिवाक्यैरेकमूलत्वसम्भवे पृथङ्मूलकल्पनागौरवात् । तथाहि । मातुः पितुश्च द्वारा या स्वस्यासपिण्डा असगोत्रा चेत्यर्थपरत्वेन

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ।

इत्यादिवाक्यैकमूलत्वसम्भवात् । गौतमवाक्ये तु पितृपदस्य जननीपरिणेतृजनकपरतया परक्षेत्रबीजावापकबीजिप्रतिपादनाशक्त्या गोबलीवर्दन्यायासम्भवाच्च । अन्ये तु क्षेत्रजादीनां पुत्रप्रतिनिधित्वाभिधानात् प्रतिनिधिस्तद्धर्मा स्यादिति न्यायेन सकलौरसधर्मप्राप्त्या क्षेत्र्यादिपितृसपिण्डावर्जनं सेत्स्यतीत्याहुः । तन्न । न सापिण्ड्यं विधीयतइति निषेधेन सापिण्ड्यस्यैवाप्राप्त्या तद्वर्जनासम्भवात् । एतेन पुत्रनाम्ना औरसधर्मातिदेशात्प्रतिग्रहीत्रादिपितृसपिण्डावर्जनसिद्धिरित्यप्यपास्तम् । न तौ पशौ करोतीतिवदतिदिष्टस्य सापिण्ड्यस्य निषेधेन वर्जनासम्भवात् ।

तस्मादनन्यगत्या वचनादेव प्रतिग्रहीत्रादिपितृसपिण्डावर्जनमिच्छकामेनाप्यभ्युपगन्तव्यम् । तत्र हेमाद्रिः पिण्डान्वयमेवोपादाय दत्तकादीनां प्रतिग्रहीतृकुले त्रिपुरुषमेव सापिण्ड्यं व्यवातिष्ठिपत् । तथाच

काष्र्णाजिनिः,

यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः ।
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह ॥
द्वाभ्यां सहाथ तत्पुत्राः पौत्रास्त्वेकेन तत्समम् ।
चतुर्थपुरुषे छेदं तस्मादेषा त्रिपौरुषी ॥ इति ।

अस्यार्थः । ये दत्तकादयः पुत्रास्ते प्रेतानां स्वप्रतिग्रहीतृमातृपित्रादीनां यावन्तः पितृवर्गाः पित्रादिसमूहाः पितृपितामहप्रपितामहादयस्तावद्भिः सह योजनं कुर्युः । यावत्तावच्छब्दोपादानादौरसानां केवलदत्तकानां च एकैक एव पितृवर्गो भवति । द्व्यामुष्यायणानां तु द्वौ, जनकवर्गः प्रतिग्रहीतृवर्गश्च । एवं त्र्यामुष्यायणानां त्रयः पितृवर्गा भवन्ति, बीजिवर्गः क्षेत्रिवर्गः प्रतिग्रहीतृवर्गश्चेति । द्व्यामुष्यायणे द्वितीयं वर्गमाह । स्वकीयैः पितृभिः सहेति । स्वकीयैः द्व्यामुष्यायणीयैः न कर्तृपितृभिः । तेषां प्रेतेनानन्वयात् । पितृभिर्जनकैः । दत्तकादिपुत्रेषु विशेषमाह । द्वाभ्यामिति । तत्पुत्राः दत्तकादिपुत्राः। स्वपितृप्रतिग्रहीतुः पितृपितामहाभ्यां सह । दत्तकादिपौत्रेषु विशेषमाह, पौत्रास्त्वेकेन तत्सममिति । दत्तकपौत्राः स्वपितुः दत्तकतत्प्रतिग्रहीतृभ्याम् एकेन प्रतिग्रहीतृपित्रा सह योजनं कुर्युः । चतुर्थपुरुषे दत्तकप्रपौत्रे कर्तरि छेदं, प्रतिग्रहीतृपितुरिति शेषः । तस्मादेषा दत्तकसापिण्डता त्रिपौरुषीति सिद्धम् । एतदेवाभिप्रेत्याह संग्रहकारः,

दत्तकानां तु पुत्राणां सापिण्ड्यं स्यात्त्रि पूरुषम् ।

जनकस्य कुले तद्वद्ग्रहीतुरिति धारणा ॥ इति ।

इदं च दत्तकस्य जनककुले त्रिपुरुषं सापिण्ड्यं पञ्चमी सप्तमी तद्वदित्यादिवृहन्मनूक्तसप्तपुरुषसापिण्ड्येन सह विकल्पते । तत्र कल्पद्वयं देशाचारादिभिर्व्यवस्थापनीयम् । यद्यपि निर्वाप्यपिण्डान्वयेन सापिण्ड्यं प्राङ्गिरस्तं तथाप्यगत्या दत्तकस्य प्रतिग्रहीत्रा सह तदेवाश्रयणीयम् । अविच्छिन्नशिष्टाचारानुरोधात् । अथ सपत्नमात्रा सह कथं सापिण्ड्यं तच्छरीरावयवान्वयाभावात् । न च पितृशरीरावयवानां स्वस्मिन्नारम्भकत्वेन सपत्नमातरि चाधेयत्वेनान्वयादेकशरीरान्वयेनैव सापिण्ड्यसिद्धिरिति वाच्यम् । पित्रवरुद्धदासीभुजिष्यादिभिरपि सापिण्ड्यापत्तेः । न च स्वसपिण्डपितृसपिण्डत्वेन सपत्नमात्रा सापिण्ड्यमिति वाच्यम् । सपत्नमातामहादिभिरप्येवंसापिण्ड्यापत्त्याऽतिप्रसङ्गात् । यथाहि स्वसपिण्डः पिता तत्सपिण्डा सपत्नमातेति तया सह सापिण्ड्यं तथा तत्सपिण्डेन तत्पित्रा सपत्नमातामहेनापि समं सापिण्ड्यं केन वार्येत । अथ पितृशरीरावयवान्वयिनि सपत्नभ्रातरि सपत्नमातुरप्यवयवान्वयात्स्वारम्भकेन सहैकशरीरम्भकतया सह सापिण्ड्यमिति वाच्यम् । तत्रापि सपत्नमातामहादिभिः सह सापिण्ड्यप्रसङ्गः । तस्यापि स्वकन्याद्वारा दौहित्रशरीरावयवान्वयात् । अत्रोदाहरणं, यथा श्रीरामस्य पिता दशरथस्तदवयवान्वयिनि भरतशरीरे केकयराजस्याप्यवयवान्वयाद्रामकेकयराजयोः सापिण्ड्यमिति । एवं सपत्नमातुलादिभिरप्येकशरीरारम्भकारभ्यत्वेन सापिण्ड्यसिद्धिः । यथा साक्षात्परम्पराभ्यामेकस्य भरतशरीरस्यारम्भकौ दशरथकेकयराजौ तदारब्धत्वेन रामयुधाजितोरपि सापिण्ड्यम् एवमेव सापत्नमातुलकन्यापुत्रादिभिरपि सापिण्ड्यमुन्नेयम् । साक्षात्परम्परानिवक्षायाः सर्वशेषस्वात् । न

नु यत्रयत्र सपिण्डशब्दप्रयोगस्तत्रतत्र साक्षात्परम्परया वा एकशरीरावयवान्वयो वेदितव्य इति मिताक्षराग्रन्थस्वरसात्सापिण्ड्यावयवान्वययोर्व्याप्यव्यापकभावावगमात्सपत्नमातुलादौ एकशरीरावयवान्वयसत्त्वस्य व्यापकव्यभिचारत्वेनादोषत्वम् । सपिण्डशब्दप्रयोगाभावादिति चेत् नैवम् । पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरो भगिन्यो भगिनीसपत्न्यश्च भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा सङ्करकारकाणीति याप्याः पतिताश्च भवन्तीति सुमन्तुना सापिण्ड्यव्याप्यमातुलत्वादिव्यपदेशात् । यद्येवं तर्हि न कोऽपि दोषो लक्ष्यलक्षणोभयसत्त्वादिति चेत्, न । तथा सति सहजसिद्धावयवान्वयरूपसापिण्ड्यसद्भावेन सापत्नमातुलादिषु सापिण्ड्यातिदेशाय वचनारम्भोऽनर्थकः स्यात् । तथाच सुमन्तुवचनारम्भान्यथानुपपत्त्यैव सपत्नमातुलादिष्ववयवान्वयरूपसापिण्ड्याभावोऽवगम्यत इत्यतिप्रसङ्गः सुस्थः । तस्मान्न सपत्नमात्रा सह सापिण्ड्यमवयवान्वयाभावादिति प्राप्तउच्यते ।

यत्रयत्रेत्यादिग्रन्थस्वरसात्सपत्नमातरि सर्वजनीनसापिण्डशब्दप्रयोगान्यथानुपपत्त्याऽवयवान्वयोऽवश्यं वाच्यः । स च सपत्न्योरेकेन भर्त्रा सहैकशरीरम्भकतया यथा तथा स्वारम्भकेण सहैकशरीरारम्भकतया सपत्नमात्रा सहापि सिद्ध्यत्येव । एवं एकतस्तत्सिद्धावन्यतोऽप्येकशरीरारम्भणसहकार्यारम्भत्वेन तत्सिद्धिः । यथा पुत्रस्य पितृशरीरावयवान्वये पित्रा सहेत्युक्ते पुत्रेऽपि स्वशरीरावयवान्वयेन पुत्रेण सहेत्यपि सिद्धम् । तस्मादस्ति सपत्नमात्रा सहाप्यवयवान्वय इति न दोषः । न च सपत्नमातामहादिष्वतिप्रसङ्गः । इष्टापत्तेः । न चैवं सपत्नमातुलादिष्वप्येकशरीरारम्भकारम्भत्वादिना सह-

जसिद्धे साविण्ड्ये तद्भ्रातरो मातुला इत्यादिवचनारम्भवैयर्थ्यमिति वाच्यम्। पञ्चमसप्तमादिसंख्यान्तरपरिसंख्यार्थतया सार्थक्योपपत्तेः। तथाहि मातृपितृसम्बद्धा आसप्तमादविवाह्याः कन्या भवन्त्यापञ्चमादन्येषामिति पूर्ववाक्ये मातृपितृसापिण्ड्येनाविवाह्यत्वेऽवधिद्वयं स्वपरमतेनोपन्यस्य मातृसपत्न्यां मातृपितृत्वाभावेन सापिण्ड्यद्वारताऽसम्भवात्तत्सम्बन्धिनां सापिण्ड्याभावादविवाह्यत्वाप्रसक्तौ पितृपत्न्यः सर्वा मातर इत्यारभ्यते। तत्र मातृसपत्नी सपत्नमातेत्यादिशब्दैरभिधानसम्भवेऽपि यत्पितृपत्नीशब्देनोपादानं तत्तस्याः पितृद्वारकसम्बन्धद्योतनाय। यच्च पत्नीशब्दोपादानं तत्पित्रवरुद्धदासीभुजिष्यादिभिः सापिण्ड्यवारणाय। यच्च सर्वशब्दोपादानं तद्द्विजातीयाभिरपि सापिण्ड्यद्योतनाय। तेन च तत्सम्बद्धानामप्यासप्तमादापञ्चमाद्वा अविवाह्यत्वप्रसक्तौ तद्भ्रातरो मातुला इत्यादि परिसंख्यायते, यथैतएवाविवाह्या नान्यइति। पञ्च पञ्चनखा भक्ष्या इतिवत्। नचायं नियमः सम्भवति। यथोक्तरीत्या सापिण्ड्यसद्भावेनाविवाह्यत्वस्य नित्यवत्प्राप्ततया पाक्षिकत्वाभावात्। नन्वयम् अपूर्वो विवाह्यत्वप्रतिषेध एव कुतो नेष्यते। सर्वजनीनसापिण्ड्याभावेन प्रसक्तिसम्भवादिति चेत्, न। साक्षात्परम्परया स्वारम्भकेण सहैकशरीरारम्भकत्वादिना सिद्धस्य सापिण्ड्यस्यापलपितुमशक्यत्वात्। तत्सिद्धौ चातिप्रसङ्गभङ्गायावश्यापेक्षितव्यवस्थाभिधानमस्मत्पक्षे। अपूर्वनिषेधपक्षे त्वनपेक्षितार्थवचनमपूर्वान्तरकल्पनाक्लेशश्चेति दोषद्वयम्। तथाहि। व्यवस्थातिक्रमे हि सपिण्डोद्वाहनिषेधाश्रितत्वेन व्यवस्थायाः सपिण्डोद्वाहनिषेधातिक्रमजन्यमेव दुरितं कल्प्यते, न पृथक्। अपूर्वनिषेधपक्षे तु सापिण्ड्याभावात्सापिण्ड्योद्वाहनिषेधातिक्रमजन्यदुरितदुरितान्तरकल्पनाक्लेशः

प्रकृतनिषेधातिक्रम इति । तस्मात्स्वभावसिद्धसापिण्ड्यस्यापलपितुमशक्यत्वात्तदतिप्रसङ्गभङ्गायावश्यापेक्षितव्यवस्थाभिधानार्थमिदमुदेनीति सर्वं सुस्थम् ।

अथ वाक्यार्थः । तद्भ्रातर इत्यत्र तच्छब्देन पितृपत्नी परामृश्यते प्रधानत्वात् । तद्भगिन्य इत्यत्रापि सैव । पूर्वपरामर्शेन सन्निहितत्वात्प्रधानत्वाच्च । तद्दुहितर इत्यत्र तु न तत्परामर्शः स्याद्दुहितॄणां साक्षात्पित्रारब्धत्वेनासपिण्डामिति सामान्यवचनेनैव विषयीकरणादेतद्विशेषवचनविषयतान्तर्भावानर्थक्यात् । किन्तु सपत्नमातुलमातृष्वस्रोरेव परामर्शः । ततश्च तत्कन्यानामेवात्रेतरत्वमत्रोच्यतइति लभ्यम् । पुत्रस्यैव सपत्नमातृकुले सापिण्ड्यं न सपत्नमातृकुलस्य पुत्रकुलइति शङ्कापनोदायाह । भगिनीसपत्न्यश्च भगिन्य इति । भगिनीसपत्नीत्वव्यपदेशेनोभयतोऽपि सापिण्ड्यप्रदर्शनात्परस्परसन्ततेरविवाह्यत्वं दर्शयति । तदेवाह तदपत्यानीति । तासामपत्यानीत्यत्रापि तच्छब्देन सपत्नमातुलमातृष्वसृदुहितॄणां भगिनीसपत्नीनां च परामर्शः । पितृपत्नीपरामर्शे तु तदपत्यानां भगिनीत्वेन भागिनेयत्वव्यपदेशानुपपत्तेः । ततश्च सपत्नमातुलमातृष्वसृतदुभयदुहितृतदपत्यानि भगिनीसपत्न्यपत्यानि चाविवाह्यानीति वाक्यार्थ इति ।

नन्वत्रोभयतः सापिण्ड्यं न सिद्ध्यति प्रमाणाभावात् । तथाहि । पितृपत्नीशब्दो हि सपत्नमातुः पितृद्वारकमेव सापिण्ड्यं वदतीत्युक्तमेव प्राक् । तच्च सापिण्ड्यं यत्पितुः सा पत्नी तस्यैवेति सापिण्ड्यावधिपरिच्छेदाकाङ्क्षाऽपि तस्यैव न पितृपत्नीपक्षस्थानां, पितृपत्नीरूपसापिण्ड्यप्रतियोग्यभावात् । न हि सा तेषां पितृपत्नी भवति, येनेदं वाक्यं तत्सापिण्ड्यं परिच्छिन्द्यात् । अस्ति तु भगिनीत्वादिना तेषां तत्सापिण्ड्यम् । तत्र चास्त्येव परिच्छेदकं पञ्चमात्स-

समादूर्ध्वमित्यादि । अत एव यद्धर्मपुरस्कारेण येन सह सापिण्ड्यं तद्धर्मपुरस्कारेणैव तदुपादानं, यथा तद्भ्रातरो मातुला इत्यादिषु तद्भ्रातृत्वादिना । यदीदमेव वाक्यमुभयतोऽपि साापिण्ड्यपरिच्छेदकं स्यात्तर्हि पुरुषसंख्याविशेषपुरस्कारेणैव प्रवर्त्तेत, यथा पञ्चमात्सप्तमादूर्ध्वमित्यादि, न तद्भ्रातृत्वादिपुरस्कारेण । प्रवर्त्तते च तथा, तस्मान्नोभयतः सापिण्ड्यपरिच्छेदकमिदमित्यवसीयते । किं तु यद्धर्मपुरस्कारेण यदुपादानं तस्यैवाविवाह्यत्वं प्रतिपादयति नान्येषाम् । अन्यथा तद्भ्रातृपदादीनां तत्पित्राद्युपलक्षणतापत्तेः । तथाच पुनरातप्रसङ्गः । तद्वारणाय पञ्चमादिवाक्यमेवालं किमनेनारब्धेनेति प्राप्त उच्यते ।

नात्र पञ्चमादिवाक्यं प्रवर्त्तते तस्य साक्षात्सापिण्ड्यविषयत्वात् । कुत एतदवसीयतइति चेत् । एतद्वाक्यारम्भान्यथानुपपत्त्यैवेति ब्रूमः । ततश्च परिगणितातिरिक्तेषु येषु सापत्नमातामहसापत्नमातुलपुत्रसापत्नमातृष्वसृपुत्रेष्वेतद्वाक्यं न प्रवृत्तं न च पञ्चमादिवाक्यं तत्र विवाह्यतापत्तिरवशिष्यते । नचेष्टापत्तिः । उक्तरीत्याऽवयवसम्बन्धसत्त्वेन सापिण्ड्यसत्त्वेन सपिण्डानिषेधस्यात्राप्यक्षतत्वात् । तर्हि सपिण्डानिषेधादेव नोक्तविषयेषु विवाह्यताप्रसङ्ग इति चेत् न । सापिण्ड्यस्यासहस्रपुरुषमप्यविच्छेदेन परिच्छेदकाभावे निषेधस्यातिप्रसङ्गात् । तस्मादनन्यगत्या तद्भ्रात्रादिपदं तत्पित्रादीनामप्युपलक्षणं वाच्यम् । ततश्चशब्दोपात्तानां प्रचयेन यावतां कथञ्चिदुपस्थितिः तावद्दूरं सापिण्ड्यमनेन परिच्छिद्यतइति पर्यवसन्नम् । तद्यथा सापत्नमातामहो मूलपुरुषः प्रथमः, तत्पुत्रः सापत्नमातुलो द्वितीयः, तत्पुत्रः सापत्नमातुलपुत्रस्तृतीयः । किमस्याश्रुतस्य ग्रहणं प्रमाणमितिचेत् । तद्दुहितरश्च भगिन्य इति मातुलपितृष्वसृदुहितृपारा-

नमेवेति ब्रूमः । दुहितॄणामिव पुत्राणामपि सम्बन्धाविशेषात् । तत्पुत्रः सापत्नमातुलेयपुत्रश्चतुर्थः । अत्रापि तदपत्यानि भागिनेयानीति मातुलमातृष्वसृदुहित्रपत्यानां मातुलमातृष्वसृपुत्रापत्यानामप्युपलक्षणम् । तुल्यसम्बन्धतया बाधकाभावात् । एवं सापत्नमातृकुले चतुष्पुरुषं सापिण्ड्यं सिध्यति । एवं सापत्नमातृष्वसृसन्तानेऽपि ज्ञेयम् । मातुलमातृष्वस्रोर्मूलपुरुषस्यैकत्वात् । ततश्च सापत्नमातामहादेव मूलपुरुषात्तद्दुहितृसपत्नीसन्ताने तत्सन्ताने च यावच्चतुर्थं परस्परमविवाह्यताप्रदर्शनेन चतुष्पुरुषं सापिण्ड्यमनेनोक्तमिति सिद्धम् । तद्भ्रातरो मातुला भगिनीसपत्न्यश्च भगिन्य इत्यन्योन्यं तुल्यसंबन्धप्रतिपादनालिङ्गादुभयतः सापिण्ड्यसिद्धेः ।

यत्तु मदनपारिजातेन,

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा ।

इति वसिष्ठवाक्यं सपत्नमातामहकुलविषयमन्यथानुपपत्तेरभावादिति व्याख्यातं, तदाकाशलतेव मूलानपेक्षमेवोज्जृम्भते । उक्तरीत्याऽन्यथानुपपत्तिसद्भावात् सापत्नादिपदाश्रवणात् सापत्नवाक्यैकवाक्यताऽभावात्सीमन्तविशेषवाक्यविरोधाच्चेति । न च वसिष्ठवाक्यान्यथानुपपत्तिरेव मूलमिति वाच्यम् । अन्यथोपपत्तेर्वक्ष्यमाणत्वात् । तस्मादुक्तमेव साधीय इत्यलमतिविस्तरेण ।

अथ सापिण्ड्यपरिच्छेदकपुरुषसंख्याविशेषः ।

तत्र बुधस्मृतिः, सवर्णां भार्यामुद्वहेत् अतीत्य मातृतः पितृतः पञ्चमीं दशमीमन्यगोत्रजामिति ।

मातृतः पञ्चमीं पितृतः दशमीम् अतीत्येत्यन्वयः । पञ्चमीं दशमीं संख्यामिति शेषः, न कन्यामिति । तथात्वे पितृतः पितृद्वारके सापिण्ड्ये दशम्याः मातुरत्यये सापिण्ड्यस्य मातृद्वारकतापत्त्या पितृग्रहणमनर्थकं स्यात् । तस्मात्संख्येत्येव शेषो वाच्यः ।

स्वयम्भुस्त्वस्यैव साषिण्ड्यस्याविवाहाशौचयोर्द्वयोरप्यावश्यकत्वमाह। तत्र ब्राह्मणानामेकपिण्डस्वधानामादशमाद्धर्मविच्छित्तिर्भवति आसप्तमाद्रिक्थविच्छित्तिर्भवति आतृतीयात्स्वधाविच्छित्तिर्भवति अन्यथा सपिण्डाशौचक्रियायुच्छेदाद्ब्रह्महतुल्या भवन्तीति।

अस्यार्थः। पिण्डो जनकदेहः। स्वधा श्राद्धम्। तच्च न यत् किञ्चित्, किं तु मौष्ठपद्यां विहितं प्रपितामहपित्रादीनां नान्दीमुखं श्राद्धम्। तत्र प्रपितामहपित्रादयस्त्रयः पिण्डभाजस्तदूर्ध्वास्त्रयो लेपभाजः स्वपित्रादयस्त्रयस्तन्निरूपकाः कर्त्ता चेत्येवं दशपुरुषसम्बन्धि, तदुभयं येषां ते एकपिण्डस्वधास्ते सपिण्डाः वाक्यशेषात्। तेषामादशमाद्दशमं पुरुषं मर्यादीकृत्य आदशमं तस्मादादशमाद्दशमोर्ध्वमिति यावत्। अत्राङ्पूर्वः मर्यादावचनः। आजन्मशुद्धानामितिवत्। धर्मस्य विवाहे सपिण्डावर्जनस्य जननमरणयोः सन्ध्यास्नानादिवर्जनस्य च विच्छित्तिर्निवृत्तिर्भवति। तथा आसप्तमात्सप्तमोर्ध्वं रिक्थनिवृत्तिः। तथा तृतीयोर्ध्वं स्वधानिवृत्तिः। 'अन्यथा' दशमपुरुषादर्वागेव अविवाह्यतापरिहारे जननमरणयोः सन्ध्यास्नानादिवर्जननिवृत्तौ च सपिण्डानामाशौचस्य तन्निमित्तायाः पिण्डदानादिक्रियाया आदिशब्दाद्विवाहतायाश्चोच्छेदाद्ब्रह्महतुल्या भवन्ति।

नन्वेवमप्येकपिण्डस्वधानामित्यत्र विशेषद्वयोपादानं व्यर्थम्। अन्यतरविशेषणेनैवावयवपिण्डान्वयरूपैकतरमापिण्ड्यसिद्धेरिति चेन्न। दत्तपुत्रे सत्यपि जनकावयवान्वये तत्कर्तृकश्राद्धसम्बन्धाभावान्न दशपुरुषं सापिण्ड्यम्। किं तु

दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता।
पञ्चमी सप्तमी तद्वद् गोत्रं तत्पालकस्य च॥

इति बृहन्मनुवचनात्साप्तपुरुषमेव। तथा प्रतिगृहीते पुत्रे सत्यपि प्रतिग्रहीतृश्राद्धान्वये अवयवान्वयाभावात् न दशपुरुषं सापिण्ड्यम्। किं तु त्रिपुरुषमेव।

यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः।
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह॥
द्वाभ्यां सहाथ तत्पुत्राः पौत्रास्त्वेकेन तत्समम्।
चतुर्थपुरुषे छेदं तस्मादेषा त्रिपौरुषी॥

इति कार्ष्णाजिनिवचनादिति तद्वारणार्थमुभयोपदानात्। एषा सपिण्डता। शेषं तु दत्तकसापिण्ड्यावसरएव व्याख्यातम्। दशपुरुषमेव सापिण्ड्यं रिक्थाशौचयोर्द्वयोरपि प्रयोजकमित्याह भगवान् बौधायनः, प्रपितामहः पितामहः पिता स्वयं सोदर्या भ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रस्तत्पुत्रवर्गं तेषां च पुत्रपौत्रमविभक्तदायं सपिण्डानाचक्षते विभक्तदायान्सकुल्यानाचक्षतइति। तस्य प्रपौत्रस्य पुत्रवर्गः पुत्रसमुदायः। तेषां समुदायिनां पुत्रपौत्रम्। अविभक्तदायम् दायोऽत्र पिण्ड एकपिण्डान्वयीत्यर्थः। पिण्डान्वयश्च दशपुरुषएवेत्युक्तमेव प्राक्। विभक्तदायान्विच्छिन्नसापिण्डान्दशमपुरुषादूर्ध्वं सकुल्यानाचक्षतइत्यर्थः। न चेदं केवलं रिक्थग्रहणएव दशपुरुषं सापिण्ड्यम्, आशौचे सपिण्डेष्वासप्तमादिति तेनैव पृथक्साप्तपुरुषाभिधानादिति मन्तव्यम्। सपिण्डेष्वादशाहमित्युपक्रम्य जननमरणयोस्ताश्रिवानइत्युपसंहारान्मध्यपठितयोः साप्तपुरुषदशपुरुषयोः सापिण्ड्ययोः सन्दंशपतितत्वेनोभयत्राप्युभयोरपि वैकल्पिकाङ्गत्वसिद्धेः। तच्चासप्तमाद्रिक्थविच्छित्तिरिति स्वयम्भूवाक्ये साप्तपुरुषस्य बौधायनवाक्ये च दशपुरुषस्य रिक्थग्रहणे वैकल्पिकमङ्गत्वं स्पष्टमेव। तेन साप्तपुरुषसपिण्डसत्त्वेऽष्टमादिभिर्न रिक्थं ग्राह्यमिति सिध्यति। आशौचे तु तयोर्वैक-

ल्पिकमङ्गत्वं स्पष्टमाह

पारस्करः, सर्वे ज्ञातयो ऽभ्यवयन्त्यासप्तमात्पुरुषाद्दशमा-द्वेति ।

याज्ञवल्क्योऽपि,

सप्तमाद्दशमाद्वाऽपि ज्ञातयो ऽभ्यवयन्त्यपः । इति ।

यत्तु सप्तमदशमशब्दयोर्दिनपरतया मिताक्षराव्याख्यानं, तदसत् । पूर्वोदाहृतपारस्करवचनादर्शनात् । इदमेव सापिण्ड्यं श्रुतिलिङ्गमप्युपोद्बलयति,

दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।

अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥

ममतायाः अपत्यं पुमान्मामतेयः दीर्घतमा नाम ऋषिः कूटस्थाद्दशमे युगे द्वंद्वे मातापितृलक्षणे अतीते जुजुर्वान् भार्यां सेवितवान् । जुषी प्रीतिसेवनयोरित्यस्यायं प्रयोगः । कुत इत्यत आह । अर्थं गर्भलक्षणं प्रयोजनम् आसादयितुं यतीनां गच्छन्तीनाम् अपां शुक्रशोणितरूपाणां जलानां सारथिः नेता ब्रह्मा जीवो भवति ।

स्त्रीपुंसयोश्च संयोगे विशुद्धे शुक्रशोणिते ।

पञ्च धातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुः ॥

इति स्मृतेः । तस्माद्दशयवान्वयरूपं साविण्ड्यं दशपुरुषमनुवर्त्तत इति तात्पर्यम् । तथा मातृद्वारकं सप्तपुरुषं साविण्ड्यं स्मर्यते ।

यथाह सुमन्तुः, मातृपितृसम्बद्धा आसप्तमादविवाह्याः कन्या भवन्ति आपञ्चमादन्येषामिति ।

अत्र मातृपितृद्वारकयोरुभयोरपि साविण्ड्ययोः स्वमते सप्तपुरुषत्वमुक्तं, परमते द्वयोरपि पञ्चपुरुषत्वमुक्तम् ।

याज्ञवल्क्यस्तु मातृतः पञ्चपुरुषं पितृतस्सप्तपुरुषं सापिण्ड्यमाह,

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा। इति।

विष्णुरपि, मातृतस्त्वापञ्चमात्पुरुषात्पितृतश्चासप्तमादिति।

अत्राङ् न मर्यादायां, किन्तु अभिव्याप्तौ। नोद्वहेदित्यनुषज्यते।

गौतमोऽपि, ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमादिति।

देवलोऽपि,

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात्।

सपिण्डता निवर्त्तेत सर्ववर्णेष्वयं विधिः॥ इति।

पैठीनसिरपि असमानार्षेयीं कन्यां वरयेत्पञ्च मातृतः परिहरेत्सप्त पितृत इति।

हारीतोऽपि, तस्माल्लक्षणत्रयविज्ञानोपपन्नां कन्यां वरयेत्पञ्च मातृबन्धुभ्यः सप्त पितृबन्धुभ्य इति। परिहृत्येति शेषः।

नारदोऽपि,

पञ्चमात्सप्तमादर्वाक् बन्धुभ्यः पितृमातृतः।

अविवाह्या सगोत्रा च समानप्रवरा तथा॥ इति।

वसिष्ठस्तु मातृतश्चतुष्पुरुषं पितृतः षट्पुरुषमाह।

गृहस्थः सदृशीं भार्यां विन्देत पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्य इति।

श्लोकवसिष्ठोऽपि,

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा। इति।

विष्णुपुराणेऽपि,

पञ्चमीं मातृपक्षे तु पितृपक्षे तु सप्तमीम्।

गृहस्थ उद्वहेत्कन्यां न्यायेन विधिना नृप॥ इति।

शङ्खोऽपि,

विन्देत विधिवद्भार्यामसमानार्षगोत्रजाम् ।
मातृतः पञ्चमीं चापि पितृतस्त्वथ सप्तमीम् ॥ इति ।

चतुर्विंशतिमतेऽपि,

ब्राह्मेण तु विवाहेन शीलरूपगुणान्विताम् ।
मातृतः पञ्चमीं चैव सप्तमीं पितृतस्तथा ॥ इति ।

आशौचमधिकृत्य मनुविष्णू षाट्पुरुषमाहतुः,

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते । इति ।

विष्णुरपि, आशौचे तथैव पठति,

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । इति ।

गौतमोऽप्याशौचे पिण्डनिवृत्तिः सप्तमे पञ्चमे वेति ।

वसिष्ठस्तु आशौचे साप्तपुरुषमाह, सपिण्डता च साप्तपुरुषी विज्ञायतइति ।

पैठीनसिस्तु विवाहएव मातृतस्त्रिपुरुषं पितृतः पञ्चपुरुषमाह, त्रीनतीत्य मातृतः पञ्चातीत्य पितृतो वेति । वरयेदित्यनुषज्यते ।

चतुर्विंशतिमते तु पक्षद्वयेऽपि त्रिपुरुषं द्विपुरुषं च सापिण्ड्यमुक्तम्.

तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ।
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः ॥
आरभ्य कूटात्पुरुषात्पञ्चमो न तु पञ्चमीम् ।
चतुर्थीं पञ्चमीं चैव चतुर्थः षष्ठ उद्वहेत ॥ इति ।

षट्त्रिंशन्मते तु विवाहएव मातृतः पितृतश्च द्विपुरुषमेव सापिण्ड्यमुक्तम्,

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।

विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः॥ इति।

एषां वचनानां विरोधे व्यवस्थामाह विज्ञानेश्वराचार्यः, वसिष्ठादिवचनजातं तु अर्वाङ्निषेधार्थं न पुनस्तत्प्राप्त्यर्थमिति सर्वस्मृतीनामविरोध इति। अत्रोपपत्तिमाह मिताक्षराटीकायां सुबोधिन्यां भट्टवीरेश्वरः,

पञ्चमात्सप्तमाद्वा यः कन्यामुद्वहते द्विजः।
गुरुतल्पी स विज्ञेयः सगोत्रां चैवमुद्वहन्॥
पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया।
क्रियापरा अपि हि ते सर्वे ते शूद्रतां गताः॥

इति विष्णुमरीच्यादिवाक्याभिहितनिन्दार्थवादानुगृहीतेन—

पञ्चमात्सप्तमादर्वाक् बन्धुभ्यः पितृमातृतः।
अविवाह्या सगोत्रा च समानप्रवरा तथा॥

इति नारदीयादिस्पष्टनिषेधेनार्वाग्विवाहविधायकवाक्यानामविरोधाय निषेधस्य निषेध्यापेक्षिततया एकमूलकल्पनालाघवेन च नोद्वहेदित्येकवाक्यताकरणात्सर्वस्मृतीनामविरोध इति भाव इति। नैतन्मीमांसकशिरोमणेर्विज्ञानेश्वरस्याशयविवरणं साधीयः। षोडशिग्रहणाग्रहणादिविधिनिषेधयोर्विकल्पमात्रोच्छेदप्रसङ्गात्। तस्माद्विधिनिषेधयोरेकवाक्यताकरणं तेजस्तिमिरयोस्संवलनमिवाशक्यमित्युपेक्षणीयम्।

विवाहमञ्जर्यां तु अस्यैवाशयोऽन्यथा वर्णितः। तथाहि। असपिण्डामुद्वहेदित्यत्र तत्तद्वाक्योपात्तानां तृतीयाद्यष्टम्यन्तानामसपिण्डानां युगपत्प्राप्तौ पञ्चमात्सप्तमादूर्ध्वमिति वचनमर्वाचीनानामसपिण्डानां परिसंख्यार्थम्। सैव च तत्तद्विशेषवाक्यैः स्पष्टीक्रियते। तदभिप्रायेणार्वाङ्निषेधपरमिति। नैतदपि सारम्। तृतीयाद्यष्टम्यन्तासपिण्डोद्वाहविधीनां विनिगमनाविरहेण परस्परपरिसंख्यार्थता-

पत्तेः । वस्तुतस्तु ऐकान्तिको निषेधः परिसंख्या वा रागप्राप्त एव भवति, न कलञ्जं भक्षयेत् पञ्च पञ्चनखा भक्ष्या इत्यादिष्विव । न शास्त्रप्राप्ते । तयोस्तुल्यबलत्वेन विकल्पापादकत्वात् । न चासावपि प्रकृते युक्तः । अष्टदोषदुष्टत्वात् । गत्यन्तरसम्भवाच्च ।

यदपि सप्तम्यादिविधीनां न तत्तद्विधायकत्वं, पञ्चमे सप्तमे चैवेत्य द्विवचनविरोधात् । किं तु पञ्चमसप्तमार्वाचीननिषेधपरत्वम् । पञ्चमात्सप्तमादर्वागित्यादिवचनैकवाक्यत्वादिति व्याख्यातम् । तदपि न । अपदार्थत्वेन लक्षणाप्रसङ्गात् ।

यदपि सप्तम्यादिविधायकवाक्येषु अतीतपदाध्याहारेण सप्तम्याद्यूर्ध्वविधायकवाक्यैकवाक्यताकरणम् । तदपि न । विष्णुगौतमवसिष्ठादिस्मृतिषु विवाहाशौचप्रकरणयोः षाट्पुरुषसाप्तपुरुषसापिण्ड्यविधायकवाक्यद्वयारम्भानर्थक्यापत्तेः । षाट्पुरुषसापिण्ड्यविधायकएवातीतपदाध्याहारेण साप्तपुरुषसापिण्ड्यासिद्धेः । तथाहि । विष्णुस्मृतौ—

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।

इत्याशौचप्रकरणे अभिधाय विवाहप्रकरणे मातृतस्त्वापञ्चमात्पुरुषात्पितृतस्त्वासप्तमान्नोद्वहेदिति पुनरभिहितम् । तथा गौतमनापि पिण्डनिवृत्तिः सप्तमे पञ्चमे वेत्याशौचप्रकरणे अभिधाय पुनः "ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमादिति" विवाहप्रकरणेऽभिहितम् । तथा वसिष्ठेनापि सपिण्डता तु साप्तपुरुषी विज्ञायतइति आशौचप्रकरणे अभिधाय गृहस्थः सदृशीं भार्यां विन्देत पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्य इति विवाहप्रकरणे चाभिहितम् । तस्माद्यथा विवाहाशौचयोः पृथक् पृथक् सापिण्ड्यम् अगत्या स्वीक्रियते तथा विवाहेऽपि सापिण्ड्यभेदः स्वीक्रियताम् । अत एव सुमन्तुपैठीनस्यादिस्मृतिषु विवाहएव-

सप्तपुरुषपञ्चपुरुषसापिण्ड्ये अभिहिते । तथाहि । मातृपितृसम्बद्धा आसप्तमादविवाह्याः कन्या भवन्त्यापञ्चमादन्येषामिति सुमन्तुः । पैठीनसिश्च असमानार्षेयां कन्यां वरयेत्पञ्च मातृतः परिहरेत्सप्त पितृतः, त्रीनतीत्य मातृतः पञ्चातीत्य पितृतो वेति । न चात्र।ऽतीतपदाध्याहारेणैकवाक्यता सम्भवति । साक्षादेवातीतपदवापदयोः श्रवणात् । तस्मान्न तदपि भव्यम् ।

तर्हि कथमेषां वाक्यानां विरोधपरिहार इति चेद् मुख्यानुकल्पताभेदेनेति ब्रूमः । तत्र पितृतो दशपुरुषं सापिण्ड्यं मुख्यकल्पः । बुधस्वयम्भूबौधायनयाज्ञवल्क्यपारस्करादिस्मृत्यनुग्रहात् । प्रत्यक्षश्रौतलिङ्गोपष्टम्भाच्च । अस्मिन् पक्षे मातृतस्सप्तपुरुषं सापिण्ड्यं मुख्यः कल्पः । मातृपितृसम्बद्धा आसप्तमादविवाह्याः कन्या भवन्तीति सुमन्तुस्मरणात् । तत्परिहाराशक्तौ पितृतः सप्तपुरुषादयः मातृतश्च पञ्चपुरुषादयः षट् पक्षास्त्वनुकल्पाः । तत्रापि पितृतस्सप्तपुरुषपक्षो मातृतः पञ्चपुरुषपक्षश्च बहुस्मृत्यनुग्रहादनिषेधात्प्राशस्त्यवचनात्सकलशिष्टपरिग्रहाच्च प्रशस्तः । अन्ये तु पूर्वपूर्वासम्भवे अनुकल्पतातारतम्येन व्यवस्थाप्याः । अनुकल्पता च मुख्यानुष्ठानासम्भवे परानुष्ठानम् । तत्रानुकल्पता द्विविधा, नैयायिकी वाचनिकी चेति । तत्र नैयायिकीमाह—

विष्णुपुराणम्,

सप्तमीं पितृपक्षाच्च मातृपक्षाच्च पञ्चमीम् ।
उद्वहेत द्विजो भार्यां न्यायेन विधिना नृप ॥ इति ।

न्याय्यो न्यायप्राप्तः । न्यायश्च यथा, न दीक्षितस्यान्नमश्नीयादिति निषेधे अग्नीषोमीये संस्थिते दीक्षितस्याप्यश्नीयादित्यस्य मुख्यपक्षस्य प्रतिप्रसवस्यासम्भवे क्रीतराजको भोज्यान्न इति ल-

युपक्षस्याऽप्यनुज्ञाने । वाचनिकी यथा विश्वरूपोदाहृते-
चतुर्विंशतिमते,

दशभिः पुरुषैः ख्याताच्छ्रोत्रियाणां महाकुलात् ।
उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीम् ॥
पञ्चमीं तदभावे तु पितृपक्षे स्वयं विधिः ।
सप्तमीं च तथा षष्ठीं पञ्चमीं च तथैवच ॥
एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः ।
तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ॥
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः ।
असपिण्डा च या मातुरसगोत्रा च या पितुः ॥
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ।
यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् ॥
नित्यं स व्यवहार्यः स्याद्वेदाचैतत्प्रतीयते । इति ।

सप्तमादूर्ध्वं प्रशस्तः कल्पः । तदभावे सप्तमीं तदभावे पञ्चमीमिति पक्षद्वयेऽप्ययं सर्वमतेन प्रशस्तोऽनुकल्पः । तुशब्देन पक्षान्तरं परिगृह्णाति । पितृपक्षे स्वयं वक्ष्यमाणो विधिः सप्तमीं षष्ठीं पञ्चमीं तथा । मातृपक्षे चतुर्थ्यादिकां पूर्वपूर्वाभावएव उद्वहेत्समुद्वाहे न दोष इति शाकटायनमतम् । एवं स्वमतेन पक्षद्वये अनुकल्पमुक्त्वा इदानीं मतान्तरेण पक्षद्वयेऽनुकल्पमाह । पञ्चम्यभावे चतुर्थीं तदभावे तृतीयामार्थक्रमप्राबल्यात्, पक्षद्वयेऽप्युद्वहेदिति मनुपराशराङ्गिरोयमानां मतम् । कन्यागतमेव सप्तमत्वादिविशेषणं वरेऽपि ज्ञेयम् । असपिण्डोऽसपिण्डामुद्वहेदित्यसपिण्डस्योभयविशेषणत्वात् । तेन सप्तमः सप्तमीं षष्ठः षष्ठीमित्यादि सिध्यति । पञ्चमयोस्तु विशेषोऽभिहितस्तत्रैव,

आरभ्य कूटात्पुरुषात्पञ्चमो न तु पञ्चमीम् ।

चतुर्थीं पञ्चमीं चैव चतुर्थः षष्ठ उद्वहेत ॥ इति।

नन्वनुकल्पेऽपि यदि दोषाभावस्तुल्यः तर्हि को विशेषो मुख्यकल्पादित्यत आह। सा प्रशस्तेति। सा ऽतीतसप्तमादिका प्रकर्षेण शस्ता। दारकर्म गृहकार्यं, मैथुनमाधानादि। अनेनानुकल्पस्य द्विजातीनां दोषाजनकत्वेऽप्यप्राशस्त्यमुक्तम्भवति। लोकविद्वेषात्। अन्येषां तु नाप्राशस्त्यमपि। उक्तरीत्या साप्तपुरुषस्य सापिण्ड्यस्य विजातीयेष्विव शूद्रेष्वपि सङ्कोचावश्यम्भावेन द्विजातिमात्रविषयत्वात्।

अन्ये तु साप्तपुरुषं सापिण्ड्यं चातुर्वर्ण्यविषयं, तद्विषयमेव चानुकल्पविधानं, तच्च द्विजेष्वपोद्यते पञ्चमात्सप्तमादर्वागित्यनेन। ततश्च द्विजानामेवायमनुकल्पनिषेधो नान्येषामिति द्विजातिरिक्तविषयं सप्तम्यादिविधानमिति मन्यन्ते।

तन्न सुन्दरम्। अनुकल्पविधानस्य श्रोत्रियाणामित्युपक्रमेण द्विजातीनामित्युपसंहारेण च द्विजातिमात्रविषयत्वेन चातुर्वर्ण्यविषयत्वासम्भवात्। द्विजातिमात्रविषयत्वे च विधिनिषेधयोरष्टदोषदुष्टविकल्पापत्तेः। न चास्मन्मते सा। विधेरनुकल्पविषयत्वेन निषेधस्य च मुख्यकल्पविषयत्वेनैकविषयत्वाभावात्। तस्माद्यथोक्तमेव साधीय इति।

नन्वनुकल्पोद्वाहे दोषाभावात्स्मरको न स्यात्। लोकविद्वेषस्तु मधुपर्कगोवधवत्स्यादेवेत्यत आह। यस्तु देशेति। देशकुलाचाराभ्यामनुकल्पस्य व्यवस्थितत्वान्न लोकविद्वेषविषयता। तत्र प्रमाणमाह। वेदादिति। तृतीये सङ्गच्छावहै चतुर्थे सङ्गच्छावहै इति वेदस्तृतीयचतुर्थयोरुद्वाहे प्रमाणम्। ते "नस्रा५त्वं ते ऽवत तउ नो अधिवोचत। मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावत" इति वेदः कुलाचारे प्रमाणमिति। भो देवास्ते यूयं न-

स्माकं पालयध्वम् । ते यूयं नः अस्मानवत रक्षत । ते यूयं नः अस्मानधिवोचत अधिकं हितं ब्रूत । मानवान्मनुष्यानुद्दिश्यात् परावतः परलोकसम्बन्धिनः पित्र्यात्पितृपरम्परागतात्पथो दूरं नः अस्मान्मा नैष्ट मा नयतेति देवान्प्रति प्रार्थ्यते । तस्मात्कुलपरम्परागतेन मार्गेण सप्तमाद्र्वागप्युद्वाहे न दोष इति भावः ।

उत्कलाः पुनरिमान्येव वाक्यानि दिव्यसिंहमिश्रकृतसंस्कारलतिकोदाहृतोशनःस्मृतिवाक्यबलादन्यथैव व्यवस्थापयन्ति । तद्यथा,

सप्त षट् पञ्च चत्वारो वर्ज्या वर्णैः क्रमान्नराः ।
सपिण्डतायामुद्वाहे शुद्धौ मरणजन्मनोः ॥
त्रयोऽनुलोमजैस्त्याज्याः द्वावेव प्रतिलोमजैः । इति ।

नराः पुरुषाः शीर्षाणीति यावत् ।

गौडास्तु शूलपाणिमिश्रकृतसम्बन्धविवेकोदाहृतबृहन्मनुवचनानुरोधेनान्यथैव व्यवस्थामाहुः । तद्यथा,

असबद्धा भवेद्या तु पिण्डेनैवोदकेन वा ।
सा विवाह्या द्विजातीनां त्रिगोत्रान्तरिता च या ॥ इति ।

त्रिगोत्रान्तरिता मूलपुरुषगोत्रात् चतुर्थगोत्रोत्पन्नेति यावत् ।

तथाच स एव,

तत्सन्निकर्षे कर्त्तव्यं त्रिगोत्रात्परतो यदि । इति ।

अथ विजातीयसापिण्ड्यनिर्णयः ।

तत्र शङ्खः ।

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः ।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्त्तते त्रिषु ॥ इति ।

अस्यार्थः । एकजाता एकस्माद्ब्राह्मणादेर्जाताः पृथग्जनाः भर्त्रपेक्षया भिन्नजातीयासु परस्परं समानजातीयासु स्त्रीषु जातास्ते एकपिण्डाः सपिण्डाः । ते पृथक्शौचाः पितृजात्यपेक्षया

विजातीयाशौचाः। पिण्डस्त्वावर्त्तते त्रिषु तेषां साषिण्ड्यं त्रिपुरुषमेवेत्यर्थः।

ब्रह्मपुराणेऽपि,

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
सजातीयेषु वर्णेषु चतुर्थे भिन्नजातिषु॥ इति।

अथ मातुलकन्यापरिणयननिर्णयः।

तत्र तदनुष्ठातारः श्रुतिस्मृतिपुराणेतिहासशिष्टाचारान् प्रमाणानि प्रदर्शयन्ति। तत्र ऋग्वेदश्रुतिः,

आयाहीन्द्र पथिभिरीळितेभिर्यज्ञमिमन्नो भागधेयं जुषस्व।
तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिव॥ इति।

अस्यार्थः। हे इन्द्र ईळितेभिः पथिभिः स्तुतैर्मार्गैर्नोऽस्माकमस्माभिरनुष्ठीयमानम् इमं यज्ञम् आयाहि आगच्छ आगत्य च स्वीयं भागधेयं जुषस्व जुषी प्रीतिसेवनयोः प्रीतिपूर्वकं गृह्णीष्व। कोऽसौ भागधेय इत्यत आह। वपां तृप्तामाज्यादिभिः संस्कृतां वपां यजमानाध्वर्युप्रभृतयो जहुस्त्यक्तवन्तः, तत्र दृष्टान्तद्वयमवतारयति। मातुलस्येव योषेति पैतृष्वसेयीवेति च। अत्र मातुलशब्दस्य सम्बन्धिशब्दत्वात्सम्बन्धी भागिनेय उपतिष्ठते। ततश्च मातुलस्य योषा मातुलकन्या न पत्नी। पैतृष्वस्रेय्या अनन्वयापत्तेः। यथा भागिनेयस्य भागः भजनीया परिणेतुं योग्येति यावत्। यथाच पैतृष्वसेयी पितृष्वसुर्दुहिता अर्थान्मातुलपुत्रस्य भागस्तथेयं च वपा तव भागधेयः।

तथा श्रुत्यन्तरमपि,

गर्भे तु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः।
नाकरस्य प्रमिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः॥

इति। अस्यार्थः। त्वष्टा रूपाणां कर्त्ता सविता सर्वेषां शुभाशुभ-

स्य प्रेरकः विश्वरूपः सर्वात्मकः देवो दानादिगुणयुक्तः नौ आवयोर्भ्रातृभगिन्योः गर्भे जनिता जनितारौ कन्यापुत्रौ दंपती जायापती कः करिष्यतीत्यर्थः । अत्र हेतुमाह । अस्य प्रजापतेः व्रतानि कर्माणि नकिः प्रमिनन्ति न केचित्प्रहिंसन्ति न लोपयन्तीत्यर्थः । अपिच नौ आवयोः अस्य प्रजापतेः कर्तव्यं दंपती जनकत्वं पृथिवी भूलोकः द्यौः स्वर्लोकश्च न वेद न जानातीत्यर्थः । एतेनापि भ्रातृभगिन्यपत्ययोर्विवाहयोग्यता सिध्यति ।

वाजसनेयकेऽपि,

तस्मात्समानादेव पुरुषादत्ता चाद्यश्च जायेते ।
तृतीये सङ्गच्छावहाउत चतुर्थे सङ्गच्छावहै ॥ इति ।

अस्यार्थः । तस्मादित्युक्तमर्थं दृष्टान्तेनोपसंहरति । समानादेकस्मात्पुरुषात्कूटस्थात् अत्ता भोक्ता आद्यो भोग्यश्च जायेते । तौ च मिथस्संकल्पयतः कूटस्थमारभ्य तृतीयपुरुषे आवां सङ्गच्छावहै उत चतुर्थे पुरुषे सङ्गच्छावहै इति । यद्यप्येते मन्त्रार्थवादाः पदार्थत्वान्न स्वार्थावधिपराःस्तथाऽप्यप्राप्तस्यार्थस्य सिद्धवदनुवादान्यथानुपपत्त्या स्वार्थविधिकल्पका गम्यन्ते । यथा उपरि हि देवेभ्यो धारयति सकर्ग हि मनुष्या अञ्जते इत्यादौ । न च प्रजापतिः स्वां दुहितरमभ्यध्यायत् योषा जारमिव प्रियमित्यादौ विधिकल्पनातिप्रसङ्गः । तेषां रागप्राप्तत्वात् । अत एव एतच्छ्रुतिमूलिका स्मृतिरपि षट्त्रिंशन्मते प्रत्यक्षमेव विधिं दर्शयति,

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
उद्वाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः ॥ इति ।

चतुर्विंशतिमतेऽपि,

तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ।
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः ॥ इति ।

पुराणेऽपि श्रीभागवते,

यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः।
व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियम्॥
वृतः स्वयंवरे साक्षादनङ्गोऽङ्गयुतस्तया।
राज्ञः समेतान्निर्जित्य जहारैकरथो युधि॥ इति।

तथा तत्रैव,

दौहित्रायानिरुद्धाय गौरीं रुक्म्यददाद्धरेः।
रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया॥
जानन्न धर्मं तं यौनं स्नेहपाशानुबन्धतः। इति।

यत्त्वस्य अधर्मं जानन्नित्यन्वयप्रतिभानादधर्मत्वव्याख्यानं केषाञ्चित्,तद्भगवद्बादरायणाशयानभिज्ञाननिबन्धनमित्युपेक्षणीयम्। तथाहि। प्रत्यक्षश्रौतलिङ्गानुमितश्रुतिस्मृत्याद्यनेकप्रमाणप्रमितं तं यौनं दौहित्राय पौत्रीदानलक्षणं सम्बन्धं धर्मं धर्मत्वेन जानन्नाददात्, किन्तु स्वसुः प्रियचिकीर्षया स्नेहपाशानुबन्धत एव। अतएव हरेर्बद्धवैरोऽपीति विशेषणेन तदेवाविष्कृतम्। दौहित्राय प्रद्युम्नपरिणीतस्वदुहितृपुत्राय गौरीं गौराङ्गीं रोचनां रोचनामिवेति लुप्तोपमेति शब्दार्थः।

इतिहासेऽपि महाभारते, शूरकन्या कुन्तिभोजेन पुत्रीकृता पाण्डुतोऽर्जुनमजीजनत्। अर्जुनश्च शूरात्मजस्वमातुलवसुदेवसुतां सुभद्रामुपयेमे इत्यपरं लिङ्गम्। तथाहि।

अर्जुनस्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः।
गतः प्रभासमश्रृणोन्मातुलेयीं स आत्मनः॥
तत्र चंक्रममाणो तौ वसुदेवसुतां शुभाम्।
स्वलङ्कृतां सखीमध्ये भद्रां ददृशतुस्तदा॥
एषा भगिनी पार्थ सारणस्य सहोदरा।

सुभद्रा नाम भद्रं ते पितुर्मे दयिता शुभा ॥
दुहिता वसुदेवस्य वासुदेवस्य च स्वसा ।
रूपेण चैव सम्पन्ना कमेवैषा न मोहयेत् ॥
कृतमेव तु कल्याणं सर्वं मम भवेद् ध्रुवम् ।
यदि स्यान्मम वार्ष्णेयी महिषीयं स्वसा तव ॥
अतः प्रचिन्त्य कल्याणीं प्रसह्य भगिनीं मम ।
हर स्वयंवरे ह्यस्याः को वै वेद चिकीर्षितम् ॥
ततः सुभद्रा सौभद्रं केशवस्य स्वसा प्रिया ।
जयन्तमिव पौलोमी द्युतिमन्तमजीजनत् ॥ इत्यादि ।

आचारोऽप्यविच्छिन्नपारम्पर्येण दाक्षिणात्यशिष्टानामविगीतो विजृम्भते । तस्मात्सिद्धं मातुलपितृष्वसृकन्यापरिणयनम् ।

अत्र प्राच्योदीच्यप्रतीच्याः प्रत्यवतिष्ठन्ते । कथमविगानं, निषेधस्मृतीनां बहुलमुपलब्धेः ।

तथाहि मनुः,

पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेवच ।
मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान् ।
ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्पुनः ॥ इति ।

मातुश्चाप्तस्य मात्रा भ्रातृत्वेन प्रतिपन्नस्य ।

तथाच लिङ्गपुराणे,

वाक्सम्बन्धकृतानां तु स्नेहसम्बन्धभागिनाम् ।
विवाहोऽत्र न कर्त्तव्यो लोकगर्हा प्रसज्यते ॥
अतो वंशा विनश्यन्ति लोके संकरकारकाः । इति ।

शातातपः,

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैवच ।

समानप्रवरां चैव द्विजश्चान्द्रायणं चरेत् ॥ इति ।

पुनरपि स एव,

उद्वहेत्तु सगोत्रां यस्तनयां मातुलस्य च ।
ऋषिभिश्चैव तुल्यां च स तु चान्द्रायणं चरेत् ॥

महाभारते ययातिवाक्यमपि,

यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
पापा मातुलसम्बन्धात्मजा वै ते भविष्यति ॥

कलिनिन्दाप्रक्रमे व्यासोऽपि,

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥ इति ।

सुमन्तुः,

पितृष्वसृसुतां मातृष्वसृसुतां मातृसगोत्रां समानप्रवरां च विवाह्य चान्द्रायणं चरेदिति ।

पैठीनसिः,

कुलोत्पन्नां साध्वाचारां वरयेत्पितृष्वसृमातृष्वसृदुहितरो मातुलसुता च धर्मतस्ता भगिन्यो वर्जयेदिति । भगिन्य इत्यपरिणेयत्वे हेतुगर्भं विशेषणम् । अत एव भविष्योत्तरे,

प्रथमा श्रावणे मासि तथा भाद्रपदे परा ।
तृतीयाऽऽश्वयुजे मासि चतुर्थी कार्तिके भवेत् ॥ इति—
चतस्रो यमद्वितीया उपक्रम्य तासु—
पितृव्यभगिनीहस्तात्प्रथमायां युधिष्ठिर ।
मातुलस्य सुताहस्ताद् द्वितीयायां तथा नृप ॥
पितुर्मातुः स्वसुः कन्ये तृतीयायां तयोः करात् ।
भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परम् ॥
सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः ।

इति चतसृणामपि भगिनीत्वं स्पष्टमेवाभिहितम्। तदेवं मातुलकन्यापरिणयस्य निषेधवचनकदम्बे जाग्रति कथमिव तद्विधायकस्मृत्यादेर्मूलभूतश्रुत्यनुमानमिति प्राप्ते—

अभिधीयते दाक्षिणात्यैः। प्रत्यक्षश्रौतलिङ्गाद्यनुमितश्रुत्या शीघ्रोपस्थितिकतया स्मृत्यनुमितलिङ्गाद्यनुमीयमानश्रुतेर्विषयापहारेण बाधादनुमानासम्भवान्नैतासां स्मृतीनां स्वार्थप्रमापकत्वम्।

तदुक्तं बलाबलाधिकरणे वार्तिकाचार्यैः, स्मृतिवैदिकलिङ्गयोर्विरोधे स्मृतेर्मूलान्तरसम्भवाद्वेदलिङ्गानां चानन्यथासिद्धत्वात्स्मृतेर्बाध इति। तथा, बलीयो वैदिकं वैदिकनिवहायाः स्मृतेरपीति च। विवृतं चैतद्राणकाचार्यैः प्रकृतमेवोदाहरणं प्रस्तुत्य। अथवा। विषयविशेषव्यवस्थया विरोधाभावेन विधिनिषेधवाक्यैः स्वस्वमूलभूतश्रुत्यनुमाने बाधकाभावः। तथाहि। ब्राह्मादिषु विवाहेषु दानेन कन्यायाः पितृगोत्रसापिण्ड्ये निवर्त्तते, यथा दत्तपुत्रस्य।

तदाह मनुः,

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥ इति।

दत्तः पुत्रो जनयितुर्गोत्ररिक्थे न भजेत्। तथा पुत्रं ददतः पितुः पिण्डः सापिण्ड्यं स्वधा श्राद्धं च दत्तपुत्राद्व्यपैति। तत्र हेतुर्यतो गोत्ररिक्थानुगः पिण्डस्तन्निवृत्तौ निवर्त्तते इत्यर्थः। आसुरादिचतुर्षु पुनर्दानाभावेन गोत्रसापिण्ड्ययोरनिवृत्तिरिति। अत एव मार्कण्डेयेन,

ब्राह्मादिषु विवाहेषु या वूढा कन्यका भवेत्।
भर्तृगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया॥
आसुरादिविवाहेषु पितृगोत्रेण धर्मवित्।

इति गोत्रान्वयनिवृत्ती प्रतिपाद्येते । अनेनैवाभिप्रायेण स्मृत्यन्तरेऽप्युक्तम्,

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके । इति ।

एवं च यानि मातुलसुतादिनिषेधकानि मन्वादिवाक्यानि तान्यनिवृत्तगोत्रसापिण्ड्येष्वासुरादिविवाहेषु सावकाशानीति । एतेन पुत्रिकापुत्रोऽपि व्याख्यातः ।

मातामहस्य गोत्रेण मातुः पिण्डोदकक्रियाम् ।
कुर्वीत पुत्रिकापुत्र एवमाह प्रजापतिः ॥

इति लौगाक्षिस्मरणात् । तन्न चतुरस्रम् । विकल्पासहत्वात् । तथाहि । ब्राह्मादिविवाहेषु सापिण्ड्यनिवृत्तिः किं दानेन उत वचनेन आहोस्वित्सत्यपि सापिण्ड्ये वाचनिकोऽयं विवाह इति । न तावदाद्यः । दानेन स्वत्वनिवृत्तावपि सापिण्ड्यानिवृत्तेः । अवयवान्वयः पिण्डान्वयो वा सापिण्ड्यं, तत्रावयवान्वयनिवृत्तिः प्रत्यक्षबाधिता । पिण्डान्वयनिवृत्तिस्तु—

पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।
अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत् ॥

इति शास्त्रेण बाधिता । यदा तु कन्यादाने परस्वत्वापादनमात्रं न स्वस्वत्वनिवृत्तिरिति दानत्वस्यैवाभावो विद्यादानादिष्विव तदा सुतरां न सापिण्ड्यनिवृत्तिः । नापि द्वितीयः । तादृशवचनस्य श्रीमद्भिरप्यनुपन्यासात् । यत्तु—

एकत्वं सा गता भर्त्तुः पिण्डे गोत्रे च सूतके ।

तथा—

स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ।

इति च वाक्यद्वयमुपन्यस्तं, तत्राद्ये दंपत्योः पिण्डैक्यमात्रं बोध्यते न पितृसापिण्ड्यनिवृत्तिः । अथ पिण्डशब्देन सापिण्ड्य-

मेवोच्यते तत्रापि तथैव। निवृत्तिपदाश्रवणात्। द्वितीयेऽपि तथैव पितृगोत्रनिवृत्तिः श्रूयते न सापिण्ड्यनिवृत्तिः। सापिण्ड्यपदाश्रवणात्। न च गोत्रनिवृत्त्यैव सापिण्ड्यनिवृत्तिः। परस्परव्यभिचारेण व्याप्त्यभावात्। यदपि—

चतुर्विंशतिमते,

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा।

इत्यादिवचनं, तन्मातुलस्य सुतामूढ्वेत्यादिना सत्प्रतिपक्षग्रस्तमेव, प्रतिलोमादिसापिण्ड्यविषयं वेति न प्रकृतोपयोगि।

यदपि,

ब्राह्मादिषु विवाहेषु या तूढा कन्यका भवेत्।
भर्तृगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया॥
आसुरादिविवाहेषु पितृगोत्रेण धर्मवित्।

इति मार्कण्डेयवाक्येन ब्राह्मासुरविवाहभेदेन गोत्रसापिण्ड्ययोर्निवृत्त्यनिवृत्ती प्रतिपाद्येते इत्युक्तं, तदपि न। सापिण्ड्यनिवर्त्तकपदाश्रवणात्। गोत्रनिवृत्तिस्त्वासुरेऽपि भवत्येव।

पूर्वं परिग्रहस्तेषां पश्चाद्धोमो विधीयते।

इति परिशब्देन होमादिसप्तमपदप्रक्रमान्त सकलभार्यात्वोत्पादकसंस्कारविधानात्। तत्र च सप्तमे पदे पितृगोत्रनिवृत्तेरावश्यकत्वात्। तस्मान्मार्कण्डेयवाक्यम् आसुरादिविवाहेषु मातुः पिण्डदानादौ पितृगोत्रप्राप्त्यर्थम्। ब्राह्मादिवचनं तु दृष्टान्तार्थमनुवाद इति सर्वं सुस्थम्।

यत्तु मातुलस्येव योषेत्यादिश्रौतलिङ्गानुमितश्रुतिरत्र प्रमाणमिति, तदपि—

आयाहीन्द्र पथिभिरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व।
तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिवेति॥

इत्यपरार्कोदाहृतशाखान्तरीयश्रौतलिङ्गानुमितश्रुत्या सत्प्रतिपक्षग्रस्तम् । तस्याश्चार्थस्तेनैव व्याख्यातः । आयाहीन्द्र अस्मदीयं यज्ञमन्यैरपि सोमपतिभिः ईड्येभिः स्तोत्रार्हैः सह, आगत्य च वाजसातौ सोमरूपान्नभोजनप्रस्तावे जुषस्व, सोममिति सम्बध्यते । एवं प्रार्थ्येन्द्रस्तुत्यर्थं स्वरूपार्थवादं करोति, ये सोमपतयो भवता सहायातास्ते सकृत्सोमपानेन तृप्तास्सन्तस्सोमं जहुः त्यक्तवन्तः । के कामिव, मातुलस्य सुताः पैतृष्वसेयीमिव भार्यात्वेनात्यन्तानभिलषणीयां त्यजन्ति स्वकीयमातुलस्य सम्बन्धायोग्यत्वात्। तद्वत्त्वदुद्देशेन सोमं त्यक्तवन्तो निराकाङ्क्षतया । तव पुनरयं सोमभागः अप्रामित्रीयः सातत्येनाकर्मसमाप्तेरिति ।

यदपि,

गर्भे नु नौ जनिता दम्पती करिति श्रुतेः नौ आवयोर्गर्भे जनितारौ त्वष्टा देवः दम्पती करिष्यतीति व्याख्यानं, तदपि नौ आवां जनिता जनयिता देवः गर्भे नु गर्भएव दम्पती कर्त्तृ कृतवानिति विद्यारण्यश्रीपादकृतव्याख्याविरुद्धत्वादुपेक्षणीयम् । युक्तं चैतदेव । ओचिदिति चतुर्दशर्चस्य सूक्तस्य ।

ओचित् षळ्नावैवस्वतयोर्यमयम्योः संवादः षष्ठ्ययुग्भिर्यमी मिथुनार्थं यमं प्रोवाच स तां नवमीयुग्भिरनिच्छन्प्रत्याचष्टे—

इति सर्वानुक्रमेऽस्याः पञ्चम्या ऋचः यमं प्रति यम्या पूर्वपक्षत्वेनाभिधानात् । सिद्धान्ते—

न वाउ ते तन्वा तन्वं सम्पपृच्यां पापमाहुर्यः स्वसारन्निगच्छात् ।

अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतदिति ।

अस्यार्थः । हे सुभगे ते तव तन्वा शरीरेण तन्वं स्वीयान्तनुं न वाउ नैव सम्पपृच्यां सम्पर्कयिष्यामि । तत्र हेतुमाह । यः स्वसारं

निगच्छात् गच्छति तं लोका देवाश्च पापं पापिष्ठम् आहुः । तर्हि मत्सन्तोषः कथं स्यादित्यत आह । मत्प्रमुदः मत्तः जायमानाः प्रमुदस्त्वम् अन्येन पुंसा कल्पयस्व अर्जयस्व । न ते भ्राता यमः एतत्कर्म वष्टि न काङ्क्षतीति यमेन तत्प्रत्याख्यानाच्च ।

अथ तृतीये सङ्गच्छामहे इति शातपथश्रुत्या मातुलकन्यापरिणयः सेत्स्यतीति । तत्रोच्यते । न तावद्विधित्वेनेदं गमकम् । उत्तमपुरुषश्रवणात् । नापि विधिकल्पनया । स वै स्रुचौ व्यूहतीति स्रुग्व्यूहनविधिशेषत्वात् । यद्यप्राप्तार्थकत्वेनान्यशेषस्यापि विधिकल्पकत्वं, तर्हि नापुत्रस्य लोकोऽस्ति तत्सर्वे पशवो विदुः तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहतीत्यस्यापि पुत्रोत्पादनविधिशेषस्य मात्रादिगमनविधिकल्पकत्वं केन वार्येत । अथास्य छन्दोगश्रुतिविरोधान्न विधिकल्पकत्वं तर्हि प्रकृते अपरार्कोदाहृतश्रुतिविरोधान्न विधिकल्पकत्वमिति समः समाधिः ।

अथ तस्मादु समानादेव पुरुषादत्ता चाद्यश्च जायेते इत्यस्मात्तदर्थसिद्धिः । तदपि न । एकस्मादुत्पन्नयोर्भ्रातृभगिन्योर्दांपत्यस्य पापमाहुर्यः स्वसारं निगच्छादितिप्रत्यक्षश्रुतिबाधितत्वेन मुख्यार्थासम्भवात् । अथैकान्तरविवक्षया विवक्षितार्थसिद्धिस्तर्हि मुख्यार्थत्यागाविशेषाच्छास्त्रान्तराविरोधाय पञ्चपान्तरविवक्षया एकपुरुषसन्तानजात्पञ्चमात्सप्तमादूर्ध्वमित्येवार्थः कुतो न कल्प्यते । यथा जातेष्टौ मुख्यकालबाधेन शास्त्रान्तराविरोधायाशौचानन्तरः पर्वकालः कल्प्यत इति । न हि पञ्चम्या ऽव्यवहितस्यैवापादानत्वमुच्यते । चिरनिर्गतेऽपि पुरुषे गौडादागत इत्यादिप्रयोगदर्शनात् । तेन वाजपेयस्य यूप इतिषष्ठीवद्व्यवहितसम्बन्धेऽपि पञ्चम्युपपत्तेः । यतो वंशभद्रस्तमादाय गणयेदित्यादिस्मृतिमूलत्वमेवास्याः श्रुतेः कल्पयितुं युक्तम् । ननु कल्प्यता-

मन्तरं तथापि पक्षान्तरकल्पने किं प्रमाणम् । वाक्यशेषश्रुततृतीयचतुर्थपुरुषसंख्ययैव निराकाङ्क्षत्वादस्य वाक्यस्य । उपसंहृतश्चायमेवार्थश्चतुर्विंशतिमतस्मरणेऽपि,

तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ।

विवाहयेदिति प्राहुः पाराशर्याङ्गिरोयमाः ॥ इति ।

तस्मात्सिद्धमेतावत्येवान्तरे विवाहविधायकत्वमस्येति चेत्, सत्यम् । तथापि मातुलकन्यापरिणयनासिद्धेः । मातृष्वस्त्रीयादिपरिणयनमसङ्गात् । न चाचाराभावेन तदपरिणयनसिद्धिः । प्रत्यक्षश्रुतिविहितेऽनाचारस्याप्रयोजकत्वात् । न चास्य सामान्यरूपस्यापि मातुलस्येव योषेत्यादिलिङ्गकल्पितविशेषश्रुत्युपसंहारेण नातिप्रसङ्ग इति वाच्यम् । अपरार्कोदाहृतश्रौतत्यागलिङ्गविरोधेन तदुद्वाहविधायकविशेषश्रुत्यनुमानस्यैवासम्भवात् । किञ्च । मातुलकन्यापरिणयनपरत्वे तयोः श्रुतिस्मृत्योस्तृतीयपुरुषसंकीर्तनमेव कर्त्तव्यं न चतुर्थपुरुषसंकीर्तनम् । तस्य मातुलत्वाभावात् । तस्मान्नेदं मातुलकन्यापरिणयनपरत्वेन व्याख्येयम् । किन्तर्हि, द्विपुरुषसापिण्ड्यकीर्तनं प्रतिलोमजविषयं व्याख्येयम् । त्रिपुरुषानुलोमजसापिण्ड्यसमभिव्याहारात् ।

त्रयोऽनुलोमजैस्त्याज्या द्वावेव प्रतिलोमजैः ।

इत्युशनःस्मरणात् । तेषां तथाऽऽचारदर्शनाच्च ।

अथ विधिनिषेधयोः प्रत्यक्षश्रौतलिङ्गद्वयानुमितश्रुतिद्वयमूलकयोस्तुल्यबलतया विकल्प एव देशभेदेन व्यवस्थितो मन्तव्यः ।

तथाच बौधायनः, पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतो यानि दक्षिणतस्तान्यनुव्याख्यास्यामो, यथैतदनुपनीतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृपरिणयनमिति, अथोत्तरत ऊर्णाविक्रयः सीधुपानमुभयतो-

दक्षिणैर्व्यवहारः आयुधीनकं समुद्रयानमिति । तत्रेतरदितरस्मिन्कुर्वन्दुष्यति इतरदितरस्मिन् तत्तत्र देशप्रामाण्यमेव स्यादिति ।

अस्यार्थः। विप्रतिपत्तिर्विरुद्धार्थानुष्ठानम् । इतरदिति दक्षिणदेशीयं कर्मोत्तरदेशे उत्तरदेशीयं च कर्म दक्षिणदेशे कुर्वन् दुष्यति न स्वस्वदेशे तत्तत्र देशनिबन्धनप्रामाण्यादिति चेत् न । मिथ्यैतदिति गौतमः, उभयमेव नाद्रियेत शिष्टस्मृतिविरोधदर्शनादिति बौधायनेनैवाग्रे विकल्पनिराकरणात् ।

तर्हि कथमयं विरोधः परिहर्त्तव्यः, प्रमिताक्षरोक्तप्रकारेणेति ब्रूमः । तथाहि । स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थे प्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयादित्यादिनिरुक्तपरिभाषया श्रुतिस्मृतिविरुद्धस्यार्थस्यानन्वितत्वेन प्रादेशिकविकारेणार्थं निर्णीयाविरुद्धोर्थः संपादनीयः । सच यथा,

आनो भर प्रमगन्दस्य वेद इत्यादौ नित्यानित्यसंयोगविरोधेन प्रसिद्धमपि राजानं प्रमगन्दपदस्यार्थं विहाय प्रकृष्टं मदं गमयिष्यतीति यो ददाति स प्रमगन्द इति व्युत्पत्त्या वार्द्धुषिकः प्रमगन्दपदस्यार्थः कल्प्यते । यथावा कीकटशब्दार्थं प्रसिद्धमपि देशविशेषं विहाय किङ्कृतेनेति ये वदन्ति ते कीकटा नास्तिका इति कल्प्यते । तथा मातुस्तुल्यं लक्षणं यस्येति निरुक्त्या मातुलशब्देन मातृमुखो गृह्यते । पितृष्वसाशब्देन च स्वसा सुअसा स्वेषु सीदतीति वेति च निरुक्त्या पितुः स्वे रूपे सीदतीति पितृष्वसेति पितृसदृशमुखीत्यर्थो निर्णेयः । तथाच मातृमुखेन पुरुषेण पितृमुख्यां कन्यायामुत्पादिता कन्या यथा भजनीया भवति तथेयं वपा तव भजनीयेत्यर्थः ।

उक्तं च सामुद्रिकसारे,

धन्या पितृमुखी कन्या धन्यो मातृमुखः सुतः ।
तयोर्धन्यतरोत्पन्ना कन्या भाग्येन लभ्यते ॥ इति ।

मातुलस्येव योषा पैतृष्वसेयीवेति च दृष्टान्तद्वयं विशिष्टकन्याऽलाभे अन्यतराऽपि प्रशस्तेति गमयितुम् । यद्येवमपि मातुलस्य योषा पैतृष्वसेयी लोकस्य भजनीयेत्यन्वये लोकस्येति कर्त्रध्याहारो दोषस्तर्हि मातुलस्य योषा कन्या भागिनेयस्य पैतृष्वसेयी मातुलपुत्रस्येति भवतामध्याहारद्वयं कथमदोषमापद्यत । वस्तुतस्त्वस्माकमीषदपि नाध्याहारो, यतो मातुस्तुल्यं लक्षणं नाम यस्येति व्युत्पत्त्या मातृसमाननामा पुलोमापत्यं पुलोमा गृह्यते । तस्य मातुलस्य पुलोम्नो या ऽपत्यं शची सा च पैतृष्वसेयी पितृणामग्निष्वात्तादीनां स्वसा शची तदपत्यत्वाच्छचीन्द्राणी यथा ते भागस्तथेयं वपा ते भाग इत्यर्थः । तदेतत्सर्वं महाभारतमत्स्यपुराणादिषु स्पष्टमभिहितम्,

पुलोमा कालका चैव वैश्वानरसुते उभे ।
बह्वपत्ये महासत्त्वे मरीचेस्तु परिग्रहः ॥
तयोः पुत्रसहस्राणि षष्टिर्दानवनन्दनाः ।

इत्युपक्रम्य—

पौलोमाः कालकेयाश्च दानवास्ते महाबलाः ।

इति मध्येऽभिधाय—

वैश्वानरः पुलोमा च विद्रावणमहार्णवा ।

इत्युक्त्वा—

स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु शची सुता ।

इत्यन्तेऽभिहितम् । तथा,

अग्निष्वात्तादिकानां तु पितॄणां सा शची स्वसा ।

पुलोमा जनयामास तस्यां नाम्ना शचीं सुताम् ॥ इति ।

तथा,

शच्यां तु जनयामास जयन्तं तनयं हरिः । इत्यादि ।

तस्मादिदमित्थमेव व्याख्येयम् ।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥

इति स्मरणात् । तस्मादेतन्मन्त्रलिङ्गकल्पितविधिवशेन मातुलकन्यापरिणयनं न कथञ्चन सिध्यति । यदस्यागमिष्यन्ति शाक्रो देवता इत्याद्येतन्मन्त्रानिरुक्तत्वेन केचित्पठन्ति, तदपि सर्वदेशीयवैदिकपाठाभावेन भाष्यकारापरिग्रहेण च न प्रमाणत्वेन शङ्कनीयम् । यदपि प्रद्युम्नानिरुद्धार्जुनादीनां मातुलकन्यापरिणयनमत्र प्रमाणमिति, तदपि विधवयोः प्रभावत्युलूप्योः परिणयनवत् कतकभरद्वाजौ व्यत्यस्य भार्ये जग्मतुर्वसिष्ठश्चाण्डालीमक्षमालामुपयेमे प्रजापतिः स्वां दुहितरमभ्यध्यायदित्यादिवत् परशुरामस्य मातृशिरश्छेदवत् पाण्डवानां द्रौपदीपरिणयवच्च धर्मव्यतिक्रम एव । प्रत्यक्षश्रुतिस्मृतिविरोधात् ।

तथाच गौतमः, दृष्टो धर्मव्यतिक्रमः साहसं च महतामिति । न च तैः कृतमित्यस्मदादिभिरपि कर्त्तव्यम् । तत्रापि हेतुमाह स एव । अवरदौर्बल्यादिति । अवरेषामस्मदादीनां दुर्बलत्वात् ।

तथाच श्रूयते,

तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ।

तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरको जनः ॥ इति ।

अनुष्ठितन्तु यद्देवैर्मुनिभिर्यदनुष्ठितम् ।

नानुष्ठेयं मनुष्यैस्तदुक्तं कर्म समाचरेत् ॥ इति ।

भागवतेऽपि,

तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा। इति।

अत एव बृहस्पतिरपि,

उद्वाह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः।

इत्यनाचारेष्वेव तत्परिगणयति। सोऽपि कलौ निषिद्धः।

गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा।

इति ब्रह्मपुराणात्। मातुस्सपिण्डो मातुलः। अत एव कलिनिन्दाप्रक्रमे—

व्यासोऽपि,

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा।

शुल्केन चोद्वहिष्यन्ति विप्रा पापविमोहिताः॥

इत्यलं वृद्धविरोधेन।

अथ विरुद्धसम्बन्धा।

तत्र गृह्यपरिशिष्टम्, अविरुद्धसम्बन्धामुपयच्छेतेत्युपक्रम्य दंपत्योर्मिथः पितृमातृसाम्ये विरुद्धसम्बन्धा। यथा भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा चेति। पितृमातृसाम्यइत्युपलक्षणम्। तेन भ्रातृभगिनीसाम्ये स्नुषाश्वशुरादिसाम्येऽपि नोद्वाहः। विरुद्धसम्बन्धाविशेषात्। तद्यथा। पितृव्यपत्नीस्वसुः सुता भगिनीसमा भवति पितृव्यशालिकायाः मातृष्वसृतुल्यत्वात्। तथा स्नुषाभगिन्यपि श्वशुरेण नोद्वाह्या। स्नुषातुल्यत्वात्। एवमन्यत्राप्यूह्यम्।

अत एव बौधायनः,

मातुस्सपत्न्या भगिनीं तत्सुतां चापि वर्जयेत्।

पितृव्यपत्न्या भगिनीं तत्सुतां चापि वर्जयेत्॥ इति।

अथ प्रत्युद्वाहनिषेधः।

प्रयोगपारिजाते,

प्रत्युद्वाहो न कर्त्तव्यो नैकस्मै कन्यकाद्वयम् ।
न चैकजन्ययोः पुंसोर्नैकजन्ये तु कन्यके ॥

तथा,

एकजन्ये तु कन्ये द्वे पुत्रयोर्नैकजन्ययोः ।
न पुत्रद्वियमेकस्मै दद्यादिति पराशरः ॥ इति ।

प्रत्युद्वाहः यत्पुत्राय स्वकन्या दीयेत तत्कन्या स्वपुत्राय न-कार्येत्यर्थः ।

अथैकोदरविवाहनिर्णयः ।

स्मृतिरत्नावल्याम्,

एकोदरप्रसूतानामेकस्मिन्वत्सरे पुनः ।
विवाहं नैव कुर्वीत मण्डनोपरि मुण्डनम् ॥

संहितासारावल्याम्,

एकमातृप्रसूतानामेकस्मिन्वत्सरे यदि ।
विवाहं नैव कुर्वीत कुर्वन्ति मुनयोऽन्यथा ॥

अन्यथा मातृभेदे । तथाच गर्गः,

एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः ।
न समानक्रियां कुर्यान्मातृभेदे विधीयते ॥ इति ।

वत्सरपरिहाराशक्तौ षण्मासं वा परिहरेत् ।

तथाच वराहः,

विवाहस्त्वेकजातानां षण्मासाभ्यन्तरे यदि ।
असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् ॥

मदनरत्नेऽपि,

एकोदरभ्रातृविवाहकृत्यं स्वसुर्न पाणिग्रहणं विधेयम् ।
षण्मासमध्ये मुनयस्समूचुर्न मुण्डनं मण्डनतोऽपि कार्यम् ॥

अस्यापवादस्तत्रैव,

ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनम्।
तदा ह्येकोदरस्यापि विवाहस्तु प्रशस्यते॥

संहितासारावल्यां,

फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने।
भेदादब्दस्य कुर्वीत नर्तुत्रयविलम्बनम्॥ इति।

षण्मासस्यापि परिहाराशक्तौ दिनचतुष्टयं परिहरेत्।

तथाच गर्गः,

पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम्।
पुत्र्यन्तरस्य कुर्वीत नोद्वाहमिति सूरयः॥

कपर्दिकारिकायामपि,

उद्वाह्य पुत्रीं न पिता विदध्यात्पुत्र्यन्तरस्योद्वहनं कदाऽपि।
यावच्चतुर्थं दिवसं न पूर्णं समाप्य चान्योद्वहनं विदध्यात्॥

दिनचतुष्टयस्यापि परिहाराशक्तौ दिनमात्रं परिहरेत्।

तथाच गर्गः,

भ्रातृयुगे स्वसृयुग्मे च भ्रातृस्वसृयुगे तथा।
न जातु मङ्गलं कुर्यादेकस्मिन्मण्डपेऽहनि॥

कपर्दिकारिकायामपि,

भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा।
न कुर्यान्मङ्गलं किञ्चिदेकस्मिन्मण्डपेऽहनि॥ इति।

दिनमात्रस्यापि परिहाराशक्तौ लग्नमात्रं परिहरेत्।

तथाच प्रयोगपारिजाते स्मृत्यन्तरं,

विवाहस्त्वेकजन्यानामेकस्मिन्मुदये कुले।
नाशं करोत्येकवर्षे स्याद्वैका विधवा तयोः॥ इति।

अस्यार्थः। एकजन्यानाम् एकस्मिन्नुदये लग्ने विवाहः एकवर्षमध्ये कुले नाशङ्करोति। तयोर्वा मध्ये एका विधवा भवतीति।

रुपस्यापि परिहाराशक्तौ मण्डपमात्रं परिहरेत् ।

तथाच स्मृतिरत्नावल्यां,

भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा ।

एकस्मिन्मण्डपे चैव न कुर्यान्मङ्गलद्वयम् ॥ इति ।

अस्यां च व्यवस्थायां प्रमाणमुक्तं ज्योतिर्विवरणे,

एकोदरयोर्द्वयोरेकदिनोद्वहने भवेन्नाशः ।

नक्षत्रान्तरे एकदिने केऽप्याहुः संकटे च शुभम् ॥

न प्रतिषिद्धं लग्नं संप्राप्ते संकटे महति ।

एकोदरसम्भवयोरेकाहे भिन्नमण्डपे काले ॥

अत्र दिनशब्दः पूर्वोक्तानां संवत्सरादीनां सर्वेषामुपलक्षणम् । सङ्कोचनिमित्तस्य संकटस्य सर्वत्रापि तुल्यत्वात् । अत एव प्रवेशनिर्गमयोः षण्मासपरिहारासंभवे वैपरीत्येनैकदिनविधानं तत्रैव,

ऊर्ध्वं विवाहाच्छुभदो नरस्य नारीविवाहो न ऋतुत्रयं स्यात् ।

नारीविवाहात्तदहेऽपि शस्तं नरस्य पाणिग्रहमाहुरार्याः ॥

भिन्नमातृकयोस्तु न पूर्वोक्तकालवर्जनमित्याह—

मेधातिथिः,

पृथग्मातृजयोः कार्यो विवाहस्त्वेकवासरे ।

एकस्मिन्मण्डपे कार्यः पृथग्वेदिकयोस्तथा ॥

पुष्पपट्टिकयोः कार्यं दर्शनं न शिशिरस्थयोः ।

भगिनीभ्यामुभाभ्यां च यावत्सप्तपदी भवेत् ॥ इति ।

वासरशब्दो वत्सरादीनामुपलक्षणम् ।

अथ यमलयोरपि पूर्वोक्तनिषेधापवादः ।

भट्टकारिकायाम्,

एकस्मिन्वत्सरे चैकवासरे मण्डपे तथा ।

कर्तव्यं मङ्गलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ इति ।

अथ द्विशोभनादिनिर्णयः ।

तत्र वसिष्ठः,

द्विशोभनं त्वेकगृहेऽपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैस्तु ।
आवश्यकं शोभनमुत्सुको वा द्वारेऽथवाऽऽचार्यविभेदतो वा ॥
एकोदरप्रसूतानां नाग्निकार्यत्रयं भवेत् ।
भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीत् ॥

अस्यार्थः । एकस्मिन्गृहे नवदिनमध्ये शोभनद्वयं न कार्यं, किं तु नवदिनानन्तरं कार्यम् । औत्सुक्येनावश्यककर्तव्ये द्वारभेदेन गृहभेदेनाचार्यभेदेन वा कार्यम् । तथैकस्मिन्गृहे सोदराणां होमव-त्संस्कारत्रयं न कार्यं, भिन्नोदरप्रसूतानां तु न दोषः ।

सारसंग्रहेऽपि,

एकस्मिन् शोभने वृत्ते द्विशुभं नैव कारयेत् ।
यदि कुर्यात्प्रमादेन तत्र स्यादशुभं ध्रुवम् ॥
कात्यायनोऽपि, न कुर्यान्मङ्गलत्रयमिति ।

अथ मण्डनमुण्डनादिनिर्णयः ।

तत्र गर्गः,

न मण्डनान्मुण्डनमूर्ध्वमिष्टं न पुत्रयोर्मुण्डनमेकवर्षे ।
न पुंविवाहोर्ध्वमृतुत्रयेऽपि विवाहकार्यं दुहितुश्च कुर्यात् ॥

वासिष्ठेऽपि,

न पुंविवाहोर्ध्वमृतुत्रयेऽपि विवाहकार्यं दुहितुः प्रकुर्यात् ।
न मण्डनाच्चापि हि मुण्डनं च गोत्रैकतायां यदि नाब्दभेदः ॥
गोत्रैकतायामिति त्रिपुरुषमात्रपिण्डैक्यं द्रष्टव्यम् ।
प्रवेशनिर्गमसहचरितमुण्डनमण्डनयोस्तथा दर्शनात् ।

तथाच मेधातिथिः,

पुरुषत्रयपर्यन्तं प्रतिकूलं स्वगोत्रिणाम् ।
प्रवेशान्निर्गमस्तद्वत्तथा मण्डनमुण्डने ॥ इति ।

कात्यायनोऽपि,

कुले ऋतुत्रयादर्वाग्मुण्डनाच्च तु मण्डनम् ।
प्रवेशान्निर्गमो नेष्टो न कुर्यान्मङ्गलत्रयम् ॥
कुर्वन्ति मुनयः केचिदन्यस्मिन्वासरे लघु ।
लघु वा गुरु वा कार्यं प्राप्तं नैमित्तिकं तु यत् ॥
लघुगुरुलक्षणमुक्तं ज्योतिःसागरे,
चूडाकेशान्तसीमन्तविवाहोपनयान् बुधाः ।
गुरुमङ्गलमित्याहुः तदन्यं लघु मङ्गलम् ॥ इति ।
प्रवेशनिर्गमलक्षणमुक्तं कात्यायनेन,
पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः ।
मुण्डनं चौलमित्युक्तं व्रतोद्वाहौतु मङ्गलम् ॥
चौलं मुण्डनमेवोक्तं वर्जयेद्वरणात्परम् ।
मौञ्जी चोभयतः कार्या यतो मौञ्जी न मुण्डनम् ॥
अभिन्ने वत्सरेऽपि स्यात्पादहस्तश्च भेदयेत् ।
अभेदेऽपि विवाहः स्यान्न कुर्यादेकमण्डपे ॥

नृसिंहप्रसादेऽपि,

न मुण्डनं स्याद्व्रतनामिबन्धो न चापि मोक्षो व्रतबन्धनस्य ।
वदन्ति गर्गप्रमुखा मुनीन्द्राश्चूडाकृतिं मुण्डनमेव नान्यम् ॥ इति ।

नारदः,

पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये ।
न तयोर्व्रतमुद्वाहान्मण्डनादपि मुण्डनम् ॥

संहिताप्रदीपे,

ऊर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहो दुहितुस्समार्द्धम् ।

अप्राप्य कन्यां श्वशुरालयं तु वधूः प्रवेश्या स्वगृहं नचादौ इति ।

अथ कन्यालक्षणानि ॥

लक्षण्यां स्त्रियमुद्वहेदिति योगिस्मरणे तानि द्विविधानि बाह्यान्याभ्यन्तराणि च ।

तत्र बाह्यान्याह मनुः,

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् ॥

शातातपोऽपि,

हंसस्वनां मेघवर्णां मधुपिङ्गललोचनाम् ।
तादृशीं वरयेत्कन्यां गृहस्थः सुखमेधते ॥

आपस्तम्बोऽपि,

बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेतेति । लक्षणसम्पन्नामित्यनेन दोषवतीं नोद्वहेदित्युक्तं भवति ।

अत एव मनुः,

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ॥
वाचाटां बहुभाषिणीम् । पिङ्गलां पिङ्गलाक्षीम् ।

यमोऽपि,

ह्रस्वां दीर्घां कृशां स्थूलां पिङ्गाक्षीं गौरपाण्डुराम् ।
न पूज्या न च सेव्यास्ता नाशमृत्युकराः स्त्रियः ॥

विष्णुपुराणेऽपि,

न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम् ।
न घर्घरस्वरां काकुवाक्यां काकस्वरां न च ॥
नानिमेषेक्षणां वृत्ताक्षीणाक्षीं नोद्वहेद् बुधः ।

यस्याश्च रोमशौ जङ्घे गुल्फौ यस्यास्तथोन्नतौ ॥
गण्डयोः कूपकौ यस्या भवतस्तां च नोद्वहेत् ।
नातिरूक्षच्छविं पाण्डुं न रुजामरुणेक्षणाम् ॥
अपीनहस्तपादां च न कन्यामुद्वहेद् बुधः ।
न वामनां नातिदीर्घां नोद्वहेत्संहतभ्रुवम् ॥
न चातिच्छिद्रदशनां न करालमुखीं तथा ।
नामविशेषेणापि वर्जनीयां मनुराह,
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ।
ऋक्षं नक्षत्रम् । अन्त्यो म्लेच्छः ।

आपस्तम्बोऽपि,

नक्षत्रनामा नदीनामा वृक्षनामा च गर्हिताः ।
सर्वाश्च रेफलकारोपान्त्यवर्णा विवर्जयेत् ॥ इति ।

यमोऽपि,

वेदनाम्नीं नदीनाम्नीं शैलगन्धर्वनामिकाम् ।
ऋक्षवृक्षलतानाम्नीं दारार्थे परिवर्जयेत् ॥ इति ।

आभ्यन्तराण्याहाश्वलायनः,

दुर्विज्ञेयानि लक्षणानीति अष्टौ पिण्डान्कृत्वा पिण्डानभिमन्त्रयते "ऋतमग्रे प्रथमं जज्ञे ऋते सत्यं प्रतिष्ठितम् यदीयं कुमार्यभिजाता तदीयमिह प्रतिपद्यतां यत्सत्यं तद् दृश्यताम्" इति पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति । क्षेत्राच्चेदुभयतः सस्याद् गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विद्याद्गोष्ठाच्चेत्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनो ह्रदात्सर्वलक्षणसम्पन्ना देवनात्कितवी चतुष्पथाद् द्विप्रव्राजिनी ईरिणादधन्या श्मशानात्पतिघ्नीति ।

अस्यार्थः । उभयतःसस्याद्यस्मिन् क्षेत्रे प्रतिसंवत्सरं द्विवारं

सस्यं निष्पद्यते तदुभयतःसस्यम्।

तदुक्तं,

सस्यं क्षेत्रे तु यत्र द्विर्निष्पन्नं प्रतिवत्सरम्।
तदिहोभयतस्सस्यशब्देनेति प्रचक्षते॥ इति।

तस्मात्तत्क्षेत्रात्। गोष्ठं गोस्थानम्। वेदिगताः पांसवो वेदिपुरीषमिति हरदत्तः। अपवृक्ते कर्मणि या वेदिः तद्वेदिपुरीषमिति नारायणः। अविदासिनः दसु उपक्षये इति धातुः। अविदासिनः अशोष्याद्ध्रदादित्यर्थः। कितवा यत्र दीव्यन्ति तद्देवनं द्यूतस्थानम्। चतुर्णां पथां समाहारश्चतुष्पथम्। ईरिणमूषरप्रदेशः यत्र धान्यं न प्ररोहति। अधन्या धनरहिता। श्मशानं प्रसिद्धम्। एतेभ्यः स्थानेभ्यो मृदः पृथगानीय तत्तत्स्थाननामानि पृथक्पृथक् पत्रखण्डेषु लिखित्वा तानि खण्डानि यथाक्रमं मृत्तिकास्वन्तर्धायैकरूपतया पिण्डान्कृत्वा परिशुद्धे पात्रे विनिक्षिप्य गन्धपुष्पैरभ्यर्च्य ऋतमग्रइत्यनेन मन्त्रेणाभिमन्त्र्य वरः स्वाभिमतां देवतां ध्यात्वा एषामेकं गृहाणेति कुमारीं ब्रूयात्। सा च यदि क्षेत्रादाहृतं पिण्डं गृह्णीयादस्याः प्रजा अन्नवती भविष्यतीति, विद्यात् इति सर्वत्र नेयम्। वृत्तस्वाध्यायकृतं यशो ब्रह्मवर्चसं तद्वती।

तदुक्तं,

वृत्ताध्ययनसंपत्तिः ब्रह्मवर्चसमुच्यते। इति।
द्वौ प्रव्रजतीति द्विप्रव्राजिनी। स्पष्टमवशिष्टमिति।

शौनकोऽपि,

अथाष्टपिण्डग्रहणविधानेन विचक्षणः।
लक्षणानि परीक्षेत ततः कन्यां यथातथम्॥
क्षेत्रादुभयतःसस्याद्गोष्ठाद्वेदितलादपि।
अशोष्याच्च ह्रदाद् द्यूतस्थानादथ चतुष्पथात्॥

इरिणाच्च श्मशानाच्च गृहीत्वाऽष्टौ मृदः पृथक् ।
ताभिर्मृद्भिर्विधायाष्टौ पिण्डानन्योन्यतः समान् ॥
तिलपत्रैकदेशेषु मृदां संज्ञाः पृथक्पृथक् ।
लिखित्वा तांश्च पिण्डानामन्तर्धाय यथाक्रमम् ॥
शुद्धपात्रे विधायैतान् गन्धाद्यैरर्चयेदथ ।
ऋतमग्रे प्रथमं जज्ञइत्याद्यां वैदिकीमृचम् ॥
दृश्यतामितिपर्यन्तमुक्त्वा पिण्डाभिमन्त्रणम् ।
कृत्वाऽग्रपाणिना ध्यायन् स्वाभीष्टां देवतां वरः ॥
एषामेकं गृहाणेति कुमारीं प्रत्युदीरयेत् ।
तं पिण्डमेकं गृह्णीयात्साऽपि स्वाभिमतं ततः ॥
गृहीतपिण्डमध्यस्थलेखवाचनपूर्वकम् ।
गृह्योक्तं तत्फलं बुध्वा ततः कुर्याद्यथारुचि ॥
पिण्डेष्वेषु प्रथमतश्चत्वारः शुभसूचकाः ।
कन्यायाः पश्चतश्चान्ये चत्वारोऽशुभसूचकाः ॥
क्षेत्रमृद्ग्रहणे तस्या बह्वन्ना सन्ततिर्भवेत् ।
इति विद्यात्तथा गोष्ठमृद्ग्रहे तु गवादिभिः ॥
पशुभिः सुसमृद्धा स्यात्सन्ततिः स्वयमेव वा ।
ब्रह्मवर्चससम्पन्ना वेदिमृद्ग्रहणं भवेत् ॥
सर्वसम्पत्समृद्धा स्यादशोष्याद्वा हृदादृ ग्रहे ।
द्यूतमृद्ग्रहणे धूर्त्ता स्याच्चतुष्पथमृद्ग्रहे ॥
द्विरूढा विरमण्वेषा व्यभिचाररता भवेत् ।
दारिद्र्योत्पादिनी भर्त्तुर्भवेदीरिणमृद्ग्रहे ॥
श्मशानमृद्ग्रहे भर्त्तुर्मृतिहेतुर्भवेदियम् । इति ।

आश्वलायनोऽपि,

पितृमातृभ्रातृमतीं सर्वलक्षणलक्षिताम् ।

सद्भिरदृष्टपिण्डाद्यैः कन्यां सम्यक् परीक्षिताम् ॥ इति।

सामुद्रिकादिलक्षणानि तु लक्षणप्रकाशे वक्ष्यन्ते।

अथानन्यपूर्विकानिर्णयः।

तत्र याज्ञवल्क्यः,

अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥ इति।

अन्यः पूर्वो यस्याः सा अन्यपूर्वा अन्यपूर्वैवान्यपूर्विका न अन्यपूर्विका अनन्यपूर्विका ताम् अनन्यपूर्विकाम्। सा च द्विविधा। पुनर्भूः स्वैरिणी च। पुनर्भूरपि द्विविधा। क्षता अक्षता चेति।

तथाच स एव,

अक्षता च क्षता चैव पुनर्भूस्संस्कृता पुनः।
स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ॥ इति।

अस्यार्थः। पुनस्संस्कृता पुनर्भूः, सा च संस्कारद्वैविध्याद् द्विविधा। तत्र विहितविवाहसंस्कारमात्रसंस्कृताऽनुपभुक्ता अक्षतेत्युच्यते। क्षता पुनर्विवाहात्प्रागेव निषिद्धपुरुषसंबन्धदूषिता। या तु कौमारं पतिमुत्सृज्य स्वेच्छया पुरुषान्तरं श्रयति सा स्वैरिणी। एतासामेव किञ्चिदवान्तरभेदेन सप्तविधत्वमाह—

कश्यपः,

सप्त पौनर्भवाः कन्याः वर्जयित्वा कुलाधमाः।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका।
अग्निं परिगता या च पुनर्भूः प्रसवा च या ॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्। इति।

बौधायनोऽपि,

वाचा दत्ता मनोदत्ताऽग्निं परिगता सप्तमं पदं नीता भुक्ता

गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूः तां गृहीत्वा न प्रजां न धर्मं विन्देदिति ।

नारदस्तु पुनर्भूत्रैविध्यं स्वैरिणीचातुर्विध्यं चाह,

परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा सोक्ता पुनस्संस्कारकर्मणि ॥
देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता ॥
उत्पन्नसाहसा उत्पन्नव्यभिचारा ।
असत्सु च देवरेषु बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता ।
स्त्री प्रसूता ऽप्रसूता वा पत्यावेव तु जीवति ।
कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता ।
पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्त्तिता ॥
मृते भर्त्तरि तु प्राप्तान्देवरादीनपास्य या ।
उपगच्छेत्परं कामात्सा तृतीया प्रकीर्त्तिता ।
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या ।
तवाहमित्युपगमात् सा चतुर्थी प्रकीर्त्तित ॥ इति ।

एतासां सर्वासामविवाह्यत्वेऽप्यतिक्रान्तनिषेधेन परिग्रहीत्रा ऋणं द्वयोरेव देयम् ।

तथाच स एव,

अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम् ।
ऋणं तयोः पतिकृतं दद्याद्यस्ते उपाश्नुतः ॥ इति ।

अथान्यदर्थपरिणयने प्रतिप्रसवः ।

तत्र याज्ञवल्क्यः,

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥ इति ।

यद्यप्यत्र गमनमात्रमेव श्रूयते तथापि परिणयनपूर्वकमेव तद्द्रष्टव्यम् ।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ ॥

इति मनुस्मरणात् । अयं च विवाहो वाचनिको मृतस्यैव भार्यात्वोत्पादकः न वोढुः ।

अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ।

इति इदमा मृतस्यैव परामर्शात् । स च वाग्दत्ताविषयो नोढाविषयः । यस्या म्रियेत कन्याया इति पूर्वोक्तमनुवचनात् ।

तथा,

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या संतानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥

इत्येवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति,

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन्हि नियुञ्जानाः धर्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥
ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम्।
नियोजयत्यपत्यार्थे गर्हन्ते तं हि साधवः ॥ इति।

विधवायां नियुक्तस्त्वित्यत्र विधवाशब्दो वाग्दानानन्तरं विवाहात्प्राक् मृतपतिकाविषयः। वाचा सत्ये कृते पतिरित्युपक्रमात्। नान्यस्मिन्विधवा नारीत्यत्र तु विधवाशब्दो विवाहानन्तरं मृतपतिकाविषयः। नोद्वाहिकेषु मन्त्रेष्विति हेतूपन्यासात्। ततश्च विषयभेदान्न मिताक्षरोक्तविकल्पशङ्कावसरः।

पराशरः,

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

वसिष्ठबौधायनावपि,

बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥ इति।

याज्ञवल्क्योऽपि,

दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्।

एतच्च वाग्दत्ताविषयम्। वाग्दत्तापि वरदोषे ज्ञाते गुणवतेऽन्यस्मै देयेत्यर्थः।

तथा च गौतमः, प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति। वरदोषास्तु प्रागुक्ताः।

शातातपोऽपि,

वरश्चेत्कुलशीलाभ्यां न युज्येत कथंचन।

न मन्त्राः कारणं तत्र नच कन्यानृतं भवेत् ॥
समाच्छिद्य तु तां कन्यां बलादक्षतयोनिकाम् ।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत् ॥
हीनस्य कुलशीलाभ्यां हरन्कन्यां न दोषभाक् ।
न मन्त्राः कारणं तत्र नच कन्यानृतं भवेत् ॥ इति ।
स तु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
ऊढा ऽपि देया सा ऽन्यस्मै सप्रावरणभूषणा । इति ।
वागुदकदत्तायामप्यसंस्कृतायां वरमरणे न कन्यात्वहानिः ।
तथाच वसिष्ठः,
अद्भिर्वाचा च दत्ताया म्रियेतादौ वरो यदि ।
नच मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥ इति ।
वरणानन्तरं देशान्तरगमने विशेषमाह—
कात्यायनः,
वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा ।
ऋत्वागमांस्त्रीनतीत्य कन्या ऽन्यं वरयेद्वरम् ॥ इति ।
नारदोऽपि,
प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून्समतिक्रम्य कन्या ऽन्यं वरयेद्वरम् ॥ इति ।
शुल्कदानानन्तरं वरमरणे विशेषमाह—
मनुः,
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्या ऽनुमन्यते ॥
शुल्कदानानन्तरं देशान्तरगमने तु विशेषमाह—
कात्यायनः,

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देया ऽन्यस्मै विधानतः ॥
अनेकेभ्यो वाग्दत्तायां विशेषमाह स एव,
अनेकेभ्यो हि दत्तायामनूढायां तु यत्र वै ।
प्रत्यागतश्च सर्वेषां लभेतादिवरस्सुताम् ॥
अथागच्छेयुरूढायां दत्तपूर्ववरो हरेत् । इति
योऽयं पुनरुद्वाहो विहितः सोऽक्षतयोन्या एव ।
सा चेदक्षतयोनिः स्याद्गतप्रत्यागता ऽपि वा ।
पौनर्भवेन भर्त्रा सा पुनस्संस्कारमर्हति ॥

इति मनुस्मरणात् । अत्र सेति तच्छब्देन पूर्वप्रक्रान्ता पुनर्भूरुच्यते । यद्यपि,

या पत्या वा परित्यक्ता विधवा स्वेच्छया ऽपि वा ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥

इति पुनर्भूविशेष एव प्रक्रान्तो न पुनर्भूसामान्यं, तथापि
अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः ।

इति स्मृत्यन्तरवाक्यैकवाक्यतया पुनर्भूमात्रजातस्य पौनर्भवत्वेन पुनर्भूसामान्यस्यैव प्रक्रमोऽभिप्रेत इति ध्येयम् ।

तस्याश्चाक्षतयोनित्वलक्षणगुणविशेषपुरस्कारेण पुनस्संस्कारो विधीयते । तत्र कुल्लूकभट्टव्याख्या ।

सा यद्यक्षतयोनिः सती अन्यमाश्रयेत तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हतीति । तत्र चाक्षतयोन्याः पुनर्विवाहे पौनर्भवेन भर्त्रेत्यन्वयकरणाद् गतप्रत्यागतासंस्कारे च कौमारेण भर्त्रेत्युपादानाद् द्वितीयस्यैव पौनर्भवत्वं न पूर्वस्येति सिध्यति । तेन च पौनर्भवश्च काणश्चेति श्राद्धे, तथा पौनर्भवे द्विजे इति दाने च, परपूर्वापतिस्तथेत्यादिना च प्रतिषेधोऽपि द्वितीय-

यस्य पत्युस्तदुत्पन्नानां पुत्राणां चेति सर्वनिबन्धसम्मतं, न क्वापि प्रथमस्य पत्युः पौनर्भवत्वेन तदपत्यानां वा निषेधो गम्यते। यद्यपि पुनर्भ्वा अयमिति सम्बन्धसामान्यविवक्षया पूर्वापरयोर्द्वयो-रपि पत्योः पौनर्भवत्वं प्रतीयते तथापि पुनर्भवतीति व्युत्पत्ताव-न्यथाऽनुपपत्त्या भार्येति शेषस्यावश्यकतया यत्प्रतियोगिकभा-र्यात्वेनास्याः पुनर्भूत्वं तस्योपस्थितस्य विशेषस्य परित्यागे का-रणाभावाद् बुद्धिस्थतया चायमिति सर्वनाम्ना परामर्शसम्भवात्त-स्यैव पौनर्भवत्वं युक्तम्। यत्तु अपरार्केणोभयोरपि पत्योः पौनर्भव-त्वमुक्तं, तद् उक्तयुक्त्या बाधितमिति ध्येयम्। यद्यप्यस्मिन्व्याख्याने गतप्रत्यागतायां क्षताक्षतात्वविशेषो न प्रतीयते तथापि नारा-यणसर्वज्ञमेधातिथिभ्यां तस्यामप्यक्षतयोनिपदानुषङ्गकरणादक्ष-तात्वमेव सिध्यति। युक्तं चैतत्।

त्यक्त्वा भर्तृगृहं गच्छेद्यदि दोषं विना पुनः।
भर्त्रा सा संस्कर्त्तव्या च प्रायश्चित्तादिभिः क्रमात्॥

इति ब्राह्मवाक्ये दोषं विनेत्यभिधानात्। दोषश्च क्षतयोनि-त्वम्। तदभावे संस्कार्यताऽभिधानात्।

यथाह वसिष्ठः,

पाणिग्राहे कृते कन्या केवलं मन्त्रसंस्कृता।
सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति॥ इति।

नारदोऽपि,

उद्वाहिता ऽपि या कन्या न चेत्सम्प्राप्तमैथुना।
पुनस्संस्कारमर्हेत यथा कन्या तथैव सा॥ इति।

अत एव मनुः,

पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः।
न त्वन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः॥

इत्यक्षतयोनीनामेव कन्याशब्दाभिधेयानां मन्त्रसंस्कारमाह । कन्या अग्निमयक्षतेति मन्त्रलिङ्गात् । एतेनापरार्कीयमपि गतप्रत्यागतायां क्षतात्वव्याख्यानं परास्तम् । यच्च पुनर्भूर्या कौमारं भर्त्तारमुत्सृज्यान्यैः सह चरित्वा पुनस्तस्यैव गृहमाविशति सा पुनर्भूर्भवतीत्युपक्रम्य न संस्कारबोधकं वसिष्ठवाक्यमत्रोदाहृतं तत्रापि चरित्वेत्यत्र नैकान्ततः सुरतमेव कर्मतयोपतिष्ठते । सप्तपदीं चरित्वेत्यस्यापि सम्भवात् । बहूनामनुग्रहो न्याय्य इति न्यायेनानेकवाक्यानुरोधाच्च । वस्तुतस्तु धात्वर्थमर्यादयापि सप्तपदीचरणमेव मुख्यार्थो गम्यते न सुरतमिति ध्येयम् । नन्वेवमक्षतयोन्या एव संस्कारविधाने—

या गर्भिणी संस्क्रियते ज्ञाताऽज्ञाताऽपि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥

इति मनुवचनं विरुध्येत । गार्भिण्याः संस्कारविधानादिति चेत् । मैवम् । सहोढस्य वोढुः पुत्रत्वान्यथानुपपत्त्या तादृशसंस्काराभ्युपगमात् । तस्मादक्षतयोनिश्चेद् गतप्रत्यागता तदा पूर्वभर्त्रा पुनः संस्कृत्य परिग्राह्येति ।

अत्राहुः, न सङ्गच्छते । कुतः, पुनस्संस्कारस्य कलौ निषेधात् । यथा,

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥ इति ।

तदपरे न क्षमन्ते । वरान्तरकर्तृकस्यैव पुनर्विवाहस्य कलौ निषेधो न स्वकर्तृकस्य ।

दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ।

इति बृहन्नारदीयवाक्येनास्योपसंहारात् । अत एव—

बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः ।

इति धर्मज्ञसमये स्पष्टमेवाभ्यधायि । अन्यथा चिरप्रोषितस्य जीवद्वार्त्ताऽनाकर्णने कृतौर्ध्वदैहिकस्य पुनः प्रत्यागमनेऽपि स्त्रियाः पुनस्संस्कारो निषिध्येत । तस्मान्नास्य निषेधस्यायं विषय इति न पूर्वेण भर्त्रा तस्याः परिग्रहे विरोध इति । तन्न साधु । स्वपरकर्तृकस्य द्विविधस्यापि पुनः संस्कारस्य कलौ निषेधात् ।

यथा ब्रह्मपुराणे,

मृते भर्त्तरि या नारी त्यक्तवत्यथ तं स्वयम् ।
सवर्णाज्जनयेद्गर्भं भर्त्तुः पौनर्भवं सुतम् ॥
यदि सा बालविधवा बलात्त्यक्ता ऽथवा क्वचित् ।
तदा भूयस्तु संस्कार्या गृहीता येन केन चित् ॥
त्यक्त्वा भर्तृगृहं गच्छेद्यदि दोषं विना पुनः ।
भर्त्रा सा संस्कर्तव्या च प्रायश्चित्तादिभिः क्रमात् ॥
स्त्रीणां पुनर्विवाहस्तु देवरात्पुत्रसन्ततिः ।
स्वातन्त्र्यं वा कलियुगे न कर्त्तव्यं कदाचन ॥ इति ।

अत्र यत्तच्छब्दोपादानादेकवाक्यत्वम् । तच्चैवं । या मृतभर्तृका या च जीवन्तमेव भर्त्तारं स्वयं त्यक्त्वा सवर्णादन्यस्मात्पुरुषाद्गर्भं जनयेज्जनयितुं प्रवर्त्तते तदा सा येन केनचिद् गृहीता स्वीकृता भूयः संस्कार्या । तत्र मृतभर्तृकायास्त्यक्तभर्तृकायाश्चाविशेषप्राप्तावाह । यदि सा बालविधवेत्यादि । मृतभर्तृका यदि बालविधवा अक्षतयोनिस्तथा त्यक्तभर्तृका भर्त्रापि बलान्निर्भत्स्य त्यक्ता भवति तदैव संस्कार्या नान्यथा । अनेन वा—

या पत्या चापरित्यक्ता विधवा स्वेच्छया ऽपि वा ।

इति मनुवाक्येऽपि पत्या स्वेच्छया परित्यक्तेत्येवान्वयः सिद्धः । तेन च क्षतयोन्याः भर्त्तपारत्यक्तायाश्च व्यावृत्तिः । तत्र गर्भस्य कुण्डगोलकत्वपरिहारायाह । भर्त्तुः पौ-

नर्भवं सुतामिति । भर्त्तुर्द्वितीयस्य पत्युः पौनर्भवं पुनर्भ्वा-मुत्पादितं सुतं पुनः संस्कृतायामुत्पन्नस्यैव पौनर्भवत्वात् । एवं पुनर्भूसंस्कारमुक्त्वा गतप्रत्यागतासंस्कारमाह । त्यक्त्वेति। यदि-सैव पुनर्भूः पौनर्भवं भर्त्तारं त्यक्त्वा दोषं पुरुषसंबन्धं विना पुनः भर्त्तुः पूर्वस्य पत्युः गृहं गच्छेत्तदा सा भर्त्रा पूर्वेण प्रायश्चित्तादिभिः संस्कार्येति । तमेवमुभयविधमपि संस्कारं कलौ निषेधति । स्त्रीणामिति । पुनर्विवाह उक्तविषयः । स्वातन्त्र्यं विधवायाः पित्रादि-परिहारेण स्थितिरिति । अत्र तदा भूयस्त संस्कार्येति परकर्तृकस्य भर्त्रा सा संस्कर्त्तव्या चेति स्वकर्तृकस्य च पुनः संस्कारस्य प्रक्रमात् स्त्रीणां पुनर्विवाहस्त्विति सामान्यनिषेधो द्वावपि-विषयीकरोति । विशेषे विनिगमकाभावात् । यदि संनिधिर्विनिगमकस्तदा सुतरामस्मदभीष्टसिद्धिः ः स्वकर्तृकस्यैव संनिहितत्वात् । न च सामान्यरूपस्यास्य वरेणान्येन संस्कृतिरिति विशेषेणोपसंहार इति वाच्यम् । संनिधिलक्षणप्रकरणोपात्तविशेषद्वयान्वयेन विशेषरूपतयैवास्य नैराकाङ्क्ष्यात् । ग्रन्थान्तरीयस्य विशेषस्य विलम्बोपस्थितिकतया ऽनन्वयात् । तस्मात्पुनर्भूर्गतप्रत्यागता चेत्युभे अप्यसंग्राह्ये इति ।

यत्तु सा चेदक्षतयोनिः स्यादिति मनुवचनं तद्युगान्तरविषयम् । उक्तवचननिचयात् । अत एव तादृश्या मनूक्तस्त्यागोऽपि साम्प्रतविषय एव । यथा,

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥

इति । विगर्हितां पूर्वं प्रतिगृहीतामक्षतयोनिमपीति मेधातिथिः । विप्रदुष्टामन्यगतभावामिति ।

नारदोऽपि,

नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम् ।
दोषे सति न दोषः स्यादन्योन्यं त्यजतोर्द्वयोः ॥ इति ।

अदुष्टकन्यापरित्यागे दण्डमाह—

याज्ञवल्क्यः,

अदुष्टां च त्यजन्दण्ड्यो दूषयंस्तु मृषा शतम् । इति ।

नारदोऽपि,

प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेद्वरः ।
विनेयः सोऽथ दण्डेन कन्यां तामेवचोद्वहेत् ॥

कात्यायनः,

वरदोषमनाख्याय पाणिं गृह्णाति यो नरः ।
याचनं च प्रकुर्वीत तद्दत्तं नाप्नुयात्तु सः ॥
कन्यादोषेऽप्येवमेव दाता दण्ड्यो वरस्तथा ।

याज्ञवल्क्योऽपि,

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् । इति ।

एवमनन्यपूर्वा व्याख्याता ।

अथ कान्तादिविशेषणानि व्याख्यायन्ते ।

कान्ता वोढुर्मनोनयनानन्दकारिणी । यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिरित्यापस्तम्बस्मरणात् । असपिण्डा व्याख्याता प्रागेव । यवीयसी वयसा प्रमाणतश्च ।

तथाच वसिष्ठः, गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुज्ञातः स्नात्वा असमानार्षेयीमसंस्पृष्टमैथुनामवरवयसीं सदृशीं भार्यां विन्देतेति ।

गृहस्थ इति भाविनि भूतोपचारः, यूपं तक्षतीतिवत् । अरोगिणीम् अचिकित्सनीयव्याध्यनभिभूताम् । अचिकित्सनीयाश्च व्याधयो वैद्यकेऽभिहिताः ।

यथा,

वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः ॥ इति ।

भ्रातृमतीं पुत्रिकाकरणशङ्कानिवृत्तये ।

यथाह मनुः,

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्म्मशङ्कया ॥ इति ।

यस्याः पिता पुत्रिकाकरणाभिप्रायवानिति न निश्चीयते तामपि नोद्वहेदित्यर्थः । अनेनापरिभाषिताऽपि पुत्रिका भवतीति सर्वर्षिसंम्मतोऽर्थो दर्शितः ।

तत्प्रकारमाह वसिष्ठः,

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ॥ इति ।

संवित्करणं चाग्निं प्रजापतिं चेष्ट्वा भवति ।

यथाह गौतमः,

पितोत्सृजेत्पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वाऽस्मदर्थमपत्यमिति संवाद्येति ।

होमश्चाज्येनेति हरदत्तः । तन्न ।

पुत्रिकायाः प्रदानेन स्थालीपाकेन धर्मवित् ।
अग्निं प्रजापतिं चेष्ट्वा पुत्रदाने तथैव च ॥

इति जाबालिस्मरणात् । इयमेव मम पुत्रस्थानीयेत्यभ्युपगत्याऽपि पुत्रिका भवति । अत एव वसिष्ठः, तृतीयः पुत्रिका विज्ञायत इति पुत्रगणने तामपि परिगणितवान् । साऽपि भ्रातृमत्त्वेन व्यावर्त्यते । प्रत्यावृत्तिलक्षणदोषश्रवणात् ।

तथाच श्रुतिः,

अभ्रातेव पुंस एति प्रतीची गर्त्ता रुगिव सन ये धनानाम्।
जायेव पत्यउशती सुवासा उषाहस्रेव निर्णीते अप्स इति।

अस्यार्थः। अभ्रातेव पुंसः यथा अभ्रातृका कन्या दत्ताऽपि सती पित्रा ऊढाऽपि भर्त्रा पुनः पुंसः प्रतीची पितॄनेव पितृवंशमेवाभिमुखी एति सन्तानकर्मणे पिण्डदानार्थं न पतिवंशमित्यर्थः। सा हि पितृवंशं पुत्रैः पौत्रैश्च वर्द्धयति न भर्तृवंशमिति।

यास्कोपि, अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी सन्तानकर्मणे पिण्डदानायेति।

वसिष्ठोऽपि, अभ्रातृका पुंसः पितॄनभ्येति प्रतीचीनं गच्छति पुत्रत्वमिति।

अथोद्वाहे मुख्या दाराः॥

तत्र मनुः,

गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्॥

व्यासोऽपि,

स्नात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम्। इति।

मनुरपि,

सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्मणि। इति।

वर्णो जातिरप्युपलक्षणम्। अग्रे प्रथमोद्वाहे। द्विजातिपदं शूद्रानुलोमजप्रतिलोमजानामुपलक्षणम्। प्रशस्ता प्राथमकल्पिके दारकर्मणि रतिपुत्रधर्मलक्षणे।

तथाच यमः,

भार्याः सजात्याः सर्वेषां धर्म्मः प्राथमकल्पिकः। इति।

अयमर्थः। समावृत्तस्य त्रैवर्णिकस्य प्रथमविवाहे सवर्णैव मुख्या। क्षत्रियोरव्यादिषु प्रायश्चित्तस्मरणात्। शूद्रस्य शूद्रैव।

अनुलोमजादीनामपि प्रथमविवाहे सवर्णैव ।

अथ दारानुकल्पः ।

तत्र पैठीनसिः, अलाभे कन्यायाः स्नातकव्रतं चरेत्, अपित्रा क्षत्रियायां पुत्रमुत्पादयेत्, वैश्यायां वा शूद्रायां वेत्यन्ये इति । कन्यायाः सवर्णायाः । स्नातकव्रताचरणं तु स्नातकाभिप्रायेणैव, न मृतभार्याभिप्रायेण ।

आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ।
अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ॥

इत्यादिवचनविरोधात् । यदा तूत्पन्नपुत्रोऽतिवृद्धो वा कन्यां न लभते तदा भवत्येव तस्यापि स्नातकव्रताचरणम् । यदा त्वनुत्पन्नपुत्रोऽविरक्तोऽतिसमर्थश्च सवर्णां न लभते तदा त्वाह । अपित्रेति ।

यमः,

आनुपूर्व्येण भार्याः स्युश्चतस्रो ब्राह्मणस्य तु ।
क्षत्रियस्यानुपूर्व्येण ज्ञेयास्तिस्रो ऽवराः स्त्रियः ॥
वैश्यस्य चावरे धर्म्ये द्वे भार्येत्यब्रवीन्मनुः ।
शूद्रः स्वजातिं विन्देत तास्वपत्यं समं भवेत् ॥

नारदोऽपि,

ब्राह्मणस्यानुलोम्येन स्त्रियोऽन्यास्तिस्र एव तु ।
शूद्रायाः प्रातिलोम्येन तथाऽन्ये पतयस्त्रयः ॥
द्वे भार्ये क्षत्रियस्यान्ये वैश्यस्यैका प्रकीर्त्तिता ।
वैश्याया द्वौ पती ज्ञेयावेकोऽन्यः क्षत्रियापतिः ॥

वसिष्ठः, तिस्रो ब्राह्मणस्य भार्या वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यशूद्रयोरिति ।

मनुः,

सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्मणि ।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो ऽवराः ॥
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः ॥ इति ।

अथ शूद्रापरिणयने विप्रतिपत्तिः ।

तत्र मनुः,

न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः ।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते ॥

वृत्तान्ते उपाख्याने ।

वसिष्ठः, शूद्रामप्येके मन्त्रवर्जनं च न तथा कुर्यादिति हि ध्रुवः कुलापकर्षः प्रेत्य चास्वर्ग्यम् ।

याज्ञवल्क्यः,

यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥ इति ।

विष्णुः,

द्विजस्य भार्या शूद्रा तु धर्म्मार्थे न भवेत् क्वचित् ।
रत्यर्थमेव सा ऽत्यन्तं रागान्धस्य प्रकीर्त्तिता ॥ इति ।

वसिष्ठः,

कृष्णवर्णा च रामा रमणायैव न धर्मार्थमिति ।

शङ्खः,

आपद्यपि न कर्त्तव्या शूद्रा भार्या द्विजेन तु ।
तस्यां तस्य प्रसूतस्य निष्कृतिर्न विधीयते ॥
तपस्वी धर्मशीलश्च सर्वधर्मभृतां वरः ।
ध्रुवं शूद्रत्वमाप्नोति शूद्रश्राद्धे त्रयोदशे ॥
नीयते तु सपिण्डत्वं येषां शूद्रः कुलोद्भवः ।

सर्वे शूद्रत्वमायान्ति यदि स्वर्गजितस्तु ते ॥
सपिण्डीकरणं कार्यं कुलजस्य तथा ध्रुवम् ।
श्राद्धं द्वादशकं कृत्वा प्राप्ते श्राद्धे त्रयोदशे ॥
सपिण्डीकरणानर्हो न च शूद्रस्तथा ध्रुवः ।
तस्मात्सर्वप्रयत्नेन शूद्रां भार्यां विवर्जयेत् ॥

मनुविष्णू,

हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥

मनुः,

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च ।
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः ॥
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥

यमः,

ब्राह्मणो वृषलीं गत्वा ऽयहं भवति सूतकी ।
अथास्यां गर्भमाधत्ते ब्राह्मण्यादेव हीयते ॥
न ब्रह्महा ब्रह्महा तु ब्रह्महा वृषलीपतिः ।
यस्तत्र जायते गर्भः स तेन ब्रह्महा भवेत् ।
वृषली शूद्रा ।

हारीतः,

ब्राह्मणो वृषलीं गत्वा सद्यो गच्छेदधोगतिम् ।
अथास्यां गर्भमाधत्ते पतत्याशु न संशयः ॥
ब्रह्महा न भवत्यन्यो ब्रह्महा वृषलीपतिः ।
यस्तस्यामाहितो गर्भः स तेन ब्राह्मणो हतः ॥

मनुयमहारीताः,

वृषलीफेनपीतस्य निश्वासोपहतस्य च।
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते॥
फेनपीतस्य पीतमुखासवस्य।

उशना,

निष्कृतिः स्यात्सुरापस्य हत्वा वा ब्रह्मवादिनः।
वृषल्यभिप्रजातस्य निष्कृतिर्नोपपद्यते॥

गर्ग्योशना, पतति वृषलीपतिरित्याचक्षते। न पततीत्येके। ब्राह्मणस्य कल्पविहिताश्चतस्र आनुपूर्व्येण भार्या भवन्तीति।

वसिष्ठ आह, पतति न पततीति न संशयः वृषल्या पततीति हारीतः। सुतजननात्पततीति शौनकः। तद्पत्यैः पततीति गौतम इति।

हारीतः,

अधोवर्णेषु प्रजायमानः पतति न पततीति संशयः। न क्षत्रियविशोः। यज्ञसंयोगात्। वृषल्यां पतितः यः प्रजायते स तत्र गमनादधस्तरः सर्ववर्णक्षये वा ब्राह्मणः सर्वानेव जनयन्न दुष्यतइत्याचार्या इति।

भविष्यत्पुराणे,

शूद्रामारोप्य वेद्यां तु पतितोऽत्रिर्बभूव ह।
उतथ्यः पुत्रजननात्पतितत्वमवाप्नुयात्॥
पुलस्य पुत्रमासाद्य शौनकः शूद्रतां गतः।
भृग्वादयोऽप्येवमेव पतितत्वमवाप्नुयुः॥ इति।

अत्रायं संकलितोर्थः। द्विजातीनां सजातीयकन्याया अलाभे उत्तरोत्तरविजातीया अपि क्रमेण विवाह्याः। तथा अधिवेदननिमित्ते सति पूर्वभार्य्यामरणे च सति सवर्णाया अलाभे उत्तरोत्तराः विवाह्याः।

तदुक्तं ब्रह्मपुराणे,

क्षत्रविट्शूद्रकन्यास्तु न विवाह्या द्विजातिभिः ।
विवाह्य ब्राह्मणीं पश्चाद्विवाह्याः क्वचिदेवतु ॥

क्वचिदेवेति कस्मिंश्चिदधिवेदननिमित्ते दारमरणे वा सति । शूद्रायां स्वयं विधिस्तदितरासु प्रजाया असंभवे प्रजोत्पत्तिमात्रार्थं सापि विवाह्या । वर्णक्षये सर्वानेव जनयन्न दुष्यतइति हारीतवचनात् । शूद्राविवाहनिषेधस्त्वितरासां लाभे । यस्तु पुत्रपौत्रजनने निन्दानुवादः सोऽप्यनेवंविधविवाहविषयः । निन्दाविशेषश्रवणं तु दोषभूयस्त्वप्रतिपादनार्थम् । इति दारानुकल्पः ॥

अथ वरलक्षणानि ।

तत्र लिङ्गपुराणं,

दातव्या श्रोत्रियायैव ब्राह्मणाय तपस्विने ।
साक्षादधीतवेदाय विधिना ब्रह्मचारिणे ॥
ब्रह्मचारिणे ऽस्खलितब्रह्मचर्याय ।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।

इति योगिस्मरणात् । लक्षणपरीक्षातः प्रागायुष्परीक्षा कर्त्तव्येत्युक्तं तत्रैव,

पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां च लक्षणैः किं प्रयोजनम् ॥
वामभागेषु नारीणां दक्षिणे पुरुषस्य तु ।
पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ॥
सप्तरक्तं त्रिगम्भीरं त्रिविस्तीर्णं प्रशस्यते ।
बाहुर्नेत्राञ्चलं चैव जानु नासा तथैवच ॥
स्तनयोरन्तरं चैव पञ्चदीर्घं प्रशस्यते ।
ग्रीवापक्षाननं पृष्ठं ह्रस्वं जङ्घे च शोभने ॥

ह्रस्वानि यस्य चत्वारि पूजामाप्नोति नित्यशः।
सूक्ष्माण्यङ्गुलिपर्वाणि दन्तकेशनखत्वचः॥
पञ्च सूक्ष्माणि येषां स्युस्ते नरा दीर्घजीविनः।
कक्षः कुक्षिश्च वक्षश्च घ्राणस्कन्धललाटिकाः॥
एतत्सर्वं विनिर्दिष्टमुन्नतं षट् प्रशस्यते।
नेत्रान्तं करपादं चाधरोष्ठं चैव तालुकम्॥
जिह्वा नखश्च ते सप्त रक्तवर्णाः शुभावहाः।
कर्णकूपौ च नाभिश्च त्रिगम्भीरं प्रशस्यते॥
उरः शिरो ललाटं च त्रिविस्तीर्णं प्रशस्यते।
मुखमध्यं शरीरस्य सर्वं वा मुखमुच्यते॥
तत्रापि चक्षुषी श्रेष्ठे घ्राणं च तदनन्तरम्।
वर्णात्परतरः स्नेहः स्नेहात्परतरः स्वरः॥
स्वरात्परतरं सत्त्वं सर्वं सत्त्वे प्रतिष्ठितम्।
उरोविशालो धनधान्यभोगी शिरोविशालो नृपपुङ्गवः स्यात्।
कटीविशालो बहुपुत्रभोगी विशालपादस्तु धनी सुखी स्यात्॥
चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम्।
त्वचः स्नेहेन शय्या स्यात्पादस्नेहेन वाहनम्॥
अकर्मकठिनौ हस्तौ पादौ चाध्वनि कोमलौ।
यस्य हस्तौ च पादौ च तस्य राज्यं विनिर्दिशेत्॥
दीर्घलिङ्गेच दारिद्र्यं स्थूललिङ्गे च निर्धनम्।
कृशलिङ्गे तु सौभाग्यं ह्रस्वलिङ्गे तु भूपतिः॥
कनिष्ठाङ्गुलिदेशे तु रेखा गच्छति मध्यगा।
अविच्छिन्ना तु रेखा स्यादशीत्यायुर्विनिर्दिशेत्॥
अनामिकापर्वमतिक्रमेत चेत्कनिष्ठिका वर्षशतं च जीवति।
समे त्वशीतिर्विषमे तु सप्ततिः पर्वार्द्धहीने खलु षष्टिमादिशेत्॥

अङ्गुष्ठोदरमध्यस्थे यवाविव विराजिते ।
उत्पन्नभोग्यभोगी च स नरः सुखभाग्भवेत् ॥
रेखाभिर्बहुभिः क्लेशमल्पाभिर्धनहीनता ।
रक्ताभिर्धनमाप्नोति कृष्णाभिर्दुःखितो भवेत् ॥
अतिमेधोऽतिकीर्तिश्च विक्रमी च सुखी तथा ।
अतिस्निग्धार्थदृष्टिः स्यात्स नरोऽल्पायुषो भवेत् ॥
अङ्कुशं कुड्मलं चक्रं यस्य पाणितले भवेत् ।
तस्य राज्यं विनिर्दिष्टं सामुद्रवचनं यथा ॥
मत्स्ये शतं विजानीयान्मकरे तु सहस्रकम् ।
पद्मे कोटीर्विजानीयाच्छङ्खे कोटिसहस्रकम् ॥
अतिकृष्णमतिश्वेतमतिरक्तं तथैव च ।
इत्थंवर्णो न रोगी स्यान्नारदस्य वचो यथा ॥ इति ।

लक्षणान्तराणि तु लक्षणप्रकाशे वक्तव्यानीति नेहोच्यन्ते ।

अथ वरगुणाः ।

तत्र यमः,

कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च ।
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥
इति ।

मल्लः,

जातिविद्यावयःशीलमारोग्यं बहुपक्षता ।
अर्थित्वं वित्तसम्पत्तिरष्टावेते वरे गुणाः ॥ इति ।

गौतमोऽपि,

विद्याचारित्रबन्धुशीलसम्पन्नाय दद्यादिति ।

विद्या श्रुतिस्मृतिरूपा । चारित्रमनुष्ठानम् । बन्धुः प्रशस्ताभिजनः । शीलं धर्मरतिः । एतत्सम्पन्नाय कन्यां दद्यादित्यर्थः ।

आपस्तम्बोऽपि, बन्धुशीललक्षणसम्पन्नः श्रुतवान् अरोग इति वरसम्पदिति ।

शातातपोऽपि,

वरो वरयितव्योऽर्थी कुलशीलसमन्वितः ।
रूपवान्पण्डितः प्राज्ञो युवा दोषविवर्जितः ॥

वरयितव्यः, कन्यापित्रेति शेषः ।

मनुरपि,

उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्विचक्षणः ॥ इति ।

अप्राप्ताम् अप्राप्तविवाहसमयां बालिकामपीत्यर्थः ।

बौधायनोऽपि,

दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।
अपिवा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

यत्तु,

काममामरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि ।
नत्वेवैनां प्रयच्छेत गुणहीनाय हि कर्हिचित् ॥

इति मनुवचनं, तद् गुणवति सम्भवति गुणहीननिषेधपरम्। न तु सर्वथा गुणहीननिषेधपरम्।नो चेत् "अपिवा गुणहीनाय" इति बौधायनोक्तोऽनुकल्पो निर्विषयः स्यात् । ऋतुमत्यपि तिष्ठेदिति तु उक्तरीत्या न स्वार्थे पर्यवस्यति । अतो नोपरुन्ध्याद्रजस्वलामित्यनेन न विरुध्यते ।

अत एव वसिष्ठः,

प्रयच्छेन्नग्निकां कन्यामृतुकालभयात्पिता ।
ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति ॥ इति ।

याज्ञवल्क्यः,

एतैरेव गुणैर्युक्तस्सवर्णः श्रोत्रियो वरः ।
यत्नात्परीक्षितः पुंस्त्वे युवा धीमाञ्जनप्रियः ॥ इति ।

एतैः पूर्वोक्तैर्लक्षण्यादिभिः कन्यागुणैः । तत्र लक्षणानि पूर्वोक्तानि । अनन्यपूर्वकत्वं चाविप्लुतब्रह्मचर्य इत्यादिनोक्तमेव । यद्यपि—

दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ।
आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ॥
सुरापी व्याधिता धूर्त्ता वन्ध्याऽर्थघ्न्यप्रियंवदा ।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥

इत्यादिना द्वितीयाद्युद्वाहविधानादनन्यपूर्वकत्वं वरस्य नावश्यकमिति प्रतीयते तथापि—

अदग्धहस्ते यद्दत्तं तदनन्तफलं स्मृतम् ।
दग्धहस्ते तदर्धं स्यान्निष्फलं बहु गृह्णतः ॥

इत्याद्यदग्धहस्तदानस्य फलातिशयदर्शनात्फलातिशयकामस्य तदावश्यकता सिध्यति । कान्तत्वं च लौकिकप्रमाणसिद्धमेव । असपिण्डत्वं च शब्दशक्त्यैव सिध्यति । सापिण्ड्यस्योभयनिरूप्यत्वात् । यवीयस्त्वं तु त्र्यष्टवर्षोऽष्टवर्षामित्यादिस्मृत्या बाधितमेवेति नातिदिश्यते । अरोगित्वं च सामर्थ्यादेव सिध्यति । भ्रातृमत्त्वं चापेक्षितमेव ।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

इति वरमरणे देवरेण तदुद्वाहस्मरणात् । असमानार्षगोत्रजत्वं तु सापिण्ड्यवच्छब्दशक्त्यैव सिध्यति । एतेनानन्यपूर्वकत्वयवीयस्त्वभ्रातृमत्त्वव्यतिरिक्तैर्युक्त इति केषांचिद्व्याख्यानं निरस्तम् । सवर्ण इत्युत्कृष्टवर्णस्याप्युपलक्षणम् । श्रोत्रियः अधीते-

कशास्त्रः । पुंस्त्वे प्रजननशक्तौ यत्नान्नानोपायैः प्रत्यक्षानुमानिकैः परीक्षितः ।

परीक्षोपायमाह नारदः,

परीक्ष्य पुरुषं पुंस्त्वे निजैरेवाङ्गलक्षणैः ।
पुमांश्चेदविकल्पेन स कन्यां लब्धुमर्हति ॥
सुबद्धजत्रुर्जान्वस्थिसुबद्धांसशिरोधरः ।
यस्याप्सु प्लवते वीर्यं ह्रादि मूत्रं च फेनिलम् ॥
पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तु पण्ढकः । इति ।

विपरीतः यथोक्तलक्षणाभाववान् षण्ढ इत्युच्यते । स चैकविंशतिविधः । तत्र सप्तविधः—

कर्मविपाकसंग्रहे,

पण्ढकश्चातकः षण्ढः पण्डः क्लीबो नपुंसकः ।
सकीलश्चेति सप्तैवं क्लीबभेदा विभाषिताः ॥
तेषां स्त्रीतुल्यवाक्चेष्टः स्त्रीधर्मा षण्ढको भवेत् ।
पुमान् भूत्वा स्वलिङ्गानि पश्चाच्छिन्द्यात्तथैवच ॥
स्त्री च पुम्भावमास्थाय पुरुषाचारवद्गुणा ।
चातको नाम षण्ढःस्यात् स्त्रीषण्ढो वापि नामतः ॥
असाल्लिङ्गोऽपि षण्ढः स्यात् पण्डस्तु म्लानमेहनः ।
अमेध्याशी पुमान् क्लीबो नष्टरेता नपुंसकः ॥
सकीलक इति ज्ञेयो यः क्लैब्यादात्मनः स्त्रियम् ।
अन्येन सह संयोज्य पश्चात्तामेव सेवते ॥

चतुर्दशविधस्तु नारदेन दर्शितः,

चतुर्दशविधः षण्ढः शास्त्रे दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥
निसर्गपण्डो बध्रश्च पक्षषण्ढस्तथैवच ।

अभिशापाद्गुरो रोगादेवक्रोधात्तथैवच ॥
ईर्ष्यापण्डश्च सेव्यश्च वातरेता मुखेभगः ।
आक्षिप्तो मोघबीजश्च शालीनोऽन्यापतिस्तथा ॥ इति ।

निसर्गपण्डः स्वभावतो लिङ्गवृषणहीनः । वध्रिश्छिन्नमुष्कः । पञ्चदशाद्दिनानन्तरं सकृद्भोगक्षमः पक्षपण्ढः । गुरुशापपण्डादयस्त्रयः स्पष्टाः । ईर्ष्यया परसम्भोगदर्शनेन पुंस्त्वमुत्पद्यते यस्य स ईर्ष्यापण्ढः । उपचारविशेषेण पुंस्त्वोत्पत्तिर्यस्य स सेवापण्डः । वातोपहतरेतस्को वातरेताः । यस्य मुखएवपुंस्त्वशक्तिर्न योनौ स मुखेभगः । रेतोनिरोधात् पण्डीभूतः आक्षिप्तपण्डः । गर्भाधानासमर्थरेता मोघबीजः । अप्रगल्भतया क्षोभाद्वा नष्टपुंस्त्वः शालीनः । यस्य स्वभार्यापरिहारेणान्यासु पुरुषभावः सोऽन्यापतिरिति । एषां चावान्तरविशेषेणापौनरुक्त्यादेकविंशतित्वमविरुद्धम् । युवेत्यनेनानुद्भूतवीर्यस्य बालस्याभिभूतवीर्यस्य वृद्धस्य च व्यावृत्तिः । धीमान् लौकिकवैदिकव्यवहारनिपुणमतिः । जनप्रियः सकलजनप्रेमपात्रम् । स्मितमृदुपूर्वाभिभाषीति मिताक्षरा ।

अथ वरदोषाः ।

तत्र नारदः,

उन्मत्तः पतितः क्लीबो दुर्भगस्त्यक्तबान्धवः ।
कन्यादोषौ च यौ पूर्वावेष दोषगणो वरे ॥

उन्मत्तो वाय्वादिना । पतितो ब्रह्महत्यादिना । दुर्भगो भाग्यहीनः । त्यक्तबान्धवः अदुष्टान्बन्धून्विहाय स्वतन्त्रव्यवहारः । कन्यादोषौ च यौ पूर्वाविति ।

दीर्घकुत्सितरोगार्त्तव्यङ्गा संस्पृष्टमैथुना ।
दुष्टान्यगतभावा च कन्यादोषाः प्रकीर्त्तिताः ॥

इत्यत्र उक्तौ पूर्वौ प्रथमौ दीर्घकुत्सितरोगव्यङ्गत्वरूपौ ना-

रदोक्तावेव।

वसिष्ठोऽपि,

कुलशीलविहीनस्य षण्ढादिपतितस्य च।
अपस्मारिविधर्म्मस्य रोगिणां वेषधारिणाम्॥
दत्तामपि हरेत्कन्यां सगोत्रोढां तथैवच। इति।

अत्र सगोत्रपदं सपिण्डाया अप्युपलक्षणम्। तुल्यन्यायत्वात्।

पराशरोऽपि,

कन्यां यच्छति वृद्धाय नीचाय धनलिप्सया।
कुरूपायाकुलीनाय स प्रेतो जायते नरः॥

वसिष्ठोऽपि,

अत्यासन्नेऽतिदूरे च अत्याढ्ये चातिदुर्बले।
वृत्तिहीने च मूर्खे च षट्सु कन्या न दीयते॥

कात्यायनोऽपि,

निष्क्रान्तस्तेन विद्विष्टस्तथा त्यक्तः स्वबन्धुभिः।
अन्यजातिः क्षयी दासो लिङ्गस्थश्चोदरी यदि॥
उन्मत्तः पतितः कुष्ठी तथा षण्ढः सगोत्रजः।
चक्षुःश्रोत्रविहीनश्च तथा ऽपस्मारदूषितः॥
वरदोषा स्मृता ह्येते कन्यादोषाः प्रकीर्त्तिताः।
प्राक् पश्चाद्वा समुत्पन्ना दानं तत्र निवर्त्तयेत्।

निष्क्रान्तः देशान्तरगमनशीलः। तेन निष्क्रमेण विद्विष्टः रहितः, अत्यन्तं प्रवासभीरुरिति यावत्।

तथाच महाभारते,

द्वाविमौ ग्रसते भूमिस्सर्पो बिलशयानि वा।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम्॥ इति।

लिङ्गस्थः वेदबाह्यलिङ्गधारी। उदरी जलोदररोगाधिमान्। प्रा-

क् वाग्दानात् । पश्चाद्वाग्दानानन्तरम् । अन्यानपि वर्ज्यानाह स एव,

दूरस्थानामवेद्यानां मोक्षमार्गानुसारिणाम् ।
शूराणां च निवृत्तानां न देया कन्यका बुधैः ॥ इति ।

षण्ढो वर्जनीय इत्युक्तं, तद्वर्जने कारणमाह—

नारदः,

अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः ।
क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति ॥

अथ परिवेत्त्रादिनिर्णयः ॥

तत्र गर्गः,

सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम् ।
आवसथ्ये तथाऽऽधानं पतितस्त्वन्यथा भवेत् ॥ इति ।

यस्तु कुर्यात्स पतितः परिवेत्तेत्युच्यते ।

तथाच मनुः,

अग्रजे ब्रह्मचर्यस्थे योऽनुजो दारसङ्ग्रहम् ।
कुरुते परिवेत्ता स परिवित्तोऽग्रजो भवेत् ॥

अग्रजोऽत्र सोदर्यो विवक्षितः । पूर्ववाक्यानुरोधात् । तथा,

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥
परिवित्तिः परिवेत्ता च यया च परिविद्यते ।
ते सर्वे नरकं यान्ति दातृयाजकपञ्चमाः ॥ इति ।

सोदर्यत्वं चात्र त्रिविधं, पित्रैक्यान्मात्रैक्यादुभयैक्याच्च । तत्र पित्रैक्येन सोदर्यत्वं "पुरुषे ह वा अयमादितो गर्भो भवती"त्यादिगर्भोपनिषत्सु प्रसिद्धम् ।

महाभारते च,

पितुः स जठरे स्थित्वा शुक्रद्वारेण मातरम् ।

प्रविश्य शोणितासक्तः पञ्चधा तनुमाददे ॥ इति।

देवयानीं प्रति कचोक्तिश्च,

यस्मिन्नेवोदरे तातस्यावसस्त्वं शुभानने।

तस्मिन्नेवाहमवसं तेन त्वं भगिनी मम॥

इत्यादिहेतुभिरविवाह्यत्वप्रतिपादिका। मात्रैक्यादिना सोदरत्वं स्पष्टमेव। तत्रैकैकं निमित्तमादाय निषेधप्रवृत्तावपवादमाह—

शातातपः,

पितृव्यपुत्रसापत्नपरनारीसुतेषु च।

ज्येष्ठेष्वपि च तिष्ठत्सु भ्रातॄणां तु कनीयसाम्॥

दाराग्निहोत्रसंयोगे न दोषः परिवेदने। इति।

पितृव्येण देवरादिना देवदत्तमातर्युत्पादितः पुत्रः पितृव्यपुत्र इत्युच्यते। स मात्रैक्येन देवदत्तस्य सोदरः। संविदा तूभयोरिति गौतमस्मरणेन तस्य द्व्यामुष्यायणत्वात्। एतेषु त्रिष्वपि सोदर्यत्वेन निषेधमाप्तावयमपवादः। अत एवापवादादपरिणीतेऽपि युधिष्ठिरे भीमसेनस्य परिणयो न दोषाय।

यमोऽपि,

पितृव्यपुत्रान् सापत्नान् परपुत्रांस्तथैवच।

दाराग्निहोत्रधर्मेषु नाधर्मः परिविन्दतः॥ इति।

अत्राद्यौ द्वौ व्याख्यातौ। परपुत्रः परस्यैव पुत्रार्थमुत्पादितो न स्वार्थमपि। सोऽपि पित्रैक्यादेव देवदत्तस्य सोदरः।

गौतमोऽपि,

भिन्नोदरे दत्तके च पितृव्यतनयेऽग्रजे।

दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥ इति।

दत्तः पित्रा ऽन्यस्मै पुत्रत्वेन, तस्य सोदरज्येष्ठापेक्षया प-

रिवेदनप्राप्तौ तदपेक्षया च तत्सोदरकनिष्ठस्येत्युभयैकयापवादः । तृतीयः पुत्रिकैवेति वसिष्ठोक्तेः पुत्रिकापुत्रे सति कनिष्ठे औरसे परिवेदनप्राप्तावग्रजपदेनापवादः । तदेवमपवादतया वाक्यत्रयोपपत्तौ—

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।

इत्यत्राग्रजस्य व्यतिरेकमुखेन सोदर्यत्वविवक्षार्थं वाक्यत्रयारम्भ इति निरस्तम् । सोदर्ये तिष्ठति ज्येष्ठे इत्यनेनैकवाक्यतयैव तत्सिद्धेः । न ह्यग्रजस्य सोदर्यत्वसिद्ध्यर्थं वाक्यत्रयारम्भो युज्यते । न हि घट इति वक्तव्ये अनघट इति वदन्ति विद्वांस इति न्यायापातात् । किञ्च सोदर्यत्वमात्रविवक्षार्थत्वे पितृव्यपुत्रादिपदानामविवक्षितार्थतया मातृष्वसृपितृष्वसृमातुलपुत्राणामप्यपरिणयनमापद्येत । तेषामप्यग्रजत्वेन दोषापादकत्वसम्भवात् । सम्भवति चापवादत्वेन विवक्षितार्थत्वेऽविवक्षाया अन्याय्यत्वात् ।

यच्च—

षण्ढान्धबधिरादीनां विवाहोऽस्ति यथोचितम् ।
विवाहासम्भवे तेषां कनिष्ठो विवहेत्तदा ॥
पितृव्यपुत्रे सापत्ने परदारसुतादिषु ।
विवाहाधानयज्ञादौ परिवेदो न दूषणम् ॥

इति मनुना,

देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः ॥
जडमूकान्धबधिरकुब्जवामनकुण्ठकान् ।
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।

कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ॥

इति कात्यायनेन,

उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव च ।

राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम् ॥

इति कार्ष्णाजिनिना च ज्येष्ठमात्र एव विषयविशेषेऽपवादोऽभिहितस्सोऽपि सोदर्यविषय एव । अन्यत्राप्राप्त्यभावेनापवादत्वासम्भवादित्यलं बहुना । ज्येष्ठानुजयोश्च पुंस्त्वं विवक्षितम् । अप्राप्तोद्देश्यविशेषणत्वात् । अष्टवर्षं ब्राह्मणमित्यत्राष्टवर्षत्वादिवत् । तेनापरिणीतायामपि ज्येष्ठभगिन्यां कनिष्ठस्य भ्रातुः परिवेदनं न भवति । तथा अपरिणीते ज्येष्ठभ्रातरि कनिष्ठाया भगिन्याश्च न भवति । अत एव भगिन्योरपि परिवेदनाभावप्राप्तौ वचनारम्भः ।

यदाह गार्ग्यः,

एकमातृप्रसूतानां पुत्रीणां परिवेदने ।

न भवेत्सर्ववर्णेषु न दोषो भिन्नमातृषु ॥ इति ।

मातृपदं पितुरप्युपलक्षणम् ।

तेन भिन्नपितृकास्वपि न दोषः । ततश्च पितृव्यपुत्रादिवाक्योपात्ता विशेषा अत्राप्यनुसन्धेयाः । सोदर्यास्वपि क्वचिदपवादमाह—

वृद्धमनुः,

विवाहेऽनधिकारी स्याज्ज्येष्ठकन्या स्थिता यदा ।

तदनुज्ञां विना वापि कनिष्ठामुद्वहेत्तदा ॥ इति ।

अनधिकारीति छान्दसो लिङ्गव्यत्ययः । वाशब्दोऽनुज्ञापक्षं गमयति । ततश्चानधिकारिण्यां ज्येष्ठायां तदनुज्ञां विनापि कनिष्ठामुद्वहेत् । अधिकारिण्यां तदनुज्ञयापीति वाशब्दार्थः । अनधिकारश्च कुष्ठापस्मारवैरूप्यादिभिः । अरोगिणीं भ्रातृमती-

मिति स्मरणात् ।

नाग्निहोत्रं न वा वेदा न च वेदव्रतान्यपि ।
नाग्नयः परिविन्दन्ति न यज्ञा न तपांसि च ॥
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिता ।

इति कात्यायनस्मरणाच्च । जातारणिपरिग्रहेण जातमात्राहिताग्नेरग्निहोत्रवेदाध्ययनवेदव्रतैः परिवेदनदोषो नास्ति । किं तु दारेण पारिवेद्यम् । जातारण्यभावे तु उपनीतस्याध्ययनाधिकारादुपनयपरे परिवेदनदोषोऽस्त्येवेति गमयितुं वेदग्रहणम् ।

न जन्ममासे दिवसे च ऋक्षे ज्येष्ठेऽनुपेते परशाखया च ।
न चान्यगोत्रावुपदं च कुर्याश्च बह्वृचाः पञ्चमषष्ठयोश्च ॥

इति ज्योतिष्पाराशरनिषेधात् । एतेन वेदपदमुपनयपरमिति निरस्तम् । अग्नयः श्येनचित्यादयो यज्ञाः ज्योतिष्टोमविकारानाग्निष्टोमातिरात्रौ । तयोः प्रथमप्रयोगे परिवेदनापादकत्वात् ।

यथाह त्रिकाण्डमण्डनः,

दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहम् ।
अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितम् ॥
न कुर्याज्जनके ज्येष्ठे सोदरे चाप्यकुर्वति । इति ।

प्रयोगे प्रथमे स्थितमिति दर्शेष्ट्यादीनां यूथे लिङ्गं विशेषणम् । तेन प्रथमप्रयोगएवैषां परिवेदनापादकत्वं न द्वितीयादिप्रयोगेष्विति । सोमेज्या प्रकृतिभूतो ज्योतिष्टोमः । तपांसि चान्द्रायणादीनि । श्राद्धं दर्शादौ पार्वणादि । एते कनिष्ठं भ्रातरं न परिविन्दन्ति । विरूपिता अङ्गेन्द्रियादिविकला ज्येष्ठा कनिष्ठां भगिनीं च न परिविन्दतीति वाक्यद्वयार्थः ।

अत्र विशेषमाह वसिष्ठः, परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्निविशेत तामेवोपयच्छेतेति । तस्मै ज्येष्ठाय

दत्त्वा निवेश्य पुनर्निविशेत पुनरुद्वहेत । कामिस्त्रपेक्षायां तामेवेति । अयमेव न्यायो ज्येष्ठकनिष्ठयोराधानव्युत्क्रमे भगिन्योर्विवाहव्युत्क्रमे चानुसन्धेयः ।

अत एव गौतमः, परिविवित्तिपरिवेत्तृपर्याहितपर्याधात्रग्रेदिधिषूपतिदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यमिति ।

अकृताधाने ज्येष्ठे कनिष्ठेनाधाने ज्येष्ठः पर्याहितः कनिष्ठः पर्याधाता ।

अग्रेदिधिषूलक्षणमाह देवलः,

ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा ।

या साऽग्रेदिधिषूः प्रोक्ता पूर्वा तु दिधिषूः स्मृता ॥ इति ।

तत्राह वसिष्ठः,

अग्रेदिधिषूपतिः कनिष्ठापतिः कृच्छ्रं कृत्वा तां ज्येष्ठाम अन्योढां समुद्वहेत ।

दिधिषूपतिर्ज्येष्ठापतिः स्वोढां ज्येष्ठां कनिष्ठापतये दत्त्वा स्वयमन्यामुद्वहेदिति । देशान्तरस्थिते ज्येष्ठे प्रतीक्षाकालमाह—

वसिष्ठः, अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवति । अनिविष्टमकृतविवाहाग्निहोत्रम् । कालविकल्पस्त्वेवं विज्ञेयः । तत्र पुनः श्रूयमाणे सुप्रदेशस्थिते द्वादश वर्षाणि । किञ्चिच्छ्रूयमाणे नातिसुप्रदेशस्थिते दश । नदीपर्वतचौराद्याकुलदूरतरदेशस्थिते अश्रूयमाणे चाष्टौ वर्षाणीति ।

अथाधाने विशेषः । यत्र ज्येष्ठोऽधिकार्यपि आधानं न करोति तत्र तदनुज्ञया कनीयसा कर्त्तव्यम् ।

यथाह सुमन्तुः,

ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैवचाश्रयेत् ।

अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा ॥

वृद्धवसिष्ठोऽपि,

अग्रजस्तु यदा ऽनग्निरादध्यादनुजस्तदा ।

अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि ॥

हारीतोऽपि, अधिकारी भ्रात्रनुज्ञापूर्वकमाधानमनुजानीते न तु विवाहम् ।

सोदर्याणां तु सर्वेषां परिवेत्ता कथं भवेत् ।

दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया ॥

विशेषान्तरमाधानप्रकरणे वक्ष्यामः ।

अथ वधूवरयोर्विवाहकालः ।

तत्र विष्णुपुराणम्,

वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुणः स्वयम् ।

मनुयमौ,

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ।

त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥

महाभारते,

त्रिंशद्वर्षः षोडशवर्षां भार्यां विन्देत नग्निकाम् ।

एकविंशतिवर्षो वा स पूर्वामवाप्नुयात् ॥

नग्निका ऽनागतार्त्तवा । पूर्वेषां, लोकमिति शेषः । अत्रा-यं समुदायार्थः । अष्टवर्षान्ता कन्या त्रिगुणवयसा विवाह्या । अ-ष्टवर्षामारभ्य द्वादशवर्षान्ता तत्सार्द्धद्विगुणवयसा विवाह्या । द्वा-दशवर्षामारभ्य षोडशवर्षपर्यन्ता तदष्टमांशन्यूनद्विगुणवयसा वि-वाह्या । अनाश्रमित्वादिना धर्मे सीदति सति सत्वरः उक्तप्रमा-णान्न्यूनवयस्कोऽपि न्यूनवयस्कामुद्वहेत् । अन्ये पुनरुक्तपरिमाणाद् न्यूनपरिमाणां न्यूनपरिमाणामुद्वहन् धर्मे सीदति, धर्मातिक्रम-कारी भवतीत्याहुः ।

आपस्तम्बः,

त्रिंशद्वर्षो दशाब्दां तु भार्यां विन्देत नग्निकाम्।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात्॥

आश्वलायनोऽपि,

कुलशीलवयोरूपवृत्ताढ्यां नग्निकां शुभाम्।
विधिना तु वरः कन्यामुद्वहेदात्मनः समाम्॥

समा कुलशीलादिभिर्न वयसा। तथा,

सप्ताब्दा कन्यकानाम्नी शैशवी स्याच्छुभान्विता।
तामष्टादशवर्षीयो विवहेद्विधिवत् पुमान्॥
अष्टवर्षा भवेद्गौरी पुत्रपौत्रप्रवर्धिनी।
पञ्चविंशतिवर्षीयस्तां कन्यामुद्वहेद्द्विजः॥
रोहिणी नववर्षा स्याद्धनधान्यविवर्धिनी।
तामुद्वहेत मतिमान् सर्वकामार्थसिद्धये॥
ऊर्ध्वं दशाब्दाद्याकन्या प्राग्रजोदर्शनात्तु सा।
गान्धारी स्यात्समुद्वाह्या चिरं जीवितुमिच्छुना॥ इति।

यमः,

दद्याद्गुणवते कन्यां नग्निकामेव शक्तितः। इति।

वसिष्ठगौतमावपि,

प्रयच्छेन्नग्निकां कन्यामृतुकालभयादिह।
ऋतुमत्यां तु तिष्ठन्त्यां दोषः पितरमृच्छति॥ इति।

नग्निकालक्षणमाह ब्रह्मपुराणं,

यावन्न लज्जां जानाति कन्या पुरुषसंनिधौ।
योन्यादीन्नावगूहेत तावद्भवति नग्निका॥

अमरसिंहस्तु, गौरी तु नग्निकाऽनागतार्तवेत्याह। व्याख्यातं चैतल्लिङ्गभट्टेन। मनसा विवाहं प्रत्युद्गच्छतीति गौरी। गु-

री उग्रमे। नज्जते व्रीडतीति नग्निका। नज्जी व्रीडने। अत्र नग्निकाशब्दो विरुद्धलक्षणया गौर्यां वर्त्तते। अनागतमार्त्तवमस्या इत्यनागतार्तवा। अनूढसप्तवर्षाधिकानां नामानीति।

अत एव संवर्त्तः,

अष्टवर्षा भवेद्गौरी नवमे नग्निका भवेत्।
दशमे कन्यका प्रोक्ता द्वादशे वृषली मता॥ इति।

वृषल्यत्र रजस्वला।

तथाच देवलः,

वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा।
अपरा वृषली ज्ञेया कुमारी या रजस्वला॥

बृहस्पत्यात्रिकश्यपा अपि,

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता।
भ्रूणहत्या पितुस्तस्यास्सा कन्या वृषली स्मृता॥

विष्णुरपि,

पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता।
सा कन्या वृषली ज्ञेया हरंस्तां च न दुष्यति॥ इति।

न दुष्यति न दण्ड्यो भवतीत्यर्थः।

यमोऽपि,

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥ इति।

रोहिणीति नग्निकायाः संज्ञान्तरम्।

भविष्यपुराणे,

अप्राप्तरजसा गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जनकुचा कन्या कुचहीना तु नग्निका॥
सप्तवर्षा भवेद्गौरी दशवर्षा तु नग्निका।

द्वादशे तु भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

काश्यपः,

सप्तवर्षा भवेद्गौरी दशवर्षा तु कन्यका ।

प्राप्ते तु द्वादशे वर्षे कुमारीत्यभिधीयते ॥ इति ।

अङ्गिराः,

अनवाप्तरजा गौरी प्राप्ते रजसि रोहिणी ।

अव्यञ्जनकुचा श्यामा कुचहीना तु नग्निका ॥

व्यञ्जनेष्वथ जातेषु सोमो भुङ्क्ते तु कन्यकाम् ।

पयोधरेषु गन्धर्वो वह्निर्भुङ्क्ते रजस्वलाम् ॥

तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् ।

कश्यपः,

भुञ्जीत व्यञ्जने सोमो गन्धर्वस्तु पयोधरे ।

वलित्रयागमे वायु रजस्यग्निः प्रतिष्ठितः ॥

तस्माद्व्यञ्जनोपेतामरजस्कामपयोधराम् ।

नोपभुक्तां तु सोमाद्यैर्दद्याद् दुहितरं पिता ॥

संवर्त्तः,

रोमकालेतु संप्राप्ते सोमो भुङ्क्ते तु कन्यकाम् ।

रजःकाले तु गन्धर्वो वह्निस्तु कुचदर्शने ॥

तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् ।

इति वदता ऋतुमत्या विवाहे दोष इत्युक्तं भवति ।

अत्रिबृहस्पती,

व्यञ्जने तु कुलं हन्यात्पितॄन् हन्यात् पयोधरे ।

हन्यादिष्टं च पूर्त्तं च प्राप्ते रजसि कन्यका ॥

भविष्यपुराणे,

अतोऽप्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत् ।

महद्देनः स्पृशेदेनमन्यथैव विधिस्मृतः ॥ इति ।

बौधायनोऽपि,

दद्याद्गुणवते कन्यां नग्निकां धर्म्मचारिणीम् ।

अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥ इति ।

ऋतुमत्या दाने दोषमाह नारदः,

यावन्तश्चर्त्तवस्तस्याः समीयुः पतिना विना ।

तावत्यो भ्रूणहत्याः स्युस्तस्य यो न ददाति ताम् ॥

वसिष्ठोऽपि,

यावत्तु कन्यामृतवः स्पृशन्ति तुल्यैस्सकामामपि याच्यमानाम् ।

भ्रूणानि तावन्ति हतानि तासां मातापितृभ्यामिति धर्मवादः ॥

पितुः प्रमादात्तु यदीह कन्या वयःप्रमाणं समतीत्य तिष्ठेत् ।

सा हन्ति दातारमदीयमाना कालातिरिक्ता गुरुदक्षिणेव ॥

यमोऽपि,

कन्या नर्त्तुमुपेक्षेत बान्धवेभ्यो निवेदयेत् ।

न चेत्प्रदद्युस्तां तत्र ते स्युर्भ्रूणहनः समाः ॥

बौधायनोऽपि,

त्रयाचते च देयं स्यात्रयाचते च पृथक् पृथक् ।

एकैकस्मिन्नृतौ दोषं पातकं मनुरब्रवीत् ॥

त्रीणि वर्षाण्यृतुमतीं यः कन्यां न प्रयच्छति ।

स तुल्यं भ्रूणहत्याया दोषमृच्छत्यसंशयः ॥

गौतमोऽपि,

त्रीन्कुमार्यृतूनतीत्य स्वयं युज्येतानिन्दितेनोत्सृज्य पैत्रानलं-
कारानाप्रदानं प्रागृतोरप्रयच्छन्दोषी प्राग्वाससः प्रतिपत्तेरित्येके ।

याज्ञवल्क्योऽपि,

अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ ।

यमपराशरापस्तम्बाः,

प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति ।
मासिमासि रजस्तस्याः पिबन्ति ऋतुशोणितम् ॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
प्राप्ते तु द्वादशे वर्षे रजः स्त्रीणां प्रवर्त्तते ॥

पराशरः,

माता चैव पिता चैव ज्येष्ठो भ्राता तथैवच ।
त्रयोऽपि नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥

पैठीनसिः, यावन्नोद्भिन्नौ स्तनौ तावद्देया अथ ऋतुमती भवति दाता प्रतिग्रहीता च नरकं प्राप्नोति पितामहः प्रपितामहश्चेति विष्ठायां जायते तस्मान्नग्निका देयेति ।

ऋतुमतीप्रतिग्रहे दोषमाह बृहस्पतिः,

यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ।
असम्भाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः ॥
वृषलीसङ्ग्रहीता यो ब्राह्मणो मदमोहितः ।
सततं सूतकं तस्य ब्रह्महत्या दिनेदिने ॥

आपस्तम्बः,

प्राप्ते च द्वादशे वर्षे रजः स्त्रीणां प्रवर्त्तते ।
यस्तां विवाहयेन्मोहात्स ज्ञेयो वृषलीपतिः ॥

अत्रिकश्यपौ,

यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥ इति ।

अत्र ब्राह्मणपदोपादानाद्ब्राह्मणस्यैवायं रजस्वलापरिणयननिषेधो न क्षत्रियादीनाम् । कुन्त्यादिषु तथा दर्शनात् । यत्तु—

कामामरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि ।

न त्वेवैनां प्रयच्छेत गुणहीनाय कर्हिचित् ॥

इति मनुवाक्यं, तद् गुणवद्वरप्रशंसार्थं न स्वार्थे प्रमाणम् ।

अथ स्वयंवरः ।

तत्र नारदः,

यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् ।
अनुज्ञया तस्य वरं परीक्ष्य वरयेत्स्वयम् ॥
सवर्णमनुरूपं च कुलरूपवयःश्रुतैः ।
सहधर्मं चरेत्तेन पुत्रांश्चोत्पादयेत्ततः ॥

ततस्तस्माद्वराव ।

याज्ञवल्क्यः,

गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम् ।

गम्यं कुलशीलादिभिर्गमनार्हम् ।

मनुरपि,

त्रीणि वर्षाण्युपासीत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्तारमधिगच्छेत्स्वयं यदि ।
नैनः किंचिदवाप्नोति न च यं साऽधिगच्छति ॥
अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा ।
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत् ॥
पित्रे दद्यान्न शुल्कं तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात् ॥

बौधायनः,

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।
ततश्चतुर्थवर्षे तु विन्देत सदृशं पतिम् ॥
अविद्यमाने सदृशे गुणहीनमपि श्रयेत् ।

वसिष्ठः, ऋतुमती त्रीणि वर्षाण्युपासीत ऊर्ध्वं त्रिवर्षेभ्यः पतिं विन्देत तुल्यम् ।

विष्णुः,

ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरम् ।
ऋतुत्रये व्यतीते तु प्रभवत्यात्मनस्सदा ॥

यमः,

कन्या द्वादश वर्षाणि सा ऽप्रदत्ता गृहे वसेत् ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् ॥
एवं चोपनता पत्नी नावमान्या कदाचन ।
न च तां बन्धकीं कुर्यान्मनुः स्वायम्भुवोऽब्रवीत् ॥

इदं च वर्षत्रयप्रतीक्षणं पित्रादीनां यत्नवतामपि केनचित्कारणेन दानासम्पत्तौ । ऋतुत्रयप्रतीक्षणं तु यथोक्तवरसम्पत्तावपि पित्रादीनामुपेक्षायाम् । तुल्यैस्सकामामपि याच्यमानामित्यादिपूर्वोक्तवासिष्ठवचनात् ।

अथ वधूवरयोः कूटविचारः ।

तत्र प्रश्नप्रकारमाह वसिष्ठः,

शुभे दिने दैवविदं त्वभिज्ञं ताम्बूलपुष्पाक्षतपूर्णपाणिः ।
गत्वा च गत्वा प्रणिपत्य पृच्छेन्निवेद्य तस्मै वरकन्ययोर्भम् ॥ इति ।

भमिति नाम्नोऽप्युपलक्षणम् ।

तथाच बृहस्पतिः,

विवाहसमये काले सुखासीनं शुभप्रदम् ।
दैवज्ञं भक्तितो गत्वा सम्पूज्यादौ यथाबलम् ॥
उडुनी नामनी चोक्त्वा संपृच्छेत्सकृदेव तम् । इति ।

दैवज्ञमनोहरे,

वर्णश्च वश्यं च मिथश्च तारा योनिश्च मैत्री खगयोर्गणश्च ।

भमेलको नाडिकशुद्धिरेते यथोत्तरं स्युर्बलिनोऽष्टभेदाः॥ इति।
एतेऽष्टौ कूटभेदा यथोत्तरम् उत्तरोत्तरं बलिनः गुरवोऽधिका वेदितव्याः। तत्र वर्णकूटलक्षणमाह—

नारदः,

रुष्यालिककर्कटा विप्राः सिंहमेषतुला नृपाः।
नृयुक्चापघटा वैश्या मृगकन्यावृषान्त्यजाः॥

जगन्मोहनेऽपि,

कर्कान्त्यवृश्चिका विप्राः क्षत्राः सिंहधनुस्तुलाः।
मेषयुग्मघटा वैश्याः शूद्रा वृषमृगाङ्गनाः॥

अन्त्यो मनिः। वर्णपरिग्रहे विशेषमाह—

नारदः,

झषालिकर्कटा विप्रास्तदूर्ध्वाः क्षत्रियादयः।
पुंवर्णराशेः स्त्रीराशौ समे हीने तथा शुभम्॥
वर्णज्येष्ठा तु या नारी वर्णहीनस्तु यः पुमान्।
विवाहं यदि कुर्वीत तस्या भर्त्ता विनश्यति॥

हीनवर्णे वरे उत्तमवर्णा नारी पतिघ्नी भवतीत्यर्थः।

अथ वश्यकूटः।

बृहस्पतिः,

मेषस्य वश्यौ सिंहाली कर्किजूकौ वृषस्य तु।
युग्मस्य कन्या वश्या स्यात्कर्किणश्चापवृश्चिकौ॥
तुला सिंहस्य वश्या स्यात्कन्याया यममत्स्यभे।
मृगकन्ये तु जूकस्य कर्की स्याद्वृश्चिकस्य तु॥
मीनश्चापस्य वश्यः स्यान्मकरो मीनवश्यकृत्।
कुम्भस्य कन्या वश्या स्यान्मीनो मेषस्य वश्यकृत्॥
एवं वश्यसमायोगे दंपत्योः प्रीतिरुत्तमा।

वश्याभावेऽपि दंपत्योर्विवाहः कलहप्रदः ॥

गर्गोऽपि

सिंहाली कर्किजूकौ च कन्या वृश्चिककार्मुकौ ।
तुला मीनयमौ नक्रः कन्याकर्कटकौ तिमिः ॥
मेषकुम्भावजो नक्रो मेषादेर्वश्यराशयः ।
एतानि वश्यकूटानि दंपत्योः शुभसंपदे ॥

अलिर्वृश्चिकः । जूकस्तुला । युग्मं मिथुनम् । यमौ मिथुनम् । मत्स्यभं मीनः । नक्रो मकरः ।

श्रीधरोऽपि,

मेषे वृश्चिकसिंहौ च वृषे कर्कटकस्तुला ।
मिथुने कन्यका वश्यं कर्कटे धनुवृश्चिकौ ॥
सिंहे वश्यस्तुला चैव युवत्यां मीनको यमः ।
तौल्या वश्यं मृगश्चैव वृश्चिके कन्यकर्कटौ ॥
चापे मीनमिदं वश्यं मकरे मेषकुम्भयोः ।
कुम्भे मीनमिदं वश्यं मीने च मकरस्तथा ॥ इति ।

वश्यानाह चिन्तामणिः,

हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः ।
सर्वेऽपि सिंहस्य वशे विनाऽलिं ज्ञेयं नराणां व्यवहारतोऽन्यत् ॥

नरराशयो मिथुनकन्यातुलाः । एवां मेषादयस्सर्वेऽपि सिंहं त्यक्त्वा वश्याः । ननु जलचराणां सहानवस्थानात्कथं वश्यत्वं तत्राह । जलजाश्च भक्ष्या इति । एषां नरराशीनां जलजाः मकरकुम्भमीनकर्कास्तु भक्ष्याः किं पुनर्वश्या इति सूचयितुं तुशब्दः । सिंहस्यालिं वृश्चिकं विना सर्वे वश्याः । अन्यदनुक्तं चतुष्पदानां जलचराणां वश्यावश्यं नराणां मनुष्याणां व्यवहारतो ज्ञेयम् । वश्यकूटं वश्यभक्ष्यवैरभेदेन त्रिधा । तत्र नरराशेः स्त्रीराशौ वश्ये

सति गुणद्वयम् । भक्ष्ये एको गुणः । वैरे गुणाभावः । अस्याप-
वादमाह—

वसिष्ठः,

विवाहकरणे नृणामवश्यं वश्यमिष्यते ।
तदभावेऽपि राशिश्च गणरज्जुयुतः शुभः ॥ इति ।

अथ ताराकूटम् ।

संग्रहे,

जन्म संपत् विपत् क्षेम प्रत्यरिः साधको वधः ।
मैत्रं परममैत्रं च जन्म चेति पुनः पुनः ॥
स्त्रियो वै जन्मताराया विपत्प्रत्यरिनैधनाः ।
पर्याये प्रथमे वर्ज्या द्वितीयाद्यचतुष्टयः ॥
तारास्त्याज्याः तृतीये तु सर्वास्ताराश्च शोभनाः ।

बृहस्पतिः,

आद्यसंविपदाख्यर्क्षे मत्परौ च चतुर्थकम् ।
वधाख्ये च तृतीयांशं विना शेषा न शोभनाः ॥

नारदः,

स्त्रीभमारभ्य गणने नव पर्यायतः क्रमात् ।
जन्मत्रिपञ्चमसप्तं पुंभं स्याद्धननाशनम् ॥
पुम्भमारभ्य गणने स्त्रीभं जन्मादिके स्थले ।
स्त्रीविनाशो भवेत्तस्माद्दिनकूटं विवर्जयेत् ।

अस्यापवादः सङ्ग्रहे,

स्त्रीदीर्घगणसद्भावे दिनं यदि न विद्यते ।
तथापि दिनमस्त्येव चन्द्रताराबलान्विते ॥

गर्गोऽपि,

स्त्रीदीर्घगणयोस्सत्त्वे चन्द्रताराबले सति ।

अतस्तत्र दिनकूटस्य न दोषं जनयेद् ध्रुवम् ॥
दिनकूटमिति ताराकूटस्यैव संज्ञान्तरम् ।
चन्द्रताराबलमत्र जन्मलग्नकालीनं वेदितव्यम् ।

अथ योनिकूटम् ।

तत्र वसिष्ठः,
अश्वेभमेषभुजगद्वयकुक्कुरौतु-
मेषोतुमूषकमथोन्दुरुगोलुलायाः ।
शार्दूलमाहिषगवारिमृगद्वयञ्च
कीशोऽथ बभ्रुयुगकीशगजाश्वसिंहाः ॥
गोकुञ्जराविति यथाक्रममाश्विनादे-
र्भानां भवन्ति खलु कल्पितयोनिरूपाः ।
आसां वैरमाह स एव,
बभ्रूरगं श्वैणमिभेन्द्रसिंहमोत्वाखुसंज्ञं त्वजवानरं च ।
गोव्याघ्रमश्वोत्तममाहिषं च वैरं नृनार्योर्नृपभृत्ययोश्च ॥
ओतुर्बिडाळः । लुलायो महिषः । गवारिर्व्याघ्रः । कीशो वानरः । बभ्रुर्नकुलः । युगं नक्षत्रद्वयम् । एवं द्वयशब्देऽपि द्रष्टव्यम् ।
अस्यापवादमाह स एव,
योनेरभावे नोद्वाहस्तु कार्यो वियोगदः ।
राशिमैत्र्यं च यद्यस्ति कारयेन्न तु दोषभाक् ॥
अस्य फलमाह अत्रिः,
एकयोनिषु सम्पत्यै दंपत्योः सङ्गमस्सदा ।
भिन्नयोनिषु मध्यः स्यादरिभावे नचैतयोः ॥
बृहस्पतिः,
अरिभावकृतोद्वाहः शीघ्रं मरणमाप्नुयात् ।

अथ ग्रहमैत्री ।

तत्र वसिष्ठः,

रवेः समो ज्ञः सितसूर्यपुत्रावरी परे ये सुहृदोऽम्बराटाः ।
चन्द्रस्य नारी रविचन्द्रपुत्रौ मित्रे समाः शेषनभश्चराः स्युः ॥
समौ सितार्कौ शशिजश्च शत्रुर्मित्राणि शेषाः पृथिवीसुतस्य ।
शत्रुः शशी सूर्यसितौ च मित्रे समाः परे स्युः शशिनन्दनस्य ॥
गुरोर्ज्ञशुक्रावरिसंज्ञकौ तौ शनिः समोऽन्ये सुहृदो ग्रहेन्द्राः ।
शुक्रस्य मित्रे बुधसूर्यपुत्रौ समौ कुजार्काविंतरावरी तौ ॥
शनेस्समो वाक्पतिरिन्दुभानुः शुक्रश्च मित्रे रिपवः परे स्युः ।
एवं ग्रहाणां चतुराननेन शत्रुत्वमित्रत्वसमत्वमुक्तम् ॥

अम्बराटाः ग्रहाः ।

अस्याः फलमाह स एव,

अन्योन्यमित्रं शस्तं स्यात्समभिन्नं तु मध्यमम् ।
उदासीनं कनिष्ठं स्यान्मृतिदं शात्रवं स्मृतम् ॥
शत्रुमित्रं च विज्ञेयं दंपत्योः कलहप्रदम् ।
अन्योन्यं समशत्रुत्वं दंपत्योर्विरहप्रदम् ॥

अस्यापवादमाह स एव,

राशिनाथे विरुद्धेऽपि सबलांवंशकाधिपौ ।
तन्मित्रेऽपिच कर्त्तव्यं दंपत्योः शुभमिच्छता ॥
राशिनाथे विरुद्धेऽपि मित्रत्वे चांशनाथयोः ।
विवाहं कारयेद्धीमान् दंपत्योस्सौख्यवर्धनम् ॥
स्त्रीदीर्घे रज्जुकूटे च राशौ नाड्यां स्थिते सति ।
ग्रहाणां मैत्र्यमात्रेऽपि विवाहः शुभदो भवेत् ॥

राशिनाथानाह श्रीधरः,

मेषवृश्चिकपतिर्महीसुतो भार्गवो वृषतुलाधरेश्वरः ।
बोधनस्तु मिथुनाङ्गनापतिर्भास्करिर्मकरकुम्भनायकः ॥

सिंहकर्कटकयोरिनोडुपौ मन्मथस्य पतिरिन्द्रपूजितः ।
अंशका नवनव व्यवस्थिताः शौनकादिमुनिभिः प्रकीर्तिताः ॥
इति ।

अथ गणकूटम् ।

तत्र वसिष्ठः,
दस्रादितीज्यमृगमैत्रकरानिलान्त्य-
लक्ष्मीशभानि नव देवगणः प्रदिष्टः ।
पूर्वात्रयान्तकविधातृहरोत्तराणि
धिष्ण्यानि मानुषगणोऽत्र नव प्रदिष्टः ॥
पित्र्याद्विदैवाग्निशतेन्द्रमूलवस्वाहिचित्रर्क्षगणोऽसुराख्यः ।
देवासुराणां मनुजासुराणां वैरं महत्स्नेहमथेतरेषाम् ॥
अस्यार्थमाह श्रीधरः,
अश्वी मृगशिरो हस्तस्वाती पुष्यपुनर्वसू ।
मैत्रश्रवणरेवत्य एते देवगणाः स्मृताः ॥
भरणी रोहिणी चैव आर्द्रा पूर्वात्रयं तथा ।
त्रीण्युत्तराणि विज्ञेया मानुषाः परिकीर्त्तिताः ॥
ज्येष्ठामूलमघाश्लेषाविशाखास्वात्वाष्ट्रवारुणाः ।
कृत्तिका च धनिष्ठा च राक्षसास्तु प्रकीर्त्तिताः ॥ इति ।
गणविशेषेणोत्तमाधमव्यवस्थां फलं चाह—
नारदः,
स्ववर्गे चोत्तमं विद्यान्मध्यमं दैवमानुषम् ।
वैरं क्षितिजदेवेषु मरणं मानुषासुरे ॥
देवासुरगणे पुंसि यदि स्त्री मानुषे गणे ।
एतावुत्तममध्याख्यौ विपरीतौ न शोभनौ ॥
राक्षसी यदि वा नारी नरो भवति मानुषः ।

मृत्युस्तत्र न सन्देहो विपरीतः शुभावहः ॥
पुत्रमित्रकलत्रादियोगः स्वांशे सुशोभनः ।
मध्यमो नृसुरांशे च जघन्या देवराक्षसाः * ॥

---

* एतदनन्तरं पत्रद्वयपत्रपर्याप्तग्रन्थस्त्रुटितोऽस्ति । पुस्तकान्तराभावान्न मुद्रितः ।

तत्र वर्षेशमासेशज्ञानं सूर्यसिद्धान्तेनोक्तम्,

मासाब्ददिनसंख्याप्तं द्वित्रिघ्नं रूपसंयुतम्

सप्तोद्धृतावशेषौ तु विज्ञेयौ मासवर्षपौ ॥ इति।

अयनर्तुस्वामिज्ञानमाह शौनकः,

अयनादयनं सूर्यो दिने यस्य तु गच्छति।

अमृतं तस्य विज्ञेयं शुभं वा यदि वाऽशुभम् ॥

शुक्रारचन्द्रसौम्यानां गुरोर्मन्दस्य च क्रमात्।

अत्र सर्वत्र विरुद्धतिथिवारनक्षत्रेषु सिद्धियोगे सति विवाहः कार्यः।

तदुक्तं व्याससंहितायाम्,

शनैश्चरादिने प्राप्ते यदा रिक्ता तिथिर्भवेत्।

तस्मिन्विवाहिता कन्या सर्वसौख्यैस्समेधते ॥

रिक्ता शनिदिने चेत्स्यात्स्थिता पतिगृहे सदा।

चन्द्रस्य च दिने ऽप्येवं किन्तु सापत्न्यमाप्नुयात् ॥

बृहस्पतिः,

रविवारे शुभं कर्म कर्त्तव्यं योगतः शुभे।

योगाच्छुभे कुजे मन्दे कन्योद्वाहादि कारयेत् ॥ इति।

बृहस्पतिः,

पौष्णोत्तरामघाहस्तमूलं श्रवणसप्तभाः।

सूर्यवारयुता दोषहालाहलगणोद्धराः ॥

मित्रोऽश्विन्यर्यमा पूषा साहिर्बुध्न्या च रोहिणी।

भौमवारेण संयुक्ता योगाः स्युर्दोषघस्मराः ॥

श्रवण इति अभिजितोऽप्युपलक्षणम्। तेन सप्तभत्वं मिध्यति। अहिर्बुध्न्यः उत्तराभाद्रपदा। दोषघस्मराः दोषभक्षकाः।

कृत्तिकारोहिणीस्वातीशततारार्कवारणाः।

शुभयोगा महादोषकैरव्यादित्यवर्चसः ॥ इति ।
कैरव्यं कुमुदसमूहः ।

अथ नक्षत्राणि ।

तत्र वसिष्ठः,
तिस्रोत्तरामूलमघान्त्यमैत्रप्राजेशचन्द्रार्कसमीरभेषु ।
तदा प्रशस्तः खलु कन्यकानां पाणिग्रहोऽन्येषु विवर्जितस्तु ॥
वात्स्यः,
उत्तरात्रितयं सौम्यं प्राजापत्यं तथाऽनिलम् ।
हस्तो मूलं तथा मैत्रं पूषदैवतमेव च ॥
विवाहे निर्दिशेद्धर्मयशोऽर्थी कालवित्सदा ।
उक्तवर्ज्येषु या मोहात्कन्यका परिणीयते ॥
सा भर्तृमरणव्याधिशोकदारिद्र्यभागिनी ।
अत्र विशेषश्चतुर्वर्गचिन्तामणौ कालखण्डे,
आद्ये मघाचतुर्भागे नैर्ऋतस्याद्यएव च ।
रेवत्यन्तचतुर्भागे विवाहः प्राणनाशनः ॥
षड्भागशेषेष्वन्येषु नक्षत्रेषु न दृश्यते । इति ।
नक्षत्रफलानि तु विस्तरभयान्नेहोच्यन्ते ।

अथ योगाः ।

तांश्च फलमुखेनाह शौनकः,
व्यतीपातवज्रवैधृतिपरिघे शूले च वित्तहानिः स्यात् ।
सौभाग्यसुखानि स्युः प्रीत्यादिषु शेषयोगेषु ॥ इति ।

अथ करणानि ।

तत्र बृहस्पतिः,
शकुन्यादिचतुष्केषु करणेष्वपि विष्टिषु ।
कुलिकेषु शुभं वर्ज्यमशुभान्यत्र कारयेत् ॥

गुणायुतैर्युतेऽप्यस्मिन् शकुन्यादिचतुष्टये ।
काले नैव शुभं सर्वं कृतं सम्यग्विनश्यति ॥ इति ।

शौनकोपि,

ध्रुवकरणैः शकुनाद्यैः पाणिग्रहणे ध्रुवो भवति मृत्युः ।
मासान्मासत्रितयाद्द्विशतिरात्रात्तथाऽब्दार्धात् ॥ इति ।

अथ लग्नानि ।

श्रीधरीये,

श्रेष्ठास्तौलियमाङ्गनाघटधनुर्गोकार्किकण्ठीरवाः
मध्यास्सौम्ययुतास्तथोर्ध्ववदनास्सर्वे विवाहे हिताः ।

विवाहपटलेऽपि,

कन्यातुलामिथुनघटेषु विवाहकर्म
श्रेष्ठं तदन्यभवनेषु शुभावहं स्यात् ।
केचित्प्रशस्तमपि तेषु वदन्ति तज्ज्ञा
बाहुल्ययोगरतितश्चरभेषु योगाः ॥

नारदस्तु अभिजिद्गोधूलिकयोः शुभत्वमाह,

चतुर्थमभिजिल्लग्नमुदयर्क्षाच्च सप्तमम् ।
गोधूलिकं तदुभयं विवाहे पुत्रपौत्रदम् ॥
प्राच्यानां च कलिङ्गानां मुख्यं गोधूलिकं स्मृतम् ।
अभिजित्सर्वदेशेषु मुख्यदोषविनाशकृत् ॥
मध्यंदिनगते भानौ मुहूर्तोऽभिजिदाह्वयः ।
नाशयत्यखिलं दोषं पिनाकी त्रिपुरं यथा ॥

संहितान्तरेऽपि,

मध्यंदिनगते भानौ सकलं दोषसञ्चयम् ।
दहत्येवाभिजिल्लग्नं तूलराशिमिवानलः ॥ इति ।

अथ लग्नफलानि ।

तत्र वराहः,

क्रिये कुमारी पररक्तचित्ता विहीनवित्ता गवि गोव्रता च ।
कुलद्वयानन्दकरी तृतीये कुलीरलग्ने कुलटा नृशंसा ॥
हरौ प्रसूता सकृदाश्रिता पितुः पतिप्रिया च श्वशुरस्य षष्ठे ।
रूपाभिमानार्थवती तुलाधरे तथालिनि क्रन्दति नित्यमस्थिरा ॥
धनुषि कुलटा तत्पूर्वार्द्धे सतीत्यपरे जगुः ।
मृगघटझषेष्वन्यासक्ता जरामुपगच्छति ॥ इति ।

क्रियो मेषः । गौर्वृषः । तृतीयं मिथुनम् । कुलीरः कर्कः । हरिः सिंहः । षष्ठं कन्या । अलिर्वृश्चिकः । मृगो मकरः । अथ प्रत्येकं नवांशकफलम् ।

तत्र वसिष्ठः,

द्विभर्तृका मेषनवांशके स्यात् वृषांशके स्यात् पशुशीलयुक्ता ।
धनान्विता पुत्रवती तृतीये कुलीरकांशे कुलटाऽतिहिंस्रा ॥
सिंहांशके सा पितृमन्दिरस्था कन्यांशके वित्तयुता सुशीला ।
चापांशकाद्ये धनिनी द्वितीयभागेऽन्यसक्ता मलिना गदार्त्ता ।
निःस्वा मृगांशे विगुणा घटांशे विभर्तृका योगरता विशीर्णा ॥
मीनांशके भर्तृसुतार्थहीना शुभग्रहैर्युक्तनिरीक्षितेऽपि ।
तस्मात्तदैवोक्तनवांशकेषु कुर्याद्विवाहं गुणसम्प्रवृद्धौ ॥
अन्त्यांशकश्चेद्धि शुभांशकानां मध्ये य एको न शुभप्रदस्तः ।
स एव वर्गोत्तमसंज्ञकश्चेच्छुभप्रदश्चाखिलमङ्गलेषु ॥

तथा,

वर्गोत्तमं विनाऽन्त्यांशे विवाहो न शुभप्रदः । इति ।

अथ लग्ने एकविंशतिमहादोषाः ।

तत्र नारदः,

एकविंशतिदोषाणां नामरूपफलानि च ।

पितामहोक्तं संवीक्ष्य तानि वक्ष्ये समासतः ॥
पञ्चाङ्गशुद्धिरहितो दोषस्त्वाद्यः प्रकीर्त्तितः ।
उदयास्तशुद्धिहीनो द्वितीयः सूर्यसंक्रमः ॥
तृतीयः पापषड्वर्गो भृगुषष्ठः कुजाष्टमः ।
गण्डान्तकर्त्तरी रिःफषडष्टेन्दुश्च सङ्ग्रहः ॥
दंपत्योरष्टमं लग्नं राशिर्विषघटी तथा ।
दुर्मुहूर्तो वारदोषः खार्ज्जूरिकसमाङ्घ्रिभम् ॥
ग्रहणोत्पातभं क्रूरविद्धर्क्षं क्रूरसंयुतम् ।
कुनवांशो महापातो वैधृतिश्चैकविंशतिः ॥ इति ।

अथ पञ्चाङ्गशुद्धिलक्षणम् ।

तत्र स एव,

तिथिवारर्क्षकरणयोगाः पञ्चाङ्गसंज्ञिताः ।
पञ्चाङ्गस्य च या शुद्धिः पञ्चशुद्धिरुदाहृता ॥
तच्छुद्धिहीने यत्कर्म तन्निरर्थकमीरितम् ।
त्यजेत्पञ्चाष्टिकं चापि विषसंयुक्तदुग्धवत् ॥ इति ।

पञ्च अष्टयो यस्मिन्निति पञ्चाष्टिकम् ।
अष्टिः हानिः दोष इति यावत् ।

अथोदयास्तशुद्धिः ।

तत्र नारदः,

लग्नलग्नांशकौ स्वस्वपतिना वीक्षितौ युतौ ।
नचेद्वाऽन्योन्यपतिना शुभमित्रेण वा तथा ॥
वरस्य मृत्युः स्यात्ताभ्यां सप्तमस्तोदयांशकौ ।
एवं तौ न युतौ दृष्टौ मृत्युर्वध्वाः करग्रहे ॥ इति ।

अथ संक्रान्तिदोषः ।

नारदः,

त्याज्याः सूर्यस्य सङ्क्रान्तेः पूर्वतः परतस्तथा ।
विवाहादिषु कार्येषु नाड्यः षोडशषोडश ॥
अत्र संक्रान्तिपदं हरिपदषडशीतिमुखपरम् । विषुवदयन-योर्दिनत्रयं परिहार्यत्वस्मरणात् ।
तथाच वसिष्ठः,
विषुवतोरयनयोर्दिनत्रयं हरिपदेषु षडशीतिमुखेषु ।
पूर्वतोऽपि परतोऽपि संक्रमान्नाडिकाश्च खलु षोडश त्यजेत् ॥
इति ।

अथ षड्वर्गशुद्धिः ।
नारदः,
त्रिंशद्भागात्मकं लग्नं होरा तस्यार्द्धमुच्यते ।
लग्नत्रिभागो द्रेष्काणो नवांशोऽपि नवांशकः ॥
द्वादशांशो द्वादशांशस्त्रिंशांशस्त्रिंशदंशकः ।
षड्वर्गाः कथिता ह्येते तेषामीशा इमे स्मृताः ॥
मेषवृश्चिकयोर्भौमस्तुलावृषभयोः सितः ।
कन्यामिथुनयोर्बोधः कर्कटस्य पतिः शशी ॥
चापान्त्ययोर्गुरुः स्वामी शनिर्मकरकुम्भयोः ।
रविः सिंहस्य चैतेषामंशानामधिपा इमे ॥
शुक्रचन्द्रज्ञगुरवः शुभा अन्ये शुभेतराः ।
क्षीणः शशी तथाऽन्ये च पापयुक्तो बुधोऽशुभः ॥
होरयोरोजराशौ तु रवीन्दू क्रमतः पती ।
समराशौ तु चन्द्रार्कौ होरेशौ क्रमशो वदेत् ॥
स्युर्द्रेष्काणेषु चाद्येषु नव राशीश्वराः क्रमात् ।
नवमांशा मेषसिंहचापस्त्रजादयः क्रमात् ॥
क्रमाद्वृषमृगकन्यासु ज्ञेयाः स्युर्मकरादयः ।

तुलामिथुनकुम्भेषु स्युः क्रमेण तुलादयः ॥
अलिकर्कटमीनेषु क्रमात्स्युः कर्कटादयः।
लग्नराशिं समारभ्य द्वादशांशेश्वराः क्रमात् ॥
कुजार्कीज्यज्ञशुक्राणां बाणेष्वष्टाद्रिमार्गणाः।
भागाः स्युर्विषमे ते तु समराशौ विपर्ययात् ॥
षड्वर्गो भवति सदा शुभखचरसमुद्भवः शुभदः।
पापसमुत्थस्त्वशुभस्तस्माद् ग्राह्यस्तु सौम्यषड्वर्गः ॥ इति।

अथ भृगुषष्ठदोषः।

नारदीये,

भृगुषष्ठाष्टमो दोषो लग्नादष्टगते सिते।
उच्चगे शुभसंयुक्ते तल्लग्नं सर्वथा त्यजेत् ॥ इति।

अथ कुजाष्टमदोषः तत्रैव,

कुजोऽष्टमो महादोषो लग्नादष्टमगे कुजे।
शुभत्रययुतं लग्नं त्यजेन्न तुङ्गगे यदि ॥ इति।

अथ गण्डान्तदोषः।

नारदीये,

पूर्णानन्दाख्ययोस्तिथ्योस्सन्धिर्नाडीद्वयं सदा।
गण्डान्तं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु ॥

अथ नक्षत्रगण्डान्तः।

सार्पेन्द्रपौष्णभेष्वन्त्यषोडशांशा भसन्धयः।
तदग्रेष्वाद्यपादांशभाना गण्डान्तसंज्ञकाः ॥
उग्रं च सन्धित्रितयं गण्डान्तत्रितयं महत्।
मृत्युप्रदं जन्मयानविवाहस्थापनादिषु ॥

अथ लग्नगण्डान्तः।

कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः।

गण्डान्तमन्तरालं स्याद् घटिकार्द्धं मृतिप्रदम् ॥ इति ।

अथ कर्त्तरीदोषः ।

नारदीये,

लग्नाभिमुखयोः पापग्रहयोरुभयस्थयोः ।
सा कर्त्तरीति विज्ञेया दम्पत्योर्गलकर्त्तरी ॥
कर्त्तरीदोषदुष्टं यत्तल्लग्नं परिवर्जयेत् ।
अपि सौम्यग्रहैर्युक्तं गुणैः सर्वैः समन्वितम् ॥ इति ।

अस्यापवादमाह वसिष्ठः,

पापयोः कर्त्तरीकर्त्रोर्नीचशत्रुगृहस्थयोः ।
यदा चास्तगयोर्वापि कर्त्तरी नैव दोषदा ॥ इति ।

अथ रिःफषडष्टेन्दुदोषः तत्रैव,

षडष्टरिःफगे चन्द्रे लग्नाद्दोषः स्वसंज्ञकः ।
तल्लग्नं वर्जयेद्यत्नाज्जीवशुक्रसमन्वितम् ॥
उच्चगे नीचगे चापि मित्रगे शत्रुराशिगे ।
अपि सर्वगुणोपेतं दम्पत्योर्निधनप्रदम् ॥

अस्यापवादमाह वसिष्ठः,

जन्मेशमृत्युराशीशौ मिथो मित्रे यदा तदा ।
जन्माष्टमर्क्षे चन्द्रश्च दोषं भङ्गं समाप्नुयात् ॥ इति ।

अथ सङ्ग्रहदोषः ।

नारदः,

शशाङ्के ग्रहसंयुक्ते दोषः सङ्ग्रहसंज्ञकः ।
तस्मिन् सङ्ग्रहदोषे तु विवाहं नैव कारयेत् ॥
सूर्येण संयुते चन्द्रे दारिद्र्यं भवति ध्रुवम् ।
कुजेन मरणं व्याधिः सौम्येन त्वनपत्यता ॥
दौर्भाग्यं गुरुणा युक्ते सापत्न्यं भार्गवेण तु ।

प्रकृत्या सूर्यपुत्रेण राहुणा कलहं सदा ॥
केतुना संयुते चन्द्रे नित्यं कष्टदरिद्रता ।
पापग्रहयुते चन्द्रे दम्पत्योर्मरणं भवेत् ॥
शुभग्रहयुते चन्द्रे स्वोच्चस्थे मित्रराशिगे ।
दोषाय न भवेल्लग्नं दम्पत्योः श्रेयसे सदा ॥
स्वक्षेत्रगः स्वोच्चगो वा मित्रक्षेत्रगतो यदि ।
पापग्रहयुतश्चन्द्रः करोति मरणं तयोः ॥
अथाष्टमलग्नदोषः तत्रैव,
दम्पत्योरष्टमं लग्नम् अष्टमो राशिरेव वा ।
यदि लग्नगतः सोऽपि दम्पत्योर्मरणप्रदः ॥
स राशिः शुभसंयुक्तो लग्नं वा शुभसंयुतम् ।
लग्नं विवर्जयेद्यत्नात्तदंशांश्च तदीश्वरान् ॥
दम्पत्योर्द्वादशं लग्नं राशिर्वा यदि लग्नगः ।
अर्थहानिस्तयोर्यस्मात्तदंशस्वामिनं त्यजेत् ॥
जन्मराश्युदगमं चैवं जन्मलग्नोदयं शुभम् ।
तयोरुपचयस्थानं यदि लग्नगतं शुभम् ॥
अस्यापवादमाहतुः कश्यपबृहस्पती,
जन्मेशाष्टमलग्नेशौ मिथो मित्रे व्यवस्थितौ ।
जन्मराश्यष्टमर्क्षोत्थदोषो नश्यति भावतः ॥
कालदीपे,
कर्त्तुः षष्ठं सजेल्लग्नं क्षौरोद्वाहगतीर्विना ।
मृतिं व्ययं च सर्वत्र एकमित्राधिपादृतः ॥ इति ।
अथ विषघटिकादोषः नारदीये,
खमार्गणा ५० वेदपक्षाः २४ खरामा ३० व्योमसागराः ४० ।
अब्धिचन्द्रा १४ रूपदस्राः २१ खरामा ३० व्योमबाहवः २० ॥

द्विरामाः ३२ खाग्नयः ३० शून्यदस्राः २० कुञ्जरभूमयः २८।
रूपपक्षाः २१ व्योमदस्राः २० वेदचन्द्राः१४ चतुर्दश १४॥
शून्यचन्द्रा १० वेदचन्द्राः १४ षडक्षा ५६ वेदबाहवः २४।
शून्यदस्राः२० शून्यचन्द्राः १० पूर्णचन्द्रा १० गजेन्दवः १८॥
तर्कचन्द्राः १६ वेदपक्षाः २४ खरामा ३० श्वाश्विभात्क्रमात्।
आभ्यः पराः स्युर्घटिकाश्चतस्रो विषसंज्ञिताः॥
विवाहादिषु कार्येषु विषनाडीश्च वर्जयेत। इति।
अथ दुर्मुहूर्त्तदोषः तत्रैव,
भास्करादिषु वारेषु ये मुहूर्त्ताश्च निन्दिताः।
विवाहादिषु ते वर्ज्या अपिलक्षगुणैर्युताः॥
मुहूर्तलक्षणमाह कश्यपः,
अह्नः पञ्चदशो भागो मुहूर्त्तोऽथ तथा निशि। इति।
तांश्चाह श्रीपतिः,
रुद्राहिमित्रपितरो वसुवारिविश्वा
वेधा विधिः शतमुखः पुरुहूतवह्नी।
नक्तञ्चरेशवरुणः यमयोनयश्च
प्रोक्ता दिने दश च पञ्च तथा मुहूर्त्ताः॥
निशामुहूर्त्ता गिरिशाजपादाहिर्बुध्न्यपूषाश्वियमाग्नयश्च।
विधातृचन्द्रादितिजीवविष्णुतिग्मद्युतित्वष्टृसमीरणाश्च॥ इति।
एतांस्तु वारविशेषेण वर्जनीयानाह वसिष्ठः,
आर्यम्णो भानुवारे शशिधरदिवसे राक्षसब्राह्मसंज्ञौ
पित्राग्नेयौ कुजाहे शशिसुतदिवसे योऽभिजित्संज्ञकस्तु।
जीवाहे राक्षसाख्यो भृगुसुतदिवसे राक्षसब्राह्मसौम्याः
सौराहेते त्रिवर्ज्याः स्मरमाथनदा मङ्गले दुर्मुहूर्त्ताः॥
घारस्य लक्ष्मीं निखिलां निहन्ति संवत्सरार्धे कुमुहूर्तदोषः।

दुर्वाससः शाप इव प्रमत्तमहेन्द्रलक्ष्मीमसमां समग्राम् ॥
करोति नष्टं कुमुहूर्त्तदोषः कुमारमुद्राहितमाशु नूनम् ।
सप्ताङ्गराज्योत्कटराजरत्नं नयं यथा द्यूतकिरातवर्त्मा ॥ इति ।

अथ वारदोषः नारदीये,

न हिता वारदोषा ये सूर्यवारादिषु क्रमात् ।
अपि सर्वगुणोपेतास्ते वर्ज्याःसर्वमङ्गले ॥

तत्र वारदोषलक्षणमाह संग्रहः,

अहःप्रमाणं वसुधा विभज्य तद्वारगः स्यात्प्रथमोऽन्त्यभागः ।
शेषाः षडंशाः क्रमशोऽपि नेयाः शनेस्तु भागाः कुलिका वदन्ति॥
शन्यंशः कुलिको ज्ञेयो गुर्वंशो यमघण्टकः ।
अर्द्धप्रहरसौम्यांशो ह्यर्कांशः कालसंज्ञकः ॥ इति ।

अस्यार्थः । वारस्याहःप्रमाणमष्टधा विभज्य तत्र प्रथमान्त्यभागौ वाराधिपत्यंशौ ज्ञेयौ । शेषाः क्रमेण तद्ग्रहांशा भवन्ति । यः शन्यंशः स कुलिको भवति । यो बृहस्पत्यंशः स तु यमघण्टको भवति । यः सौम्यांशः सोऽर्द्धप्रहरसंज्ञकः । यस्त्वादित्यांशः स कालसंज्ञको भवति ।

एतेषां फलमाह बृहस्पतिः,

निधनं प्रहरार्द्धे तु निःस्वत्वं यमघण्टके ।
कुलिके सर्वनाशः स्याद्रात्रावेते न दोषदाः ॥

वसिष्ठः,

कुलिके निधनं विभाद्यमघण्टेऽर्थनाशनम् ।
यामार्द्धे कार्यनाशश्च प्रोक्तो यामार्द्धसंख्यया ॥
निशासु वारप्रभवा हि दोषास्त्याज्यास्सदा टङ्कणसंज्ञदेशे ।
दिवाऽपि त्याज्यकालप्रमाणमाह संग्रहकारः,

अर्द्धप्रहरकादौ तु मध्ये तु यमघण्टके ।

कुलिकेऽन्त्ये विवर्ज्याः स्युस्तिस्रो द्वे एकनाडिका ॥ इति ।

अथ खार्जूरिकदोषः । तल्लक्षणमाह—

श्रीपतिः,

एकामूर्ध्वगतां त्रयोदश तथा तिर्यग्गताः स्थापयेत्
रेखाचक्रमिदं बुधैरभिहितं खार्जूरिकं तत्र तु ।
व्याघातादिषु मूर्ध्नि भं तु कथितं तत्रैकरेखास्थयोः
सूर्याचन्द्रमसोर्मिथो निगदितो दृक्पात एकार्गले ॥ इति ।

अस्यार्थमाह स एव,

व्याघातशूलपरिघव्यतिपातपूर-
गण्डातिगण्डकुलिशेषु सवैधृतेषु ।
आदित्यचान्द्रपितृसार्पभदस्रमूल-
मैत्राख्यतिष्यसुरवर्द्धकिभानि मूर्ध्नि ॥

पूरो विष्कम्भः । कुलिशं वज्रः । सुरवर्द्धकिभं चित्रा । शेषाः प्रसिद्धाः । एतेषु पूर्वार्द्धोक्तेषु व्याघातादिषु नवसु योगेष्वन्यतमेन योगेन यथाक्रममपरार्द्धगतेषु पुनर्वस्वादिषु नवसु नक्षत्रेषु अन्यतमं नक्षत्रं योजयित्वा तन्नक्षत्रं मूर्ध्नि लेखनीयम् । तदारभ्य प्रादक्षिण्येन सर्वाणि नक्षत्राणि सर्वेषु रेखाग्रेषु लेखनीयानि । तत्र सूर्याचन्द्रमसौ एकरेखास्थौ यदा भवेतां तदा मिथस्तद्दृष्टिपातजनित एकार्गलदोषो भवेदिति । एकार्गल इति तस्यैव संज्ञान्तरम् ।

तथाच नारदीये,

एकार्गलसमाङ्घ्रिश्च तत्र लग्नं विवर्जयेत् ।
अपि शुक्रेऽप्यसंयुक्तं विषसंयुक्तदुग्धवत् ॥ इति ।

अथ ग्रहणोत्पातदोषः नारदीये,

ग्रहणोत्पातभं त्याज्यं मङ्गलेषु ऋतुत्रयम् ।
यावच्च रविणा भुक्तां मुक्तं तदग्धकाष्ठवत् ॥ इति ।

ग्रहणात्पुरः पश्चाच्च ग्राह्यदिनसंख्यामाह स एव,
उत्पातग्रहणादूर्ध्वं सप्ताहमखिलग्रहे।
नाखिले त्रिदिनं नेष्टं नेष्टं तद्वदृतुत्रयम्॥
ग्रस्तेऽस्ते त्रिदिनं पूर्वं पश्चाद्ग्रस्तोदये तथा।
सन्ध्यायां तु त्रित्रिदिनं विशेषे सप्तसप्त च॥
बृहस्पतिः,
पश्चादेवोपरागे तु दोषः स्यान्नैव पूर्वतः।
गृहदाहादयो दोषा यथा स्युर्दहनात्परम्॥ इति।
महोत्पातानाह स एव,
उल्कापाते महापाते महाशनिनिपातने।
नभोऽशनिनिपाते च भूकम्पपरिवेषयोः॥
ग्रामोत्पाते शिवाक्रन्दे दुर्निमित्ते न शोभनम्।
केतवो यत्र दृश्यन्ते स धूमा वा पृथग्विधाः॥
ग्रहाणां ग्रहणं चैव वर्जयेद्दिनसप्तकम्।
युद्धे ग्रहाणामन्योन्यं निर्घाते वा कुकम्पने॥
महोत्पातयुतात्कालात्सप्तरात्रं शुभं त्यजेत्। इति।
अथ क्रूरविद्धर्क्षदोषः नारदीये,
पङ्क्तेषु त्यजेत्क्रूरविद्धर्क्षं क्रूरसंयुतम्।
अखिलर्क्षं पञ्चगव्यं सुराबिन्दुयुतं यथा॥
पादएव शुभैर्विद्धं भाशुभं नैव कृत्स्नभम्।
क्रूरविद्धं युतं धिष्ण्यं निखिलं नैव याचतः॥
आद्येनान्त्यपदं बाध्यमन्त्ये नाद्यं तु बाध्यते।
द्वितीयेन तृतीयं स्यात्तृतीये न द्वितीयकम्॥ इति।
क्रूरविद्धनक्षत्रस्वरूपं च पञ्चशलाकाचक्रेण ज्ञातव्यम्।
तदुद्धारक्रममाह विवाहवृन्दावनम्,

याम्योत्तराः प्रागपराश्च पञ्च द्वे द्वे च रेखे विचरेद्विदिक्षु ।
विदिग्द्वितीयार्गलिताग्नितारं तत्रालिखेत्साभिजितं भवर्गम् ॥

इति ।

तस्मिन्नभिन्नाग्रगतं भिनत्ति ग्रहो विवाहर्क्षमशेषमेव ।
स्त्रीपुंसयोरायुरसौम्यवेधः सौम्यग्रहो हन्ति सुखानि शश्वत् ॥

इति ।

अथ प्रत्येकं वेधफलानि ।

तत्र वराहः,

रविवेधे वैधव्यं पुत्रविनाशं करोति कुजवेधः ।
वन्ध्या पण्डितवेधे दीक्षाकरणं करोति गुरुवेधः ॥
भृगुसुतवेधे पुत्री दासी रविजेन्दुराहुसम्भूतः ।
पण्डितो बुधः । दीक्षाकरणं प्रव्राजिकात्वम् ।

अथ कुनवांशदोषः नारदीये,

तुलामिथुनकन्यांशा धनुरन्त्यार्द्धसंयुताः ।
एते नवांशाः शुभदाः यदि नान्त्यांशकाः खलु ॥
अन्त्यांशास्तेऽपि शुभदाः यदि वर्गोत्तमाह्वयाः ।
अन्ये नवांशा न प्राह्या यतस्ते कुनवांशकाः ॥
कुनवांशकलग्नं यत् त्याज्यं सर्वगुणान्वितम् । इति ।
वर्गोत्तमलक्षणमाह वराहमिहिरः,
वर्गोत्तमाश्चरगृहादिषु पूर्वमध्य-
पर्यन्तगाः शुभफला नवभागसंज्ञाः । इति ।
अथ महापातवैधृतिदोषौ नारदीये,
यस्मिन्दिने महापातस्तद्दिनं वर्जयेच्छुभे ।
अपि सर्वगुणोपेतं दम्पत्योर्मृत्युदं यतः ॥ इति ।
सङ्ग्रहे तु,

महापातस्य वैधृत्या यावत्कालं स्थितिर्भवेत् ।
तावत्कालं त्यजेत्पूर्वं तावत्कालं त्यजेत्परम् ॥ इति ।
महापातवैधृतिलक्षणं तु सूर्यसिद्धान्ते,
एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा ।
तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः ॥
विपरीतायनगतौ चन्द्रार्कौ क्रान्तिलिप्तिकाः ।
समास्तदा व्यतीपातो भगणार्द्धे तयोर्युतौ ॥
तुल्यांशजालसम्पर्कात्तयोस्तु प्रवहाहतः ।
तादृक्क्रोधोद्भवो वह्निर्लोकाभावाय जायते ॥ इति ।
अथ दश दोषाः व्यवहारोच्चये,
वेधश्च लत्ता च तथा च पातः खार्ज्जूरवेधो दशयोगचक्रम् ।
युतिश्च जामित्रमुपग्रहाश्च बाणाख्यवज्रे दश चैव दोषाः ॥
तत्र वेधश्च पञ्चशलाकाचक्रे प्राङ् निरूपितः ।

अथ लत्ता ॥

तत्र श्रीपतिः,
ऋक्षं द्वादशमुष्णरश्मिरवनीसूनुस्तृतीयं गुरुः
षष्ठं चाष्टमसर्कजः स्वपुरतो हन्ति स्फुटं लत्तया ।
पश्चात्सप्तममिन्दुजः स्वनवमं राहुः सितः पञ्चमं
द्वाविंशं परिपूर्णमूर्त्तिरुडुपः सन्ताडयेत्तत्परः ॥

अथ पातः,

सूर्याधिष्ठितभाद् भुजङ्गपितृभत्वाष्ट्रेषु मैत्रे श्रुतौ
पौष्णे च क्रमशोऽश्विभाद्गणनया शीतांशुना संयुते ।
धिष्ण्ये तावतिथे पतत्यभिनवे चण्डीशचण्डायुधम्
तस्मिन्नात्महितैष्युभिर्निगदितं कार्यं न कार्यं बुधैः ॥ इति ।
अस्यार्थः । सूर्याक्रान्तनक्षत्रमारभ्य नक्षत्राणि रेखारूपाणि

लिखेत्। तन्मध्ये आश्लेषाचित्रामघानुराधाश्रवणरेवतीषु सङ्केतपत्यं कुर्यात्। पश्चादश्विन्यादिगणनया तावतिथे सङ्केतस्थाने पतितनक्षत्रे तीक्ष्णं खड्गायुधं पतति।

खार्जूरवेधोऽपि प्रागेव निरूपितः। अथ दशयोगचक्रम्।

व्यवहारोच्चये,

शून्यैकवेदऋतवो दशरुद्रयुक्ताः
पञ्चैकनागशिशिराश्च नवैकखाब्धि।
सोऽध्यर्क्षमिन्दुयुतभानुसमन्वितं च
भागश्च देय उडुभिर्दशयोगचक्रम्॥

लल्लः,

मरुन्मेघाग्निभूपाला मृत्युश्चोरो रुजोऽशनिः।
कलिर्हानिर्दशोद्वाहे सन्त्याज्यास्ते सदा बुधैः॥

अथ युतिः। विवाहवृन्दावने,

यस्मिन्भवने चन्द्रस्तस्मिन् यदि जायते ग्रहः कश्चित्।
युतिरतिदोषः स तदा ऽशुभयुक्ते केचिदिच्छन्ति।

अथ जामित्रम्।

जामित्रं द्विविधं प्रोक्तं गर्गगालवगौतमैः।
तस्माल्लग्नाच्च चन्द्राच्च जामित्रं परिवर्जयेत्॥

अथोपग्रहः विवाहवृन्दावने,

भूकम्पः सप्तमर्क्षे भवति सवितृभात्पञ्चमे विष्कमुल्का
शूलं चैवाष्टसंख्येऽशनिरिति दशमे केतुरष्टादशे च।
दण्डाख्यः पञ्चसंख्ये समवदशमिते मनमुल्का मदिष्टा
धिष्ण्ये द्विः सप्तसंख्ये मुनिभिरभिहितश्चात्र निर्घातपातः॥

भादेकविंशतिमितास्कथितास्तु मोह-
निर्घातकम्पकुलिशाः परिवेषयुक्ताः।

एषिन्दुगेषु न शुभं खलु कर्म कार्यं
सिद्धिं प्रयाति दहनाम्बुविषादिसाध्यम् ॥
अथ बाणः । ब्रह्मयामले,
गततिथियुतलग्नं पञ्चधा स्थापितं स्या-
त्तिथिरविदशनागैर्वेदयुक्तं क्रमेण ।
नवहृतशरशेषं यत्र तत्पञ्चकं स्याद्-
रुगनलनृपचौरं मृत्युदं वर्जनीयम् ॥
ज्योतिःप्रकाशे,
नृपाख्यं नृपसेवायां गृहगोपेऽग्निपञ्चकम् ।
याने चौरं व्रते रोगं विवाहे मृत्युपञ्चकम् ॥
रोगं चौरं त्यजेद्रात्रौ दिवा राजन्यपञ्चकम् ।
सन्ध्ययोर्मृत्युदं त्याज्यं सर्वदा वह्निपञ्चकम् ॥
तैलं रोगेऽनले होमं दद्यात्किङ्किणीं नृपेऽर्हणाम् ।
चौरे द्रव्यं जलं मृत्यौ पञ्चकारिष्टशान्तये ॥
फलप्रदीपे,
रवौ रोगं कुजे वह्निं शनौ च नृपपञ्चकम् ।
वर्ज्यं पुनः कुजे चौरं बुधवारे च मृत्युदम् ॥ इति ।
अथैकविंशतिमहादोषाणां मध्ये केषाञ्चिद्भङ्गा उच्यन्ते।
तत्र संग्रहदोषापवादः ।
तत्र वसिष्ठः,
स्वगृहविधुगृहोच्चस्सौम्यभागस्थितश्चेद्
गुरुरुपचययातः स्वांशगोऽसौ बलाढ्यः ।
यदि गुरुतरदोषा यान्ति नाशं यथैव
श्रुतिरपि समधीता पापनाशाय दृष्टा ॥
उदयभवनतोऽरिव्ययगोऽदित्यपापा

निजगृहगतसौम्याः प्राणिनः कण्टकस्थाः।
यदि शशिनि शुभस्थे कर्मणा प्रस्थिते वा
निजमुदयगदोषं नाशयेच्छीतरश्मिः॥
अथ पापांशस्थितचन्द्रदोषापवादः।
लग्ने केन्द्रे त्रिकोणे वा शुभस्थाने बलान्विते।
पापांशेन्दूत्थदोषौघं विजहाति न संशयः॥
स्ववर्गस्थः शुभः केन्द्रे त्रिकोणे वा स्वतुङ्गगः।
विधौ पापांशगे दोषाञ्जहाति बलसंयुतः॥
अथ दुर्मुहूर्त्तादिदोषापवादः।
मुहूर्त्तपापषड्वर्गकुनवांशग्रहोत्थिताः।
प्रदोषास्तांश्हिन्त्येव यत्रैकादशगः शशी॥
अथ वारदोषापवादः।
पापग्रहोऽपि वारेशो लग्नव्यायारिविचगः।
स्ववारकथितं दोषं न शुभोपरि यच्छति॥
पापग्रहोऽपि वारेशो लग्नाद् दुश्चिक्यगः शुभात्।
दृष्टास्ताराजितो वक्री शुभकर्माणि दुर्वहन्॥
दुश्चिक्यं तृतीयस्थानम्।
अथ कुलिकापवादः।
सौम्यग्रहेऽथ वारेशे बलाढ्ये लग्नगेऽथवा।
कुलिकोदयदोषोऽत्र नास्तीति श्रुतिचोदितम्॥ इति।
अथ यमकण्टकापवादः।
शुभांशे शुभकार्यस्थाशुभः केन्द्रे शुभेक्षितः।
लग्नादुपचये चन्द्री यमकण्टकनाशनः॥
अथ सर्वदोषभङ्गः।
नारदीये,

बृहस्पतिः केन्द्रगतः शुक्रो वा यदि वा बुधः ।
एतेषां दोषसङ्घानां करोत्येव विनाशनम् ॥
गुरुरेकोऽपि लग्नस्थः सकलं दोषसञ्चयम् ।
विनाशयति घर्मांशुरुदितस्तिमिरं यथा ॥ इति ।

अन्येऽपि दोषास्तदपवादाश्च ग्रन्थान्तरादवगन्तव्याः विस्तरभयान्नेहोच्यन्ते ।

अथ ग्रहसंस्थानम् ।

तत्र वराहः,

मूर्त्तौ करोति विधवां दिनकृत्कुजश्च
राहुर्विपन्नतनयां रविजो दरिद्राम् ।
शुक्रः शशाङ्कतनयश्च गुरुश्च साध्वीम्
आयुःक्षयं च कुरुतेऽथ विभावरीशः ॥
कुर्वन्ति भास्करशनैश्चरराहुभौमा
दारिद्र्यदुःखमतुलं नियतं द्वितीये ।
वित्तेश्वरीमविधवां गुरुशुक्रसौम्या
नारीं प्रभूततनयां कुरुते शशाङ्कः ॥
सूर्येन्दुभौमगुरुशुक्रबुधास्तृतीये
कुर्युः सदा बहुसुतां धनभागिनीं च ।
व्यक्तं दिवाकरसुतः सुभगां करोति
मृत्युं ददाति नियतं खलु सैंहिकेयः ॥
स्वल्पं पयः स्रवति सूर्यसुते चतुर्थे
दौर्भाग्यमुष्णकिरणः कुरुते शशी च ।
राहुः सपत्नमपि च क्षितिजोऽल्पवित्तां
दद्याद् भृगुः सुरगुरुश्च बुधश्च सौख्यम् ॥
नष्टात्मजां रविकुजौ खलु पञ्चमस्थौ

चन्द्रात्मजो बहुसुतां गुरुभार्गवौ च ।
राहुर्ददाति मरणं शनिरुग्ररोगान्
कन्याविनाशमचिरात्कुरुते शशाङ्कः ॥
षष्ठाश्रिताः शनिदिवाकरराहुजीवाः
कुर्युः कुजश्च सुभगां श्वशुरेषु भक्ताम् ।
चन्द्रः करोति विधवामुशना दरिद्रा-
मस्यां शशाङ्कतनयः कलहप्रियां च ॥
सौर्यारजीवबुधराहुरवीन्दुशुक्रा
दद्युः प्रसह्य खलु सप्तमराशिसंस्थाः ।
वैधव्यबन्धनकुलक्षयवित्तनाशं
व्याधिप्रवासमरणानि यथाक्रमेण ॥
स्थानेऽष्टमे गुरुबुधौ नियतं वियोगं
मृत्युं शशी भृगुसुतश्च तथैव राहुः ।
सूर्यः करोत्यविधवां सुरुजां महीजः
सूर्यात्मजो धनवतीं पतिवल्लभां च ॥
धर्मे स्थिता भृगुदिवाकरभूमिपुत्रा
जीवश्च धर्मनिरतां शशिजः सरोगाम् ।
राहुश्च सूर्यतनयश्च करोति वन्ध्यां
कन्यामसूतिजठरां कुरुते शशाङ्कः ॥
राहुर्नभस्तलगतो विधवां करोति
पापे रतिं दिनकरश्च शनैश्चरश्च ।
मृत्युं कुजोऽर्थरहितां कुलटां च चन्द्रः
शेषा ग्रहा धनवतीं सुभगां च कुर्युः ॥
आये रविर्बहुसुतां सधनां च चन्द्रः
पुत्रान्वितां क्षितिसुतो रविजो धनाढ्याम् ।

आयुष्मतीं सुरगुरुः शशिजः समृद्धां
राहुः करोत्यविधवां भृगुरर्थयुक्ताम् ॥
अन्ते गुरुर्धनवतीं दिनकृद्दरिद्रां
चन्द्रो धनक्षयकरीं कुलटां च राहुः।
साध्वीं भृगुः शशिसुतो बहुपुत्रपौत्रां
यां च प्रशस्तहृदयां रविजः कुजश्च ॥ इति।
गोधूलिके तु सर्वदोषापवादमाह स एव,
गोपैर्यष्ट्या हतानां खुरपुटदलिता या च भूमिर्दिनान्ते
सोद्वाहे सुन्दराणां विपुलधनसुतारोग्यसौभाग्यकर्त्री।
तस्मिन्काले न ऋक्षं न च तिथिकरणं नैव लग्नं न योगः
ख्यातः पुंसां सुखार्थे शमयति दुरितान्युत्थितं गोरजस्तु ॥
इति।

अथ लग्नसाधनाय घटीयन्त्रनिर्माणप्रकारमाह—

तत्र वामनः,
दशपलशुद्धकपाले संवृद्धान्वे षडङ्गुलोच्छ्राये।
द्वादशमुखपरिणाहे षष्ट्यम्बुपलपरिमिता घटिका ॥
चतुरङ्गुलशलाकाहतं कुर्यात्सुवर्णपादेन।
तत्परिमितया छिद्रे जलस्थिते शोभना घटिका ॥

अथ घटीयन्त्रस्थापनप्रकारः।

प्रागुत्क्रमत्रणे देशे गोमयेनोपलेपिते।
मृन्मयं कुण्डिकायुग्मं स्थापयेदव्रणं शुभम् ॥
कुङ्कुमाक्तेन सूत्रेण परिवेष्ट्य परस्परम्।
स्थले च वारिणा पूर्णं तण्डुलानामथोपरि ॥
निश्चले सलिले स्थाप्य कुण्डिकाया जलोपरि।
स्थापयेद्घटिकायन्त्रं सूर्यबिम्बानुदर्शनात् ॥

अथ स्थापनायां घटिकानिमन्त्रणमन्त्रः ।

मुख्यं त्वमसि यन्त्राणां ब्रह्मणा निर्मिता पुरा ।
भावाभावाय दम्पत्योः कालसाधनकारणम् ॥ इति ।

अथ घटीयन्त्रभ्रमणफलम् ।

यद्रूपं प्रथमं करोति घटिका पूर्वादिदिक्षु क्रमात्
सौभाग्यं निधनं यशोविरहितं युक्तं च रोगैः क्रमात् ।
कन्यावल्लभतामुपैति नियतं या निश्चला सर्वदा ।
स्यात्साध्वी सुतवित्तबन्धुसहिता नन्दत्यलं भूतलम् ॥ इति ।

अथात्रापेक्षितरविगुर्वादिबलम् ।

तत्र वराहः,

गुरौ रवौ वा विषमास्पदस्थे स्त्रियो विपर्यस्तफलं लभन्ते ।
वराग्र्यलाभे च तथाऽतिकाले पूजाभिषेकैः शुभदो विवाहः॥
इति ।

गर्गः,

स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलम् ।
तयोश्चन्द्रबलं श्रेष्ठमिति गर्गेण निश्चितम् ॥ इति ।

गुरोः पूज्यतास्थानान्याह वराहः,

दुश्चिक्यजन्मारिखमध्यमेषु जन्मर्क्षतो वाञ्छति वज्रपाणेः ।
पूजां पुरोधा न स एव काङ्क्षत्यथाष्टमं प्राप्तरसातलस्थः ॥
पूजाभिलाषं प्रति निःस्पृहेऽपि कुर्याद् गुरौ शुद्धिविवर्जितेऽपि।
वराग्र्यलाभे शुभदं विवाहं वदन्ति गर्गच्यवनादिमुख्याः॥इति।

लल्लोऽपि,

द्वादशदशमचतुर्थे जन्मनि षष्ठाष्टमे तृतीये च ।
प्राप्ते पाणिग्रहणे जीवे वैधव्यमाप्नोति ॥
बन्धौ तृतीये रिपुराशिसंस्थे वाञ्छन्ति पूजां दशमे सुरेज्ये।

नेच्छन्ति पूजां जनिके व्ययस्थे पुरातना अष्टमगेऽपि सूरौ ॥
रवेः पूज्यतास्थानान्याह बृहस्पतिः,
पुंसो भानुस्त्रिषष्ठाये शनिभौमौ च शोभनौ ।
अन्यत्र शान्तिमेतेषां कृत्वा कर्म समारभेत् ॥ इति ।

अथ गुरुशान्तिविधिः ।

तत्र शौनकः,
कन्यकोद्वाहकाले चेदानुकूल्यं न विद्यते ।
ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः ॥
सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टितम् ।
ऐशान्ये धवलं कुम्भं धान्योपरि निधाय च ॥
दमनं मधुपुष्पं च तथा पीतं च सर्षपम् ।
मांसी गुडूच्यपामार्गौ विडङ्गी शङ्खिनी वचा ॥
सहदेवी हरिद्रान्ता सर्वौषधिशतावरी ।
कृत्वाऽऽज्यभागपर्यन्तं स्वशाखोक्तविधानतः ॥
गृह्योक्तमण्डलेऽभ्यर्च्य पीतपुष्पाक्षतादिभिः ।
देवपूजोत्तरे काले ततः कुम्भानुमन्त्रणम् ॥
अश्वत्थसमिधश्चाज्यं पायसं सर्पिरन्वितम् ।
यवव्रीहितिलास्साज्या मन्त्रेणैव बृहस्पतेः ॥
अष्टोत्तरशतं सर्वं होमशेषं समापयेत् ।
दारपुत्रसमेतस्य त्वभिषेकं समाचरेत् ॥
प्रतिमां वस्त्रकुम्भं च आचार्याय प्रदापयेत् ।
ब्राह्मणान् भोजयेत् पश्चाच्छुभदः स्यान्न संशयः ॥

अथादित्यशान्तिः ।

तत्र स एव,
ब्राह्मणस्योपनयने नानुकूलो भवेद्रविः ।

तस्य शान्तिं प्रवक्ष्यामि मन्त्रौषधिविधानतः ॥

अत्रोपनयनं विवाहस्याप्युपलक्षणम् । रविगुरुशुद्धौ व्रतोद्वाहाविति स्मरणात् ।

उपनयनात्पूर्वेद्युः कृत्वा पुण्याहवाचनम् ।
गृहस्येशानदिग्भागे गोमयेनोपलेपयेत् ॥
कुङ्कुमेन लिखेत्पद्ममष्टपत्रं सकेसरम् ।
सुवर्णेन रविं कृत्वा द्विभुजं पद्मधारिणम् ॥
कृत्वाऽऽज्यभागपर्यन्तं तन्त्रं हुत्वा तु पूर्ववत् ।
पूर्ववद्ग्रहयज्ञवत् ।
स्वशास्त्रोक्तविधानेन आचार्यो होममाचरेत् ॥
आकृष्णेनेति मन्त्रेण समिदाज्यचरून् हुनेत् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥
तिलव्रीहीँश्च हुत्वाऽथ होमशेषं समापयेत् ।
दारपुत्रसमेतस्य ऋत्विजो अभिषेचयेत् ॥
कुम्भाभिमन्त्रणोक्तैश्च समुद्रज्येष्ठमन्त्रकैः ।
ऋत्विजे दक्षिणां दद्यादन्येभ्यश्च स्वशक्तितः ।
प्रतिमां वस्त्रकुम्भं च आचार्याय प्रदापयेत् ॥
एवं यः कुरुते सर्वः सूर्यदोषो विनश्यति ॥

अथ सिंहस्थनिर्णयः ।

तत्र लल्लः,

उद्यानचूडाव्रतबन्धदीक्षाविवाहयात्रादिवधूप्रवेशम् ।
तडागकूपात्रिदशप्रतिष्ठां बृहस्पतौ सिंहगते न कुर्यात् ॥

पुनरपि स एव,

नीचस्थे वक्रसंस्थे ह्यतिचरणगते बालवृद्धेऽस्तगे वा
संन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधश्च दीक्षा ।

मौञ्जीबन्धो नराणां परिणयनविधिर्वास्तुदेवप्रतिष्ठा
वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते च ॥
राजमार्त्तण्डोऽपि,
सिंहे यदा तिष्ठति देवपूज्यः पापं तदा वत्सरमादिशन्ति ।
वैधव्यमाप्नोत्यचिरेण कन्या विवाहिता स्याद्यदि माधवेन ॥
यात्रां चूडां विवाहं श्रुतिविवरविधिं शङ्खसद्मप्रवेशं
प्रासादोद्यानहर्म्यं सुरनरभवनारम्भविद्याविधानम् ।
मौञ्जीबन्धं प्रतिष्ठां मणिकनकरदाभूषणं कुर्वते ये
मृत्युः सिंहस्थितेज्ये गुरुदिनकरयोरेकराशिस्थयोश्च ॥
गर्गोऽपि,
न गुरौ सिंहराशिस्थे सिंहांशकगतेऽपि वा ।
क्षौरमन्नं न कुर्वीत विवाहं गृहकर्म वा ॥
श्रीपतिरपि,
यदि गुरुरविचारे जीवसंवत्सरान्ते
भवति च अधिमासे सिंहसंस्थे च जीवे ।
अनुगतरविरास्ते नीचगे निर्जिते वा
ह्युपनयनप्रतिष्ठे यज्ञयात्राविवाहाः ॥
अन्यत्रापि सिंहस्य साम्यमाह वात्स्यः,
वक्रे चैवातिचारे त्रिदशपतिगुरौ देवपूज्ये च लुप्ते
गुर्वादित्ये ऽधिमासे दिवसकरविधौ सङ्गमे चैवपौषे ।
धिष्ण्ये केतूद्गमे वा शरदि सुरगुरौ सिंहसंस्थे ऽमरेज्ये
वर्षे लुप्तेऽपि चोढा सुनियतमरणा देवकन्यापि भर्त्तुः॥इति ।
अथ निमित्तविशेषेण प्रतिप्रसवमाह स एव,
गुरौ हरिस्थे न विवाहमाहुर्हारीतगर्गप्रमुखा मुनीन्द्राः ।
यदा तु माघी मघसंयुता स्यात्तदा न कन्योद्वहनं वदन्ति ॥

माघ्याश्च मघायोगो गुर्वनधिष्ठितमघात्रिषयो न यथाकथंचित् ।

माघी च मघसंयुक्ता मघायां च गुरुर्यदा ।

महामाघस्तदा प्रोक्तो व्रतोद्वाहं च वर्जयेत् ॥

इति लल्लस्मरणात् । अत्र व्रतग्रहणात्पूर्ववाक्येऽपि कन्योद्वहनं व्रतोपलक्षणम् । प्रतिप्रसवतदपवादयोस्तुल्यविषयत्वान्यथानुपपत्तेः । देशविशेषेणापि व्यतिरेकमुखेन प्रतिप्रसवमाह—

लल्लः,

गोदावर्य्युत्तरतो यावद्भागारथीतटं याम्यम् ।

तत्र विवाहो नेष्टः सिंहस्थे देवपतिपूज्ये ॥

विवाह इति व्रतबन्धस्याप्युपलक्षणम् ।

भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा ।

विवाहो व्रतबन्धो वा सिंहस्थेऽज्ये न दुष्यति ॥

इति वासिष्ठेन गङ्गागोदान्तरालातिरिक्तदेशे विवाहव्रतबन्धयोरभ्यनुज्ञानात् । एतेन—

विवाहो दक्षिणे कूले गौतम्या नेतरत्र तु ।

इति वासिष्ठं वाक्यान्तरमपि व्याख्यातम् । विवाहस्य व्रतोपलक्षणत्वात् । इतरत्र गोदागङ्गान्तराले । न गङ्गोत्तरे । तत्र पूर्ववाक्येन विधानात् ।

तथा च गर्गः,

भागीरथ्युत्तरे कूले गोदावर्य्याश्च दक्षिणे ।

व्रतोद्वाहादिकर्माणि सिंहस्थेऽपि न दुष्यति ॥

कुर्वन्निति शेषः । सिंहस्थेऽज्ये इत्यत्र मघाव्यतिरिक्तसिंहस्थे इति ध्येयम् । मघासंस्थे—

गोदाभागीरथीमध्ये नोद्वाहः सिंहगे गुरौ ।

मघासंस्थे सर्वदेशे तथा मीनगते रवौ ॥

इति पराशरेण सर्वदेशेषु निषेधात्। यत्तु—

सिंहस्थिते सिंहनवांशके वा गोदावरीदक्षिणकूलजातैः।
उद्वाहकालात्ययदोषभीतैः कार्यो विवाहस्त्यवनो ब्रवीति॥

इति वाक्येन गोदादक्षिणस्थितानामुद्वाहकालात्ययेऽप्यनुद्वाहप्रसङ्गेन गोदादक्षिणस्थत्वविशेषणानर्थक्येन दक्षिणदेशविवाहकालात्ययरूपनिमित्तद्वयपरमेव वाच्यम्। यच्च—

कण्ठीरवस्थे धिषणे विवाहं कुर्यान्न यात्रां व्रतबन्धदीक्षाम्।
गोदावरीमुत्तरतो हि दोषा गोदावरीदक्षिणतो न सन्ति॥

इति गौतमवाक्ये सामान्यतो गोदावरीमुत्तरत इत्युक्तं, तद् गोदागङ्गान्तरालविषयं द्रष्टव्यम्। गोदाभागीरथीमध्यइति पराशरस्मरणात्। यद्यपि—

व्रतबन्धप्रतिष्ठां विवाहमन्दिरप्रवेशं च।
यात्रां च याम्यदेशे कुर्यादार्ये न सिंहांशे॥

इति देवलेन याम्यदेशे इति सामान्यतोऽभिहितं, तदपि भागीरथ्या याम्ये इति द्रष्टव्यम्। एतेन याम्यदेशे यात्रामित्यन्वयो निरस्तः। राजमार्त्तण्डोऽपि निमित्तविशेषेण देशविशेषे व्यतिरेकमुखेन प्रतिप्रसवमाह,

सिंहराशौ तु सिंहांशे यदा भवति वाक्पतिः।
नर्मदोत्तरकूले तु न दोषो दक्षिणामुखे॥
सिंहे सिंहांशगे जीवे कलिङ्गे गौडगुर्जरे।
कालमूर्त्तिरयं योगो दम्पत्योर्निधनप्रदः॥

तुशब्दोऽवधारणे। तेन नर्मदोत्तरकूले एव दोषो न दक्षिणामुखे इत्यर्थः।

विवाहो दक्षिणे कूले गौतम्या नेतरत्र तु।

इति वसिष्ठस्मरणात्। अनेन नर्मदोत्तरकूलएव न दोष इत्य-

न्त्वयभ्रमो निरस्तः। तस्य गङ्गागोदान्तरालदेशत्वेन सर्वविषयनिषेधविषयत्वात्। गौतमीयदक्षिणकूले विधानाच्च। एतावान्परं विशेषो यदत्र नर्मदोपादानं, वासिष्ठे गोदोपादानमिति। दक्षिणकूलत्वं त्वविशिष्टम्। सिंहे सिंहांशगे इति सिंहराश्यन्तर्गतसिंहांशे इति द्रष्टव्यम्। सिंहराशौ तु सिंहांशे इति पूर्ववाक्ये वैशिष्ट्याभिधानात्।

यत्तु—

न गुरौ सिंहराशिस्थे सिंहांशकगतेऽपि वा।

इति विकल्पाभिधानं, तद् राश्यन्तर्गतसिंहांशकाभिप्रायेण। अन्यथा सिंहराशिस्थनिषेधे विकल्पानुपपत्तेः। एतेन—

सिंहस्थिते देवगुरौ विवाहं नेच्छन्ति यात्रामुपनायनं वा।
कलिङ्गवङ्गेष्वथ मागधेषु दोषः प्रयुक्तो न तथाऽन्यदेशे॥

इत्यगस्त्यवाक्यस्थं सिंहस्थिते इति पदं सिंहांशकपरं वेदितव्यम्। सिंहसिंहांशगस्यैव कलिङ्गादौ निषेधात्। कालविशेषेणापि प्रतिप्रसवमाह—

वसिष्ठः,

पाणेस्तु ग्रहणं कार्यं सिंहस्थो वाक्पतिर्यदा।
भानौ मेषगते शस्तमित्याहुः शौनकादयः॥
सिंहगते सुरमन्त्रिणि कन्या मेषगते तपने परिणीता।
भूषणरत्नयुता च सुशीला सत्यवती सुतकीर्त्तिसमेता॥
सिंहेऽपि मघहीनस्थे गुरौ पुत्रवती भवेत्।
अत्यन्तं सुभगा साध्वी धनधान्यसमन्विता॥ इति।

मौञ्जीपटले,

जन्मभादष्टगे सिंहे नीचस्थे शत्रुभे गुरौ।
मौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे मीनगते रवौ॥ इति।

अथ मकरस्थनिर्णयः।

देवीपुराणे,

यथा सिंहस्थिते जीवे तथैव मकरस्थिते।
देवागारतडागादिव्रतोद्यानगृहाणि च ॥
विवाहादि महाभाग महाभयकरम्भवेत्।

मकरस्थे इति मकरे मकरांशस्थे इति व्याख्येयम्।

तथाच व्यवहारचण्डेश्वरः,

नीचराशिगतो जीवः प्रशस्तः सर्वकर्मसु।
नीचांशकगतस्त्याज्यो यस्मादंशेषु नीचता ॥

अत एव वामनपुराणे,

वापीकूपतडागादि निषिद्धं सिंहगे गुरौ।
मकरस्थे तु तत्कार्यं न दोषः काललोपतः ॥

इति मकरांशव्यतिरिक्तमकरस्थे एव दोषाभावकीर्त्तनं पर्यवस्यति। काललोपः कालदौष्ट्यम्।

स्कन्दपुराणेऽपि,

सिंहस्थिते गुरौ राजन् विवाहादि न कारयेत्।
मकरस्थे तु कर्त्तव्यं यदीच्छेदात्मनः शुभम् ॥

गरुडपुराणेऽपि,

यदि सिंहगतो जीवो नैव कल्याणमाचरेत्।
मकरस्थे तु कर्त्तव्यं नात्र कार्या विचारणा ॥ इति।

एतदपि वाक्यद्वयं पूर्वेण व्याख्यातम्। निषेधस्य मकरांशविषयत्वात्। देशविशेषेण प्रतिप्रसवमाह—

लल्लः,

नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे।
गण्डक्याः पश्चिमे भागे मकरस्थो न दोषभाक् ॥

यत्तु देवशर्मनामकेणाभिहितं,

मगधे गौडदेशे च सिन्धुदेशे च कोङ्कणे ।
व्रतं चूडां विवाहं च वर्जयेन्मकरे गुरौ ॥ इति,

तद् दोषगौरवाभिप्रायेण । अन्यथा सामान्यनिषेधेनैव सिद्धौ विशेषनिषेधानर्थक्यापत्तेः । उपसंहारपक्षे सामान्यनिषेधाप्रवृत्त्या प्रतिप्रसवासङ्गतेश्च ।

अथ कन्यावरणम् ।

तत्र नारदः,

पञ्चाङ्गशुद्धिदिवसे चन्द्रताराबलान्विते ।
विवाहभस्योदये वा कन्यावरणमाचरेत् ॥
भूषणैः फलताम्बूलगन्धपुष्पाक्षतादिभिः ।
शुक्लाम्बरैर्गीतवाद्यैर्विप्राशीर्वचनैस्सह ॥
गच्छेच्च कन्यकागेहं वरः प्रणयपूर्वकम् ।
तदा कुर्यात्पिता तस्याः प्रदानं प्रीतिपूर्वकम् ॥ इति ।
कुलशीलवयोरूपवित्तविद्यायुताय च ।
वराय रूपसंयुक्तां कन्यां दद्याद्यवीयसीम् ॥
संपूज्य प्रार्थयित्वा च शचीं देवीं गुणाश्रयम् ।
त्रैलोक्यवल्लभां दिव्यगन्धमाल्याम्बरान्विताम् ॥
सर्वलक्षणसंयुक्तां सर्वाभरणभूषिताम् ।
अनर्घ्यमणिमालाभिर्भासयन्तीं दिगन्तरम् ॥
विलासिनीसहस्रौघैः सेव्यमानामहर्निशम् ।
एवंविधां कुमारी तां पूजान्ते प्रार्थयेदिति ॥
देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि ।
विवाहभाग्यमारोग्यं पुत्रलाभञ्च देहि मे ॥ इति ।

वरस्यापि वरणं श्वशुरेणोक्तम्,

उपवीतं फलं पुष्पं वासांसि विविधानि च ।

देयं वराय वरणे कन्याभ्रात्रा द्विजेन च ॥ इति।

अथ प्रसङ्गात्प्रतिकूलनिर्णयः।

तत्र वृद्धगार्ग्यः,

वधूवरार्थे घटिते सुनिश्चिते वरस्य पक्षे त्वथ कन्यकायाः।
मृतिर्यदि स्यान्मनुजस्य कस्यचित्तदा न कार्यं खलु मङ्गलं बुधैः॥

घटिते घटने कर्त्तव्यतया निश्चिते सतीत्यर्थः।

तथा,

कृते वाङ्निश्चये पश्चान्मरणं यस्य कस्य चित्।
न तत्र मङ्गलं शस्तं नारीवैधव्यशङ्कया॥ इति।

अत्र यद्यपि कस्यचिदित्यविशेषेणोक्तं तथापि —

वाङ्निश्चये कृते यत्र सपिण्डानां मृतिर्भवेत्।
प्रतिकूलं सपिण्डेषु नान्येषामिति गोभिलः॥

इति स्मरणेन सपिण्डमरणस्यैव प्रतिकूलत्वम्। अत्र वाङ्निश्चयग्रहणं मानसनिश्चयस्याप्युपलक्षणम्।

वाचया मनसा वापि वरणं निश्चितं भवेत्।
कथं तत्र प्रकर्त्तव्यं वद सत्यवतीसुत॥

इति पृष्टे व्यासः,

साधु पृष्टं त्वया विप्र कर्त्तव्यं शान्तिकं नरैः।
त्रयोदशदिनादूर्ध्वं तद्वत्तेद्विधिपूर्वकम्॥

इति वाक्येन वाचिके मानसेऽपि वरणे शान्तिकर्मोपदेशात्।

तद्विधिमाह व्यासः,

यमायेति च मन्त्रेण हवनं तिलसर्पिषा।
प्रमाणं त्वायुतं तत्र कृष्णा गौर्दक्षिणा भवेत्॥

जपहोमौ प्रकर्त्तव्यौ प्रीत्यै मृद्गुणेशयोः।

अयुतं वा तदर्धं वा शक्त्या च हवनं भवेत् ॥
पूर्णाहुत्यभिषेकादि कृत्वा ब्राह्मणभोजनम् ।
एवं यः कुरुते लोके पुत्रपौत्रयुतो भवेत् ॥ इति ।

वाग्दानानन्तरं तु निषेधमाह—

मारकण्डेयः,

वाग्दानानन्तरं माता पिता वापि विपद्यते ।
विवाहो नैव कर्त्तव्यः स्ववंशाहितमिच्छता ॥

वृद्धवसिष्ठोऽपि,

वरवध्वोः पिता माता पितृव्यश्च सहोदरः ।
एतेषां प्रतिकूलं चेन्महाविघ्नप्रदं भवेत् ॥

शौनकोऽपि,

पिता पितामहश्चैव माता चैव पितामही ।
पितृव्यः स्त्री सुतो भ्राता भगिनी चाविवाहिता ॥
एतैरेव विपन्नैस्तु प्रतिकूलं तु वै स्मृतम् ।
अन्यैरपि विपन्नैस्तु केचिदूचुर्न तद्भवेदिति ॥

भ्राताऽत्र एकोदर उपनीतश्च विवक्षितः । पितृव्यपुत्रस्य पृथङ्निर्देशात् ।

दम्पत्योः पितरौ भ्राता चोपनीतः सहोदरः ।

इति वाक्यान्तराच्च । उक्तस्यापि निषेधस्य कालविशेषेण व्यवस्थोक्ता मेधातिथिरत्नावलीभ्याम् ।

पितुरब्दं महाशौचं तदर्धं मातुरेव च ।
मासत्रयं तु भार्यायाः तदर्धं भ्रातृपुत्रयोः ॥
अन्येषां तु सपिण्डानामाशौचं माससंमितम् ।
तदन्ते शान्तिकं कृत्वा ततो लग्नं विधीयते ॥ इति ।

यत्तु ज्योतिःप्रकाशवचनम्,

प्रतिकूलेऽपि कर्त्तव्यो विवाहो मासतः परम्।
शान्तिं विधाय गां दत्त्वा वाग्दानादि चरेत्पुनः॥
इति, तत् पित्रादिभिन्नसपिण्डमात्रप्रातिकूलविषयम्।
प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत्।
विवाहस्तु ततः पश्चात्तयोरेव विधीयते॥

इति स्मृतिरत्नावल्यां मासानन्तरं विवाहविधानात्। अन्येषां तु सपिण्डानामिति वचनेन तेषां मासपरिमितमहाशौचविधानाच्च।

यदपि वचनम्,

प्रतिकूले न कर्त्तव्यं लग्नं यावदृतुत्रयम्॥ इति,

तदपि मातृप्रतिकूलविषयम्। तदर्थं मातुरेवचेत्यनेन तस्या एव ऋतुत्रयं महाशौचाविधानात्।

यदपि मेधातिथिवचनम्,

वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः।
तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्॥

इति, तत् पितृप्रतिकूलविषयम्। तस्यैव संवत्सरं महाशौचोक्तेः। तदेतत्प्रातिकूल्यं पुरुषत्रयपर्यन्तं चतुःपुरुषपर्यन्तं वा।

तथाच मेधातिथिः,

पुरुषत्रयपर्यन्तं प्रतिकूलं सगोत्रिणाम्।
प्रवेशान्निर्गमस्तद्वत्तथा मुण्डनमण्डने॥
प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम्।
आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत्॥ इति।

विशेषान्तरमाह गर्गः,

ज्वरभ्योत्पादनं यस्य शुभं तस्य न कारयेत्।
दोषनिर्गमनात्पश्चात्स्वस्थः कर्म समाचरेत्॥
हर्म्यदाहे मृते चैव विवाहं यः करोति च।

तयोरेकं विनश्येत मनुः स्वायंभुवोऽब्रवीत् ॥
नान्दीमुखे कृते पश्चात् गृहदाहो भवेद्यदि ।
पाणिग्रहो न कर्त्तव्यो नारीवैधव्यदो यतः ॥
केचिद्वधूगृहस्थस्य दारुणः कस्यचिज्ज्वरः ।
तावन्मङ्गलकार्यं च न कार्यं निश्चितं बुधैः ॥ इति ।

पूर्वं तदन्ते शान्तिकं कुर्यादित्यनेन प्रतिकूले जाते शान्तिकं कार्यमित्युक्तम् । तद्विधानमाह—

शौनकः,

पुण्येऽह्नि विप्रकथिते कृत्वा पुण्याहवाचनम् ।
नान्दीश्राद्धे कृते पश्चाद् द्विजांश्चैव प्रपूजयेत् ॥
सौवर्णान्कारयेद्देवान्यथावयवनिर्मितान् ।
पूजयेत्प्रयतो देवान् क्षीरादिस्नपनं ततः ॥
श्रियं शक्तिं शिवं विष्णुं मृत्युं चैव विशेषतः ।
श्रीसूक्तेन श्रियं विष्णुमिदंविष्णुऋचेन च ॥
गौरीर्मिमायेति शिवां त्र्यम्बकेति महेश्वरम् ।
परंमृत्योरितिमन्त्रेण मृत्युं संपूजयेत्ततः ।
शिवां शक्तिम् ।
गन्धमाल्यादिवस्त्रैश्च उपचारान्समर्पयेत् ।
अथाज्यभागपर्यन्तं कृत्वा उल्लेखनात्ततः ॥
दूर्वातिलाज्यचरुभिः समिद्भिश्च शताष्टकम् ।
प्रत्येकं जुहुयात्तत्र कृत्वा पूर्णाहुतिं ततः ॥
होमान्ते दक्षिणां दद्याद्गां सवत्सां पयस्विनीम् ।
दक्षिणां च यथाशक्त्या अभिषेकं च कारयेत् ॥
शतानां पञ्चसंख्यातमेकैकस्य यथाविधि ।
ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ॥

एवं यः कुरुते शान्तिं वंशस्तस्य विवर्धते। इति।

इयं च शान्तिः कन्यापित्रा कार्या। वरपित्रा तु—

उद्वहेद्यदि वाग्दत्तां प्रातिकूल्येऽपि यः पुमान्।
स याति नरकं घोरं कुले वाऽप्यशुभं भवेत्॥

इति संवर्त्तवचनेन परिणयने दोषश्रवणात्।

अकृत्वा शान्तिकं यस्तु निषेधे सति दारुणे।
यः करोति शुभङ्कर्यांद्विघ्नं तस्य पदेपदे॥

इति शान्ति विना निषेधात्, स्नुषायै सुखं वर्द्धतामिति मन्त्रलिङ्गाच्च वृद्धवसिष्ठोक्ता शान्तिः कर्त्तव्या।

तथाच स एव,

प्रतिकूलेऽपि संजाते विवाहं नैव कारयेत्।
अन्ते दोषविनाशाय कुर्याच्छान्तिमिमां शुभाम्॥

श्रिये जात इति श्रियम्, इदंविष्णुरिति विष्णुं, गौरीर्मिमायेति गौरीं, त्र्यम्बकमिति त्र्यम्बकं, परंमृत्योरिति यमं पूजयित्वा तिलाज्यमष्टोत्तरशतं जुहुयात्। भूस्त्वादिर्मृत्युर्नश्यतात् स्नुषायै सुखं वर्द्धताम्।

ततो होमशेषं समाप्य गोद्वयं दक्षिणां दद्यादिति। दुर्भिक्षादावानुकूल्यप्रतीक्षा नास्तीत्युक्तं—

ज्योतिःसागरे,

दुर्भिक्षे राष्ट्रभङ्गे च पित्रोर्वा प्राणसंशये।
प्रौढायामपि कन्यायां नानुकूल्यं प्रतीक्ष्यते॥ इति।

तथा दीर्घरोगाद्यभिभूतादिमरणे प्रातिकूल्यं नास्ति।

तदुक्तं शौनकेन,

दीर्घरोगाभिभूतस्य दूरदेशे स्थितस्य वा।
उदासवर्त्तिनश्चैव प्रतिकूलं न विद्यते॥ इति।

एतादृशे विषये प्रतिकूले जाते याज्ञवल्क्योक्तां विनायकशान्तिं कृत्वा विवाहादि कुर्यात् ।

तदुक्तं तेनैव,

सङ्कटे समनुप्राप्ते याज्ञवल्क्येन योगिना ।
शान्तिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत् ॥ इति ।

अथ विवाहादौ आरम्भात्प्राक् सूतकादावुपस्थिते तदतीतस्य शुद्धः सन्कुर्यात् । सन्निहितलग्नान्तरस्याभावे कन्यायास्त्वधार्यत्वे—

विष्णुराह,

अनारब्धविशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद् घृतम् ।
गां दद्यात्पञ्चगव्याशी ततः शुध्यति सूतकी ॥

तथा,

सङ्कटे समनुप्राप्ते सूतके समुपागते ।
कूष्माण्डीभिर्घृतं हुत्वा गां च दत्त्वा पयस्विनीम् ॥
चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् । इति ।

कूष्माण्डैः कूष्माण्डसंज्ञकैर्यद्देवादेवहेडनमित्यादिभिः । आरम्भोत्तरं तु आशौचपाते आरब्धत्वात्सद्यः शुद्धिरिति । तदुक्तं-

स्मृतिचन्द्रिकायां याज्ञवल्क्येन,

ऋत्विजां दीक्षितानां च याज्ञियं कर्म कुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥
दाने विवाहे यज्ञे च सङ्ग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यः शौचं विधीयते ॥ इति ।

तथा,

विवाहयज्ञयोर्मध्ये अन्तरा मृतसूतके ।
पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥ इति ।

आरम्भोऽत्र नान्दीश्राद्धमेव ।

प्रारब्धो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः ।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया ॥

इति सङ्ग्रहोक्तेः । यदि तु बलवत्यनुपपत्तिस्तदाऽशौचसम्भावनायां पूर्वमपि नान्दीमुखं कर्त्तव्यमित्युक्तं—

तत्रैव,

प्राप्यं तु सूतकं ज्ञात्वा मातॄणां पूजनं भवेत् ।
सूतकं न विशेत्तत्र मातरो यत्र पूजिताः ॥ इति ।

तस्य च कियद्दिनं पूर्वमनुष्ठानमित्यपेक्षायां तत्रैवोक्तम्,

एकविंशत्यहर्यज्ञे विवाहे दश वासराः ।
पञ्चोपनयने चैव चौले चैव त्रिरात्रकम् ॥ इति ।

वधूवरयोरन्यतरजनन्याः रजोदर्शने निर्णयः शान्तिकं च चौलप्रकरणे पूर्वोक्तमिति नेहोच्यते ।

विशेषस्तु माधवीये,

प्रारम्भात्प्राक् विवाहस्य माता यदि रजस्वला ।
निष्कृतिस्तत्र कर्त्तव्या सहस्रश्रुतिचोदनात् ॥ इति ।

अथ मण्डपनिर्माणविधिः ।

तत्र वसिष्ठः,

षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितम् ।
मण्डपं तोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत् ॥ इति ।

अष्टहस्तं तु रचयेन्मण्डपं वा द्विषट्करम् । इति ।

द्विषट्करं द्वादशकरम् ।

सप्तर्षिमते विवाहपटले,

मङ्गलेषु च सर्वेषु मण्डपो गृहमानतः ।
कार्यः षोडशहस्तो वा द्व्यूनहस्तो दशावधिः ॥
स्तम्भैश्चतुर्भिरत्रात्र वेदी मध्ये प्रतिष्ठिता ।

द्वारादिदेहलीविद्धा कूपवृक्षव्यथा तथा ॥
न कार्या वेदिका तज्ज्ञैः कार्या मङ्गलकर्मणि ।
विवाहवृन्दावने,
वेदिकां विरचयेद्यथा तथा स्यादियं प्रविशतस्तु दक्षिणे ।
स्यूर्जनाश्रयपत्रोऽसितवर्णकाः षण्नवत्रिदिवसेषु नाग्रतः ॥

अथ वैवाहिककर्मकालः ।

तत्र वात्स्यः,
कण्डनदलनपवारकमण्डपमृद्वेदिवर्णकाद्यखिलम् ।
तत्सम्बन्धि गतागतपक्षे वैवाहिके कुर्यात् ॥
तथा,
वैवाहिके तु दिवसे ऽशुभे वाथ तिथौ शुभे ।
चतुर्थिकां प्रकुर्वीत विधिदृष्टेन कर्मणा ॥
दैवज्ञमनोहरः,
चित्रा विशाखा शततारकाऽश्विनी ज्येष्ठा भरण्यौ पितृभाच्चतुष्टयम् ।
हित्वा प्रशस्तं फलतैलवेदिकाप्रदानकं कण्डनमण्डपादिकम् ॥ इति ।

अथ वेदिनिर्माणविधिः ।

तत्र नारदः,
हस्तोच्छ्रितां चतुर्हस्तैश्चतुरश्रां समन्ततः ।
स्तम्भैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनि ॥
समां तथा चतुर्दिक्षु सोपानैरतिशोभिताम् ।
प्रागुदक्प्रवणां रम्भास्तम्भहंसशुकादिभिः ॥
विचित्रिताङ्कितां कुम्भैर्विहितैस्तोरणाङ्कुरैः ।
भृङ्गारपुष्पनिकरैर्वर्णकैः समलङ्कृताम् ॥
द्विजाशीर्वचनैः पुण्यस्त्रीभिर्दीपैर्मनोरमाम् ।
वादित्रनृत्यगीताद्यैर्हृदयानन्दिनीं शुभाम् ॥

एवंविधामारुरुक्षेन्मिथुनं साग्निवेदिकाम् । इति ।

वसिष्ठः,

तुल्यां समन्ताद् गृहवामभागे हस्तोच्छ्रितामुक्तशुभांशयुक्ताम् ।
समण्डपां प्राक्प्रवणामुदग्वा सोपानरम्यां निविडां ककुप्सु ॥

वराहः,

विस्तीर्णता हस्तचतुष्टयेन हस्तोच्छ्रितां मन्दिरवामभागे ।
स्तम्भैश्चतुर्भिः कृतनिश्चलाङ्गीं वेदिं विवाहे प्रवदन्ति तज्ज्ञाः ॥

हस्तपरिमाणं तु कन्याया एव ।

कन्याहस्तैः सप्तभिः पञ्चभिर्वा वेदी कार्या कूर्मपृष्ठोन्नतांसा ।

इति ग्रन्थान्तरोक्तेः ।

अथ वरस्य कन्यागृहगमनविधिः ।

तत्र शौनकः,

पुण्ये मुहूर्त्ते कुर्वीत विवाहं विधिवद् द्विजः ।
तत्राभ्युदयिकं श्राद्धं कुर्यात्स्वस्ति च वाचयेत् ॥
अपरेद्युः कृतस्नानो धृतधौताम्बरद्वयः ।
भूषितो गन्धमाल्याद्यैर्वन्दिताभीष्टदेवतः ॥
ब्राह्मणान् भोजयित्वा तैः कृतपुण्याहवाचनः ।
कृतकौतुकबन्धश्च मित्रबान्धवसंयुतः ॥
यानं यथार्हमारुह्य यातव्यं च वधूगृहम् ।
तस्य द्वाराद् बहिः स्थित्वा प्राङ्मुखोऽभिमुखागतैः ॥
प्रदीपपूर्णकुम्भादिवाणिभिर्वनिताजनैः ।
कृताभ्युद्गमनो गेहं प्रविशेत्सह बन्धुभिः ॥ इति ।

ब्रह्मपुराणेऽपि,

पूर्वेद्युः स्वस्तिवचननान्दीश्राद्धसमन्वितः ।
अपरेद्युः कृतस्नानो ऽहतवस्त्रधरो वरः ॥

भुक्त्वा निश्यहनि पूर्वाह्ने उद्वहेन्मिथ सर्वदा ।
भूषणैः फलताम्बूलैर्गन्धपुष्पाक्षतादिभिः ॥
शुक्लाम्बरधरैर्वाद्यैर्विप्राशीर्वचनैस्सह ।
गच्छेच्च कन्यकागेहं वरश्च स्त्रीपुरस्सरम् ॥ इति ।

अथ वरयानानि ।

तत्र हिरण्यकेशी,
आनयन्त्यस्मै रथमश्वं हस्तिनं वेति ।
आनयन्ति कन्यापित्रादयः ।

अथ वधूवरयोर्भोजननिर्णयः ।

तत्र व्यासः,
भुक्त्वा समुद्वहेत्कन्यां सावित्रीग्रहणं तथा ।
उपोषितः सुतां दद्यादर्चिताय द्विजाय तु ॥ इति ।
बौधायनोऽपि,
स्रग्वी भुक्तवान् प्रतोदपाणिरपदातिर्गत्वा वधूज्ञातिभिरतिथिवदर्चितः स्नातामहतवाससं गन्धानुलिप्तां स्रग्विणीं भुक्तवतीमिषुहस्तां दत्तां वधूं समीक्षते इति ।

अथ मधुपर्कविधिः ।

तत्र विश्वामित्रः,
सम्पूज्य मधुपर्केण ऋत्विजः कर्म कारयेत ।
अपूज्य कारयन्कर्म किल्बिषेणैव युज्यते ॥ इति ।
ऋत्विज इति वैवाह्यादीनामुपलक्षणम् ।
तथाच जाबालः,
वैवाह्यमृत्विजं चैव श्रोत्रियं गृहमागतम् ।
अर्हयेन्मधुपर्केण स्नातकं प्रियमेव च ॥ इति ।

याज्ञवल्क्योऽपि,

प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः।

प्रियो वैवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः॥ इति।

स्नातकादयः प्रियान्ताः संवत्सरानन्तरम् अर्घ्याः मधुपर्केणार्चनीयाः। वैवाह्यो विवाहाङ्गतया। ऋत्विजस्तु संवत्सराभ्यन्तरेऽपि प्रतियज्ञमर्हणीयाः।

आश्वलायनोऽपि, ऋत्विजो वृत्वा मधुपर्कमाहरेत्स्नातकायोपस्थिताय राज्ञे चाचार्याय श्वशुरपितृव्यमातुलानां चेति।

पारस्करोऽपि, षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति प्रतिसंवत्सरानर्हयेयुर्यक्ष्यमाणास्त्वृत्विज इति।

तत्रोपस्करानाह आश्वलायनः, विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्तइति।

पारस्करोऽपि, विष्टरं पद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येनान्यस्त्रिस्त्रिः प्राहेति। तत्र विष्टरलक्षणम्—

परिशिष्टे,

कतिभिस्तु भवेद्ब्रह्मा कतिभिर्विष्टरो मतः।

पञ्चाशता भवेद्ब्रह्मा तदर्धेन तु विष्टरः॥

ऊर्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः।

दक्षिणावर्तको ब्रह्मा वामावर्त्तस्तु विष्टरः॥ इति।

पञ्चाशता कुशपिञ्जूलैरित्यर्थः। ऊर्ध्वकेश ऊर्ध्वाग्रः। लम्बकेशस्तिर्यगग्रः। दक्षिणावर्त्तको, ग्रन्थिरिति शेषः। एवं विष्टरेऽपि ज्ञेयम्। पाद्यं पादप्रक्षालनार्थं जलम्। तेन च पादौ प्रक्षालयेद्वरस्य कन्यादाता। पादौ प्रक्षालयसीति दातृपरामर्शात्। दक्षिणमग्रे ब्राह्मणायाप्रयच्छेत्सव्यं शूद्रायेति लिङ्गाच्च। शूद्रस्य पादप-

क्षालनकर्तृत्वं चाह—

हिरण्यकेशी, अथास्मै पाद्यमिति प्राह तेनास्य शूद्रः शूद्रा वा पादौ प्रक्षालयति सव्यमग्रे ब्राह्मणस्य दक्षिणमितरयोरिति। इतरयोः क्षत्रियवैश्ययोः। अनेन सव्यं पादं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणमिति पारस्करवाक्यमपि व्याख्यातम्। अर्घं हस्तप्रक्षालनार्थं जलम्। आचमनीयम्। आचमनार्थं जलम्। पृथक्पृथग्निर्देशात् तेषां गम्यते। मधुपर्को मधुसंपृक्तं दधि।

कांस्येन कांस्येऽपिहितं दधि मध्वाज्यसंयुतम्।
मधुपर्कमिति प्राहुर्याज्ञिका यज्ञकर्मणि॥

इति परिशिष्टात्। आज्यग्रहणं मध्वलाभे। दधनि मध्वानीय सर्पिर्वा मध्वलाभइत्याश्वलायनस्मरणात्। त्रितयमपि समुच्चितमिति हिरण्यकेशिनः।

तथाच तत्सूत्रम्,

अथास्मा आवसथं कल्पयित्वाऽर्घ इति प्राह कुरुतेति प्रत्याह कुर्वन्त्यस्मै त्रिवृतं पाङ्क्तं वा, दधि मधु घृतमिति त्रिवृत्, दधि मधुघृतमापः सक्तव इति पाङ्क्तः, कांस्ये मध्वानीय दध्यानयति। ह्रसीयस्यानीय वर्षीयसा पिधायानूचीनानि पृथगाहारयति। कूर्चं पाद्यमर्घ्यमाचमनीयं मधुपर्क इत्यन्वक्रमनुसंव्रजितासोऽनुवाक्यया वा-चैकैकं प्राह कूर्चमिति कूर्चं तस्मिन्प्राङ्मुख उपविशतीति।

आवसथोऽर्घगृहम्। ह्रसीयसि स्वल्पपरिमाणे। वर्षीयसा बृहत्परिमाणेन। अनूचीनानि कूर्चादीनि वस्त्वन्तराणि। आ-हारयति अन्यैर्ग्राहयति। अन्वक्रम् अङ्गानां कूर्चादीनामनु पश्चात्। अनुसंव्रजितासो गतान् गृहीतकूर्चादीन्पुरुषान्स्वयमनुगच्छेदित्यर्थः। अनुवाक्यया अनुवाक्यतया वाचा। एकैकं कूर्चादि।

अथ गोलक्षणम्। तत्र हिरण्यकेशी,

अथास्मै गौरिति प्राह तस्याः कर्मोत्सर्गो वा गौर्धेनुर्भव्येति ।

अनेनाचान्तोदकाय गां वेदयन्तइत्याश्वलायनादिसूत्रस्थमपि गोपदं धेनुपरतया व्याख्यातम् । स्त्रीत्वस्य तस्या इत्युदाहृतसूत्रात् माता रुद्राणामित्यादिमन्त्रलिङ्गाच्च स्वत एव सिद्धत्वात् । तस्याश्चालम्भनमुत्सर्गो वा । आलम्भनं तु निषिद्धम्—

आदित्युपुराणे,

कन्यायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।

कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥ इति ।

धर्मज्ञसमयेऽपि,

वरातिथिपितृभ्यश्च पशूपाकरणक्रिया । इति ।

वराय गन्धमाल्यादिकमपि देयमित्युक्तम्—

भगवता शौनकेन,

दत्वाऽथ गन्धमाल्याद्यैर्विधितोऽभ्यर्चयेद्वरम् ।

पश्चात्तेन सहायातान् तद्बन्धूनपि पूजयेत् ॥ इति ।

आदिशब्दाद् भूषणमपि देयम् ।

तथाच कारिका,

गन्धमाल्याम्बरैस्तद्वद् भूषणैः पूजयेद्वरम् । इति ।

भूषणैः कुण्डलमुद्रिकादिभिः । यज्ञोपवीतमपि शिष्टाचाराद् द्रयम् । अयं च मधुपर्को वरशाखानुसारेणैव कर्त्तव्यः । तथाच गृह्यपरिशिष्टान्तरम् ।

वरस्य या भवेच्छाखा तच्छाखागृह्यचोदितः ।

मधुपर्कः प्रदातव्योऽप्यन्यशाखेऽपि दातरि ॥ इति ।

वर इत्यर्हणीयमात्रोपलक्षणम् । मधुपर्काश्नात् । स चर्त्विजो यच्छाखीयमार्त्विज्यं तच्छाखीयगृह्यानुसारेण कार्यः । आर्त्विज्यशाखीयमधुपर्कसंस्कृतस्यैव तत्तदार्त्विज्याधिकारात् । तत्त-

च्छाखीयोपनयनसंस्कृतस्यैव तत्तच्छाखाध्यापनाधिकारवत् ।

अथ कन्यादातृनिर्णयः,

तत्र नारदः,

पिता दद्यात्स्वयं कन्यां भ्राता वाऽनुमतः पितुः ।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा ॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते ।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ॥
यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् । इति ।

याज्ञवल्क्योऽपि,

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥
अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ । इति ।

प्रकृतिस्थोऽविक्षिप्तचित्तः । विक्षिप्तचित्ततया तु पित्रादि-नाऽपि कृतमकृतमेव ।

यथाह नारदः,

स्वतन्त्रोऽपि हि यः कार्यं कुर्यादप्रकृतिं गतः ।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः ॥ इति ।

अत्रानधिकारिणा कृते दाने कन्यां प्रत्याहृत्याधिकारी पुनस्तस्मा एव दद्यादिति मदनः ।

विष्णुः,

पिता पितामहो भ्राता सकुल्यो मातामहो माता चेति । कन्याप्रदः पूर्वपूर्वाभावे प्रकृतिस्थः परः पर इति ।

कात्यायनः,

स्वयमेवौरसीं दद्यात्पिता ऽभावे स्वबान्धवाः ।
मातामहस्ततोऽन्यो वा माता वा धर्मजां सुताम् ॥

बान्धवाः स्वसपिण्डाः ।
सपिण्डाश्च सनाभयः ।
सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥

इति त्रिकाण्डीस्मरणात् । कल्पतरुस्तु बन्धुशब्देन स्मृत्यन्तरोक्तान्पितृष्वस्रसुतादीन् व्याचष्टे । अन्याम् अनौरसीम् । धर्मजां नियोगोत्पादिताम् । अभावोऽत्रासान्निध्यमसामर्थ्यं च लक्षयति ।

तथाच स एव,

दीर्घप्रवासयुक्तेषु पौगण्डेषु च बन्धुषु ।
माता तु समये दद्यादौरसामपि कन्यकाम् ॥ इति ।

पौगण्डो व्यवहारासमर्थः । समये कन्यादानोचितकाले ।

अथ कन्यानिरीक्षणविधिः ।

तत्राश्वलायनकारिका,

स्नातालंकृतकन्यायाः प्राङ्मुख्याः प्रत्यगाननः ।
ईक्षेत तण्डुलस्थाया वरस्तस्य मुखं च सा ॥
मुहूर्ते शोभने सम्यक् क्षिपेतां मुखयोर्मिथः ।
सगुडान् जीरकान् कन्या वरयेदथ तां वरः ॥
अस्यामुकगोत्रस्य पुत्रः पौत्रः प्रपौत्रकः ।
एतद्गोत्रामिमामस्य पुत्रीं पौत्रीं च नप्त्रिकाम् ॥
वृणेऽहं कन्यकां साध्वीं श्रीरूपामित्यतः परम् ।
वरेणैवं वृतां कन्यां तत्पिता प्रददाति ताम् ॥ इति ।

अथ कन्यादानविधिः ।

तत्राश्वलायनः,

अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयात् समानं तद्वक्ष्याम इति ।

उच्चावचधर्मानाह शौनकः,

नानाविधा जानपदा ग्राम्याश्चोद्वाहकर्मणि ।
क्रियन्ते लौकिका धर्मास्तेषु स्वकुलपूरुषैः ॥
पूर्वैरनुष्ठितान्कृत्वा कुर्याद्वरपरिग्रहम् ।
सर्वसाधारणं कर्म यत्तु तावदिहोच्यते ॥
तत्र प्रदेशे कस्मिंश्चिद् बन्धुभिः परिकल्पिते ।
विष्टरे प्राङ्मुखः सम्यगासित्वा चरणौ स्वयम् ॥
प्रक्षाल्याचम्य च कृतप्राणायामः समाहितः ।
उपलिप्य ततोल्लिख्य स्थण्डिलेऽग्निं निधाय च ॥
पश्चादग्नेः प्रतिष्ठाप्य पेषणीमश्मनिर्मिताम् ।
प्रागुत्तरेऽग्नेः संस्थाप्य पूर्णकुम्भमथो वरः ॥
उत्थाय प्राङ्मुखः स्थित्वा प्रत्यगुत्तरतोऽनलात् ।
तदानीमात्मना दत्तं नूतनं वसनद्वयम् ॥
वसित्वाऽऽचान्तसलिलां भूषितां कुसुमादिभिः ।
प्रत्यङ्मुखः प्राङ्मुखीं तां स्थितामात्मसमीपतः ॥
कन्यकां प्रतिगृह्णीत दत्तां पित्रादिभिर्वरः ।
कन्यादानप्रकारश्च पूर्वाचरित उच्यते ॥
वरस्याभिमुखः स्थित्वा कन्यायाः प्रतिपादकः ।
चतुर्थ्यन्तं वरस्योक्त्वा नाम तद्गोत्रपूर्वकम् ॥
ततस्सहत्वकर्मभ्य इत्युच्चार्य ततः परम् ।
वरस्य हस्तेऽपो दद्याद्देवतीर्थेन शान्तधीः ॥
तद्यथा गार्ग्यगोत्राय परमेश्वरशर्मणे ।
आत्रेयगोत्रप्रभवां पार्वतीं प्रददाम्यहम् ॥
कन्यां सहत्वकर्मभ्यः करोति प्रतिपादिताम् ।
कन्यकादानकर्मैवमाचरन्ति मनीषिणः ॥
विभवानुगुणं क्षेत्रं सुवर्णरजतादिकम् ।

सर्वं विहितममानुसहोदकम् ।
ततो मङ्गलसूत्रं च ध्यायन्निष्टां च देवताम् ।
बध्नाः कण्ठप्रदेशे स्याद् भूषणानि च शक्तितः ॥ इति ।

गृह्यपरिशिष्टेऽपि,

चतुष्पदे सोत्तरच्छदे हरितदर्भास्तीर्णे भद्रपीठे प्राङ्मुख उपविशेत् । तस्य पुरस्तात्प्राङ्मुखीं भद्रपीठासनां सुस्नातामहतवाससं स्रग्विणीं कन्यां पुरस्कृत्य दाता सामात्य उपविशेद्वरं विधिवदभ्यर्चयेत् । अथ दक्षिणतः पुरोधा उपविश्य मध्ये प्रागग्रोदगग्रान्दर्भानास्तीर्य तैजसमयं पूर्णकलशं निधाय व्रीहियवानोप्य गन्धादिभिरलंकृत्य दूर्वापल्लवैर्मुखमवस्तीर्य अब्लिङ्गाभिर्ऋग्भिरभिमन्त्र्य ताभिरद्भिः प्रयोजयेत् । अथ दाता पुण्याहादीनि वाचयित्वा शिवा आपः सन्तु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु दीर्घमायुरस्तु शान्तिः पुष्टिस्तुष्टिश्चास्तु तिथिकरणमुहूर्तनक्षत्रसंपदस्त्विति उक्त्वा भार्यादिसमेतः कन्यां प्रगृह्य वत्सगोत्रोऽमुष्य प्रपौत्रीम् अमुष्यपौत्रीम् अमुष्यपुत्रीं सुशीलानाम्नीमिमां कन्यां वसिष्ठगोत्रोद्भवायामुष्य प्रपौत्रायामुष्य पौत्रायामुष्य पुत्राय सुशीलनाम्ने ऽस्मै वराय सम्प्रददे कन्यां प्रतिगृह्णातु भवानिति ब्रुवन्वरस्य पाणौ हिरण्यमवधाय कलशोदकधारामासिञ्चेत् । मनसा प्रजापतिः प्रीयतामिति ब्रूयात् । अथ वरः पुण्याहाशिषो वाचयित्वा दक्षिणेंऽसे कन्यामभिमृश्य क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णात्विति जपित्वा प्रजापतिमनुस्मृत्य धर्मप्रजासिद्ध्यर्थं कन्यां प्रतिगृह्णामीति ब्रूयादेवं त्रिः प्रयुज्य पुरोधा दातृवरौ पश्यन् ऋतस्य हि शुधः सन्ति

पूर्वीरिति तिस्रो जपित्वैतद्वः सत्यमृद्धिमदस्त्विति ब्रूयात् ।

अथानयोर्निरीक्षणम्,

स्वलंकृते वेश्मनि मङ्गलगीततूर्यनिर्घोषे पूर्वापरावत्युच्छ्रितौ हस्तान्तरालौ राशी कृत्वा मध्ये स्वस्तिकां शिरस्करिणीं धारयेयुरथ पूर्वस्मिन् राशौ प्रत्यङ्मुखीं गुडजीरकपाणिं कन्यां स्थापयेयुरपरस्मिन्प्राङ्मुखं तथाभूतं वरं तौ मनसेष्टदेवतां ध्यायन्तौ समाहितौ तिष्ठन्तौ ब्राह्मणाः सूर्य्यसूक्तं पठेयुः पुरन्ध्र्यो मङ्गलगीतीः कुर्युः। अथ तद्विदा काले प्रदिष्टे सद्यस्तिरस्करिणीम् उदगपसार्य कन्यावरौ परस्परस्मिन् गुडजीरकानवकिरतः परस्परं निरीक्षेयाताम् । अभ्रातृघ्नीमिति तामीक्षमाणो जपति अघोरचक्षुरपतिघ्न्येधीति तयेक्ष्यमाणोऽथास्या भ्रुवोर्मध्ये व्याहृतिभिर्दर्भाग्रेण परिमृज्य दर्भं निरस्याप उपस्पृशेदथ ब्राह्मणा बान्धवाः पुरन्ध्र्यस्तावाशीर्भिरभिनन्दयेयुः ।

अथानयोराद्राक्षतारोपणं, तैजसेन पात्रेण क्षीरमानीय घृतमासिच्यार्द्रानक्षततण्डुलानोप्य तथा स्थितयोर्वधूवरयोर्वर्धनकमेतत्कारयेयुः । अमृतं क्षीरमायुर्घृतमरिष्टरक्षता अप एतेषामारोपणमिष्यते । वरः प्रक्षालितपाणिर्वध्वाः प्रक्षालितेऽञ्जलौ क्षीरघृतं पाणिना द्विरुपस्तीर्य द्विस्तण्डुलानञ्जलिना ऽऽवपति यथा पूर्यते ततो द्विरुपरिष्टादभिघारयेदित्येवं वराञ्जलावन्यस्तण्डुलपूरणं कुर्यादथ दाताऽञ्जलौ हिरण्यमवदधाति । अथ वरः कन्याञ्जलौ स्वाञ्जलिं धारयेदथ दाता "कन्या तारयतु दक्षिणाः पान्तु बहु देयं चास्तु पुण्यं वर्द्धतां शान्तिः पुष्टिस्तुष्टिश्चास्तु तिथिकरणमुहूर्त्तनक्षत्रसम्पदस्त्विति" उक्त्वा कन्यामुत्क्षिप्य तदञ्जल्यक्षतान् वरमूर्ध्न्यारोपयेत् । वरोऽपि तन्मूर्ध्नि स्वाञ्जल्यक्षतामारोपयेदेवं त्रिः वधूपूर्वम् । वराञ्जलौ वधूस्तण्डुलपूरणं

कुर्यात्तदङ्गजलाद्यन्यः । अथ सप्तमं वधूपूर्वमारोपणं कारयेत् । इदानीं दाता वराय गोभूदासीयानशयनमन्नादिकमनुदानं दद्यात् । अथ पुरोधाः कांस्ये ऽप आसिच्यौदुम्बर्याऽऽर्द्रशाखया सपलाशया सहिरण्यपवित्रया सदूर्वापल्लवया निषिञ्चेदब्लिङ्गाभिर्ऋग्भिः।अथ वधूवरौ स्वशेखरपुष्पं क्षीरघृतेनाप्लाव्य परस्परस्य तिलकं कुरुतः कण्ठे स्रजं चामुञ्चतः कौतुकसूत्रं च करे बध्नीयाताम् । अथ पुरोधास्तयोरुत्तरीयान्तयोः पञ्चपञ्च पूगीफलानि विवाहव्रतरक्षिणं गणाधिपमनुस्मृत्य गणानां त्वा गणपतिं हवामहइत्यादून इन्द्रक्षुमन्तमिति च बध्वोत्तरीयान्तौ च नीललोहितं भवतीति बध्नीयात् । अथ दाता सभार्यो वृद्धाः पुरन्ध्र्यो ज्ञातिबान्धवाश्च क्रमादाशीर्भिरार्द्राक्षतारोपणं कुर्युरिति । अत्र —

प्रत्यङ्मुखः प्राङ्मुखीं तां स्थितामात्मसमीपतः ।
कन्यकां प्रतिगृह्णीत दत्तां पित्रादिभिर्वरः ॥

इति शौनकेन —

ततः पूर्वमुखो दाता वरः प्रत्यङ्मुखो भवेत् ।
मधुपर्कार्चितायैनां तस्मै दद्यात्सदक्षिणाम् ॥

इति ऋष्यशृङ्गेण च वरस्य प्रत्यङ्मुखत्वमुक्तम्,

परिशिष्टे तु प्रत्यङ्मुखीं गुडजीरकपाणिं कन्यां स्थापयेद्गुरुपरस्मिन्प्राङ्मुखं तथाभूतं वरमिति वरस्य प्राङ्मुखत्वमुक्तं, तयोर्विरोधे देशाचारतः कुलाचारतो वा व्यवस्थाऽनुधेया ।

अथ कन्यादाने पुरुषोच्चारणक्रमः ।

तत्र वृद्धवसिष्ठः,

नान्दीश्राद्धे विवाहे च प्रपितामहपूर्वकम् ।
नाम सङ्कीर्तयेद्विद्वानन्यत्र पितृपूर्वकम् ॥

ऋष्यशृङ्गोऽपि,

वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम् ।
नाम सङ्कीर्त्तयेद्विद्वान्कन्यायाश्चैवमेवहि ॥ इति ।

परिशिष्टेऽप्ययमेव क्रम उदाहृतः । यत्तु—

पुत्रायास्य च पौत्राय नप्त्रे ऽस्यामुकगोत्रिणे ।
अस्याअमुकगोत्रस्य पुत्री पौत्र्यस्य नप्त्रिका ॥

इति कारिकायामानुलोम्यक्रमोऽभिहितस्स पूर्वोक्तवृद्धवसिष्ठादिवाक्यविरुद्धत्वान्मूलानुपलब्धेश्च चिन्त्यः । अक्षतारोपणे मन्त्रानाह सङ्ग्रहकृत्,

श्रियो भगो यशश्चैव यज्ञो धर्मः प्रजाश्च षट् ।
समृध्यतामिति वधूर्वरश्चैतान् क्रमाद्वदेत ॥ इति ।

श्रियः इति वधूः । भग इति वरः । यश इति वधूः । यज्ञ इति वरः । धर्म इति वधूः । प्रजा इति वरः । समृध्यतामित्यन्तान्षण्मन्त्रान्पठेदित्यर्थः ।

तण्डुलराशौ परिमाणमाह यमः, आरुह्य तण्डुलप्रस्थमीक्षेत प्रत्यङ्मुखो वधूमिति ।

अथ कन्यादानमन्त्रौ वायुपुराणे,

कन्यां कनकसम्पन्नां कनकाभरणैर्युताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥
विश्वम्भरः सर्वभूतास्साक्षिण्यः सर्वदेवताः ।
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ॥ इति ।

अथ वरप्रार्थनामन्त्रौ ऋष्यशृङ्गः,

गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् ।
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ इति ।

व्यासः,

कन्ये ममाग्रतो भूयाः कन्ये मे देवि पृष्ठतः ।

कन्ये मे सर्वतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥
शय्यादिदानान्याह लिङ्गपुराणम्,
दासीदासासनाद्यं च भूषणानि गृहे ततः ।
क्षेत्राणि च धनं चापि तथाऽन्यानि प्रदापयेत् ॥
ऋष्यशृङ्गोऽपि,
भूमिं गां चैव दासीश्च वसनानि स्वशक्तितः ।
महिषीर्वाजिनश्चैव दद्यात्स्वर्णमणीनपि ॥
ततः स्वगृह्यविधिना होमाद्यं कर्म कारयेत् ।
यथाचारं विधेयं च मङ्गल्यं कौतुकानि च ॥ इति ।

अथ कन्यादानफलम् ।

तत्र ब्रह्मपुराणं,
कन्यां तु परया भक्त्या ह्यलंकृत्य प्रयत्नतः ।
कुलीनाय सुरूपाय गुणज्ञाय विशेषतः ॥
कन्यां वरयमाणाय दद्यादेष विधिः स्मृतः ।
लैङ्गे,
कन्यादानं प्रवक्ष्यामि सर्वदानोत्तमोत्तमम् ।
यद्दत्त्वा सर्वदानानां फलं प्राप्नोति मानवः ॥
ऋष्यशृङ्गः,
महीदातुश्च गोदातुः कन्यादातुश्च ये तथा ।
कन्यादानानुगाः पश्चात्समं यान्ति त्रयो रथाः ॥
अयाचितप्रदातुश्च सत्यवादिन एव च ।
नित्यं स्वाध्यायशीलस्य समं यान्ति त्रयो रथाः ॥
मनुः,
अग्निहोत्रादिभिर्यस्त्याद्दीक्षितब्राह्मणस्य च ।
तत्कन्यां विधिवद्दत्त्वा फलमाप्नोति मानवः ॥

स्कान्दे,

वैवाहिकप्रदानं वा यो ददाति तथा परः।
विमानेन विचित्रेण किङ्किणीजालमालिना॥
महेन्द्रभवनं याति वीक्ष्यमाणोऽप्सरोगणैः।

संवर्तः,

अलङ्कृत्य तु यः कन्यां भूषणाच्छादनादिभिः।
दत्त्वा स्वर्गमवाप्नोति पूज्यते वासवादिभिः॥
कूपदश्चाश्वमेधी च प्राणदाता भयेषु च।
सर्पं यान्ति रथा एषां त्रयो वै नात्र संशयः॥
कूपदोऽलङ्कृतकन्यादाता।
सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूपदः।

इत्यभिधानात्,

दाने भूषितकन्यायाः कूपो गर्भे महावपि।
इति वैजयन्तीदर्शनाच्च।

वह्निपुराणे,

कन्यां ये तु प्रयच्छन्ति यथाशक्ति स्वलङ्कृताम्।
ब्रह्मदेयां द्विजश्रेष्ठ ब्रह्मलोकं व्रजन्ति ते॥
तिलराशिः कृतो यावद्दिवाकरसमुच्छ्रितः।
वर्षान्ते गृह्यते तस्य तिलो राशेस्तु यावता॥
संक्षयं लभते तावद्ब्रह्मलोकोऽस्य निश्चितम्।

लैङ्गे,

यावन्ति सन्ति रोमाणि कन्यायाश्च तनौ पुनः।
तावद्वर्षसहस्राणि ब्रह्मलोके महीयते॥

आग्नेः,

वालुकाभिः कृतो राशिर्यावत्सप्तर्षिमण्डलम्।

गते वर्षसहस्रे तु लवमेकं विशीर्यते ॥
क्षयश्च दृष्टस्तस्यापि कन्यादाने न विद्यते ।

संवर्त्तः,

कन्यकायाः प्रदानेन श्रेयो विन्दति पुष्कलम् ।
सद्भिरित्युच्यते साधुः कीर्त्तिं प्राप्नोति पुष्कलाम् ॥

इतिशब्दः साधुशब्दात्परो योद्धव्यः ।

तथा,

ज्योतिष्टोमातिरात्राणां शतं शतगुणीकृतम् ।
प्राप्नोति पुरुषीं दत्वा होममन्त्रैस्तु संस्कृताम् ॥

पुरुषीं कन्याम् । यद्यपि संस्कृतां दत्वेत्यन्वये दानात्संस्कारस्य पूर्वभावित्वं प्रतीयते तथापि सुखं व्यादाय स्वपितीतिवद्दानोत्तरकालत्वमेव संस्कारस्यावगन्तव्यम् । अर्थक्रमस्य बलवत्त्वात् ।

कश्यपः,

अनडुहां सहस्राणां दद्यानां धुर्यवाहिनाम् ।
सुपात्रे विधिवद्दानं कन्यादानं च तत्समम् ॥
यस्तु सत्येन धर्मेण पिता स्पर्शयते सुताम् ।
स प्रेत्य लभते स्थानं यथा दक्षः प्रजापतिः ॥

सत्येन छलादिरहितेन धर्मेण धर्मबुद्ध्या स्पर्शयते वरेण प्रापयतीत्यर्थः ।

बृहस्पतिः,

सहस्रमेव धेनूनां शतं वाऽनडुहां समम् ।
दशानडुत्समं यानं दशयानसमो हयः ॥
दशवाजिसमा कन्या भूमिदानं च तत्समम् ।
तस्मात्सर्वेषु दानेषु कन्यादानं विशिष्यते ॥

आदित्यपुराणे,

श्रुत्वा कन्याप्रदानं तु पितरः सपितामहाः ।
मुक्ता वै सर्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥
बृहस्पतिर्देवलश्च,
तिस्रः कन्या यथान्यायं पालयित्वा निवेश्य च ।
न पिता नरकं याति नारी वा स्त्रीप्रसूतिनी ॥
यथान्यायं यथोक्तविधिना । स्त्रीप्रसूतिनी कन्याप्रसूतिनी ।
स्मृत्यन्तरे,
नाग्निहोत्रादिभिस्तस्माद्व्रह्मणे ब्राह्मणस्य च ।
यत्कन्यां विधिवद्दत्वा फलं प्राप्नोति मानवः ॥
संवर्त्तः,
तां दत्त्वा च पिता कन्यां भूषणाच्छादनासनैः ।
पूजयन्स्वर्गमाप्नोति नित्यं वत्सरवृद्धिषु ॥ इति ।
अथ वयोविशेषेण दातुः फलम् ।
तत्र मरीचिः,
गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत् ।
कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥ इति ।
गौर्यादिशब्दार्थो यमेन दर्शितः,
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ इति ।
अथ होमादिविधिः ।
तत्र शौनकः
कन्यकां परिगृह्यैवं वरः पूर्ववदासने ।
तत्रैवोपविशेत्पश्चात्तां वधूं मातुलादिकः ॥
स्वजनः परिगृह्याग्नेः उत्तरेण वरस्य तु ।
पश्चिमेन यथा नीत्वा तस्मिन्नेव वरासने ॥

वरस्य दक्षिणे पार्श्वे प्राङ्मुखीमुपवेशयेत् । इत्यादि ।
विशेषान्तरं तत्तत्सूत्रानुसारेण प्रयोगे वक्ष्यते ।

अथ पाणिग्रहणम् ।

तत्र मनुः,

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ॥
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया ।
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ॥

क्षत्रियया ग्राह्य इति वदता पूर्वं वरेण गृहीतं शरं क्षत्रिया गृह्णीयादित्युक्तं भवति । एवमुत्तरत्रापि ।

याज्ञवल्क्यः,

पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥ इति ।

अथ सप्तपदी,

तत्राश्वलायनः,

अथैनामपराजितायां दिशि सप्तपदान्यभ्युत्क्रामयतीति । अपराजिता ऐशानी ।

तथाच शौनकः,

अग्नेः पूर्वोत्तरं देशं नीत्वा तस्याः पुरो व्रजेत् ।
इषएकपदीत्याद्यमुक्त्वा मन्त्रं च सर्वकम् ॥
मन्त्रादिपदसंख्यानं प्रत्येकं योजयेत्पदम् । इति ।

पारस्करोऽपि, अथैनामुदीचीं सप्त पदानि प्रक्रामयतीति ।

हिरण्यकेशी, अपरेणाग्निं प्राचीमुदीचीं वा विष्णुक्रमान् क्रामयत्यथैनां संशास्ति दक्षिणेन प्रक्रम्य सव्येनानुप्रक्रामप्रक्रम्येन दक्षिणमतिक्रामीरिति ।

अस्यापवादकालमाह मनुः,

पाणिग्रहणमन्त्रास्तु नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥ इति ।

दारलक्षणं भार्यात्वोत्पत्तौ प्रमाणं विद्वद्भिर्नियतम् । तेषां मन्त्राणां निष्ठा समाप्तिस्सम्पूर्णसंस्कारोत्पादकत्वं सप्तमे पदे अतिक्रान्ते भवति ।

पाणिगृहीती भार्या स्यादितरा सहधर्मिणी ।

इति त्रिकाण्डीस्मरणात् । भार्यात्वं पतित्वस्याप्युपलक्षणम् ।

तथाच यमः,

नोदकेन न वाचा वा कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥ इति ।

पतिगोत्रप्राप्तिरपि सप्तमपदातिक्रमे भवति ।

तथाच मनुः,

स्वगोत्राद् भ्रश्यते नारी विवाहात्सप्तमे पदे । इति ।

अथ होमकाले कन्यर्तुदर्शने निर्णयमाह—

यज्ञपार्श्वः,

विवाहे वितते तन्त्रे होमकाल उपस्थिते ।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ।
युञ्जानामाहुतिं हुत्वा ततः कर्मणि योजयेत् ॥

युञ्जानमन्त्रस्तैत्तिरीयशाखायामभिहितः,

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ इति ।

यद्वा,

विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला ।

त्रिरात्रं दम्पती स्यातां पृथक्शय्यासनाशनौ ॥
चतुर्थेऽहनि संस्नातौ तस्मिन्नग्नौ यथाविधि । इति ।

अथाविवाहान्तः सूतकपाते निर्णयः ।

ब्रह्मपुराणे,
विवाहयज्ञयोर्मध्ये सूतके सति चान्तरा ।
शेषमन्नं परैर्देयं दातॄन् भोक्तॄंश्च न स्पृशेत् ॥ इति ।
शेषमन्नं परैर्देयमित्येतत्तु जन्ममरणगृहव्यतिरिक्तगृहविषयम्। न स्पृशेदित्यत्र दोष इति शेषः ।

क्रतुरपि,
विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके ।
पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥ इति ।

अथ विवाहमध्ये श्राद्धादिमपाते निर्णयः ।

दीपिकायाम्,
विवाहमारभ्य चतुर्थिमध्ये श्राद्धं दिनं दर्शदिनं यदि स्यात्।
वैधव्यमाप्नोति तदाऽऽशु कन्या जीवेत्पतिश्चेद्दनपत्यता स्यात् ॥ इति ।
विवाहमध्ये यदि तत्क्षयाहं श्रुत्वाऽश्वशुर्याः पितरो न यान्ति ।
वृत्ते विवाहे परतस्तु कुर्याच्छ्राद्धं स्वधाभिर्नच दूषयेत्तम् ॥ इति ।
वध्वा चानक्षत्रदर्शनं वाङ्नियमः कार्यः ।

तथाचाश्वलायनः,
ब्राह्मण्याश्च वृद्धाया जीवपत्न्या जीवप्रजाया अगारएतां रात्रिं वसेद् ध्रुवमरुन्धतीं सप्तऋषीनिति दृष्ट्वा वाचं विसृजेत जीवपत्नी प्रजां विन्देयेतीति ।

अस्यार्थः । समाप्ते होमे रात्रौ ध्रुवादीन् दृष्ट्वा वाचं विसृजेन्मन्त्रेण । हरदत्तस्तु सप्तर्षीनित्यत्रेतिशब्दः प्रकारार्थः । तेन शुक्रादीनामपि यथासम्भवं दर्शनं भवतीति । इदानीं वाग्विसर्जनवि-

धानाद्धोमादारभ्य तावन्तं कालं वाचो नियम इति गम्यते । कस्यायं वाग्विसर्गः, वध्वाः । कुतः, मन्त्रलिङ्गात् । जीवः पतिर्यस्याः सा जीवपत्नी । जीव इति कर्त्तरि पचाद्यच् । पत्युर्नो यज्ञसंयोगे विभाषा सपूर्वस्येति ङीप् नकारादेशश्च ।

शौनकोऽपि,

यस्मिन्काले विवाहः स्याद्रजन्यां यदि वा दिवा ।
तत्र होममुपक्रम्य प्राग्विवाहसमापनात् ॥
वधूर्वाङ्नियमं कृत्वा वर्त्तेतावहिता सती ।
निवृत्ते तु विवाहे तां वधूं ध्रुवमरुन्धतीम् ॥
सप्तर्षींश्चेक्षयेत्पश्चाद्वध्वा वक्तुमशक्तितः ।
वध्वर्थं जीवपत्न्यादिवाक्यं च व्याहरेद्वरः ॥ इति ।

पारस्करः, अस्तमिते ध्रुवं दर्शयति ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वाऽदात् बृहस्पतिः ।

मया पत्या प्रजावती सञ्जीव शरदः शतमिति सा यदि न न पश्येत्पश्यामीत्येव ब्रूयादिति ।

अथौपासनहोमोपक्रमः ।

तत्राश्वलायनः, पाणिग्रहणादि गृह्यं परिचरेदिति ।

अस्यार्थः । पाणिग्रहणप्रभृति गृह्यं नामाग्निं परिचरेत् । पाणिग्रहणादिवचनं गृहप्रवेशनीयोत्तरकालप्रारम्भशङ्कानिवृत्त्यर्थम् । यद्विधास्यते तत्परिचरणमिति ।

गृह्यपरिशिष्टेऽपि, अथ नित्यौपासनं तस्य सायमारम्भ इति । कात्यायनादीनां तु विशेषो वक्ष्यते ।

शौनकोऽपि,

यस्मिन्नग्नौ विवाहः स्यात्सायमारभ्य तस्य तु ।
परिचर्या विवाहाग्नेर्विदधीत स्वयं द्विजः ॥

यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति ।
उपक्रम्योत्तरस्याह्नः सायं परिचरेदमुम् ॥ इति ।

परिशिष्टान्तरेऽपि,

रात्रौ विवाहउत्पन्ने कथं कुर्वन्ति याज्ञिकाः ।
रात्रावतीतकालश्चेच्छ्वः सायं तदुपक्रमः ॥ इति ।

तत्परिमाणमाह सुदर्शनभाष्यकारः, तस्य चारम्भणं रात्रावेव यदि नव नाड्यो नातीताः । अतीताश्चेत्परेद्युः सायमेवाग्निहोत्रवेलायामारम्भ इति ।

सन्ध्याभाष्येऽपि,

प्रातर्होमे सङ्क्रान्तः कालस्त्वनुदितेऽथवा ।
सायमस्तमिते होमः कालस्तु नव नाडिकाः ॥ इति ।

अथ वध्वाः प्रथमगृहप्रवेशविधिः ।

तत्र गर्गः,

वधूप्रवेशः प्रथमे तृतीये शुभप्रदः पञ्चमकेऽथवाऽह्नि ।
द्वितीयके वाथ चतुर्थके वा षष्ठे वियोगामयदुःखदः स्यात् ॥

नारदोऽपि,

आरभ्योद्वाहदिवसात्षष्ठे वाऽप्यष्टमे दिने ।
वधूप्रवेशः सम्पश्यै दशमे ऽथ समे दिने ॥

वृद्धवसिष्ठोऽपि,

षष्ठेऽष्टमे वा दशमे दिने वा विवाहमारभ्य वधूप्रवेशः ।
पञ्चाङ्गसंशुद्धिदिनं विनापि विधावसङ्कोचरगेऽपि कार्यः ॥

षष्ठस्य विहितप्रतिषिद्धत्वाद्विकल्पः । अयं च युग्मदिनविधिः पञ्चमदिनादूर्ध्वं षोडशादिनादर्वाक् द्रष्टव्यः । षोडशवासरान्तादिति वक्ष्यमाणत्वात् । तदूर्ध्वं विषमे मासि विषमे संवत्सरे वा कार्यः । समे दोषश्रवणात् ।

तथोक्तं तेनैव,
समे वर्षे समे मासे यदि नारी गृहं व्रजेत् ।
आयुष्यं हरते भर्त्तुः सा नारी मरणं व्रजेत् ॥
अयं युग्मवत्सरनिषेधः पञ्चमवत्सरादर्वाक् द्रष्टव्यः । ऊर्ध्वं त्व-
नियमः ।
तथाचोक्तं संग्रहे,
विवाहमारभ्य वधूप्रवेशो युग्मे तिथौ षोडशवासरान्तात् ।
ऊर्ध्वं ततोऽब्देऽयुजि पञ्चमान्तादतः परस्मान्नियमो नचास्ति ॥
तत्र नक्षत्राणि व्यवहारतत्त्वे,
पौष्णात्कभाच्च श्रवणाच्च युग्मे हस्तत्रये मूलमघोत्तरासु ।
पुष्ये च मैत्रे च वधूप्रवेशो रिक्तेतरे व्यर्ककुजे च शस्तः ॥
अथ मासनिर्णयः ॥ ज्योतिर्विवाहपटले,
मार्गशीर्षे तथा माघे माधवे ज्येष्ठसंज्ञके ।
शुभवारतो भवेद्गेहप्रवेशो नवयोषिताम् ॥

अथ प्रतिशुक्रविचारः ।

तत्र लल्लः,
स्वभवनपुरप्रवेशे देशानां विप्लवे तथोद्वाहे ।
नववध्वा गृहगमने प्रतिशुक्रविचारणा नास्ति ॥
माण्डव्यः,
नित्ययाने गृहे जीर्णे प्राशनान्तेषु सप्तसु ।
वधूप्रवेशमाङ्गल्ये न दोषः शुक्रशुक्रयोः ॥
ज्योतिःप्रकाशः,
वामे शुक्रे नवोढायाः सुखं हानिश्च दक्षिणे ।
धनं न्यान्ये च पृष्ठस्थे सर्वनाशः पुरः स्थिते ॥
नवोढायास्तु वैधव्यं यदुक्तं सम्मुखे भृगौ ।

तदेव विबुधैर्ज्ञेयं केवलं तु द्विरागमे ॥

पूर्वतोऽभ्युदिते शुक्रे प्रयायाद्दक्षिणापरे ।

पश्चादभ्युदिते चैव यायात्पूर्वोत्तरे दिशी ॥

तथा भाद्रपदमारभ्य पूर्वादिमुख्यदिक्षु प्रतिदिशं मासत्रयं कण्टकं ज्ञेयम्। चैत्रमारभ्य पूर्वाद्यष्टदिक्षु मुख्यादिक्षु मासद्वयं विदिक्ष्वेकं मासं क्रमेण कण्टकं जानीयात् । इदं द्वयं ग्रामान्तरे च वधूगमने वर्ज्यम् ।

नियतकालेऽपि कदाचिन्निषेधमाह—

गर्गः,

व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि ।

श्राद्धं विना शुभं नैव प्राप्तकालेऽपि मानवः ॥

तथा,

अमासंक्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत् । इति ।

इह प्रियं प्रजयेति वधूं गृहं प्रवेश्य सवधूको वरो गणपतिं लक्ष्मीं च यथाचारं सम्पूज्य पुण्याहं वाचयित्वा विप्राशिषो गृह्णीयात् ॥

अथ नववध्वाः प्रथमवर्षनिषिद्धानि ।

तथाच संग्रहे,

विवाहात्प्रथमे पौषे आषाढे चाधिमासके ।

भर्तुर्गृहे वसेन्न स्त्री चैत्रे तातगृहे तथा ॥ इति ।

तथा,

वधूप्रवेशो निश्येव कार्यो न दिवा ।

वधूप्रवेशो न दिवा प्रशस्तो राजप्रवेशो न निशि प्रशस्तः ।

दिवा च रात्रौ च गृहप्रवेशः प्रकीर्तितस्तु त्रिविधाः प्रवेशाः ॥

इति स्मरणात् ।

आश्वलायनः, प्रयाणउपपद्यमाने पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेदश्मन्वती रीयते संरभध्वमित्यर्द्धर्चेन नावमारोहयेदुत्तरेणोत्क्रमयेज्जीवं रुदन्तीति रुदत्यां विवाहाग्निमग्रतोऽजस्रं नयन्ति कल्याणेषु देशवृक्षचतुष्पथेषु मा विदन्परिपन्थिन इति जपेद्वासे वासे सुमङ्गलीरियं वधूरितीक्षकानीक्षेतेह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेद्विवाहाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायाम् आ नः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचं हुत्वा समञ्जन्तु विश्वे देवा इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वाऽनक्ति हृदयइति ॥

शौनकोऽपि,

तत्र प्रदेशे कस्मिंश्चिदुपलेपनपूर्वकम् ।
विधाय स्थण्डिलं तस्मिन्विवाहाग्निं निधाय च ॥
ततोऽग्नेः पश्चिमे देशे प्राग्ग्रीवोपरिलोमिकाम् ।
त्वचमानडुहं वध्वाः समास्तीर्यासनं क्षमी ॥
उपवेश्य वधूं तत्र ततोऽन्वाधानपूर्वकम् ।
अनूयाजनिधानान्तं पुरस्तात्तं निधाय च ॥
अन्वारब्धस्ततो वध्वा यदीध्माधानपूर्वकम् ।
पुरस्तात्तन्त्रशेषं यद्विधाय जुहुयात्ततः ॥
आ नः प्रजामित्यादिभिर्ऋग्भिश्चतसृभिर्घृतम् ।
तत्र प्रत्यृचमित्युक्ते मन्त्रास्यान्ते हुनेद्धविः ॥
प्रक्षिप्य पश्चात्स्वाहेति शब्दं होता समीरयेत् ।
ततः समञ्जन्त्वित्याद्यामृचमुक्त्वा स्वयं दधि ॥
किञ्चित्प्राश्यावशिष्टं च दधि तां प्राशयेद्वधूम् ।
अथवाऽऽहुतिशिष्टाज्यशेषेणोरसी वधे ॥

समयअन्त्वनयैवर्चा स्वस्य वध्वा अपि क्रमात् ।
ततः स्विष्टकृदाद्यूर्ध्वतन्त्रं परिसमापयेत् ॥ इति ।

अथ दंपत्योर्विवाहव्रतम् ।

तत्राश्वलायनः, अत ऊर्ध्वमक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधःशायिनौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैकऋषिर्जायतइति चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यादन्नं ब्राह्मणेभ्योऽथ स्वस्त्ययनं वाचयीतेति ।

अस्यार्थः । अत ऊर्ध्वमक्षारालवणाशिनावित्यादि । अक्षारं क्षारद्रव्यविवर्जितम् अलवणं लवणवर्जितं चाश्नीत इत्यक्षारालवणाशिनौ । अक्षारलवणाहाराविति शौनकवाक्ये तु क्षारं च लवणं च क्षारलवणे तद्वर्जमाहारो ययोस्ताविति । अक्षारमिति लवणविशेषमाह

मेधातिथिः । क्षारीलवणमिति लोकप्रसिद्धेः । विवाहादारभ्यैते नियमास्सन्त्युभयोः । गृहप्रवेशनीयात्प्रागपि नियमानामिष्टत्वाद्योगविभागः कृतः। उत्तरावधिमाह ! अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रम् । अतो गृहप्रवेशनीयादूर्ध्वं त्रिरात्रं द्वादशरात्रं वा नियतौ स्यातां संवत्सरं वा, एकर्षिकल्पः पुत्रो जायतइति कृत्वा ।

अन्ये त्वाहुः । नियमान्ते एकऋषिकल्पः संपद्यते, पितृगोत्रं विहाय सा पतिगोत्रं भजतइत्यर्थ इति । चरितव्रत इत्यादि । व्रतानन्तरं सूर्याविदे वध्वा उपयमनकाले परिहितं धृतं वस्त्रं दद्यात् । सूर्यया दृष्टो मन्त्रः सूर्या । यथा वृषाकपिरिति । सा च सत्येनोत्तभितेति सूक्तम् । कथं पुनरसौ वेत्ति । स्वरतो वर्णत इत्यादि । शब्दतोऽर्थत इति वा । अन्नं ब्राह्मणेभ्य इत्यादि । दद्यात् । अथ स्वस्त्ययनमित्यादि । ओं स्वस्ति भवन्तो ब्रुवन्त्विति । ओं स्वस्तीति प्रतिब्रूयुरिति ।

शौनकोऽपि,
अत ऊर्ध्वं त्रिरात्रं तौ द्वादशाहमथापि वा ।
शक्तिं वीक्ष्य तथाऽब्दं वा चरतां दंपती व्रतम् ॥
अक्षारलवणाहारौ भवेतां भूतले तथा ।
शयीयातां समावेशं न कुर्यातां वधूवरौ ॥
व्रते समाप्ते वध्वा च विवाहसमये धृतम् ।
वस्त्रं प्रदद्यात्तत्तस्मै ब्राह्मणाय विपश्चिते ॥
सूर्यां नाम्ना ऋचो वेत्ति शब्दार्थस्वरतश्च यः ।
सत्येनोत्तभितेत्याद्यामृचमारभ्य या ऋचः ॥
विहिसोतोरसृक्षतनेन्द्रमित्यादिकाः पुरा ।
अधीतास्ता इहोच्यन्ते सूर्याशब्देन सूरिभिः ॥
ब्राह्मणान्भोजयित्वा तैः पुण्याहमथ वाचयेत् । इति ।
तत्र चतुर्षु दिवसेषु कर्तव्यविशेषमाह स एव,
दम्पती रोहिणीसोमौ भुत्वा प्रथमके दिने ।
दाक्षायणीं यजयातां द्वितीयदिवसेऽपि तौ ॥
पूजयेतां महादेवीं गन्धर्वाप्सरसौ च तौ ।
अग्निस्वाहे तृतीयेऽह्नि पूजयेतां च कालिकाम् ॥
चतुर्थ्यां तौ यजेयातां शाङ्करीं पानपास्त्रियौ ।
एवं प्रतिदिनं कर्तुं पूजां तौ दम्पती तदा ॥
चतुर्ष्वेतेषु दिवसेष्वर्चयेतां द्विजान्बहून् ।
वस्त्रहेमादिमिष्टान्नताम्बूलादिप्रदानतः ॥
आशीर्वादैर्बहुविधैश्चतुर्वेदोदितैर्द्विजाः । इति ।
तौ वर्द्धयेयुरिति शेषः ।
सत्यव्रतोऽपि,
विवाहे दंपती स्यातां त्रिरात्रं ब्रह्मचारिणौ ।

अधःशय्यासनौ स्यातामक्षाराऌवणाशिनौ ॥ इति ।

पारस्करोपि, त्रिरात्रमक्षाराऌवणाशिनौ स्यातामधः शयियातां संवत्सरं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमन्तत इति ।

हिरण्यकेश्यपि, त्रिरात्रमक्षाराऌवणाशिनावधःशायिनावलंकुर्वाणौ ब्रह्मचारिणौ वसत इति ।

एषां च पक्षाणां व्यवस्थोक्ता ब्रह्मपुराणे,

कृते विवाहे वर्षं तु वस्तव्यं ब्रह्मचारिणा ।
पञ्चष्टवर्षा कन्या स्यात्तथा तत्त्रिगुणः पुमान् ॥
त्रिगुणश्चतुर्विंशतिवार्षिकः । तथा,
अथ तद् द्वादशाहानि त्रिंशद्वर्षेण सर्वदा ।
यदि द्वादशवर्षा स्यात्कन्या रूपगुणान्विता ॥
द्वात्रिंशद्वर्षपूर्णेन यदि षोडशवार्षिकी ।
लब्धा तदा तु षड्रात्रं वस्तव्यं संयतेन तु ॥
विंशत्यब्दा यदा कन्या वस्तव्यं तत्र वै त्र्यहम् ।
अत ऊर्ध्वमहोरात्रं वस्तव्यमिति संयतैः ॥ इति ।

अथ चतुर्थीकर्म ।

तत्र पारस्करः, चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तर उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीत्यादि ।

हिरण्यकेश्यपि, चतुर्थ्यामपररात्रेऽग्निमुपसमाधाय प्रायश्चित्तपर्यन्तं कृत्वा नव प्रायश्चित्तीर्जुहोतीत्यादि ।

अथ मण्डपोद्वासनविधिः ।

तत्र नारदः,

मण्डपोद्वासनं कार्यं समे तु दिवसे बुधैः ।

षष्ठं च विषमं नेष्टं मुक्त्वा पञ्चमसप्तमौ ॥ इति ।

अथ विवाहभेदाः ।

तत्र मनुः,

चतुर्णामपि वर्णानां प्रेत्येह च हिताहितान् ।
अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत ॥
ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथाऽऽसुरः ।
गान्धर्वो राक्षसश्चैव पैशाचस्त्वष्टमोऽधमः ॥ इति ।

नारदोऽपि,

अष्टौ विवाहा वर्णानां संस्कारार्थं प्रकीर्त्तिताः ।
ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्तथैव च ॥
आर्षस्तथैव दैवश्च गान्धर्वश्चासुरस्तथा ।
राक्षसोऽनन्तरस्तस्मात्पैशाचश्चाष्टमोऽधमः ॥ इति ।

हारीतोऽपि, अथाष्टौ विवाहा भवन्ति ब्राह्मो दैवो गान्धर्व आसुरो राक्षसः पैशाचो मानुषः क्षात्रश्चेति ।

अत्र मानुषक्षात्रपदाभ्यामार्षप्राजापत्ययोर्ग्रहणमित्यविरोधः ।

विष्णुरपि, अथाष्टौ विवाहा भवन्ति ब्राह्मो दैव आर्षः प्राजापत्यो गान्धर्व आसुरो राक्षसः पैशाचश्चेति ।

यत्तु वसिष्ठेन षड्विवाहा ब्राह्मो दैव आर्षो गान्धर्वः क्षात्रो मानुषश्चेति षट्त्वमेव विवाहानामुक्तं, तन्नेतरव्यवच्छेदकम् । किन्तु ब्राह्मणकर्त्तव्यतयोक्तषड्विवाहपरम् ।

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥

इति मनुस्मरणात् ।

अथ ब्राह्मादिलक्षणानि ।

तत्र मनुः,

आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्यायाः ब्राह्मो धर्मः प्रकीर्त्तितः ॥

आच्छाद्य वाससा, अर्हयित्वा स्रक्चन्दनादिभिः । वरमिति शेषः, न कन्यामिति । आहूयेत्यस्यापेक्षितत्वात् । स्वयमिति न वरप्रार्थनाव्युदासः । कन्यावरणविधिविरोधापत्तेः । श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने दीयतइति स ब्राह्म इति बौधायनवाक्ये ब्राह्मविवाहेऽप्यर्थनाश्रवणाच्च । ब्रह्मचारिणे अविप्लुतब्रह्मचर्याय । तच्चार्थनं वरणरूपमेव । स्वयमेव वरस्याह्वानमपूर्वं ब्राह्मविवाहाङ्गत्वेन विधीयते । अत एव दाक्षिणात्यशिष्टाचारोऽपि तथा ।

विष्णुरपि, आहूय गुणवते कन्यादानं ब्राह्मः विवाह आहूय दीयते शक्त्यलङ्कृतेति ।

संवर्तोऽपि,

अलङ्कृत्य स्वलङ्कारैर्वराय सदृशाय च ।
ब्राह्मेण तु विवाहेन कन्यां दद्यात्सुलक्षणाम् ॥

देवलः,

ततो निवीतां कल्याणीं कन्यां सुवलयान्विताम् ।
अलङ्कृत्यार्हते दद्याद्विवाहो ब्राह्म उच्यते ॥

निवीतां निवीतप्रावरणवतीम् । कल्याणीमुक्तकन्यालक्षणवतीम् । सुवलयान्वितामभिनवकङ्कणवतीम् । तेन गजदन्तकङ्कणधारणरूपो दाक्षिणात्यशिष्टाचारोऽप्यनुगृहीतो भवति ।

व्यासः,

आच्छाद्यालङ्कृतां कृत्वा त्रिः परिक्रम्य पावकम् ।
नामगोत्रे समुद्दिश्य दद्याद्ब्राह्मो विधिस्त्वयम् ॥

पावकपरिक्रमणं च शाखान्तरेऽग्निं प्रतिष्ठाप्य कन्यया सह तं त्रिः परिक्रम्य तां दद्यादिति क्रमदर्शनादत्रोक्तमिति ध्येयम् ।

यमः,

अद्भिर्या दीयते कन्या ब्राह्मेयीति तां विदुः ।

ब्राह्मेयीति संज्ञा श्राद्धे ब्राह्मेयानुजातश्चेत्यनेन तज्जातस्य पङ्क्तिपावनत्वव्यवहारार्थम् । यत्तु अनिन्द्यमन्यैरवितर्कयन् विधिवद्वस्त्रयुगं दत्त्वा सहधर्मश्चर्यतामिति स ब्राह्म इति हारीतेन ब्राह्मविवाहेऽपि सहधर्मचरणमुक्तं, तद् न ब्राह्मपदार्थघटकं, गौरवापत्तेः । किन्तु प्रैषवचनप्राप्तार्थानुवादः । अनिन्द्यन्दोषाभिधानमकुर्वन् । अन्यैरवितर्कयन् अन्यैस्सह दोषमनाशङ्कमानः । ब्राह्मविध्युपक्रमे हि धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयं नातिचरामीति काठकगृह्योक्तदातृप्रतिग्रहीतृप्रैषानुवादः । विधिवन्मधुपर्कादिपूर्वम् ।

आपस्तम्बः,

ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्याणि बुद्ध्वा प्रजासहत्वकर्मभ्यः प्रतिपादयेत् । यथाशक्त्यलङ्कृत्य प्रजार्थधर्मकर्मसु सहभावाय यथोक्तविधिना प्रतिपादयेदित्यर्थः ।

आश्वलायनः,

यथाशक्त्यलङ्कृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः ।

शङ्खलिखितौ, तत्र सवर्णः सवर्णाय विदितायैव नग्निकां दद्यात्स ब्राह्मः । विदितः कुलादिभिः । नग्निकामनागतार्तवाम् ।

पैठीनसिः, तस्मान्नग्निकां कन्यां सहिरण्यां दद्यादयं ब्राह्मो विवाह इति ।

ब्रह्मपुराणे,

ईदृशाय यदा कन्यां ददध्वं प्रजयाऽन्विताः ।

अलङ्कृत्य यथाशक्त्या पूरयित्वा धनेन च ॥

ईदृशाय पूर्वोक्तगुणयुक्ताय ।

अथ दैवलक्षणम् ।

तत्र मनुः,

यज्ञे तु वितते सम्यक् ऋत्विजे कर्म कुर्वते।

अलङ्कृत्य सुतादानं दैवं धर्म्यं प्रचक्षते॥

सम्यगतिसौष्ठवेन कर्म कुर्वते ऋत्विजे इत्यन्वयः।

याज्ञवल्क्यः, यज्ञस्थऋत्विजे दैवः।

आश्वलायनः, ऋत्विजे वितते कर्मणि दद्यादलङ्कृत्य स दैवः।

देवलः,

अन्तर्वेदि समानीय कन्यां कनकमण्डिताम्।

ऋत्विजे तु ददात्येनां विवाहो दैवसंज्ञकः॥

यमः,

ऋत्विजं समलङ्कृत्य विवाहो दैव उच्यते।

हारीतः,

वेद्यन्ते मैथुनं दत्त्वा स दैवः। वेद्यन्ते वेदिमध्ये मैथुनं गोमिथुनं दत्त्वा, वरायेति शेषः।

बौधायनः, दक्षिणासु दीयमानास्वन्तर्वेदि यदृत्विजे स दैवः।

अथार्षलक्षणम्।

तत्र मनुः,

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।

कन्याप्रदानं विधिवदार्षो धर्मोऽयमुच्यते॥

धर्मतः कुलधर्मतः। आर्षधर्मतो वा। न तु शुल्कत्वेन।

आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत्।

अल्पो वापि महान्वापि विक्रयस्तावदेव सः॥

इति मनुना गोमिथुनस्य शुल्कत्वेनोपादानाऽऽकरणात्। शुल्कत्वं तु गोमिथुनस्यापि लोभेन गृह्यमाणस्य भवति।

तथाच स एव,

न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि ।
गृह्णन् हि शुल्कं लोभेन स्यान्नरोऽपत्यविक्रयी ॥ इति ।

अत एव लोभं विना गृह्यमाणमपि अर्हणमेव भवति कुमारीणां न शुल्कमित्याह—

स एव,

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत्कुमारीणामानृशंस्यं हि केवलम् ॥ इति ।

आनृशंस्यमपापिष्ठमित्यर्थः।वाशब्दादधिरथं गोशतमपि देयम्।

तथाचापस्तम्बः, विवाहे दुहितृमते काम्यं धर्मार्थं श्रूयते तस्माद् दुहितृमतेऽधिरथं शतं देयम् तन्मिथुनं कुर्यादिति तस्यां क्रयशब्दः संश्रुतिमात्रं धर्माद्धि सम्बन्ध इति।

अस्यार्थः ।

दानं विक्रयधर्मश्चापत्यस्य न विधीयते ।

इति निषेधात्कथं गोमिथुनादिग्रहणमित्यत आह । विवाहइति । विवाहे आर्षे, तस्यैवोपसंहारात् । तत्र यत्कन्यापित्रे दीयते तत्काम्यम् । ऋषितुल्यपुत्रोत्पत्तिकामनया दीयमानत्वात् ।

तथाच स्मृतिः, यथा युक्तो विवाहस्तथा युक्ता प्रजा भवतीति । तन्मिथुनं कुर्यादिति । तद् दत्तं रथाधिकं गोशतं कन्यावरौ मिथुनं कुर्यात् । जायापतित्वमापादयेदित्यर्थः । यस्तु तस्यामार्षोढायां क्रयशब्दः स शब्दमात्रं न वास्तवः क्रय इति कल्पतरुः। वस्तुतस्तु तस्यां दानक्रियायामिति व्याख्येयम् । आर्षोढायां क्रीताशब्दप्रयोगापेक्षणात् क्रियावाचिनः क्रयशब्दस्य प्रयोगानुपपत्तेः । अत्र हेतुः धर्माद्धि सम्बन्ध इति । धर्मनिमित्तो ह्यसौ सम्बन्धो न लोभनिमित्तक इति । गोमिथुनग्रहणं च स्वयं कन्योपकरणदानासमर्थस्य तद्दानार्थं वेदितव्यम् ।

प्रदानं यत्र कन्यायाः सह गोमिथुनेन च ।
शस्ताय चासगोत्राय तमार्षमृषयो विदुः ॥

इति देवलस्मरणात् । गोमिथुनेन वरादुपात्तेनेत्यर्थः । शुल्कत्वेन ग्रहणे तु दोषः । वक्ष्यमाणदोषश्रवणात्त्वाचार्यैरभिहितं "देशकालानुरूपं हि मूल्यं शुल्कं भवति, लोके तथा दर्शनात् । गोमिथुनं हि न शुल्कम् । शास्त्रे नियतपरिमाणत्वादिति । तच्चिन्त्यम् । अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीत्यत्र सोमक्रयण्यां गवि व्यभिचारदर्शनात् । तस्माच्छास्त्रेऽपि नियतपरिमाणं शुल्कं भवति । हिरण्येन क्रीणाति वाससा क्रीणातीत्युपक्रम्य तां दशभिः क्रीणातीति तत्रैव शुल्कपरिमाणदर्शनात् । तस्माद्यथोक्तमेव साधु ।

याज्ञवल्क्यः, आदायार्षस्तु गोद्वयमिति ।

शङ्खलिखितौ, गोमिथुनेन वस्त्रयुगलेन वाऽऽर्षः सर्वेष्वलङ्कारः स्त्रीधनं च देयमिति ।

सर्वेषु विवाहेषु । स्त्रीधनम् अलङ्कारातिरिक्तं धनक्षेत्रादि ।

बौधायनः, पूर्वे लाजाहुती हुत्वा गोभ्यां स आर्षः ।

पूर्वे चतसृणां लाजाहुतीनामाद्ये द्वे गोभ्यां सह देये इत्यर्थः । एतेन गोमिथुनप्रत्याहृत्ते कन्यादानकालात्कालान्तरमुक्तं भवति ।

आश्वलायनः, गोमिथुनं दत्त्वोपयच्छेत स आर्ष इति ।

अथ प्राजापत्यलक्षणम् ।

तत्र मनुः,

सहोभौ चरतां धर्ममिति वाचाऽनुभाष्य च ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥

देवलः,

सहधर्मक्रियाहेतोर्दानं समयबन्धनात् ।

अलंकृत्यैव कन्याया विवाहः स प्रजापतेः ॥

गौतमः, संयोगमन्त्रः प्राजापत्ये सहधर्मश्चर्यतामिति ।

याज्ञवल्क्यः,

इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने । स कायः ॥ इति ।

आश्वलायनः, सह धर्मं चरत इति प्राजापत्यः ।

कन्यादानसमयेऽन्योन्याव्यभिचारेण सहोभौ चरतां धर्ममित्यनेन वाक्येन समयं कृत्वा यत्कन्यादानं स प्राजापत्य इति कल्पतरुप्रभृतयः । देवस्वामिनस्तु यद्यप्यन्येष्वपि विवाहेषु सहधर्मचरणमस्त्येव तथाप्यत्र सहधर्मचरणमेव न मध्ये आश्रमान्तरप्राप्तिर्नापि स्त्र्यन्तराविवाह इति विशेष इत्यव्यभिचारपदार्थं व्याचख्युः ।

विष्णुस्तु लक्षणान्तरमाह ।

प्रार्थितायाः याचितायाः कन्यायाः यत्पित्रा प्रकर्षेणोक्तविधिना दानं तेन प्राजापत्य इत्येकार्थतां वर्णयन्ति ।

यत्तु धर्मशब्दोऽर्थकामयोरुपलक्षणम् । धर्मे चार्थे च कामे च नातिचरितव्या त्वया त्वियमितिस्मृत्यन्तरादिति । तन्न । तस्य वाक्यस्य काठकगृह्यपरिशिष्टे ब्राह्मविवाहोपक्रमपठितत्वेन तन्मात्रविषयत्वात् । सह धर्मश्चर्यतामिति प्राजापत्ये गौतमेन मन्त्राभिधानाच्च ।

अथासुरलक्षणम् ।

तत्र मनुः,

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याऽऽप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥

आप्रदानम् आदानं ग्रहणमिति यावत् । स्वाछन्द्यात्स्वेच्छया, न तु कन्यापितुः पारतन्त्र्येण । क्रयेणैव स्वत्वोत्पत्तेः ।

देवलः,

शुल्कं प्रदाय कन्यायाः प्रत्यादानं विधानतः।
वित्तहेतुर्विवाहो ऽयमासुरः षष्ठ उच्यते॥

वित्तहेतुर्वित्तसाध्यः।

पैठीनसिः, शुल्केन पणित्वा ददतोरासुरः।

पणित्वा विक्रीय। ददतोः मातापित्रोः। ददतोरर्पयतोः, दानाभावादिति केचित्। तन्न।

मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम्॥

ब्राह्मादिषु विवाहेषु पञ्चस्वेषु विधिः स्मृतः।
गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु॥

इति मनुनारदाभ्यां मान्यविशेषाभ्यामष्टस्वपि विवाहेषु दानप्रतिपादनात्। स्वस्त्ययनं स्वस्तिवाचनादि। प्रजापतियज्ञः प्राजापत्यश्चरुहोमः। एषविधिर्दानलक्षणः। गुणो ब्राह्मण्यम्। तस्यैव सम्प्रदानविशेषणेषु प्राधान्यात्। ब्राह्मणादीनां प्रतिलब्धेऽसाधारणस्वत्वाच्च। तदपेक्ष्यासुरादिष्वपि त्रिषु दानं भवति।

हारीतः, शौल्केन मानुषः।

मानुष इत्यासुरस्यैव संज्ञान्तरम्।

पैठीनसिः, शुल्केन कन्यामाददतो राक्षस इति। इदमप्यस्यैव संज्ञान्तरम्।

वसिष्ठः, पणित्वा धनक्रीता स मानुषः। क्रये श्रुतिं प्रमाणयति, तस्माद्दुहितृमते ऽधिरथशतं देयमिति ह क्रयो विज्ञायतइति। तस्मादित्युक्तोपसंहारः। ग्राहयितुः कन्यादातुः। मते संमते। अधिको रथो यस्मिन् शते तदधिरथं, तच्च तच्छतं च, गवामिति शेषः। अनुक्तसंख्या गोगामिनीति न्यायात्। तद् वरेण देयम्। इतिहशब्देनोक्तस्यार्थस्य प्रसिद्धिं दर्शयति। याच पत्युः

क्रीता साऽन्यैश्चरतीति ह चातुर्मास्येष्विति क्रयप्रदर्शनाय श्रुत्युपन्यासः ।

याज्ञवल्क्यः, आसुरो द्रविणादानादिति ।

आश्वलायनोऽपि, धनेनोपयच्छेत स आसुरः ।

हारीतस्तु लक्षणान्तरमाह, दम्भच्छद्मभ्यां परैस्तर्किताय यद्दीयते प्रतिपाद्यते स आसुर इति ।

अस्यार्थः । परैरन्यैर्दम्भच्छद्मभ्यां दाम्भिकत्वेन छाद्मिकत्वेन वा तर्किताय ज्ञाताय स्वयमेव वा दाम्भिकत्वं छाद्मिकत्वं प्रतिपद्य ज्ञात्वा यत्र दानं स आसुरः । आसुरनिन्दामाह —

कश्यपः,

क्रीतद्रव्येण या नारी न सा पत्नी विधीयते ।
न सा दैवे न सा पित्र्ये दासीं तां कश्यपोऽब्रवीत् ॥ इति ।

आपस्तम्बः,

दानं विक्रयधर्मश्चापत्यस्य न विधीयते ।
न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि ॥
गृह्णन्हि शुल्कं लोभेन स्यान्नरोऽपत्यविक्रयी ।
आददीत न शूद्रोऽपि शुल्कं दुहितरं ददत् ॥
शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम् । इति ।

यमः,

नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु ।
शुल्कसंज्ञेन मूल्येन पापं दुहितृविक्रयम् ॥
स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः ।
नारी यानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् ॥

कश्यपः,

शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः ।

आत्मविक्रयिणः पापा महाकिल्विषकारकाः ॥
पतन्ति निरये घोरे घ्नन्ति चासप्तमं कुलम् ।
गमनागमने चैव सर्वं शुल्कोऽभिधीयते ॥
गमनागमने कन्याप्रार्थनार्थं कन्यापितृगृहगमनागमने ।
यमोऽपि,
यो मनुष्योऽपि यत्किञ्चिद्विक्रीय धनमिच्छति ।
तस्य मूत्रं पुरीषं च स पत्योपजीवति ॥
कन्याविक्रयिणो मूर्खाः महाकिल्विषकारकाः ।
पतन्ति नरके घोरे दहन्त्यासप्तमं कुलम् ॥
पराशरः,
कन्यां यच्छति वृद्धाय नीचाय धनलिप्सया ।
कुरूपाय कुशीलाय स प्रेतो जायते नरः ॥
अत्र प्रायश्चित्तमुक्तम् ऋग्विधाने,
महत्तरोमवर्गं च लक्षं चेद्विष्णुमन्दिरे ।
कन्याविक्रयदोषस्तु प्रणश्यति न संशयः ।

इदं च दोषाभिधानं लोभेनात्मार्थं धनग्रहणे, कन्यार्थं धनग्रहणे तु न दोषस्तस्याईणरूपत्वादित्युक्तं प्राक् ।

अथ गान्धर्वलक्षणम् ।

तत्र मनुः,
इच्छया ऽन्योन्यसंयोगः कन्यायाश्च वरस्य वा ।
गान्धर्वस्स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥

अन्योन्यसंयोगः अन्योन्यं सम्प्रतिपत्तिः । मैथुन्यः मिथुनसाध्यकर्माहः । कामसम्भवः कामोद्रेकसम्भवः ।

देवलः,
विविक्ते स्वयमन्योन्यं स्त्रीपुंसोर्यस्समागमः ।

प्रीतिहेतुः स गान्धर्वो विवाहः पञ्चमो मतः ॥

समागमः पतिभार्यात्वसम्प्रतिपत्तिः ।

गौतमः, इच्छन्त्याः स्वयं संयोगो गान्धर्वः । स्वयमिच्छन्त्या वध्वा इच्छतो वरस्य संयोगो गान्धर्वः । स्वयमिति वचनात्स्वयमेव स्वस्य दानं कर्त्तव्यमिति गम्यते, तन्त्रापेक्षयेति ।

द्वयोस्सकामयोर्मातापितृदानरहितो गान्धर्व इति विष्णुस्मरणात् । मातापितृदानरहितः मातापितृकर्तृकदानरहितः ।

हारीतः, स्वयं कन्या वरयते स गान्धर्वः ।

वसिष्ठः, सकामां कामयमानः सदृशीं यो निरुन्ध्यात् स गान्धर्वः ।

याज्ञवल्क्यः, गान्धर्वः समयान्मिथः ।

आश्वलायनः, मिथः समयं कृत्वोपयच्छेत स गान्धर्वः ।

अथ राक्षसलक्षणम् ।

तत्र मनुः,

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ।

प्रसह्य कन्यां हरतो राक्षसो विधिरुच्यते ॥

हत्वा ताडयित्वा, प्रतिबन्धकानिति शेषः । छित्त्वा, प्रतिबन्धकशिरांसीति शेषः । भित्त्वा, शस्त्रप्रहारैरिति शेषः । क्रोशन्तीं स्वजनानाह्वयन्तीम् । अनेन युद्धमुपलक्ष्यते ।

तथाच याज्ञवल्क्यः, राक्षसो युद्धहरणादिति ।

आश्वलायनोऽपि, हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः ।

रुदद्भ्यः, कन्यासम्बन्धिभ्य इति शेषः ।

हारीतः, राजाश्रयेण शान्धत्राभिघातदण्डापविशेषाद्राक्षसः ।

देवलः, विक्रमेण प्रसह्य स्यात्कुमारी ।

हरणं पुनः *।
वीर्यहेतुर्विवाहः स सप्तमः समुदाहृतः ॥

विक्रमेण पराक्रमेण। प्रसह्य बलात्कारेण। वीर्यहेतुर्बललक्षणः।

वसिष्ठः, यां बलेन हरन्ति स राक्षसः।

केचित्तु यां प्रमथ्य बलेन हरेत्स क्षात्र इत्यपि पठन्ति। क्षात्र इति राक्षसस्यैव संज्ञान्तरम्।

हारीतः, अलङ्कृतामभिजयतः क्षात्रः।

विवाहार्थम् अलङ्कृतां कन्यां युद्धे विजयमानस्य यो विवाहः स क्षात्र इत्यर्थः।

विष्णुः, युद्धहरणेन राक्षसः।

गौतमः, प्रसह्यादानाद्राक्षस इति।

अथ पैशाचलक्षणम्।

तत्र मनुः,

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥

विष्णुः, सुप्तप्रमत्ताभिगमनात्पैशाचः।

सुप्ता निद्रिता प्रमत्ता प्रमदातिशयेन नष्टचेतना। तस्यामभिगमनं मैथुनं तस्मात्पैशाचः।

गौतमः, असंविज्ञातोपसङ्गमनात्पैशाचः।

अत्र उपगमनाभिगमनशब्दाभ्यां मैथुनमेवाभिधीयते।

ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति।
यः स्वदारानृतुस्नातान् स्वस्थः सन्नोपगच्छति।

---

* विक्रमेण प्रसह्य स्यात् कुमारी। इति पूर्वपृष्ठस्यान्तिमपङ्क्तौ हरणं पुनः इति च अस्मिन् पृष्ठे पृथग् मुद्रितं प्रमादात्। अपेक्षितं तु—विक्रमेण प्रसह्य स्यात् कुमारीहरणं पुनः। इति।

ऋतात्रुपेयादित्यादिप्रचुरप्रयोगदर्शनात् । तदवस्थानां कन्याहरणमेव पैशाच इत्यन्ये ।

सुप्तमत्तोन्मत्तकन्याहरणं व्यसनादपि ।

प्रमादहेतुः पैशाचो विवाहोऽष्टम उच्यते ॥

इति देवलस्मरणात् । सुप्तानां निद्राक्रान्तानां, मत्तानां मदनीयद्रव्येण, उन्मत्तानां ग्रहाद्यावेशेन, व्यसनाद् राजाद्युपद्रवाद्याकुलानां कन्यायाः यद्धरणं स पैशाचः । प्रमादः पूर्वोक्तादिनिमित्तैरसावधानता । प्रमादोऽनवधानतेति कोशात् ।

आश्वलायनः, सुप्तानां प्रमत्तानां वाऽपहरेत्स पैशाचः ।

याज्ञवल्क्यः, पैशाचः कन्यकाछलात् ।

कन्यकाछलं कन्यकाप्रतारणम् ।

हारीतः, स्त्रीपानमद्यभोगसम्प्रयोगात्पैशाचः ।

स्त्रियाः कुट्टन्याः, पानस्य दुग्धपानकादेः, मद्यस्य द्वादशविधस्य, भोगस्य वस्त्रालङ्कारादेः सम्प्रयोगात् सम्यक् पौनःपुन्येन प्रयोगात्र्पणात्कन्यायाः वशीकरणं पैशाचः । कन्यापित्रादेर्वा ।

अथैषां वर्णविशेषेण व्यवस्था ।

तत्र मनुः,

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरो ऽवरान् ।

विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥

विप्रस्य क्रमेण ब्राह्मदैवार्षप्राजापत्यासुरगान्धर्वाः षट् विवाहा धर्म्याः । तत्र चत्वारो मुख्याः द्वावनुकल्पौ ।

तथाच स एव,

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः । इति ।

तत्रापि द्वौ मुख्यतरौ ।

तथाच महाभारते,

ब्राह्मणानां सतामेष ब्राह्मो धर्म्यो युधिष्ठिर । इति ।

दैवोऽपि ब्राह्मणस्यैव, ऋत्विक्सम्प्रदानकत्वात् । न क्षत्रियादेः, आर्त्विज्याभावात् । क्षत्रियस्य अवरान् अन्त्यान् चतुरः । प्राजापत्यासुरगान्धर्वराक्षसान् । नासुरगान्धर्वराक्षसपैशाचान् । पैशाचस्य सर्वनिषिद्धत्वात् ।

तथाच स एव,

स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः । इति ।

तत्र राक्षसो मुख्यः प्राजापत्यासुरगान्धर्वा अनुकल्पाः ।

तथाच स एव,

राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ।

विट्शूद्रयोस्तु तानेव चतुरः प्राजापत्यासुरगान्धर्वान् राक्षसं विहाय । तत्रासुरो मुख्यः प्राजापत्यगान्धर्वावनुकल्पौ । आसुरो वैश्यशूद्रयोरित्युदाहृतवचनात् । क्रयविक्रयप्रधानत्वाच्च । यत्तु वैश्यस्य राक्षसः श्रेयानिति पैठीनसिवचनं, तद् आसुरमभिप्रेत्य । शुल्केन कन्यास्त्वाददतो राक्षस इति तत्रैव परिभाषणात् ।

नारदोऽपि,

चत्वारो ब्राह्मणस्याद्याः शस्ता गान्धर्वराक्षसौ ।
राक्षस्तथाऽऽसुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः ॥

अन्त्यः पैशाचः स गर्हितो न कस्यापि योग्य इत्यर्थः ।

पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन ।

इति मनुस्मरणात् । यद्वा । यो गर्हितः पैशाचः स आन्त्यः अन्त्याः शूद्रास्तद्योग्य इत्यर्थः । पैशाचः शूद्रस्येति पैठीनसिवचनात् । अन्त्याः प्रतिलोमजा इति वा । पैशाचोऽसंस्कृतप्रसूतानां प्रतिलोमजानां चेति प्रचेतःस्मरणात् । असंस्कृतप्रसूताः कुण्डगोलकादयः ।

बौधायनोऽपि, तेषां चत्वारः पूर्वे ब्राह्मणस्य तेष्वपि पूर्वः

पूर्वः श्रेयानितरेषामुत्तरोत्तरः पापीयानिति ।

देवलोऽपि,

पूर्वे विवाहाश्चत्वारो धर्म्यास्तोयप्रदानकाः ।

अशुल्काः ब्राह्मणार्हाश्च तारयन्ति द्वयोः कुलम् ॥ इति ।

तत्रापि षष्ठसप्तमौ क्षत्रधर्मानुगतौ । तत्पूर्वकत्वात्क्षत्रस्य । पञ्चमाष्टमौ वैश्यशूद्रयोः । अयन्त्रितकलत्रा हि वैश्यशूद्रा भवन्ति कर्षणशुश्रूषाधिकृतत्वात्, गान्धर्वमप्येके प्रशंसन्ति सर्वेषां स्नेहानुगतत्वादिति । चत्वारः, प्रशस्ता इति शेषः । पूर्वः पूर्वस्त्वतिशयेन प्रशस्त इत्यर्थः । इतरेषां गान्धर्वादीनाम् । उत्तरोत्तरोऽप्रशस्तः । षष्ठसप्तमौ आसुरराक्षसौ क्षत्रधर्मानुगतौ क्षत्रियधर्मानुसारिणौ तद्धर्मश्च धनप्रदानबलसम्पत्तिरूपः । पञ्चमाष्टमौ गान्धर्वपैशाचौ वैश्यशूद्रयोः । अयन्त्रितकलत्राः असङ्कोचितस्त्रीकाः । कलत्रमत्र कन्योच्यते । असङ्कोचितकलत्रत्वं च तयोः कर्षणशुश्रूषाधिकृतत्वात् । अनेन वैश्यशूद्रकन्यानामपि कर्षणशुश्रूषे दर्शिते भवतः । सर्वेषां वर्णानां जातीनां च स्नेहस्य सर्वसाधारण्यात् ।

अथ ब्राह्मणादीनामापत्कल्पः ।

तत्र मनुः,

पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह ।

पैशाचश्चासुरश्चैव न कर्तव्यौ कथञ्चन ॥

पृथक्पृथग्विमिश्रौ वा विवाहौ पूर्वचोदितौ ।

गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥ इति ।

क्षत्रस्य चतुरोऽवरानित्युपक्रान्ताः ये प्राजापत्यादयः पञ्च तेषामपि मध्ये आसुरस्य वैश्यशूद्रयोरेव मुख्यत्वात्पैशाचस्य च सर्वेषां निन्दितत्वादवशिष्टास्त्रयः प्राजापत्यगान्धर्वराक्षसाः धर्म्या विप्रस्य । आपद्यनन्तरवर्णद्रव्याश्रयणवदनन्तरवर्णविवाहा-

नामप्यौचित्यात्। क्षत्रियस्यापत्कल्पमाह। पृथगिति। पृथगसङ्कीर्णौ। मिश्रौ सङ्कीर्णौ। यथा प्रथमं गान्धर्वेण प्रतिगृह्य तद्बन्धुषु विरोधप्रवृत्तेषु युद्धेन हरणं, रुक्मिणीहरणवत्। अत्र मिश्रावित्यापत्कल्पः। पृथगित्यनुकल्पः। तद् अनुवादमात्रम् असङ्कीर्णात्सङ्कीर्णस्यातिनिन्दितत्वप्रदर्शनार्थम्। तेन वर्णान्तराणामप्यसङ्कीर्णविवाहासम्भवे आपदि सङ्कीर्णस्याप्यनुष्ठानमभ्यनुज्ञातम्। सर्वनिषिद्धस्य पैशाचस्य विवाहमध्ये परिगणनं वैश्यशूद्रयोरापदि तस्यापि प्राप्त्यर्थम्।

तथाच वत्सः,

सर्वोपायैरसाध्या स्यात्सुकन्या पुरुषस्य च।
चौर्य्येणापि विवाहेन सा विवाह्या रहःस्थिता॥ इति।

चौर्य्येण पैशाचेन। नचासुरादिषु विवाहेषु सप्तपदाभिक्रमणाभावात्पतित्वभार्य्यात्वयोरनुपपत्तिरित्याशङ्कनीयम्। तत्रापि स्वीकारानन्तरं संस्कारविधानात्।

तथाच देवलः,

गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः।
कर्त्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः॥

समयेन संवादेन। समर्थेनेत्यपि पठन्ति। तस्मिन्पक्षे सम्यगर्थः समर्थः भार्य्यात्वोत्पत्तिलक्षणं प्रयोजनं तेन हेतुनेत्यर्थः।

गृह्यपरिशिष्टेऽपि,

गान्धर्वासुरपैशाचा विवाहा राक्षसाश्च ये।
पूर्वं परिणयस्तेषां पश्चाद्धोमो विधीयते॥

परिणयः स्वीकारः। अकृते तु होमे न भार्य्यापतिभावः।

तदुक्तं वसिष्ठबौधायनाभ्यां,

बलादपहृता कन्या यदि मन्त्रैर्न संस्कृता।

अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥ इति ।

संस्कारावश्यकत्वमाह यमः,

नोदकेन विना चायं कन्यायाः पतिरुच्यते ।

पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥ इति ।

आसुरादिविवाहेषु प्रायश्चित्तमप्युक्तं—

त्रिकाण्डमण्डनेन,

अधर्म्येषु विवाहेषु ताम्बूलमनुमोदनम् ।

वाहनं भोजनं चैव वर्जयेत्सर्वथा द्विजः ॥

आसुरे तूपवासः स्याद् गान्धर्वे तु त्रिरात्रकम् ।

राक्षसे चैव पैशाचे कार्यं चान्द्रायणं तथा ॥ इति ।

अथैषां फलानि ।

तत्र मनुः,

यो यस्यैषां विवाहानां मनुना कीर्त्तितो गुणः ।

सर्वं शृणुत तं विप्राः सम्यक्कीर्त्तयतो मम ॥ इति ।

आश्वलायनः, तस्यां जातो द्वादशावरान्द्वादश परान्पुनात्युभयत इति ।

अस्यार्थमाहुर्देवस्वामिनः, तस्यां ब्राह्मविवाहोढायां जातः पुत्रः उभयतो मातृवंशे पितृवंशे च द्वादशावरानुत्पत्स्यमानान्द्वादश परान् पित्रादीन् मातामहादींश्च पुनातीत्यर्थः । आत्मानं च पञ्चविंशम् । आत्मानमिति मनुवाक्ये दर्शनात् ।

शौनकोऽपि,

या ब्राह्मेण विवाहेन सम्यग्दत्ता कुमारिका ।

तज्जातः पावयेत्पुत्रो मातापितृकुलोद्भवान् ॥

द्वादशद्वादशातीतान्पुरुषान् भाविनस्तथा ।

वस्त्रेण च समाच्छाद्य भूषयित्वा च शक्तितः ॥ इति ।

संख्यान्तरमाह मनुः,

दश पूर्वान्परान्वंश्यानात्मानं चैकविंशतिम् ।
ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् ॥

ब्राह्मी ब्राह्मविवाहोढा । पितृशब्दः पुत्रादीनामप्युपलक्षणम् ।

विष्णुरपि, ब्राह्मीपुत्रः पुरुषानेकविंशतिं पुनीतइति ।

याज्ञवल्क्योऽपि,

तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् । इति ।

गौतमोऽपि, दश पूर्वान्दशापरानात्मानं च । ब्राह्मीपुत्र उभयतो दशावरान्दश परान्पुनाति आत्मानं चैकविंशम् । एवमुत्तरत्राप्यात्माऽनुसन्धेयः ।

शौनकोऽपि,

ऋत्विजे कन्यकादानं वितते यज्ञकर्मणि ।
दैवो नाम विवाहोऽसौ ज्ञेयो दैवेन सम्मतः ॥
दैवोढकन्यकाजातो मातापितृकुलोद्भवान् ।
दशावरान्दश परान्पुनात्युभयतो नरान् ॥ इति ।

संख्यान्तरमाह मनुः,

दैवोढजाःसुतश्चैव सप्तसप्त परावरान् । इति ।

दैवेन विवाहेनोढा तस्यां जातः दैवोढजः । संज्ञाछन्दसोर्बहुलमिति ह्रस्वत्वम् । आत्मानं चेत्यनुवर्त्तते । एवं स्मृत्यन्तरवाक्येष्वपि ।

विष्णुरपि, दैवीपुत्रश्चतुर्दश । दैवी दैवविवाहोढा ।

याज्ञवल्क्योऽपि, चतुर्दश प्रथमजः पुनातीति । प्रथमजः दैवविवाहजः ।

गौतमोऽपि संख्यान्तरमाह, दश दैवादिति । पञ्चावरान् पञ्च परानुभयत इति दश ।

अथार्षफलम् ।

तत्राश्वलायनः, सप्तावरान्सप्त परान्पुनात्युभयत इति। आर्षविवाहोढायां जातः पुत्रः सप्तावरान्सप्त परान्पुनातीति उभयतः।

शौनकोऽपि,

यत्र गोमिथुनं दत्त्वा प्रदातृभ्यः कुमारिकाम्।

उद्वहेदार्षनामाऽसौ विवाह ऋषिसंमतः॥

तस्यां जातः सुतो मातुः पितुश्च कुलसम्भवान्।

सप्तावरान्सप्त परान्पुनात्युभयतो नरान्॥ इति।

संख्यान्तरमाह मनुः, आर्षोढजः सुतस्त्रींस्त्रीनिति।

आर्षोढजः आर्षविवाहोढजः।

विष्णुः, आर्षीपुत्रश्च सप्त। आर्षोढापुत्रस्त्रीन्पूर्वांस्त्रीनपरान्दातारं च सप्तमं पुनाति।

याज्ञवल्क्योऽपि, उत्तरजश्च षडिति।

गौतमोऽपि, त्रिपुरुषमार्षात्। त्रिपुरुषमित्यत्र वीप्सा द्रष्टव्या। तथाच त्रीन्पूर्वान् त्रीन्परानिति सिध्यति। स्मृत्यन्तरवाक्यैकवाक्यत्वात्।

अथ प्राजापत्यफलम्।

तत्राश्वलायनः, अष्टावरानष्ट परान्पुनात्युभयत इति। प्राजापत्यविवाहोढायां जातः पुत्रः उभयतोऽप्यवरानष्ट परान्पुनाति।

शौनकोऽपि,

सह धर्मं चरत इत्युक्त्वा यत्र कुमारिका।

प्रदीयते विवाहोऽसौ प्राजापत्य इति स्मृतः॥

अष्टावरानष्ट परान्पुनात्युभयतो नरान्। इति।

संख्यान्तरमाह मनुः,

षट्षट् कायोढजः सुत इति।

याज्ञवल्क्योऽपि,

पावयेत्तज्जः षट्षट् वंश्यान्सहात्मजान् । इति ।

विष्णुः, प्राजापत्यश्चतुरः । चतुर इसत्र वीप्सा द्रष्टव्या । तथाच चतुरः पूर्व्वान् चतुरः अवरानिति सिध्यति ।

गौतमः, दशैव प्राजापत्याद् । पञ्च पूर्वान्पञ्चावरानिति दश ।

शङ्खलिखितौ, सप्ताद्यन्तयोरात्मानं च प्राजापत्यः पञ्चार्षः त्रीन्दैव उत्तरेषु क्रियाप्राधान्यम् ।

आदौ पित्रादीन् सप्त अन्ते पुत्रादींश्च सप्त आत्मानं च पञ्चदश प्राजापत्ये पुनाति । एवं पञ्च पञ्चार्षः । त्रीन्दैवः । उत्तरेषु आसुरादिषु क्रियया विवाहक्रियया प्राधान्यं भार्यात्वोत्पत्तिमात्रं न फलसम्बन्ध इत्यर्थः । अत्र पुरुषसंख्यातारतम्यं कन्यालङ्काराद्युपस्कारतारतम्येन द्रष्टव्यम् ।

फलान्तरमाहतुर्मनुयमौ,

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ।
ब्रह्मवर्चस्विनः पुत्राः जायन्ते शिष्टसंमताः ॥
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः ।
पर्य्याप्तभोगा धर्म्मिष्ठा जीवन्ति च शतं समाः ॥
इतरेषु च शिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा ।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान्विवर्जयेत् ॥

विष्णुरपि, ब्राह्मेण विवाहेन कन्यां ददद् ब्रह्मलोकं गमयति दैवेन स्वर्गम् आर्षेण वैष्णवं प्राजापत्येन देवलोकं गान्धर्व्वेण गन्धर्वलोकं गच्छतीति ।

उक्तलक्षणेन ब्राह्मेण विवाहेन कन्यां दद्दाता पूर्वोक्तसंख्याकान् स्वपितॄन् ब्रह्मलोकं गमयति । स्वयं च गच्छतीति

वक्ष्यमाणेन सम्बन्धः । एवमुत्तरत्रापि द्रष्टव्यम् । गान्धर्वेण कन्यां ददद्गन्धर्वलोकं स्वयं च गच्छति न पितॄन्गमयति । पुरुषसंख्या-विशेषाश्रवणेन गमयतेरनन्वयात् । इदं च विवाहफलं स्वस्वजातीयवरसम्प्रदानके कन्यादाने । ब्राह्मणसम्प्रदानके दाने तु तस्मिन्नेव फलेऽतिशयः कल्पनीयः ।

समम्रब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
अधीते शतसाहस्रं प्राधीतेऽनन्तमुच्यते ॥

इति दक्षस्मरणात् ।

अथ पुनर्विवाहनिर्णयः ।

तत्र नृसिंहः,

पुनर्विवाहं वक्ष्यामि दंपत्योः शुभवृद्धिदम् ।
भग्नेन्दुलग्नयोर्दोषे ग्रहताराादिसम्भवे ॥
अन्येष्वशुभकालेषु दुष्टयोगादिसम्भवे ।
विवाहे त्वथ दंपत्योराशौचादिसमुद्भवे ॥

अत्राशौचशब्देन वरपित्रोराशौचम् । अन्याशौचे दोषाभाववचनात् । आदिशब्देन गृहदाहाद्युत्पातो गृह्यते ।

तस्य दोषस्य शान्त्यर्थं पुनर्वैवाह्यमुच्यते ।
अयनं चोत्तरं श्रेष्ठं वर्द्धयेच्च विशेषतः ॥
आषाढमार्गशीर्षौ द्वौ वर्ज्यौ शेषाः शुभावहाः ।
विवाहोक्तर्क्षतिथ्यंशराशिवारादिवर्गजः ॥
करणायोगसंज्ञानिग्रहगोचरयोगगाः ।
तस्मिन् विवाहसमये शुभदाश्च तथैव च ॥
पूर्वाह्णे पूर्वरात्रौ च विवाहः शुभदो भवेत् ।

इति पुनर्विवाहनिर्णयः ।

अथ बालवैधव्यपरिहारार्थं व्रतम् ।

व्रतखण्डे,

सावित्र्यादिव्रतादीनि भक्त्या कुर्वन्ति याः स्त्रियः।
सौभाग्यं च सुहृत्त्वं च भवेत्तासां सुसन्ततिः॥ इति।
व्रतग्रहणप्रकारस्तु व्रतप्रकाशे ऽवगन्तव्यः।

व्रतान्तरमुक्तं ज्ञानभास्करे,

बलवद्विधवायोगे बाल्ये सति मृगीदृशाम्।
पिता रहसि कुर्वीत तद्व्रतं शास्त्रसम्मतम्॥
सुदिने शुभनक्षत्रे चन्द्रताराबलान्विते।
व्रतारम्भं प्रकुर्वीत बालवैधव्यनाशकम्॥
सुस्नातां चित्रवस्त्राढ्यां कन्यां पितृगृहाद् बहिः।
नीत्वाऽश्वत्थं शमीस्थाने यद्वा बदरिकाश्रमे॥
आलवालं प्रकुर्वीत विपुलं मृदु कर्षितम्।
कुमार्याचार्यनिर्दिष्टं कृतसङ्कल्पमादरात्॥
करकाम्बुप्रपूर्णेन सिञ्चनं प्रतिवासरम्।
चैत्रे चाश्विनमासे च तृतीयासितपक्षतः॥
यावत्कृष्णतृतीयायां मासमेकं यथाविधि।
ब्राह्मणानां तथा स्त्रीणां पूजनं च समाचरेत्॥
तदाशिषाऽऽप्नुयात्कन्या सौभाग्यं च सुखान्वितम्।
प्रतिमां पार्वतीशान्यौ वैणवे भाजनेऽर्चयेत्॥
चन्दनाक्षतदूर्वाद्यैर्बिल्वपत्रैर्यथाविधि।
उपचारैर्यथा भक्त्या नैवेद्यैः प्रतिवासरम्॥
एवं व्रतप्रभावेण बालवैधव्यनिष्कृतिः।
जायते कन्यकानां च ततः पाणिग्रहक्रिया॥ इति।

अथ बालवैधव्यपरिहारार्थं कुम्भविवाहः।

तत्र मार्कण्डेयः,

बालवैधव्ययोगेऽपि कुम्भद्रुप्रतिमादिभिः ।
कृत्वा लग्नं रहः पश्चात्कन्योद्वाह्येति चापरे ॥ इति ।

कुम्भविवाह इति मन्थन्या अप्युपलक्षणम् । द्रुर्वृक्षोऽश्वत्थ एव । प्रतिमा विष्णोः सौवर्णी करशिरोऽवयवादिसहिता न शाल-ग्रामादिरूपा । तत्प्रकारोऽभिहितः —

सूर्यारुणसंवादे,

विवाहात्पूर्वकाले च चन्द्रताराबले शुभे ।
विवाहोक्ते च मन्थन्या कुम्भेन सह चोद्वहेत् ॥
पिता सङ्कल्प्य वाद्यं च विवाहविधिपूर्वकम् ।
सूत्रेणावेष्टयेत्पश्चात् दशतन्तुविधानतः ॥
कुङ्कुमालङ्कृतं देहं तयोरेकान्तमन्दिरे ।
ततः कुम्भं च निस्सार्य प्रभज्य सलिलाशये ॥
ततोऽभिषेचनं कुर्यात्पञ्चपल्लववारिभिः ।
तत्सर्वं वस्त्रपूजायां ब्राह्मणाय निवेद्य च ॥
अन्यालङ्कारवस्त्राद्यं ब्राह्मणाय निवेदयेत् ।
अथ कुम्भप्रार्थना ।
वरुणाङ्गस्वरूप त्वं जीवनानां समाश्रय ।
पतिं जीवय कन्यायाः चिरं पुत्रान्सुखं वरम् ॥
देहि विष्णुवरान्देव कन्यां पालय दुःखतः । इति ।

अथाश्वत्थविवाहः ।

तत्रैव,

द्विजान् गुरून्सुहृन्नारीर्मङ्गलोच्चारणैस्समम् ।
आहूयोद्वाहकाले च रम्यभूमौ समण्डपे ॥
गत्वा प्रणम्य गौरीं च गणनाथं च भूरुहम् ।
भवानीं चैव मन्थानीं पिता मन्त्रमुदीरयेत् ॥

उद्वाहयिष्ये विधिवदश्वत्थेन मनोहराम् ।
कन्यां सौभाग्यसौख्यार्थहेतवे ऽहं द्विजोत्तमः ॥
नमस्ते विष्णुरूपाय जगदानन्दहेतवे ।
पितृदेवमनुष्याणामाश्रयाय नमोनमः ॥
वनानां पतये तुभ्यं विष्णुरूपाय भूरुह । इति ।

अत्र विवाहविधिस्तु कुम्भविवाहवदेवावगन्तव्यः । अथवैव सौवर्ण्या विष्णुप्रतिमया सह विवाहं विधाय प्रतिमां ब्राह्मणाय दद्यात् ।

दानप्रकारस्तत्रैव,

शुभे मासे सिते पक्षे सानुकूलग्रहे दिने ।
ब्राह्मणं साधुमामन्त्र्य सम्पूज्य विविधार्हणैः ॥
तस्मै दद्याद्विधानेन विष्णोर्मूर्त्तिं चतुर्भुजाम् ।
शुद्धवर्णसुवर्णेन वित्तशक्त्याऽथवा पुनः ।
निर्मितां रुचिरां शङ्खगदाचक्राब्जसंयुताम् ।
दधानां वाससी पीते कुमुदोत्पलमालिनीम् ॥
सदक्षिणां च तां दद्यान्मन्त्रमेतमुदीरयेत् ।
यन्मया पूर्वजनुषि घ्नन्त्या पतिसमागमम् ॥
विषोपविषशस्त्राद्यैर्हतो वाऽतिविरक्तया ।
प्राप्यमाणं महाघोरं यशःसौख्यधनापहम् ॥
वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये ।
बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुम् ॥
सौवर्णीं निर्मितां शक्त्या तुभ्यं सम्प्रददे द्विज ।
अनघाऽद्याहमस्मीति त्रिवारं प्रवदेदिति ॥
एवमस्त्विति विप्राशीर्गृहीत्वा स्वगृहं विशेत् ।
ततो वैवाहिकं तासां विधिं कुर्यान्मृगीदृशः ॥ इति ।

अत्र च पुनर्भूत्वदोषो न भवति।
तथाच विधानखण्डे,
स्वर्णाम्बुपिप्पलानां च प्रतिमा विष्णुरूपिणी।
तयोः सह विवाहे च पुनर्भूत्वं न जायते॥ इति।
अत्राम्बुशब्देन जलपूर्णो घटो लक्ष्यते।
तथा,
लक्ष्मीरूपा सदा कन्या हरिरूपं सदा जलम्।
हरेर्दत्तं च यद्दानं दातुः पापहरं सदा॥
लक्ष्मीनारायणप्रीत्यै यावता कन्यका बुधैः।
तारयेत्सकलं दातुः कुलं पूर्वापरं सदा॥
चन्द्रवन्ह्यम्बुगन्धर्वशिवसोमस्मरा इमे।
पतयः कन्यकानां च बाल्यात्सन्ति सदैव ते॥
तदुद्वाहविधिर्यत्नात्कृतो नो जनयेदघम्।
यथाऽतिभुक्तं कमलं देवानां पूजनाय वै॥
अर्हं भवति सर्वत्र तथा कन्या नृणां भवेत्।
कमलं जलम्। अतिभुक्तं स्नानपानादिना।
श्रुतावपि,
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ इति।
विधानखण्डे,
मन्थन्या भास्करो यत्नात्कृतवान्दुहितुर्विधिम्।
रेणुकोऽपि स्वकन्यायास्तरूद्वाहं चकार सः॥ इति।
अत एव मनुष्योऽप्युद्वहेत्। तमेवोद्वाहपदार्थं कात्यायन आह,
पित्रा मात्रा तथा भ्रात्रा दत्ता या तोयधारया।
विप्राग्निसुहृदां साक्ष्यं कृत्वा सोद्वाहिता भवेत्॥ इति।

अथाधिवेदनम् ।

तदुक्तमैतरेयकब्राह्मणे, तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवस्सह पतय इति ।

सहशब्दसामर्थ्यात्क्रमेण पत्यन्तरं भवतीति गम्यते । अत एव

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति मनुना स्त्रीणामपि पत्यन्तरं स्मर्यते ।

श्रुत्यन्तरमपि, तस्मादेको बह्वीर्जाया विन्दतइति ।

तन्निमित्तान्याह याज्ञवल्क्यः,

सुरापी व्याधिता धूर्ता वन्ध्याऽर्थघ्न्यप्रियंवदा ।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ इति ।

मनुरपि,

मद्यपा ऽसत्यवृत्ता च प्रतिकूला च या भवेत् ।
व्याधिता वाऽधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा ॥

मद्यपाऽत्र द्विजातिस्त्री बोद्धव्येति प्राञ्चः ।

वस्तुतस्तु,

गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ।
चातुर्वर्ण्यैरपेया सा तत्स्त्रीभिश्चैव पण्डिताः ॥

इति बृहन्नारदीयवचनात्सस्त्रीकाणां चतुर्णामपि वर्णानां त्रिविधसुरापाननिषेधस्सिध्यति । द्वादशविधमद्यनिषेधस्तु ब्राह्मणानामेव न क्षत्रियादीनामिति प्रपञ्चयिष्यते प्रायश्चित्तप्रकाशे । असत्यवृत्ता असदाचारा मिथ्याभाषिणी वा । प्रतिकूला भर्त्तुरनिष्टकारिणी । व्याधिता गृहकृत्यासामर्थ्यापादकव्याधियुक्ता । हिंस्रा पुत्रदास्यादिताडनशीला । अर्थघ्नी उत्पादितार्थविनाशकारिणी । सर्वदेत्यस्यासत्यवृत्तादिभिरन्वयः ।

शङ्खलिखितावपि, अप्रियशीलां पुरुषद्वेषिणीमननुकूलां चाधिविन्देतेति ।

स्मृतिभास्करेऽपि,

व्याधिता स्त्रीप्रजा वन्ध्या उन्मत्ता विगतार्त्तवा ।
अदुष्टा लभते त्यागं तीर्थतो न तु धर्मतः ॥

तीर्थतो योनितः । एतन्निमित्ताभावे नाधिवेत्तव्या—

इत्याहापस्तम्बः,

धर्मप्रजासंपन्नेषु नान्यान् कुर्वीतान्यतराभावे कार्या प्रागग्न्याधेयादिति ।

अस्यार्थः । यदि प्रथमोढा स्त्री धर्मेण श्रौतस्मार्त्ताग्निसाध्येन प्रजया पुत्रपौत्रादिना च संयुक्ता तदा नान्यान्विवहेत् । अन्यतराभावे अग्न्याधानात्प्राग्विवोढव्येति । अग्न्याधानात्प्रागिति मुख्यकल्पाभिप्रायं, नोत्तरत्र निषेधार्थम् । अन्यथा ऽधिवेदनस्य पुनराधाननिमित्ततानुपपत्तेः ।

स्मृत्यन्तरेऽपि,

अपुत्रः सन्पुनर्दारान्परिणीय ततः पुनः ।
परिणीय समुत्पाद्य नो वेदापुत्रदर्शनात् ॥
विरक्तश्चेद्वनं गच्छेत्संन्यासं वा समाश्रयेत् । इति ।

अस्यार्थः । प्रथमायां भार्यायामपुत्रः सन् पुनर्दारान्परिणीय, पुत्रानुत्पादयेदिति शेषः । तस्यामपि पुत्रानुत्पत्तौ आपुत्रदर्शनात्, परिणयेदिति शेषः । स्पष्टमन्यत् । हितायां विशेषमाह—

मनुः,

या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः ।
साऽनुज्ञाप्याऽधिवेत्तव्या नावमान्या हि कर्हिचित् ॥ इति ।

हितेत्युपलक्षणम् ।

तथाच याज्ञवल्क्यः,

आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम्।

त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ॥ इति।

त्यजन् अधिविन्दन्।

देवलोऽपि,

एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति।

समर्थस्तोषयित्वाऽर्थैः पूर्वोढामपरां वहेत् ॥ इति।

अत्राशक्तं प्रत्याह स एव,

अधिविन्दन् स्त्रियै दद्यादाधिवेदनिकं समम्।

न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितम् ॥

तस्याप्यसम्भवे भरणमात्रमेव।

अद्रव्यो भरणं स्त्रिया इति तेनैवाभिधानात्। अधिवेदने प्रतीक्षाकालमाह—

मनुः,

वन्ध्याऽष्टमेऽधिवेद्या स्याद्दशमे तु मृतप्रजा।

एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

हारीतः,

अप्रजा नवमे वर्षे दशमे तु मृतप्रजा।

एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

देवलः,

आकाङ्क्षेताष्ट वर्षाणि भर्त्ता ऽतिप्रसवां स्त्रियम्।

दश वन्ध्यां च निन्द्यां च द्वादश स्त्रीप्रसूतिनीम् ॥

ततो विन्देत विधिना पुत्रार्थी धर्मतः स्त्रियम्।

पुत्रलाभात्परं लोके नास्ति हि प्रसवा हिताः ॥

अस्यार्थः। अतिप्रसवाऽतिपुत्रा। हिता इहामुत्रोपकारका इति।

संग्रहे,

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ।
मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥ इति ।

अत्राष्टदशवर्षादिकालप्रतीक्षायां विकल्पो वयःशक्त्याद्यपेक्षया अव्यवस्थितो बोद्धव्यः । येष्वधिवेदननिमित्तेषु न कालविशेषः श्रूयते तेषु यावता कालेन सुरापीत्वनिश्चयो भवति यावता वा व्याधेरसाध्यत्वनिश्चयो भवति तावन्तं कालं प्रतीक्षेत । यथा दीर्घरोगेऽधिविन्देतेति ।

या त्वधिविन्ना रोषेण गृहान्निर्गच्छेत्तां प्रत्याह—

मनुः,

अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् ।
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥ इति ।

कुलं तत्पित्रादि । धर्मकार्ये ज्येष्ठैव सहाधिकारिणीत्याह—

कात्यायनः,

अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया ।
कारयेत्तद्बहुत्वे चेज्ज्येष्ठया गर्हिता नचेत् ॥

अस्यार्थः । अग्निशुश्रूषा दर्शपूर्णमासादीनि कर्माणि । शिष्टशुश्रूषा अतिथ्यभ्यागतादिपूजा । अनेनान्येऽपि पत्नीसहाधिकारकगृहस्थधर्मा उपलक्ष्यन्ते । तदेतत्सकलं धर्मजातं सवर्णासवर्णासमवाये सवर्णयैव सह कार्यम् । सवर्णासमवाये ज्येष्ठयैव सह कार्यम् ।

तथाच योगीश्वरः,

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ।
सवर्णासु विधौ धर्मे ज्येष्ठया न विनेतरा ॥ इति ।

सहाशब्दोऽत्र धर्मायोग्यत्वापादकदोषोपलक्षणार्थः । अने-

न पूर्वोक्तदोषवत्या ज्येष्ठयाऽपि सवर्णया धर्मकार्यं न कारयेदित्युक्तं भवति, किं तु निर्दोषया कनीयस्यैवेति । अयं च ज्येष्ठाया अग्निपरिचर्यानियमस्तयैव सहाधानपक्षे । उभाभ्यां सहाधाने तूभयोरपि तुल्योऽधिकारः । आधानोत्तरपरिणीतायाः पुनराधानं विना न सहाधिकार इति हेमाद्रिः । स्मार्ताग्निपरिचरणं तूभाभ्यामपि कार्यम् । उभयाग्निसंसर्गविधानात् । तच्चोपरिष्टाद्वक्ष्यामः । प्रथमां पत्नीं प्रशंसति—

कात्यायनः,

प्रथमा धर्मपत्नी स्याद् द्वितीया रतिवर्द्धिनी ।
दृष्टमेव फलं तत्र नादृष्टमुपपद्यते ॥ इति ।

अथाधिवेदनेऽग्निनियमः ।

तत्र कात्यायनः,

सदारोऽन्यान्पुनर्दारानुद्वोढुं कारणान्तरात् ।
यदीच्छेदग्निमाकुर्वन् क होमोऽस्य विधीयते ॥
स्वाग्नावेव भवेद्धोमो लौकिके न कदाचन । इति ।

स्वाग्नौ पूर्वपरिगृहीताग्नौ । तदभावे लौकिकेऽग्नौ । यदा लौकिकेऽग्नौ तदा पूर्वेणाग्निनाऽस्याग्नेः संसर्गः कार्यः । तदेवाग्रे निरूपयिष्यते । अत्र नान्दीश्राद्धादिकं वरेणैव कार्यम् ।

तथाच कात्यायनः,

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे सुतः ।
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम् ॥ इति ।

तच्च येभ्यः पिता दद्यात्तेभ्यः कार्यम् ।

तथाच स एव,

येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः । इति ।

साग्निक इति कर्तृमात्रोपलक्षणम् । अन्यथा निरग्निकस्य

जीवत्पितृकस्य वृद्धिश्राद्धाभावप्रसङ्गात् । इष्टापत्तौ—

नानिष्ट्वा तु पितॄन् श्राद्धे वैदिकं किञ्चिदाचरेत् ।

इतिवचनविरोधः । अधिवेदने तृतीयविवाहनिषेधमाह—

पैङ्ग्यः,

ब्रह्मचर्यं समाप्यैकां भार्ययोर्द्वितयं तथा ।
तृतीयां नोद्वहेद्विप्र इति धर्मकृतो विदुः ॥

अत्र तृतीयापरिणयननिषेधो मानुषीविषयः ।

तथाच मात्स्ये कश्यपवाक्यम्,

अपाकृत्य ऋणं चार्षं लक्षण्यां स्त्रियमुद्वहेत् ।
एकां तु पितृदेवार्थं रत्यर्थमपरां तु वा ॥
तृतीयां मानुषीं नैव चतुर्थीं च समुद्वहेत् ।
पुत्रपौत्रादिसम्पन्नः कुटुम्बी साग्निको वरः ॥
उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन ।
मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् ॥
नश्यत्येव न सन्देहो गार्ग्यस्य वचनं यथा । इति ।

तथा,

धर्मरागनिमित्तोऽपि नोद्वहेन्मानुषीं स्त्रियम् ।
तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् ॥

मानुषीं नोद्वहेदिति वदता आर्कीमुद्वहेदित्युक्तं भवति ।

तथाच सङ्ग्रहे,

तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् ॥
चतुर्थादिविवाहाय तृतीयेऽर्कं समुद्वहेत् ॥ इति ।

अथ तद्विधिमाह स एव,

आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे ।
शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकम् ॥

दिगादिनियममाह ब्रह्मपुराणम्,

ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलसंयुतम् ।
परीक्ष्य यत्नतोऽर्कस्तात् स्थण्डिलादि यथाविधि ॥

व्यासः,

स्नात्वाऽलंकृतवासास्तु रक्तगन्धादिभूषितम् ।
सपुष्पफलशाखैकमर्कगुल्मं समाश्रयेत् ॥
सल्लक्षणेन संयुक्तमर्कं संस्थाप्य यत्नतः ।
अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत्पुरा ॥
अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ।
नान्दीश्राद्धे हिरण्येन अष्टवर्गान्प्रपूजयेत् ॥
पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः ।
यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणम् ॥
उष्णीषं गन्धमाल्यादि वरायास्मै प्रदापयेत् ।
स्वशाखोक्तप्रकारेण मधुपर्कं समाचरेत् ॥

ब्रह्मपुराणे,

कृत्वाऽर्कं पुरतस्तिष्ठन्प्रार्थयेत द्विजोत्तमः ।
त्रिलोकवासिन् सप्ताश्व छायया सहितो रवे ॥
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ।
तत्राध्यारोप्य देवेशं छायया सहितं रविम् ॥
वस्त्रैर्माल्यैस्तथा गन्धैस्तन्मन्त्रेणैव पूजयेत् ।
तन्मन्त्रेण आकृष्णेनेत्यादिना ।

स्मृत्यन्तरेऽपि,

श्वेतवस्त्रेण संवेष्ट्य तथा कार्पासतन्तुभिः ।
गन्धपुष्पैः समभ्यर्च्याप्यष्टिलङ्गैरभिषिच्य च ॥
गुडौदनं च नैवेद्यं ताम्बूलं च समर्पयेत् ।

व्यासः,

अर्कं प्रदक्षिणं कुर्वन् जपेन्मन्त्रमिमं पुनः ।
मम प्रीतिकरा येयं मया सृष्टा पुरातनी ॥
अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु ।
पुनः प्रदक्षिणीकुर्यान्मन्त्रेणानेन मन्त्रवित् ॥
नमस्ते मङ्गले देवि नमस्सवितुरात्मजे ।
त्राहि मां कृपया देवि पत्नी त्वं मे इहागता ॥
अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च ।
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः ॥
तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय ।
ततश्च कन्यावरणं त्रिपुरुषं कुलमुद्धरेत् ॥
आदित्यः सविताऽऽचार्यः पुत्री पौत्र्यस्य नप्त्रिका ।
गोत्रं काश्यप इत्युक्तं लोके लौकिकमाचरेत् ॥
मुहूर्तकं निरीक्षेत स्वस्तिसूक्तमुदीरयेत् ।
आशीर्भिः सहितैः कुर्यादाचार्यप्रमुखैर्द्विजैः ॥
अथाचार्यं समाहूय विधिना तन्मुखाच्च ताम् ।
प्रतिगृह्य ततो होमं गृह्योक्तविधिना चरेत् ॥

आचार्यस्य दानमन्त्रमाह—

व्यासः,

अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् ।
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ इति ।
ततः सर्वाणि कर्माणि कृत्वा कङ्कणपूर्वकम् ।
यावत्पश्चावृतं सूत्रं तावदर्कं प्रवेष्टयेत् ॥
स्वशाखोक्तेन मन्त्रेण गायत्र्या वा ऽथवा जपेत् ।
पश्चीकृत्य पुनः सूत्रं स्कन्धे बध्नाति मन्त्रतः ॥

बृहत्सामेतिमन्त्रेण ।
अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरयोस्तथा ॥
कुम्भांश्च निक्षिपेत्पश्चादाग्नेयादिचतुष्टये ।
सवस्त्रं प्रतिकुम्भं च त्रिः सूत्रेणैव वेष्टयेत् ॥
हरिद्रागन्धसंयुक्तं पूरयेच्छीतलं जलम् ।
प्रतिकुम्भं महाविष्णुं सम्पूज्य परमेश्वरम् ॥
पाद्यार्घ्यादि निवेद्यान्तं कुर्यान्नाम्ना च मन्त्रवित् ।
अत्र होमप्रकारमाह शौनकः,
तृतीये स्त्रीविवाहे तु सम्प्राप्ते पुरुषस्य तु ।
अर्कविवाहं वक्ष्यामि शौनकोऽहं विधानतः ॥
अर्कसन्निधिमागत्य तत्र स्वस्त्यादिकं चरेत् ।
नान्दीश्राद्धं प्रकुर्वीत स्थण्डिलं च प्रकल्पयेत् ॥
अर्कमभ्यर्च्य सौर्या च गन्धपुष्पाक्षतादिभिः ।
सौर्या सूर्यदैवतया आकृष्णेनेत्यादिकया च ।
स्वर्णेनालंकृत्य यत्नेन वस्त्रमाल्यादिभिः शुभैः ।
अर्कस्योत्तरदेशे तु एतया अर्ककन्यया ।
उल्लेखनमिदं कुर्यादाभ्यन्तरमतः परम् ॥
आज्याहुत्यादयः पश्चादन्ते पुण्याहमाचरेत् ।
अत्र पञ्चमदिनकृत्यमुक्तं ब्राह्मपुराणे,
चतुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूजयेत् ।
विसृज्य होममग्निं च विधिना मानुषीपराम् ॥
उद्वहेदन्यथा नैव पुत्रपौत्रानभिव्रजेत् ।
न पशून्न च मित्राणि न फलं चैव गच्छति ॥
एवमेव द्विजश्रेष्ठः विधिना सम्यगुद्वहेत् ।
धनधान्यसमृद्धिश्च इज्याशक्तिः परत्र च ॥ इति ।

अथ कृताधिवेदनस्याग्निद्वयसंसर्गविधिरभिधीयते।

शौनकः,

अथाऽग्न्योर्गृह्ययोर्योगं सपत्नीभेदजातयोः।
सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनकः॥
अरोगामुद्वहेत्कन्यां धर्मलोपभयात्स्वयम्।
कृते तत्र विवाहे च व्रतान्ते तु परेऽहनि॥
पृथक्स्थण्डिलयोरग्नी समाधाय यथाविधि।
तन्त्रं कृत्वा ऽऽज्यभागान्तमन्वाधानादिकं ततः॥
जुहुयात्पूर्वपत्न्यग्नौ तयाऽन्वारब्ध आहुतीः।
अग्निमीळेपुरोहितंसूक्तेन नवर्चेन तु॥
समिध्येनं समारोप्य अयन्तेयोनिरित्यृचा।
प्रत्यवरोहेत्यनया कनिष्ठाग्नौ निधाय तम्॥
आज्यभागान्ततन्त्रादि कृत्वाऽऽरभ्य तदादितः।
समन्वारब्ध एताभ्यां पत्नीभ्यां जुहुयाद् घृतम्॥
चतुर्गृहीतमेताभिः ऋग्भिः षड्भिर्यथाक्रमम्।
अग्नावग्निश्चरतीत्यग्निनाऽग्निः समिध्यते॥
अस्तीदमिति तिसृभिः पाहिनोअग्नएकया।
ततः स्विष्टकृदारभ्य होमशेषं समापयेत्॥
गोयुगं दक्षिणा देया श्रोत्रियायाहिताग्नये।
पत्न्योरेका यदि मृता दग्ध्वा तेनैव तां पुनः॥
आदधीतान्यया सार्धमाधानविधिना गृही। इति।

अयमग्निद्वयसंसर्गः लौकिकाग्नौ विवाहहोमपक्षे। संस्कृताग्नौ विवाहहोमपक्षे तु नायं संसर्गविधिः।

विवाहहोमेनैव संसृष्टत्वात्। द्वयोर्मध्ये एका म्रियेत तदा तेनैवाग्निना तां दग्ध्वा स्वयम्पुनरन्यमादध्यात्।

*अत्र बहुवचनोपदेशात् सर्वासु पक्षादिषु एतत्कार्यम्। तदुक्तम्—

देवयाज्ञिकधृतभारद्वाजगृह्ये,

सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ।
न त्यजेत्सूतके वापि त्यजन् गच्छत्यधोगतिम् ॥ इति ।

चरुः पक्षादौ क्रियमाणस्थालीपाकः ।

छन्दोगपरिशिष्टे च,

पक्षादावेव कुर्वीत सदा पक्षादिकं चरुम् । इति ।

आश्वयुज्यां पौर्णमास्यां प्रातर्नित्येषु स्थालीपाकमन्वायातयतीति मैत्रायणीयगृह्येऽप्याश्वयुजीस्थालीपाकविधिपरे वाक्ये अस्य नित्यत्वप्रदर्शनाच्च । एतच्च पूर्वेद्युरुपवसथिकाशनादिकं कृत्वा परेद्युः कर्त्तव्यम् । तदाह—

गोभिलः, अथ दर्शपूर्णमासयोः सन्ध्यां पौर्णमासीमुपवसेदुत्तरामेके। यदहश्चन्द्रमा न दृश्येतताममावास्याम्। पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः । आमावास्येन हविषा पूर्वपक्षमभियजते पौर्णमासेनापरपक्षम् । यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी यः परमः सन्निकर्षः साऽमावास्या। यदहस्त्वेव चन्द्रमा न दृश्येतताममावास्यां कुर्वीत दृश्यमानेऽप्येकदा गताध्वा भवतीति। त्रयः पौर्णमासीकाला भवन्ति। सन्ध्या वाऽस्तमितोदिता वोच्चैर्वा। अथ यदहः पूर्णो भवति। पृथगेवैतस्य ज्ञानस्याध्यायो भवत्यधीयीत वा तद्विद्भ्यो वा पर्वागमयेत। अथ यदहरुपवसथो भवति तदहः पूर्वाह्ण एव प्रातराहुतिं हुत्वेति।

* अर्कविवाहान्तः संस्कारप्रकाशः पूर्वं मुद्रितः । सार्धसहस्रपरिमितो ग्रन्थः बाबूगोविन्ददासीयपुस्तके त्रुटितः पुस्तकान्तरानुपलब्ध्या न मुद्रितः । अनन्तरं बहुदिनानि अन्विष्यापि तदनुपलम्भात् उपलभ्यमानोऽप्ययं ग्रन्थो मुद्रयितुमुपक्रम्यते ।

अस्य भाष्यविवेचितोऽर्थः। अथ बलिकर्मादिकथनानन्तरम्। दर्शपूर्णमासयोः, विधिर्व्याख्यास्यत इति सूत्रशेषः। सन्ध्यां पौर्णमासीमुपवसेत्। रात्र्यह्नयोः सन्धिः सन्ध्या तस्यां सन्ध्यायां या पौर्णमास्यवच्छिद्यते सा सन्ध्येत्युच्यते। अत्राविशेषात् सन्ध्याद्वयमपि गृह्यते। एवं च समस्तमहोरात्रं व्याप्य स्थिता सती या उदयसन्ध्यायां तिष्ठति, या वा अहरेव केवलं व्याप्य स्थिता सती अस्तमयसन्ध्यायां तिष्ठति, तामुपवसेद् वक्ष्यमाणनियमयुक्तो भवेत्।

तथाच स्मृतिः,

उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयो न शरीरस्य शोषणम्॥ इति।

उत्तरा प्रतिपत्।

तथाच श्रुतिः, द्वे ह वै पौर्णमास्यौ द्वे अमावास्ये तस्मात्प्रतिपद्युपवसन्नेव यजेतापरेद्युर्वेति।

माध्यन्दिनश्रुतावपि, एषा ह सम्वत्सरस्य प्रथमा रात्रिर्यत्फाल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वेति प्रतिपदः उत्तरपौर्णमासीत्वदर्शनात्। यदहश्चन्द्रमा न दृश्येत। यस्मिन्नहनि चन्द्रमाः सोमः न दृश्येत आगमादिना अतिक्षीण इत्युपलभ्यतेताममावास्याम् उपवसेदित्यनुषङ्गः। पक्षान्ता उपवस्तव्याः। पक्षोऽर्द्धमासः पूर्वपक्षोऽपरपक्षश्च। बहुवचनमावृत्त्यपेक्षम्। तदन्ताः अवसानतिथयः पक्षान्ताः ते वक्ष्यमाणविधिना उपवस्तव्याः। पक्षादयोऽभियष्टव्याः।पक्षाणां आदयः पक्षादयः प्रतिपदः ताश्च अभियष्टव्याः आभिमुख्येन पूर्वोक्तादिसम्पादनेन यष्टव्याः। आमावास्येन हविषा पूर्वपक्षं शुक्लपक्षम् अभियजते। पूर्वपक्षप्रतिपदिष्ट्या कृत्स्नः पूर्वपक्ष इष्टो भवतीति तात्पर्यम्। पूर्ण-

मासे उपक्लृप्तं हविः पौर्णमासं तेन पौर्णमासेन हविषा अपरपक्षं कृष्णपक्षम् अभियजते । कृष्णपक्षप्रतिपदिष्ट्या कृत्स्नः कृष्णपक्ष इष्टो भवतीति तात्पर्यम्। यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी। यः परमो महान् विप्रकर्षः व्यवधानं महदन्तरमितियावत् । सूर्याचन्द्रमसौ प्रसिद्धौ । यः परमः सन्निकर्षः साऽमावास्या । यः परमः महान् सन्निकर्षः सन्निधानं, सूर्याचन्द्रमसोरित्यनुषङ्गः । यदहस्त्वेव चन्द्रमा न दृश्येतताममावास्यां कुर्वीत । यदहः यस्मिन्नहनि चन्द्रमा न दृश्येत ताममावास्यां कुर्वीत ताममावास्याम् उपवसेत् । तुशब्दः चशब्दार्थः।एवकारश्चावधारणे। यद्यपि अयमर्थः पूर्वसूत्रेणैव सिद्धस्तथापि अस्य सूत्रस्य चतुर्द्दशीमिश्रामावास्याविषयत्वकल्पनात् पूर्वसूत्रस्य च तदतिरिक्तामावास्याविषयत्वकल्पनाच्च न पौनरुक्त्यम् । दृश्यमानेऽप्येकदा । यदा दृश्यमानेऽपि चतुर्द्दश्यामपि क्षीणशेषायामपराह्णे श्राद्धमारभेत तदाऽवश्यममावास्यां प्रतीक्षेत एकदा न सर्वदा । यदाऽतिविप्रकृष्टत्वादमावास्यायाः प्रतीक्षणे सन्ध्यासमीपं स्यात्तदा न प्रतीक्षेत अन्यदा प्रतीक्षेतेति । गताध्वा भवति। गतः अध्वा स्वकीयं स्थानं परिपाटिगणनमार्गो यस्याः अमावास्यायाः सेयं गताध्वा । चतुर्द्दश्यामेव तस्याः क्षीणत्वात् । तदुक्तम्—

छन्दोगपरिशिष्टे,

संमिश्रा या चतुर्द्दश्या अमावास्या भवेत्क्वचित् ।
खर्विकां तां विदुः केचिद्गताध्वामिति चापरे ॥ इति ।

त्रयः पौर्णमासीकाला भवन्ति।सन्ध्या वाऽस्तमितोदिता वोच्चैर्वा । त्रयः त्रिसङ्ख्याकाः पौर्णमासीकालाः भवन्ति । पौर्णमास्येव कालः पौर्णमसीकालः स त्रिप्रकारो भवतीत्यर्थः।सन्ध्या वा सन्ध्या उक्तलक्षणा। अपरा अस्तमितोदिता यस्यां सवितुः अस्त-

मयानन्तरमेव चन्द्रमा उदेति सा अस्तमितोदिता । अन्या उच्चैः पौर्णमासी । यस्यामीषत् उच्चैः स्थिते चन्द्रे पश्चात्सविता अस्तमेति सेयमुच्चैः पौर्णमासी । अथ यदहः पूर्णो भवति । अथेति सूत्रा दिज्ञापनार्थः । अन्यथा पूर्वसूत्रेणैक्यभ्रमः स्यात् । यदहः यस्मिन्नहनि । पूर्णः षोडशकलोपचययोगादखण्डमण्डलः चन्द्रमा भवति तामुपवसेदित्यनुवर्तते । पृथगेवैतस्य ज्ञानस्याध्यायो भवति । पृथगेव अन्य एतस्य ज्ञानस्य अध्यायः ग्रन्थो ब्रह्मसिद्धान्तादिको भवति । तमधीयीत वा जानीयाद्वा । तत् ज्योतिःशास्त्रं विदन्ति त इमे तद्विदः तेभ्यो वा सकाशाद्दर्शपूर्णमासाख्यं पर्व आगमयेत् जानीयात् । एवं उपवसथादिनं निर्णीय यदहरुपवसथो भवति तदहः वक्ष्यमाणं कुर्यादिति ।

शाङ्खायनश्च,

अथ दर्शपूर्णमासावुपोष्य प्रातर्यत्रैतन्महावृक्षाग्राणि सूर्य आतपति स यागकालः स्वस्त्ययनतमः सर्वासामावृतामन्यत्र निर्देशात् । सुमनाः शुचिः शुचौ वरुध्यदेशे पूर्णाविम्बनं चरुं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो यथाविभागं स्थालीपाकस्य जुहोतीति ।

आश्वलायनश्च,

अथ पार्वणस्थालीपाकस्तस्य दर्शपूर्णमासाभ्यामुपवास इध्मबर्हिषोश्च सन्नहनं देवताश्चोपांशुयाजेन्द्रमहेन्द्रवर्जं काम्या इतरास्तस्यै तस्यै देवतायै चतुरश्चतुरो मुष्टीन्निर्वपतीति ।

तत्र दर्शपूर्णमासयोः उपवसथदिनवर्ज्यादिमाह—

देवयाज्ञिकधृतपरिशिष्टम्,

शाकं मांसं मसूरं च चणकं कोरदूषकान् ।
माषान् मधु परान्नं च वर्जयेदौपवस्तके ॥ इति ।

कात्यायनश्च,

लवणं मधु मांसं च क्षारान् श्वो येन हूयते ।
उपवासे न भुञ्जीत नोरु रात्रौ न किञ्चन ॥ इति ।

परिशिष्टान्तरं च,

तिलमुद्गादृते शैम्ब्यं सस्ये गोधूमकोद्रवौ ।
पिण्याकं देवधान्यं च सर्वशाकं तथैक्षवम् ॥
सज्जीक्षारं यवक्षारं टङ्कणक्षारमेव च ।
व्रतस्थो वर्जयेन्नित्यं सामुद्रं लवणं तथा ॥ इति ।

अत एव सामुद्रमिति लवणविशेषणात्सैन्धवमानसादेरसामुद्रस्य न निषेध इति केचिदाहुः । हविष्यत्वमपि तस्योक्तं स्मृतौ-

मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम् ।
अक्षारलवणं चैव प्रकृत्या हविरुच्यते ॥ इति ।

अक्षारलवणं सैन्धवमिति निबन्धकाराः ।

सैन्धवं लवणं यच्च यच्च मानससम्भवम् ।
पवित्रे परमे ह्येते प्रत्यक्षे अपि सर्वशः ॥ इति ।

लवणं मधु मांसं चेति वाक्येन सामान्यत एव औपवसथ्याहे लवणभक्षणप्रतिषेधः ।

व्रतस्थो वर्जयेन्नित्यं सामुद्रं लवणं तथा ।

इतिवाक्येन च व्रतसामान्ये लवणविशेषप्रतिषेधः । एवं चानयोर्विभिन्नविषयत्वान्नैकतरेणान्यतरस्योपसंहारो युक्त इति तु काश्चित् ।

जाबालिसाङ्ख्यायनौ च,

कलहं क्रीतविक्रीतं प्रहासं बहुभाषणम् ।
तूर्यादिकं वृथाशय्यां यक्ष्यमाणो विवर्जयेत् ॥
करम्भांश्च कुलत्थांश्च वर्जयेत्कोद्रवांस्तथा ।
अनृतं बहुभाषां च क्रयं विक्रयमेव च ॥

दन्तधावनं पूर्वेद्युर्योगस्यैतानि वर्जयेत् । इति ।

अशनद्रव्यादिनियममाह—

आपस्तम्बः,

अमापममांसमाज्येनाश्नीयातां तदभावे दध्ना पयसा वेति।

एतच्च व्रतमावश्यकम् । तदाह—

गोभिलः,

अहुता वा एतस्य मानुष्याहुतिर्य औपवसथिकं नाश्नात्य-नीश्वरो ह क्षोधुको भवति अकाम्यो जनानां पापीयसी हास्य प्रजा भवति य औपवसथिकं भुङ्क्त ईश्वरो ह भवत्यक्षोधुकः काम्यो जनानां वसीयसी हास्य प्रजा भवति तस्माद्यत्कामयेतौपवसथिकं भुञ्जीयातामध एवैतां रात्रिं शयीयातां तौ खलु जाग्रन्मिश्रावेवैतां रात्रिं विहरेयातामितिहासमिश्रेण वा केनचिद्वा जुगुप्सेयातां त्वेवाव्रतेभ्यः कर्मभ्यो न प्रवसन्नुपवसेदित्याहुः । पत्न्या व्रतं भवतीति । यथा कामयेत तथा कुर्यात् इति । अत एव जागरणादिकमपि कर्त्तव्यमिति ।

अत्र पारस्करसूत्रानुसारिणां स्थालीपाकात् पूर्वदिने उक्तोपवासादिकं न भवति पारस्करसूत्रेऽनुक्तत्वात् । न च पारस्करसूत्राविरोधेन आश्वलायनादिगृह्योक्तत्वात्तद्भवतीति वाच्यम् । तथासति इध्माबर्हिषोः सन्नहनादिकरणस्याप्यापत्तेः । न चेष्टापत्तिः । अनेकगृह्योक्ततत्तदविरुद्धयावत्पदार्थस्य करणेऽसामर्थ्यात् । न च यथासामर्थ्यमेव उपसंहर्त्तव्यम् ।

बह्वल्पं वा स्वगृह्योक्तं यस्य यावत्प्रकीर्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥

इति कात्यायनेन स्वगृह्योक्तमात्रकरणेऽपि साङ्गोपाङ्गकर्मसिद्धेः प्रदर्शितत्वात् । को हि मन्दमतिः स्वल्पायाससाध्यादपि

तावत्फलसिद्धौ बह्वायाससाध्ये प्रवर्तेत इति । न च

यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥

इति कात्ययनेनैवाविरोधिपरकीयस्यापि अनुष्ठेयत्वोक्तेर्बह्वल्पं वा स्वगृह्योक्तमिति वाक्यस्य गृह्यान्तराद्युक्तोपसंहारासमर्थपरत्वमिति वाच्यम् । उक्तातिप्रसङ्गापत्तिबलेन यन्नाम्नातमिति वाक्यस्य परकीयाकाङ्क्षितमात्रग्रहणपरत्वात् । भवति हि परोक्तमप्याकाङ्क्षितं गृह्यते च ।

यथा,

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीताऽन्यानि मन्त्रवत् ॥

इति मेखलादिग्रहणे मनुना सामान्यतो मन्त्रवत्त्वोक्तौ मन्त्रविशेषानुक्तौ च विशेषतो मन्त्राकाङ्क्षायां गृह्यविशेषपरिपठिता मन्त्रविशेषा गृह्यन्ते । न चेह स्थालीपाकपूर्वदिनकर्तव्योपवासादेः कथञ्चिदाकाङ्क्षा समस्ति । सामान्यशब्देनार्थतो वा स्वसूत्राद्यसूत्रितत्वादिति । न चैवं शाखान्तराधिकरणविरोधः । बह्वल्पं वा स्वगृह्योक्तमिति वाक्येन गृह्यान्तरोक्ताङ्गस्य व्यवस्थितविकल्पस्वीकारादिति बहवः । अत्र पक्षादिषु स्थालीपाकं श्रपयित्वेति सूत्रे यद्यपि पक्षादिष्वित्येवोक्तं तथापि जैमिनिसूत्रभाष्यकारमते दर्विहोमानां यागरूपत्वेन एतस्यापि तथात्वात् ।सन्धिमभितो यजेतेतिवाक्येन च यागस्य सन्धिमभितो विधानात् तत्रत्यपक्षादिपदं सन्धिपूर्वापरकालपरम् । एवं च—

पर्वणो यश्चतुर्थोऽश आद्याः प्रतिपदस्त्रयः ।
यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिः ॥

तथा,

पूर्वाह्णे चापि मध्याह्ने यदि पर्व समाप्यते ।
तदैव यागकालः स्यात्परतश्चेत्परेऽहनि ॥

तथा,

सन्धिर्यद्यपराह्णे स्याद्यागं प्रातः परेऽहनि ।
कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति ॥

इत्यादिवाक्यैर्यागकालं निर्णीय स्थालीपाकः कार्य इति । विशेषतो यागादिकालनिर्णयश्च समयप्रकाशे करिष्यत इति ।

अन्ये तु स्थालीपाकादिहोमानामयागरूपत्वस्य वार्त्तिकादौ सिद्धान्तितत्वात् न "सन्धिमभितो यजेत" इति वाक्यबलेन पक्षादिपदस्य पर्वसन्धिपूर्वापरकालपरत्वं किन्तु यथाश्रुतपक्षादिमात्रपरत्वमेव । एवञ्च पूर्वाह्णो वै देवानामित्यादिश्रुतेः पूर्वाह्णे यद्दिने प्रतिपत् तद्दिन एव स्थालीपाको भवतीत्याहुः । एतच्च आधानानन्तरपौर्णमाससम्बन्धिन्यां प्रतिपदि प्रारब्धव्यं न दर्शसम्बन्धिन्याम् ।

सायमादिप्रातरन्तमेकं कर्म प्रचक्षते ।
दर्शान्तं पौर्णमासाद्यमेवमेव मनीषिणः ॥

इति कात्यायनेन—

सायंप्रातःक्रियाणां च सायमारम्भ इष्यते ।
पूर्णमासस्य दर्शस्य प्रारम्भः पूर्णमासतः ॥

इति बौधायनेन च पौर्णमासस्य आदित्वकथनात् । न च

ऊर्द्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासोऽथ वाऽग्रिमः ।
य आयाति स होतव्यः स एवादिरिति श्रुतिः ॥

इति कात्यायनेनैव दर्शस्याप्यादित्वकथनात् कथमेवमिति वाच्यम् । तद्वाक्यस्य यत्र पौर्णमासहोमानन्तरं पुनराधाननि-

मित्तमापतेत्तं ततो मासाद्युत्तरं चामावास्यातः पूर्वं च पुनराधानं कृतं तत्र तदमावास्यासम्बन्धिन्यां प्रतिपदि दर्शहोमो न प्राप्नोति । यतः पूर्वप्रक्रान्तपौर्णमाससम्बन्धिदर्शकालस्यातीतत्वात् दर्शपूर्णमासकर्मणश्च दर्शान्तत्वेन दर्शादित्वाभावादिति तत्र पूर्वप्रक्रान्तपौर्णमाससम्बन्धिदर्शस्य विधानार्थत्वात् । नचैवं स एवादिरिति श्रुतिरिति दर्शस्यादित्वकथनं विरुध्यत इति वाच्यम् । विच्छिन्नस्य पुनस्ततः सन्धानेन गौण्या वृत्त्या तस्या आदित्वस्योक्तत्वात् । अत एव श्रौतस्य स्मार्तस्य वा पौर्णमासस्य करणानन्तरं कृष्णपक्षे यजमानस्य मरणाशङ्कायां तदानीमेव दर्शकरणं कल्पसूत्रे स्मृतौ च कात्यायनादिभिरुक्तं न क्वापि दर्शानन्तरं तच्छङ्कायां पौर्णमासकरणमिति ।

कल्पसूत्रं च,

सायमाहुत्यां हुतायां चेद् दुर्बलः स्यात्तदैव प्रातराहुतिस्तत्सःस्था श्रुतेरग्निहोत्रस्य । जीवेच्चेत्पुनः काले न वा कृतत्वात्पौर्णमासान्तेचामावास्यमग्निहोत्रवदिति ।

सूत्रान्तरं च,

तच्चेदपरपक्षे प्रयाणं शङ्केत यावत्योऽपरपक्षस्य शिष्टा रात्रयः स्युस्तासां सायम्प्रातराहुतीः प्रतिसङ्ख्याय हुत्वा प्रत्याहृत्यामावास्येन हविषेष्ट्वा समापयेयुरेवं यज्ञाविलोप इति । पूर्वपक्षे चेद्रात्रौ प्रातराहुतिरेवेति ।

कात्यायनस्मृतौ,

पौर्णमासे कृते यागे मुमूर्षुर्यदि याज्ञिकः ।
दर्शयागस्तदैव स्यादपकृष्याहुतीः पृथग् ॥ इति ।

किञ्च ऊर्ध्वं पूर्णाहुतेर्दर्श इति कात्यायनवाक्येनेन पूर्णाहुत्यनन्तरमनुष्ठीयमानस्य दर्शस्य पौर्णमासस्य वा आदित्व-

सिद्धौ तदितरस्य वाऽन्तत्वसिद्धौ—

दर्शान्तं पौर्णमासादिमेवमेव मनीषिणः ।

इति तद्वाक्यस्य वैयर्थ्यापत्तेः । गङ्गाधरकारिकाकारादयस्तु यथाश्रुतवाक्यबलात् पूर्णाहुत्यनन्तरमनुष्ठीयमानस्य दर्शस्य पौर्णमासस्य वा आदित्वं तदितरस्य चान्तत्वम् । एवं च आधानानन्तरं दर्शो वा पौर्णमासो वा य एवायाति तत्रैव पक्षादौ स्थालीपाकप्रारम्भः कार्य इत्याहुः । अत्र श्रौतस्मार्तयोरुभयोः समावेशे श्रौतं कृत्वा स्मार्तं कर्त्तव्यं, श्रौतस्य प्रधानत्वात् । तदाह—

गर्गः,

यो वैदिकमनादृत्य कर्म स्मार्त्तेतिहासकम् ।
मोहात्समाचरेद्विप्रो न स पुण्येन लिप्यते ॥
प्रधानं वैदिकं कर्म गुणभूतं तथेतरत् ।
गुणनिष्ठः प्रधानं हि हित्वा गच्छत्यधोगतिम् ॥

भारद्वाजोऽपि,

होमं वैतानिकं कृत्वा स्मार्त्तं कुर्याद्विचक्षणः ।
स्मृतीनां वेदमूलत्वात्स्मार्त्तं केचित्पुरा विदुः ॥ इति ।

अथ प्रकृतमभिधीयते । स्थालीपाकं श्रपयित्वा । स्थालीपाकं चरुम् उक्तविधिना श्रपयित्वा । दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति । तत्र अग्निः अग्नीषोमौ अग्नीषोमौ चेति पौर्णमासदेवताः । अग्निः विष्णुः इन्द्राग्नी विष्णुस्थानेऽग्नीषोमौ वा इति असन्नयतो दर्शदेवताः । सन्नयतश्च इन्द्राग्निस्थाने इन्द्रः महेन्द्रो वेति । एताभ्यो देवताभ्यो हुत्वा जुहोतीति ।

अत्रेदं विचारणीयम् । किं पौर्णमास्यां दर्शे च एताभ्यः सर्वाभ्यो जुहोति, उत पौर्णमास्यां पौर्णमासदेवताभ्यो दर्शे च

दर्शदेवताभ्य इति । किं तावत्प्राप्तम् । दर्शपूर्णमासदेवताभ्यो जुहोतीत्यविशेषेणोपदेशात् उभयत्रापि सर्वाभ्यो जुहोति । नच पौर्णमास्यां क्रियमाणस्य स्थालीपाकस्य पौर्णमासरूपत्वेन तत्र पौर्णमासदेवताभ्य एव होमः समुचितः, एवं दर्शेऽपि दर्शदेवताभ्य एवेति वाच्यम् । प्रमाणेन प्राप्तस्यौचित्यमात्रेण विशेषे व्यवस्थापनायोगात् । तस्मादुभयत्रापि सर्वाभ्यो जुहोतीति । मैवम् । अग्नीषोमीयस्थालीपाकः पौर्णमास्यामैन्द्राग्नोऽमावास्यायामुभयत्र चाग्नेय इति मैत्रायणीयगृह्ये स्पष्टतरं पौर्णमास्यां पौर्णमासदेवताभ्यो दर्शे च दर्शदेवताभ्य एव स्थालीपाकस्याभिधानात् ।

गोभिलेन च, "आग्नेय एवानाहिताग्नेरुभयोर्दर्शपूर्णमासयोः स्थालीपाकः स्यात् आग्नेयो वाऽग्नीषोमीयो वाऽऽहिताग्नेः पौर्णमास्याम्, ऐन्द्रो वैन्द्राग्नो वा माहेन्द्रो वाऽमावास्यायाम् अपि वाऽऽहिताग्नेरप्युभयोर्दर्शपूर्णमासयोराग्नेय एव स्यात्" इत्यनेन देवतासमुदायहोमस्य पौर्णमास्यां दर्शे चानुक्तत्वात् । न च गोभिलसूत्रैकवाक्यतयाऽनाहिताग्नेः पारस्करसूत्रानुसारिण आहिताग्नेर्वा उभयत्राग्नेय एव आहिताग्नेरग्नीषोमीयो वाऽऽग्नेयो वा पौर्णमास्यां दर्शे चासन्नयत ऐन्द्राग्नः सन्नयतश्चैन्द्रो माहेन्द्रो वा स्थालीपाकोऽस्तु । न चैवं दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोतीति पारस्करसूत्रस्थबहुवचनानुपपत्तिः, सर्वपक्षाभिप्रायेण बहुवचनस्योक्तत्वादिति वाच्यम् । गोभिलसूत्रैकवाक्यतया एवमनुष्ठानं सूत्रान्तरैकवाक्यतयाऽन्यथा वेत्यत्र विनिगमकाभावात् । तस्मात् सन्दिग्धार्थस्य सूत्रस्य सूत्रान्तरेणार्थनिर्णयः । स च सम्भवति सर्वैकवाक्यत्वे नान्यथा कल्प्यते । एवं च मैत्रायणीयगृह्ये पौर्णमास्यामाग्नेयस्याग्नीषोमीयस्य चोभयोर्नियमतः करणमुक्तं गोभिलसूत्रे चैकतरस्य । न चोभयोः करणे एकतरकरणं विरुध्यते । उभयोः कृते एकतरस्य कृ-

त्वात्। एकतरकरणे तूभयोः करणं विरुध्यत एवेत्यविरोधाय पौर्णमास्यां तदुभयकरणम्। दर्शे च आग्नेयस्य चैन्द्राग्नस्य चोभयोः करणं मैत्रायणीये उक्तम्। गोभिलसूत्रे च आग्नेयस्य ऐन्द्राग्नस्यैन्द्रस्य माहेन्द्रस्य च प्रत्येकं विकल्पेन करणमुक्तम्। तत्राष्टदोषदुष्टविकल्पापेक्षया व्यवस्थितविकल्पस्य लघुत्वेन गोभिलीयैरप्यैन्द्राग्नस्य ऐन्द्रमाहेन्द्राभ्यां व्यवस्थित एव विकल्पः समाश्रीयते। व्यवस्था च प्रातराग्नेय ऐन्द्राग्नश्च द्वादशकपालोऽसन्नयत इत्यादिश्रौतसूत्रे दृष्टा। एवं च एकवाक्यत्वानुरोधाय मैत्रायणीयगृह्ये आग्नेयनियमस्योक्तत्वाद्दर्शे नियमतोऽग्निदेवत्यो होमः, सन्नयनमकुर्वतो नियमत एव ऐन्द्राग्नहोमः, सन्नयनं कुर्वतश्च इन्द्रदेवत्यो महेन्द्रदेवत्यो वा होम इति। तदिदमुक्तं "दर्शपूर्णमासदेवताभ्यो हुत्वा" इति। श्रौते दर्शपूर्णमासयोर्हि एतेषामेवैतासां देवतानां यागः। अत एव अथ पार्वणस्थालीपाक इत्युपक्रम्य तस्य दर्शपूर्णमासाभ्यामुपवास इत्युक्त्वा देवताश्चोपांशुयाजमहेन्द्रवर्जमित्याश्वलायनेनोक्तम्। महेन्द्रनिषेधश्च तच्छाखीयमात्रपरः। अन्यथा गोभिलगृह्यादिविरोधादिति।

अन्ये तु मैत्रायणीयगृह्यैकवाक्यतया दर्शे सन्नयतोऽसन्नयतो वा ऐन्द्राग्न एव भवति नैन्द्रादिः। अन्यथा तत्र नियमतः श्रुतस्यैन्द्राग्नस्य पाक्षिकत्वं स्यात् इत्याहुः। अत्र पौर्णमास्यां पौर्णमासदेवताभ्यो होमद्वयं न तु होमत्रयम्। तथाहि। पौर्णमास्यां हि त्रयो यागाः। तत्र एकः आग्नेयदेवत्यः। अपरौ च द्वौ यागौ अग्नीषोमदेवत्यौ। तत्रापि प्रथमः आज्यहविष्कः द्वितीयस्तु पुरोडाशहविष्कः। न चाग्निभिन्नः सोमो भिन्न इति। यतः अग्नीषोमयोश्च देवतात्वं व्यासज्यवृत्ति न प्रत्येकम्। न चाज्ययागपुरोडाशयागयोर्भेदात्तयोर्देवताभेद आवश्यकः। तथा च आ-

ज्ययागसम्बन्धिनौ अग्नीषोमौ भिन्नौ पुरोडाशयागसम्बन्धिनौ च भिन्नावेव ताविति वाच्यम् । यद्देवत्यः पशुर्भवति तद्देवत्यं पशुपुरोडाशमनुनिर्वपतीति क्वचित् यागभेदेऽपि देवताया अभेदस्य श्रुत्या दर्शपूर्णमासदेवताभ्यो जुहोतीति प्रकृतसूत्रेण च प्रदर्शितत्वात् । न चोच्चैस्त्वादिधर्मभेदेन तद्भेदः।वागन्तेन दीक्षणीया, नीचैस्तरां नीचैस्तरामितरे, उपांशूपसद इत्याद्यनेकवाक्यविहितस्वरभेदवत्त्वात्तत्तादिष्टीनां तत्तदिष्टिसम्बद्धप्रयाजादिदेवानां भेदापत्तेः । किञ्च एकमुद्दिश्य उच्चैस्त्वादिधर्मकशब्देन मनसैवान्यथा वाऽनेकप्रकारेण त्यज्यमाने द्रव्ये तदुद्देश्यभेदापत्तेः । न च शब्दमयी देवता शब्दश्च तत्र विभिन्न एवेति तद्भेदोऽपि सिद्ध एवेति वाच्यम् । सोऽयं गकार इत्यादिप्रत्यभिज्ञाबलेन तत्तद्गकारादीनामैक्यस्य व्यवस्थापितत्वात् । अथोत्पन्नोऽयं गकार इत्यादिप्रतीतीनां का गतिरिति चेत्, भ्रमत्वमेव । अन्यथा शिखामात्रनाशेऽपि शिखी विनष्ट इत्यादिप्रतीतिबलात्तद्विशिष्टप्रतियोगिकतदुत्पादविनाशावपि स्याताम् । न चैवं सेयं प्रदीपकलिकेत्यादिप्रतीतिबलेनैतासामपि अभेद एव सिद्ध्येत्। सिद्ध्येदेव यदि तत्र परिमाणादिभेदो नोपलभ्येत।अथ सोऽयं गकार इति प्रत्यभिज्ञायाः प्रमात्वं गकारो नष्ट इत्यादिप्रतीतीनां च भ्रमत्वमित्यत्र किं विनिगमकमिति चेत्, लाघवम्। अनन्तगकारव्यक्तिकल्पनामपेक्ष्य एकस्यैव गकारस्य कल्पनाया उचितत्वात् । न च तत्तदुत्पादविनाशाद्यनेकप्रतीतीनां भ्रमत्वकल्पनमपेक्ष्य एकस्या एव प्रत्यभिज्ञाया भ्रमत्वकल्पनस्यौचित्येन विपरीतमेव लाघवमिति वाच्यम् । तद्वतितत्प्रकारकत्वादिरूपप्रमात्व- तदभाववतितत्प्रकारकत्वादिरूपभ्रमत्वयोरन्यतरस्यावश्यं बहुषु कल्पनीयत्वेन लाघवाभावात् । प्रत्यभि

ग्राव्यक्तीनामप्यनन्तत्वेन तदपेक्षया स्वल्पत्वाभावाच्च । नन्वेवं गकारादौ तारत्वादयो विरुद्धधर्माः प्रतीयन्त इति विरुद्धधर्माध्यासादेव भेदसिद्धिरिति चेत्, न। ध्वनिगतानामेव तारत्वादीनां तत्र प्रतीतेः । अवर्णात्मकवीणादिजन्यध्वनिरूपशब्देषु तारत्वादेः क्लृप्तत्वात् । एवम् अभिव्यञ्जकवाय्वादिसंयोगगतानामेव ध्वंसादीनां तत्र प्रतीतिरिति । अभिव्यञ्जकवायुसंयोगानां द्विक्षणावस्थायित्वेन च क्षणद्वयमेव तत्तच्छब्दप्रतीतिरिति। अथैवं घटादेरपि न कथं नित्यत्वम् । ध्वंसादिप्रतीतेश्चान्यथैवोपपत्तिसम्भवात् इति चेत्, न । नित्यत्वग्राहकप्रमाणाभावात् । प्रकृते च लाघवानुगृहीतप्रत्यभिज्ञाबलेन गकारादीनामभेदसिद्धौ अनादित्वसिद्ध्या तत्सिद्धेः । तस्मादभिन्ना एव गकारादयो नित्याः । एवं च य एवाग्नीषोमशब्दः आज्ययागे देवतात्वमध्यारोहति स एव पुरोडाशयागेऽपीति । यदि च देवतानां विग्रहः स्वीक्रियते तदा शब्दभेदेऽपि न विरुद्धं देवतैक्यमिति । तस्मात्पौर्णमास्याम् अग्नये स्वाहेति हुत्वा अग्नीषोमाभ्यां स्वाहेति एकवारमेव जुहुयात् न पुनरग्नीषोमाभ्यां स्वाहेति द्वितीयवारमपि। एवं होमद्वयमेव पौर्णमासदेवताभ्यां न होमत्रयमिति। अत एव मैत्रायणीयगृह्ये अग्नीषोमीयस्थालीपाकः पौर्णमास्यामैन्द्राग्नोऽमावास्यायामुभयत्र चाग्नेय इत्येवोक्तम् , न तु अन्तरा अग्नीषोमाभ्यामुपांशु यष्टव्यामित्युक्तम् । आश्वलायनगृह्ये तु देवताश्चोपांशुयाजेन्द्रमहेन्द्रवर्जमित्युपांशुयागः पर्युदस्त एव । अथैवम् आश्वलायनगृह्यैकवाक्यतया दर्शेऽपि विष्णुयागो मास्त्विति चेत्, न। शाखाभेदेन व्यवस्थितगृह्यान्तरानुरोधेन सामान्यतः प्रवृत्तदर्शपूर्णमासदेवताभ्यां हुत्वेतिसूत्रसङ्कोचस्यानुचितत्वात् । अग्नीषोमीयरूपोपांशुयाजाकरणे च एतत्सूत्रसङ्कोचस्याभावात् । ह-

रिहरादयस्तु पौर्णमासदेवताभ्यो होमत्रयं दर्शदेवताभ्योऽपि होमत्रयमेव। तत्र पौर्णमास्यामग्नये स्वाहेति हुत्वा उपांशु अग्नीषोमाभ्यां स्वाहेति च हुत्वा पुनरग्नीषोमाभ्यां स्वाहेति जुहुयात्। दर्शे चाग्नये स्वाहेति हुत्वा विष्णवे स्वाहेति च हुत्वा इन्द्राग्निभ्यां स्वाहेति जुहुयात्। इन्द्रमहेन्द्रादिदेवत्यहोमस्तु न भवति।

कारिकाकारोऽपि,

अभिघार्य चरुं तेन जुहुयात्प्रथमाग्नये।
अग्नीषोमाभ्यां द्वितीया ताभ्यामेव तृतीयका॥
अग्नये विष्णवे इन्द्राग्निभ्यां दर्शे जुहोत्यपि।
सान्नाय्यवत्यपीमाः स्युर्दर्शे नेन्द्रो न महेन्द्रः॥ इति।

अथ प्रकृतमुच्यते।

जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति।

स्थालीपाकमित्यनुवर्त्तते। ब्रह्मणे स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्यां स्वाहा इत्येवम्।

विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च।

बलिहरणमित्यनुषज्यते। एतच्च बलिहरणं स्थालीपाकादेव द्रव्यान्तरानुपदेशात्। स्थालीपाकस्य प्रस्तुतत्वाच्च। बलिपरिमाणमाह—

छन्दोगपरिशिष्टे कात्यायनः,

न चावराध्या बलयो भवन्ति महामार्ज्जारश्रवणप्रमाणात्।
एकत्र चेत् कल्पा भवन्तीतरेतरमसंकाश्चेति।

अत एव न स्रुवेणैव बलिहरणनियमः। आहृत्यर्द्धं बलेः प्रमाणमिति गर्गः। हरिहरादयश्च स्रुवेणैव बलिहरणं भवतीत्याहुः।

कारिकाकारोऽपि,

ततो बलित्रयं तस्माचरोरुत्तरतोऽर्पितः ।
भाजसंस्थं स्यादुदकसंस्थं वा स्रुवेण नमोऽन्तिकम् ॥इति।
मन्त्रस्तु विश्वेभ्यो देवेभ्यो नम इत्येवंरूपः ।
तथाच छन्दोगपरिशिष्टे कात्यायनः,
अमुष्मै नम इत्येवं बलिदानं विधीयते ।
बलिदानप्रदानार्थं नमस्कारः कृतो यतः ॥
स्वाहाकारवषट्कारनमस्कारा दिवौकसाम् । इति ।

अत्र च चतुर्थ्या त्यज्यमानहविरुद्देश्यत्वं विश्वेषां देवानामन्येषां च प्रत्याय्यते । तच्च त्यागमन्तरेण न सम्भवतीति त्यागोऽप्यवश्यं कार्यः । अत एव हरिहरादयः इदं विश्वेभ्यो देवेभ्यो न ममेत्येवं त्यागो भवतीति लिलिखुः । केचित्तु अमुष्मै नम इति न नमस्कारचतुर्थ्यन्तयोः क्रमपरं, किन्तु चतुर्थ्यन्तनमस्काराभ्यां बलिर्देय इत्येतावन्मात्रपरम् । अत एव गोभिलसूत्रे विकृतौ वास्तुबलौ नमो ब्रह्मण इति दर्शनमुपपद्यते । एवं च पारस्करसूत्रे नमः स्त्रियै नमः पुंसे वयसे इति आदौ नमःशब्दस्य दर्शनात् वैश्वदेवप्रकरणे पितृभ्यः स्वधा नम इति दक्षिणत इत्यत्र अन्ते दर्शनात् नमो विश्वेभ्यो देवेभ्यो नमो भूतगृह्येभ्यो नम आयामायेत्येवमपि मन्त्रप्रयोगो युज्यत इत्याहुः । छन्दोगपरिशिष्टीयनारायणभाष्येऽप्येवमेवोक्तमिति । इदं च बलित्रयं शालायामेव । अवचने शालायां क्रियमाणस्थालीपाकसम्बद्धस्य कर्मणः शालायामेव कर्तुं युक्तत्वात् । अग्रेतनबलीनां बाह्यतः स्त्रीबलिं हरतीत्यनेन शालाया बाह्यतोऽभिधानाच्च ।

वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाऽग्नये स्विष्टकृते स्वाहेति ।

विश्वे देवा देवता अस्येति व्युत्पत्त्या वैश्वदेवशब्देन सर्वा-

र्थः पाकोऽभिधीयते। तस्य वैश्वदेवस्य। षष्ठी चेयं तदेकदेशलक्षणार्था। तथा च सर्वार्थपाकादवदाय जुहोति। तत्र मन्त्रः अग्नये स्वाहेत्यादिः। अग्नौ जुहोतीति तु अग्नावेवास्य होमो नान्यत्रेति। तेन बलिकर्म ततो न भवतीति कर्काचार्याः। अत्र केचित् पौष्णस्य जुहोतीत्यत्र पौष्णमिव वैश्वदेवं चरुं कुर्वन्ति। तदयुक्तम्। दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यात्। न हि पौष्णशब्दवाच्यः चरुः प्रकारान्तरेण तत्र सिद्धः। वैश्वदेवस्तु पाको विद्यत एव। यथा च वक्ष्यति "वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात्" इति। अग्नये स्विष्टकृते स्वाहेति तु प्रयोगदर्शनार्थम्। प्राजापत्यं स्विष्टकृच्चेति प्रदेशान्तरे अभिहितम्, प्रयोगश्च नोपदर्शित इति तदिहोपदर्श्यते। अपि च स्थालीपाकेन दर्शपूर्णमासदेवतादीनां होमविधानस्यावसरविधित्सया तत्कथनम्। प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरिति प्रदेशान्तरे उक्तम्। तेन महाव्याहृतिहोमादाज्यभागोत्तरकालं चावसरोऽवगम्यत इति कर्काचार्याः। वस्तुतस्तु एतादृशप्रयोगप्रदर्शनमन्तरेणापि आज्यभागादीनामिव प्रयोगोपपत्तेराज्यभागव्याहृतिहोमान्तरालरूपावसरस्य च सीमन्तोन्नयनान्नप्राशनादिप्रधानहोमावसरस्यैव कथनं विनापि प्राप्तेश्च नैतदुभयं तत्प्रयोजनम्। किन्तु वैश्वदेवादन्नात्स्विष्टकृन्न प्राप्त इति तद्विधानार्थम्। कथमप्राप्तिरिति चेत्, न। अशेषत्वात्। यावद्धविरुत्तरार्द्धात्स्विष्टकृतस्तत एव होमो नाज्यादशेषादिति वदता कात्यायनेन शेषात्स्विष्टकृते समवद्यतीति प्रदर्शनात्। अशेषत्वं कुत इति चेत्, अग्नेऽप्येतत्सम्बद्धप्रधानस्य विद्यमानत्वात्। किं तत्प्रधानमिति चेत्, वैश्वदेवादिः। कथमस्य तदर्थतेति चेत्, शब्दसामर्थ्यात्। विश्वे देवाः देवपितृमनुष्यरूपा देवता अस्येति वैश्वदेवशब्दस्य व्युत्पादनात्। अत एव वैश्व-

देवे स्विष्टकृन्न क्रियते तदग्रेऽपि तत्सम्बद्धप्रधानस्य विद्यमानत्वादिति । न चैवं प्रकृतस्थालीपाकादपि स्विष्टकृन्न स्यात् तस्यापि शेषत्वाभावादिति वाच्यम् । दर्शपूर्णमासदेवताभ्यो यो होमस्तदुत्तरं तस्य शेषत्वसम्भवात् । अग्नीषोमीयस्थालीपाकः पौर्णमास्यामैन्द्राग्नोऽमावास्यायामुभयत्र चाग्नेय इति मैत्रसूत्रेण पूर्वलिखितगोभिलसूत्रेण सूत्रान्तरेण च दर्शपूर्णमासदेवताकहोमस्यैव दर्शपूर्णमासशब्दवाच्यत्वाभावात्कथमेवमिति चेत्, न । पूर्वं तु दर्शपूर्णमासाभ्यामन्वारम्भणीयदेवताभ्यो जुहुयादापौर्णमासाद्दर्शस्यानतीतः काल आदर्शात्पौर्णमासस्येति शाङ्खायनसूत्रे, होमद्वयात्यये दर्शपौर्णमासात्यये तथा पुनरेवाग्निमादध्यादिति छन्दोगपरिशिष्टेऽन्यत्र च दर्शपूर्णमासपदेन बहुशस्तद्व्यवहारदर्शनेन तस्य तत्पदवाच्यत्वावसायात् । आज्याच्चेह स्विष्टकृदर्थं नावद्येयं, शेषत्वाभावात् । गृह्यान्तरेषु स्थालीपाकवति कर्मणि स्थालीपाकादेव स्विष्टकृतो दर्शनाच्च ।

तथाच मैत्रगृह्यम्,

स्विष्टकृते समवद्यत्युत्तरार्द्धात्सकृद्द्विमात्र द्विर्वा । यदि पञ्चावदानस्यावत्तं द्विरभिघार्य नात ऊर्द्ध्वं स्थालीपाकं प्रत्यभिघारयति । अग्नये स्विष्टकृते स्वाहेत्यसंसक्तमुत्तरार्द्धे जुहोतीति ।

गोभिलगृह्यं च,

स्विष्टकृत उपस्तीर्यावद्यत्युत्तरार्द्धपूर्वार्द्धात्सकृदेव भूयिष्ठं द्विरभिघारयेद्युपञ्चावत्ती स्याद्द्विरुपस्तीर्यावदाय द्विरभिघारयेन्न प्रत्यनक्त्यवदानस्थानं यातयामताया अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धपूर्वार्द्धे जुहुयान्महाव्याहृतिभिराज्येनाभिजुहुयादिति ।

अत्र होमक्रमेण पूर्वस्थालीपाकात्सौविष्टकृतमवदाय ततो वैश्वदेवादप्यादवदाय एकदेव अग्नये स्विष्टकृते स्वाहेति जुहोति ।

ननु अङ्गुष्ठपर्वमात्रमेकैकमवदानं तयोर्द्वयोरङ्गुष्ठपर्ववृत्तपुष्करेण एकेन स्रुवेणैकदा कथं होम इति चेत्, सत्यम् । अर्थपरिमाणेन स्रुवान्तरेणैव तद्धोमस्य स्वीकारात् । वसोर्द्धारादौ तथा दृष्टत्वात् । न च स्रुवं प्रतप्येत्यत्र स्रुवमित्येकवचनान्तपदोपादानात् एकस्य स्रुवस्य प्रतपनमुक्तम् । तथा च तत्र एक एव स्रुवो भवतीत्यवगम्यते इति वाच्यम् । एकत्वस्योद्देश्यगतत्वादविवक्षितत्वेन स्रुवान्तरप्रतपनस्य स्रुवान्तरस्य वा अर्थतोऽप्यनिराकरणात्, "शूलगवपशुबन्धे अवदानहोमार्थं स्रुवे उपस्तीर्य हिरण्यशकलमवधाय हृदयाद्यङ्गेभ्यः प्रत्येकं द्विर्द्विरवदायावदाय स्रुवे क्षिप्त्वा स्थालीपाकाच्च सकृदवदाय क्षिप्त्वा उपरि हिरण्यशकलं दत्त्वा सकृदभिघार्य असर्वाणि चेत्क्षताभ्यङ्गं कृत्वा अग्नये स्वाहेति जुहोति" इति हरिहरादिभिर्लिखनादप्येतस्यार्थस्य स्वीकारात् । तस्यासादनं तु वैश्वदेवान्नादुत्तरं पूर्णपात्राच्च पूर्वं भवति कार्यक्रमस्य तथैव सत्त्वात् । प्रोक्षणमपि तथैव । प्रतपनसंमार्जनप्रतपनाभ्युक्षणानि च प्रधानार्थस्रुवप्रतपनाद्युत्तरं भवन्ति । न च गृहमेधीयेष्टौ सौविष्टकृतपीशीलकस्येवात्रापि सौविष्टकृतस्रुवस्यासादनादिकं मास्तु इति वाच्यम् । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । वाजिनोत्पत्त्याद्यप्रयोजकस्य वाजिनयागस्येव अन्यदीयद्रव्योपजीवकस्य हि स्विष्टकृतो न तद्द्रव्योत्पत्तितत्संस्कारतद्द्रव्याधिकरणपात्रसंस्कारादिप्रयोजकत्वम् इति तत्रेष्टौ वचनात्पृथग्भूतेऽपि स्विष्टकृद्द्रव्येऽन्यथानुपपत्त्या तदधिकरणपात्रमात्राक्षेपेऽपि न तत्संस्कारस्याक्षेपः । स्रुवस्य तु वचनसामर्थ्याभ्यामङ्गप्रधानसाधारण्येन द्रवद्रव्यावदाने होमपात्रमनादेश इति वचने च होममात्रे एव विनियुक्तस्योपादिश्यमानः संस्कारो यावदङ्गप्रधानार्थद्रवद्रव्यग्रहणहोमार्थ इति भवति स्रुवादिसंस्कारस्य प्रयो-

जकः स्विष्टकृत्। अत एव दर्शपूर्णमासयोः विस्मृतस्रुवजुहूसंमार्गीकरणमाक्रमापवर्गादिति देवयाज्ञिकादयो लिखन्ति स्म।

अन्येतु जुह्वाऽवचन इति सूत्रेण होममात्रानुवादेनैव जुहूर्विहितेति सर्वत्र स्थालीपाकादावपि जुहूः कार्या। न च स्रुवं प्रतप्येत्यादिना स्रुवमात्रस्यैव प्रतपनाद्युपदेशात्कथमेवमिति वाच्यम्। आज्यमधिश्रित्येत्यत्र आज्यपदस्य स्थालीपाकोपलक्षकत्व इव पर्यग्नि कृत्वा तूष्णीं स्रुक्स्रुवौ संमृज्यादिति मैत्रायणीयगृह्यैकवाक्यतया स्रुवपदस्यापि जुहूपलक्षकत्वे विरोधाभावात्। एवं च आज्यभागानन्तरं जुह्वामुपस्तीर्य स्थालीपाकस्य मध्यात्पूर्वार्द्धाच्चावदाय पञ्चावत्तिनां तु मध्यात्पूर्वार्द्धात्पश्चार्द्धाच्चावदाय प्रत्युपस्तीर्य क्षताभ्यङ्गं कृत्वा प्रधानदेवताभ्यो जुहोति। स्विष्टकृद्धोमार्थं च जुह्वामुपस्तीर्य स्थालीपाकस्योत्तरार्द्धात्सकृदवदाय पञ्चावत्तिनां द्विरवदाय द्विः प्रत्युपस्तीर्य क्षताभ्यङ्गमकृत्वैव उत्तरपूर्वार्द्धे जुहोति।

तथा मैत्रायणीयगृह्ये, उपस्तीर्य उपस्पृश्य मेक्षणेन स्थालीपाकस्यावद्यति मध्यात्पूर्वार्द्धाद् द्वितीयं पश्चार्द्धात्तृतीयम्। यदिदं पञ्चावदानस्यावत्तमभिघार्य स्थालीपाकं प्रत्यभिघारयति अग्नये स्वाहेति मध्ये जुहोति यो देवानामसीति रौद्रस्य जयान् हुत्वाऽऽज्यस्य स्विष्टकृते समवद्यति उत्तरार्द्धात्सकृद्विमात्रं द्विर्वा यदि पञ्चावदानस्यादवत्तं द्विरभिघार्य नात ऊर्द्ध्वं स्थालीपाकं प्रत्यभिघारयत्यग्नये स्विष्टकृते स्वाहेत्यसंसक्तमुत्तरार्द्धे जुहोतीत्युक्त्वा एतेन स्थालीपाकेन स्थालीपाकाः सर्वे व्याख्याता इत्युक्तम्।

आश्वलायनगृह्येऽपि, अथ पार्वणस्थालीपाक इत्युपक्रम्य मध्यात्पूर्वार्द्धाच्च हविषोऽवद्यति मध्यात्पूर्वार्द्धात्पश्चार्द्धादिति पञ्चावत्तिनामुत्तरार्द्धात्स्विष्टकृते नात्र हवींषि प्रत्यभि-

धारयतीत्युक्तम् ।

गोभिलगृह्येऽपि, यद्युवा उपस्तीर्णाभिघारितं जुहुयेदा-ज्यभागावेव प्रथमौ जुहुयाच्चतुर्गृहीतमाज्यं गृहीत्वा पञ्चावत्तं तु भृगूणामग्नये स्वाहेत्युत्तरतः सोमाय स्वाहेति दक्षिणतः प्राकृशो जुहुयात् । अथ हविष उपस्तीर्यावद्यति मध्यात्पूर्वार्द्धाच्चतुरवत्ती चेद्भवति मध्यात्पूर्वार्द्धात्पश्चार्द्धादिति।पञ्चावत्ती चेद्भवत्याभिधा-रयत्यवदानानि प्रत्यनक्त्यवदानस्थानान्ययातयामताया अग्नये स्वाहेति मध्ये जुहोति सकृद्वा त्रिर्वैतेनैव कल्पेन। अथ स्विष्टकृत उपस्तीर्यावद्यत्युत्तरार्द्धपूर्वार्द्धात्सकृदेव भूयिष्ठं द्विराभिघारयेद्यदु पञ्चावत्ती स्याद्विरभिघारयेन्न प्रत्यनक्त्यवदानस्थानं यातयामता-या अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धे पूर्वार्द्धे जुहुयान्महाव्याहृ-तिभिराज्येनाभिजुहुयात् प्राक् स्विष्टकृत आवापो गणेष्वेकं परि-समूहनमिध्मो बर्हिःपर्युक्षणमाज्यभागौ च सर्वेभ्यः समवदाय सकृदेव सौविष्टकृतं जुहोतीति ।

अत एवाज्यभागावपि चतुर्गृहीतेनैव होतव्यौ न सकृद्-गृहीतेन। आज्यभागप्रधानस्विष्टकृदतिरिक्तहोमानां तु चतुरवत्त-त्वस्य गृह्यान्तरेष्वप्यदर्शनात् सकृद्गृहीतार्थावाप्तेरंवपदकारा-तिरेकाच्चेति कात्यायनसूत्राच्च सकृत्सकृदवदाय ते होमाः कर्त्त-व्याः । अत एव पाकयज्ञेष्ववत्तस्यासर्वहोम इति सूत्रव्याख्या-यां स्रुचि स्रुवे वाऽवत्तस्येति देवयाज्ञिकैरुक्तम् । एवं च प्रकृते जुह्वाः सत्त्वात्तयैवानेकहविष्कस्विष्टकृदादिसिद्धेर्द्वितीयस्यार्थपरि-माणस्रुवस्य प्रसक्तिरेव नास्तीत्याहुः । तदपरे न क्षमन्ते। स्था-लीपाक आज्यमानीय मेक्षणेनोपघातं होतुमेवोपक्रमते इत्यादि-गोभिलादिसूत्रेषु स्रुङ्नियमस्य चतुरवत्ततानियमस्य चादर्शनात्। पारस्करेण च स्रुवसंस्कारमात्रस्य कथनाद् पारस्करसूत्रानुया-

यिनां स्रुवेणैव होमो भवतीतित्युन्नयनात्। न च मैत्रायणीयगृ-ह्याद्येकवाक्यतया स्रुवं प्रतप्य संमृज्येति सूत्रस्थस्रुवपदस्य जुहू-पलक्षकत्वावश्यकत्वे कथमेवमिति वाच्यम्। तत्सूत्रज्ञापकादि-कमन्तरेणैव सूत्रान्तरमात्रानुरोधात्तत्सूत्रस्थपदे लक्षणा स्वीका-रानौचित्येन तत्रत्यस्रुवपदस्य जुहूपलक्षकत्वाभावात्। अन्यथा रौद्रस्य जयान् हुत्वाऽऽज्यस्य स्विष्टकृते समवद्यतीति मैत्रायणी-यसूत्राद्येकवाक्यतया आघारावाज्यभागौ महाव्याहृतयः सर्व-प्रायश्चित्तं प्राजापत्यं स्विष्टकृच्चैतन्नित्यं सर्वत्रेति सूत्रस्थस्विष्ट-कृदादिशब्दस्य जयाहोमाद्युपलक्षकत्वापत्तेः। अस्त्विति चेत्, न। विभिन्नपदार्थबोधकगृह्यान्तरानुरोधेन लक्षणास्वीकारे एतत्सूत्र-स्य पदमात्र एव लक्षणास्वीकारापत्तेः। तस्मान्न जुह्वा होमः किन्तु स्रुवेणैवेति। स्विष्टकृद्धोमार्थं तु अर्थपरिमाणस्रुव उपादेय एवेति। अत्र होमार्थं वैश्वदेवपाकादवत्तस्य सर्वहोमः न संस्रव-परिक्षेपणम्। परिभाषया प्राप्तस्यापि स्वाहाकारस्य अग्नये स्वा-हेत्यादौ पुनरुपादानेन संस्रवोऽत्र न भवतीति ज्ञापनात्। वैश्व-देवप्रकरणीय—वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयादितिसूत्र-व्याख्याप्रस्तावे स्वाहाकारैर्जुहुयादिति संस्रवव्युदासार्थमिति कर्काचार्यलिखनादिति केचित्। अपरे तु स्वाहाकारान्तमन्त्रा-न्तराणामिव कस्याञ्चिच्छाखायां क्रमपरिपठितानामग्नये स्वाहेत्या-दीनामप्युपनिबन्धसम्भवान्न स्वाहाकारोपादानमात्रेण संस्रव-व्युदासः। अन्यथा सर्वत्र स्वाहाकारान्तमन्त्रान्तरकरणकहो-मस्थले संस्रवानापत्तेः। सन्दिग्धतात्पर्यकसूत्रानुरोधेन निर्णीता-र्थकपाकयज्ञेष्वव त्तस्यासर्वहोम इति सूत्रसङ्कोचापत्तेश्च। अत एव कारिकाकारेणापि—

नेच्छन्ति संस्रवान् केचिद्वैश्वदेवान्नहोमतः।

स्वाहान्तत्वाच्च मन्त्राणां न युक्तं वचनादिदम् ॥
संस्रवास्तु भवन्त्यत्र भाष्यकारादिसंमतम् ।
पाकयज्ञेष्ववचस्य प्रत्यक्षवचनाद्यतः ॥
इत्युक्तमित्याहुः ।

वाह्यतः स्त्रीबलिं हरति । वाह्यतः स्त्रीबलिम् स्त्र्यादिभ्यो बलिः स्त्रीबलिः तं स्त्रीबलिं हरति ददाति, नमः स्त्रियै इत्यादिभिर्मन्त्रैः । बलिपरिमाणादिकं पूर्वलिखितमेव ग्राह्यम् । केचित्तु स्त्रीभ्यो बलिः स्त्रीबलिरिति न समासः किन्तु स्त्रीति भिन्नं पदम्। एवं च स्त्री बाह्यतो बलिं हरतीत्यर्थः । तथा च सीतायज्ञे—

पारस्करः, स्त्रियश्चोपयजेरन्नाचारितत्वादिति । स्त्री च पत्न्येव नान्या काचिदप्रकृतेत्याहुः । तन्न । एतादृशार्थकरणापेक्षया पूर्वव्याख्याने लाघवात् । एतादृशव्याख्याने हि स्त्रीणां तत्तद्बलिप्रदानानुकूलविद्याकल्पना स्यात् ।यत्र चान्यथा वाक्यार्थो न सम्भवति तत्र वचनबलेनैव विद्या कल्प्यते। न चात्र तथास्ति। तस्मात्स्त्र्यादिभ्यो बलिः स्त्रीबलिरिति समासेनैकपद्यमेवेति । इदं च बलिहरणं स्थालीपाकादेव वैश्वदेवान्नात् । वैश्वदेवस्याग्नौ जुहोतीति सूत्रस्याग्नावेव होमो न बलिहरणमिति व्याख्यानात् । प्रस्तुतत्वाद्वैश्वदेवपाकादेव बलिकर्म भवतीति तु गर्गः । आगन्तूनामन्ते निवेश इतिन्यायाच्च प्राशनान्त एव एतत्कार्यम् । अत एव—

कारिकाकारः,

आज्येन नव भूराद्याः प्राशमाद्याविमोकतः ।
शालाया बाह्यतस्तस्माच्चरुशेषाच्च पूर्ववत् ॥
नमस्त्रियादिभिर्मन्त्रैः पञ्चभिर्बलिपञ्चकम् ।
पञ्चपे बलिदाने स्युर्देवतास्तु स्त्रियादिकाः ॥ इत्याह ।

शेपमद्भिः प्रप्लाव्य । शेषं स्थालीपाकशेषम् । अद्भिः जलेन प्रप्लाव्य प्रकृष्टं प्लावयित्वा । एतच्च प्लावनं प्रणीतोदकेन प्रणीतानां सर्वार्थत्वस्वीकारात् इति बहवः । अपूर्वकार्यार्थत्वान्न प्रणीतोदकेन, किन्तु जलान्तरेणैव तदित्यपरे ।

कारिकाकारोऽपि,

अद्भिः प्रप्लाव्य तच्छेपं लौकिकाभिश्चरुं ततः ।
वासुदेवादयः प्लावे प्राहुः प्राणीतकं जलम् ॥
अस्याप्राकृतकार्यत्वान्नेच्छन्त्यन्ये च तद्विदः । इति ।

ततो ब्राह्मणभोजनमिति तु व्याख्यातम् ।

अथ सम्प्रदायानुसारेण प्रचरद्वस्थं पक्षमवलम्ब्य प्रयोगो लिख्यते ।

तत्र आधानानन्तरम् अभ्यहितपौर्णमास्यां मातृपूजापूर्वकमाभ्युदयिकश्राद्धं कृत्वा मध्याह्ने अमाषममांसमक्षारमलवणं हविष्यं व्रत्यान्नं भुक्त्वा रात्रावग्निसमीपे पृथक् भूमौ दम्पती शयीयाताम् । ततः प्रातः स्नानादिहोमान्तं विधाय वैश्वदेवान्नं पाचयेत् स्वयं वा पचेत् । तत उदिते सूर्ये पौर्णमासं स्थालीपाकमारभेत । तत्र प्रथमतः अग्नेः पश्चात्प्राङ्मुख उपविश्य अद्येहेत्यादिदेशकालौ सङ्कीर्त्य पक्षादिकर्माहं करिष्य इति सङ्कल्पं विधाय ग्रन्थकारलिखनात् देवताभिध्यानं करोति । तद्यथा, पक्षादिकर्माहं करिष्ये तत्र प्रजापतिमिन्द्रमग्निं सोममाज्येन, अग्निमग्नीषोमात्रुचैः, अग्नीषोमौ ब्रह्माणं प्रजापतिं विश्वान् देवान् द्यावापृथिव्यौ चरुणा, विश्वान् देवान् भूतगृह्यमाकाशं च बलिभिः, अग्निं प्रजापतिं विश्वान् देवान् वैश्वदेवान्नेन, स्विष्टकृतं शेषेण, अग्निं वायुं सूर्यम् अग्नीवरुणौ अग्निम् अयसं वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणमदितिं प्रजापतिं चाज्येन, स्त्रियं पुमांसं वयसं वयसां कृष्ण-

दन्तं पापिनां पतिं ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तान् बलिभिरहं यक्ष्ये। ततः ब्रह्मोपवेशनादि आज्यभागान्तमाधानवत् कुर्यात्। तत्र विशेषः। पूर्णपात्रदक्षिणेन वरदक्षिणेन वा पक्षादिकर्मणाऽहं यक्ष्ये, तत्र मे त्वं ब्रह्मा भवेति ब्रह्मवरणम्। माणिकोदकेन प्रणीताप्रणयनम्। पात्रासादनं तण्डुलानन्तरं वैश्वदेवान्नस्यासादनम्। स्विष्टकृदर्थपरिमाणस्रुवोपादानपक्षे पूर्णपात्रात्पूर्वं तस्याप्यासादनम्। एतेषां प्रोक्षणं च। प्रधानहोमार्थस्रुवप्रतपनाद्युत्तरं च द्वितीयस्रुवस्यापि प्रतपनसंमार्जनप्रतपनाभ्युक्षणानि तथैव कर्त्तव्यानि। ततः आज्यभागहोमान्ते स्थालीपाकमभिघार्य स्रुवेणादाय पूर्णमासदेवताभ्यो जुहोति। तद्यथा, अग्नये स्वाहा इदमग्नये न मम। उपांशु अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां न मम। उच्चैः अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां न मम। ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। प्रजापतये स्वाहा इदं प्रजापतये न मम। विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यो न मम। द्यावापृथिवीभ्यां स्वाहा इदं द्यावापृथिवीभ्यां न मम। अत्र पूर्वपूर्वेण होमः, उत्तरोत्तरेण त्यागो बोध्यः। एवमग्रेऽपि। ततो हुतशेषाच्चरोः महामार्ज्जारश्रवणपरिमाणादन्यूनपरिमाणं बलिं स्रुवेण वाऽन्येन वा आदायादाय बलीन् हरति। तद्यथा, विश्वेभ्यो देवेभ्यो नम इदं विश्वेभ्यो देवेभ्यो न मम। भूतगृह्येभ्यो नम इदं भूतगृह्येभ्यो न मम। आकाशाय नमः इदमाकाशाय न मम। एवं बलित्रयं दत्त्वा त्यागं च कृत्वा वैश्वदेवान्नमभिघार्य ततः स्रुवेणादायादाय जुहोति। अग्नये स्वाहा इदमग्नये न मम, प्रजापतये स्वाहा इदं प्रजापतये न मम, विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यो न मम। एवमाहुतित्रयं हुत्वा पूर्वासादितावदानद्वयग्रहणयोग्ये स्रुवे स्थालीपाकोत्तरार्द्धाद्वैश्वदेवोत्तरा-

र्द्धाचावदाय अग्नये स्विष्टकृते स्वाहेति तेनैव स्रुवेण अग्नौ उत्तरार्द्धे जुहोति । इदमग्नये स्विष्टकृते न ममेति त्यागः । तत ऋष्यादिस्मरणपूर्वकं भूरित्यादिप्रजापत्यन्ता नवाहुतीर्जुहुयात् । ततः संस्रवप्राशनं मार्जनं पवित्रप्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे दक्षिणादानं च कुर्यात् । ततः चरुशेषमादाय शालाया बहिरुपलिप्तायां भूमावुपविश्य बलीन् हरति । नमः स्त्रियै इदं स्त्रियै न मम । नमः पुंसे वयसे वयसे इदं पुंसे वयसे वयसे न मम । नमः शुक्लाय कृष्णदन्ताय पापिनां पतये इदं शुक्लाय कृष्णदन्ताय पापिनां पतये न मम । नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्य इदं ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यो न मम । नमोऽस्तु बलिभिभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददतु । इदं स्त्रियै पुंसे वयसे वयसे शुक्लाय कृष्णदन्ताय पापिनां पतये ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यो न मम । इदमेभ्य इति वा त्यागः । ततः चरुशेषम् अद्भिः प्रप्लाव्य एकं ब्राह्मणं भोजयेदिति । दर्शे तु विशेषः । अमावास्यायामपराह्णे वक्ष्यमाणविधिना पिण्डपितृयज्ञं कुर्यात् । ततः प्रातराज्यभागान्तं पौर्णमासवत्कृत्वा दर्शदेवताभ्यो जुहोति । तद्यथा, अग्नये स्वाहा इदमग्नये न मम । विष्णवे स्वाहा इदं विष्णवे न मम । इन्द्राग्निभ्यां स्वाहा इदमिन्द्राग्निभ्यां न मम इति असन्नयतः । सन्नयतस्तु इन्द्राग्निस्थाने इन्द्राय स्वाहा इदमिन्द्राय न मम । अथवा इन्द्राग्निस्थाने महेन्द्राय स्वाहा इदं महेन्द्राय न मम इति । शेषं पौर्णमासवत् ।

इति पार्वणस्थालीपाकप्रयोगः ।

अथ पिण्डपितृयज्ञः ।

तत्र पिण्डपितृयज्ञमुक्त्वा कर्कादिधृतश्रुतिः, अप्यनाहिताग्निना कार्य इति। अपराह्णे पिण्डपितृयज्ञ इत्यादिना पिण्डपितृयज्ञविधिमुक्त्वा—

कात्यायनश्च, अनाहिताग्नेरप्येष इति।

न आहिताः गार्हपत्यादिरूपा अग्नयो येन स अनाहिताग्निः कृतावसथ्यः तस्य अनाहिताग्नेः। एषः उक्तप्रकारः पिण्डपितृयज्ञः, भवतीति शेषः। नन्वेवमकृतावसथ्योऽप्यनाहिताग्निर्भवत्येव तस्यापि अनेन सूत्रेण पिण्डपितृयज्ञः किं नस्यादिति चेत्, न। गोभिलेन अनाहिताग्निकर्तृकपिण्डपितृयज्ञस्य शालाग्नावेव विधानात्।

तद्यथा, अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञो व्याख्यातोऽमावास्यायां तच्छ्राद्धमितरदन्वाहार्य मासीनं दक्षिणाग्नौ हविषः संस्करणं तत्रश्चैवातिप्रणयः शालाग्नावनाहिताग्नेरिति।

अस्यार्थः। श्वस्ततोऽन्वष्टक्यमित्यादिना अन्वष्टक्यस्थालीपाकविधिरुक्तः। तं पिण्डपितृयज्ञेऽतिदिशति, अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञो व्याख्यात इति। अमावास्यायां तच्छ्राद्धम्। अमावास्यायां दर्शे तत् पिण्डपितृयज्ञाख्यं श्राद्धं, कर्त्तव्यमिति शेषः। इतरत् पिण्डपितृयज्ञाद्भिन्नं श्राद्धम्। अन्वाहार्यम् अनु पिण्डपितृयज्ञस्य पश्चात् आहार्यं कर्त्तव्यम्। मासीनं मासि क्रियते तत् मासीनम्। दक्षिणाग्नौ हविषः संस्करणम्। गार्हपत्ये संस्कारा इति कात्यायनसूत्रेणाहिताग्नेर्गार्हपत्य एव हविषः संस्करणं प्राप्नोति तन्निराकरणार्थमुक्तं दक्षिणाग्नाविति। तत्रश्चैवातिप्रणयः। ततः दक्षिणाग्नेः सकाशात् अतिप्रणयः अतिप्रणयनम्। चशब्दात् होमश्च दक्षिणाग्नावेव। शालाग्नावनाहिताग्नेः। हविषः संस्करणम् अतिप्रणयनं होमश्च अनाहिताग्नेः शालाग्नावेव

भवतीति । तस्य कालमाह—

कात्यायनः,

अपराह्णे पिण्डपितृयज्ञः चन्द्रादर्शनेऽमावास्यायामिति ।

अपराह्णः त्रेधा विभक्तस्य अह्नः तृतीयो भागः । पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितृणामिति वाक्यशेषात् । वाक्यशेषेणाप्यर्थनिर्णयस्य अक्ताः शर्करा उपदधातीत्यादिषु स्वीकारात् । अनन्तयाज्ञिकादयस्तु समं द्वेधा विभक्तस्य अह्नः अपरो भागः अपराह्णः । शब्दसामर्थ्यात् । भागद्वये च कृते आद्यः पूर्वः द्वितीयश्च अपरो भवति, न भागत्रये पञ्चभागे वा कृते । पूर्वाह्णो वै देवानामित्यादिवाक्ये तु पूर्वाह्णापराह्णयोरेवैकदेशस्य मनुष्यादिभोजनाह्नस्य मध्याह्नत्वेन कीर्त्तनम् । न तु ताभ्यां पृथग्भूतस्य । अवयवशक्त्यैव निर्वाहे अपराह्णादिशब्दस्य रूढ्यन्तरकल्पनानौचित्यात् । तस्मात् द्वेधा विभक्तस्यैव अह्नः अपरो भागः अपराह्ण इत्याहुः । पिण्डपितृयज्ञ इति पिण्डैः पितृयज्ञः इति व्युत्पत्त्या पिण्डदानाख्यस्य कर्मणः संज्ञा । होमश्च तदङ्गम् । स उद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यो देवान् वा एष उपावर्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत् पितृयज्ञेनैवाचारी तद् देवेभ्यो निह्नुते स देवैः प्रसूतोऽथैतत्पितृभ्यो ददाति तस्मादुद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्य इति श्रुतेः । किञ्च मासि मासि वोऽशनमिति प्रकृत्य यदेवैष न पुरस्तान्न पश्चाद्ददृशेऽथैभ्यो ददातीत्यादिना श्रुतौ पिण्डदानमेवोक्तं न होमजपादिकमित्यतोऽपि पिण्डदानमात्रस्य प्राधान्यमवगम्यत इति । चन्द्रादर्शनेऽमावास्यायामिति । चन्द्रादर्शनमभ्रादिनाऽपि सम्भवतीत्यतोऽमावास्यापदमुपात्तम् । चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्राऽमावास्यामित्यादिप्रयोगदर्शनाद्दमावास्यापदेनामावास्यं कर्माप्युच्यते इत्यतश्च-

न्द्रादर्शने इत्युपासम् । अदर्शनपदेन च परमक्षयो लक्ष्यते । एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स एतां रात्रिं क्षीयते तस्मिन् क्षीणे ददातीति श्रुतेः । एवं च चन्द्रस्य परमक्षयविशिष्टे अमावास्यारूपकाले अपराह्णे पिण्डपितृयज्ञो भवतीति सूत्रार्थः । अत एव खर्विकामावास्यायां दृष्टेऽपि चन्द्रमसि अपराह्णे परमक्षय इति क्रियत एव तत्र पिण्डपितृयज्ञः । यदैवैष न पुरस्तान्न पश्चाद्ददृश इति श्रुतेश्च तस्मिन् क्षीणे ददातीत्येकतया परमक्षयोपलक्षकत्वमेव । तेन खर्विकामावास्यायां पिण्डपितृयज्ञकरणे न दोषः । विशेषतस्तु पर्वनिर्णयः समयप्रकाशे वक्ष्यते । तदितिकर्त्तव्यतामाह —

कात्यायनः, दक्षिणाग्नौ श्रपणꣳ होमश्च । परिस्तीर्य तं पूर्ववत् पात्रासादनमेकैकशोऽपरेण गार्हपत्यं चरुमपूर्णꣳस्रुवं वा तूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमवहन्ति तिष्ठन् । सकृत् फलीकरोति । सारतण्डुलमपूर्णꣳ श्रपयित्वाऽभिघार्योद्वास्य मेक्षणेन जुहोति। अग्नय इति सोमाय इति च प्रास्य तद्दक्षिणेनोल्लिखत्यपहता इत्यपरेण वा उल्मुकं परस्तात्करोति येरूपाणीति । उदपात्रेणावनेजयत्यपसव्यꣳसव्येन वोद्धरणसामर्थ्यादसाववनेनिक्ष्वेति यजमानस्य पितृप्रभृतित्रीन् । उपमूलꣳसकृदाच्छिन्नानि रेखायां कृत्वा यथावनिक्तं पिण्डान् ददात्यसावेतत्त इति । ये च त्वामन्विति चैके । अत्र पितर इत्युक्त्वोदङ्ङास्त आतमनादाव्रत्यामीमदन्तेति जपत्यवनेज्य पूर्ववन्नीविं विस्रꣳस्य नमो व इत्यञ्जलिं करोत्येतद्व इत्यपास्यति सूत्राणि प्रतिपिण्डमूर्णादशां वा वयस्युत्तरे यजमानलोमानि वोर्जमिति पयो निषिञ्चत्यवधायार्यजिघ्रति यजमान उल्मुकसकृदाच्छिन्नान्यग्नौ इति ।

अस्यार्थः । दक्षिणाग्नौ श्रपणꣳ होमश्च । दक्षिणस्यां दि-

ऽग्न्यत्रस्थापितोऽग्निः दक्षिणाग्निः तत्र चरुश्रपणं होमश्च भवति। विशेषवचनं चैतत्। अतो गार्हपत्ये संस्कारा इति परिभाषासूत्रेण गार्हपत्ये श्रपणस्य, आहवनीये होमः श्रुतिसमाख्यानाभ्यामिति परिभाषया च आहवनीये प्राप्तस्य होमस्य च व्युदासः। एतच्चाहिताग्निविषयम्। अनाहिताग्नेस्तु शालाग्नावेव श्रपणं होमश्च शालग्नावनाहिताग्नेरिति पूर्वलिखितगोभिलसूत्रादवसेयम्। परिस्तीर्य तम्। यत्र होमादिरुक्तः तमग्निं परिस्तीर्य। परिस्तरणप्रकारस्तु पूर्वोक्तोऽध्यवसेयः। पूर्ववत्पात्रासादनमेकशः। पूर्ववत् श्रपणस्य पश्चादुत्तरतो वा। पात्रासादनं शूर्पादेः प्रयोजनवतश्च स्थापनम्। एकैकशः एकैकस्य। एकैकश इत्युक्तत्वात्प्राप्ताया द्वन्द्वताया निरासः। अपरेण गार्हपत्यं चरुमपूर्णं स्रुवं वा तूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमवहन्ति तिष्ठन्। अपरेण गार्हपत्यं गार्हपत्यस्य पश्चिमतः। सजघनेन गार्हपत्यमिति श्रुतेः। चरुमपूर्णं स्रुवं वा तूष्णीं गृहीत्वा। चरुशब्दः चरुस्थालीवचनः। स्रुक् चात्र वारणकाष्ठमयी। वारणान्यहोमसंयुक्तानीति कात्यायनसूत्रात्। ग्रहणे च अपूर्णता उभयोः। अपूर्णं पितॄणामिति कर्कादिधृतवचनात्। तूष्णीमिति तु लौकिकवागुच्चारणप्रतिषेधार्थम्। मन्त्रस्यानुपदेशादेवाप्राप्तेः।

तथा चाश्वलायनसूत्रम्, दक्षिणतोऽग्निष्ठमारुह्य चरुस्थालीं पूर्णां निमृजेत्।

आपस्तम्बादिसूत्रानुयायिनां तु मन्त्रेण वा तूष्णीं वा ग्रहणं तत्सूत्रादौ तथैवोक्तत्वात्।

तद्यथा, दक्षिणतः प्राचीनं व्रीहिमत् शकटमवस्थितं भवति। अध्वर्युरुपवीती स्थालीमेकपवित्रेणान्तर्धाय तया दक्षिणतः शकटादधिनिर्वपति। उत्तरतः प्राचीनावीती तां पूरयित्वा निमार्ष्टि।

निर्वपति पितृभ्यो जुष्टं निर्वपामीति वा तूष्णीं वेति ।

शाङ्खायनानां तु पितृणां ध्यानमात्रं न मन्त्रः ।

तथाच शाङ्खायनः, गार्हपत्यस्य पश्चाद्दक्षिणाग्रेषु कुशेषु स्फ्यं निधायोपरिष्टाद्व्रीहीन् पात्र्यां पुरस्ताच्छूर्पे स्थालीम् आच्य सव्यं जानुनी वा मुष्टिना व्रीहीन् गृह्णाति पितॄन् ध्यायन् यथाधोविलाशृतः स्यादिति ।

एवं च आपस्तम्बसूत्रानुसारिणां मन्त्रविकल्पः, शाङ्खायनानां तु पितृणां ध्यानमात्रम्, अन्येषां मन्त्रस्यानुक्तत्वात्तूष्णीमिति । न चान्येषामप्यापस्तम्बोक्तो मन्त्रो विकल्पेनास्त्विति वाच्यम् । आकाङ्क्षितस्यैव परोक्तस्य ग्रहणात् । अत एव कात्यायनसूत्रानुसारिणां शकटात् पात्रीतो वा न ग्रहणम् । न वा स्थाल्यां पवित्राद्यवधानम् । किन्तु कृताश्रितपात्रान्तराद्ग्रहणमिति । उत्तरेण दक्षिणाग्निमवहन्ति तिष्ठन् । दक्षिणाग्नेरुत्तरतः अदूरे कण्डनं करोति ऊर्ध्वीभूतः । अत्र सर्वमपि दक्षिणाभिमुखेन प्राचीनावीतिना च कर्त्तव्यम् ।

तथाच श्रुतिः, सजघनेन गार्हपत्यं प्राचीनावीती भूत्वा दक्षिणासीन एतं गृह्णाति । स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणां तिष्ठन्नवहन्ति सकृत्फलीकरोतीति ।

एवं पदार्थान्तरेष्वपि दक्षिणामुखत्वादिकं तत्र तत्र श्रुतानुक्तम् । कात्यायनोऽपि विपर्यस्य पित्र्येषु सकृद्दक्षिणा नेति पित्र्यकर्ममात्र एव दक्षिणामुखत्वादिकमुक्तवान् । एतच्च कण्डनमुद्ग्रीवं कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय तत्र व्रीहीन् प्रक्षिप्य मुसलमादाय दक्षिणामुखस्तिष्ठन् करोति । दर्शपूर्णमासयोः कृष्णाजिनास्तरणं प्रकृत्य तस्मादध्यवहननमधिपेषणं भवत्यस्कन्न ५ हविरसदिति यदेवात्र तण्डुलो वा पिष्टं वास्कन्दा-

त्यग्ने यज्ञः प्रतितिष्ठादिति तस्मादध्यवहननमधिपेषणं भवतीति श्रुतत्वात् । सूत्रान्तरेषु च कृष्णाजिनास्तरणस्योक्तत्वात् ।

तथाचापस्तम्बः, अपरेणान्वाहार्यपचनं प्रत्यग्ग्रीवे कृष्णाजिने प्रतिष्ठिते दक्षिणा प्राची तिष्ठन्ती पत्न्यवहन्ति पराघातमविवेकं च सकृत्फलीकरोति दक्षिणाग्नौ जीवतण्डुलं श्रपयतीति ।

आश्वलायनश्च, कृष्णाजिने उलूखलं कृत्वेतरान् पत्न्यवहन्यादविवेचमवहतान् सकृत्प्रक्षाल्य दक्षिणाग्नौ श्रपयेदिति ।

अन्ये तु कात्यायनसूत्रे श्रुतौ च कृष्णाजिनास्तरणस्यानुक्तत्वात् सूत्रान्तरोक्तस्यानाकाङ्क्षितस्याग्रहणात् तस्मादध्यवहननमधिपेषणं भवतीत्यादेर्दर्शपूर्णमासप्रकरणीयकृष्णाजिनास्तरणस्तावकत्वाच्च नात्र कृष्णाजिनास्तरणमित्याहुः । सकृत्फलीकरोति । एकवारं कण्डननिष्पवनविवेकीकरणैः फलीभूतान् करोति । नन्वत्र सकृदिति व्यर्थम् । विपर्यस्य पित्र्येषु सकृद्दक्षिणा चेति परिभाषयैव सकृत्करणप्राप्तेरिति चेत्, न । फलीकरोतीत्येतावन्मात्रे कथिते यावता फलीकरणं भवति तावतः कर्त्तव्यत्वे प्राप्ते एतत्सूत्रानुरोधेनैव परिभाषायाः सङ्कुचितत्वेन न परिभाषया नियमतः सकृत्करणं प्राप्नोतीत्यतः सकृत्करणनियमार्थं तदुपादानात् । सारतण्डुलमपूर्णꣳ श्रपयित्वाभिघार्योद्वास्य मेक्षणेन जुहोत्यग्नय इति सोमाय इति च । सारशब्दः सकलतण्डुलवाची, प्रसिद्धेः । एवं च सम्पूर्णं तण्डुलं श्रपयित्वेत्यर्थः । तच्च ईषत् श्रपणे कृते सम्पूर्णं तिष्ठति न बहुश्रपणे कृते । दृश्यते च वाक्यशेषेषु पित्र्यौदनस्येषत्स्विन्नता शृताशृतं पितॄणामिति । अपूर्णम् । यथा शृतेन चरुणा चरुस्थाल्याः पूरणं न भवति तथा कर्त्तव्यम् ।

श्रुतिरपि, पूर्णं वै देवानामर्द्धपूर्णं मनुष्याणामुपपर्द्धं पि-

तृणामिति।

श्रपयित्वा। उक्तरूपं चरुं श्रपणेन सम्पाद्य। अभिघार्य अभिघारणं कृत्वा। एतच्चाभिघारणमाज्येन भवति। तं श्रपयति तस्मिन्नधिश्रितआज्यं प्रत्यानयतीति श्रुतेः। उद्वास्य मेक्षणेन जुहोति। तं चरुम् अग्नेः सकाशादुत्तार्य मेक्षणेन जुहोति। उत्तारणं च दक्षिणतः। पित्र्यत्वात्। शृतमभिघार्य दक्षिणत उद्वासयतीति मानवसूत्राच्च। तत्र होमे मन्त्रः अग्नये कव्यवाहनाय स्वाहेति, सोमाय पितृमते स्वाहेति। अयं च दैवोऽपि होमः प्राचीनावीतिना दक्षिणाभिमुखेन च कार्यः। पित्र्यकर्माङ्गत्वात्। अङ्गानां प्रधानोपचारन्यायात्। महापितृयज्ञे प्रयाजाद्यर्थं यदाज्यग्रहणं तत्र स यज्ञोपवीती भूत्वाऽऽज्यानि गृह्णातीति यज्ञोपवीतित्वस्य पुनर्विधानाच्च। न चायं प्राप्तानुवादः। अनन्यपरत्वाद्वाक्यस्य। अग्नौकरणं प्रकृत्यैव—

कात्यायनश्च,

अपसव्येन वा कार्यो दक्षिणाभिमुखेन च। इति।

न चैवम्,

अग्नौकरणहोमश्च कर्त्तव्य उपवीतिना।

इति कात्यायनवाक्येनैव विरोधः। एतद्वाक्यस्य यच्छाखायां यज्ञोपवीतिना होम उक्तस्तच्छाखीयपरत्वात्। उक्तश्च तथा होमः-

शाङ्खायनसूत्रे, यज्ञोपवीती प्राङासीनो मेक्षणेन जुहोतीति।

आपस्तम्बसूत्रे च, अध्वर्युरुपवीती दक्षिणं जान्वाच्य मेक्षण उपस्तीर्य तेनावदायाभिघार्येति।

न चैवं शाङ्खायनादिसूत्रकृद्वाक्यतया सर्वेषामेव यज्ञोपवीतिनैव होमोऽस्त्विति वाच्यम्। अपसव्येन वा कार्य इति कात्यायनवाक्यस्य निर्विषयत्वापत्तेः। ऐच्छिकविकल्पस्वीकारे च गौ-

रवापत्तेः । तस्मात्प्राचीनावीतिना होमः कार्य इति ।

कश्चित्तु अनन्तयाज्ञिकमतानुयायितया यज्ञोपवीतिनैव होमः कर्त्तव्य इत्याह ।

प्रास्य तत् । तत् मेक्षणम् अग्नौ प्रक्षिप्य । अत्र केचित् सव्येन होमपक्षे मेक्षणप्रासनमपि सव्येन । अपसव्येन होमपक्षे त्वपसव्येनैव । होमाङ्गत्वात्तस्य । होमाङ्गत्वं च अग्नौ मेक्षणमभ्यादधाति तत्स्विष्टकृद्भाजनमिति श्रुतेरित्याहुः । तन्न । होमाङ्गत्वे प्रमाणाभावात् । प्रयाजाद्युपक्रमणादीनामिवात्रान्तरप्रकरणस्याभावात् । स्विष्टकृत्स्थानापन्नस्यापि तस्य प्रकरणेन प्रधानाङ्गत्वात् । अत्र पिण्डदानस्यैव प्रधानत्वात् । पित्रर्थचरुचालनार्थमुत्पन्नस्यापि तस्य प्रासनरूपप्रतिपत्तिविशेषविधानेन पित्रर्थत्वस्यापरित्यागात् । तस्मात्प्राचीनावीतिनैव तस्य प्रासनं भवतीति । दक्षिणेनोल्लिखत्यपहता इत्यपरेण वा । प्रस्तुतत्वाद्दक्षिणाग्नेः दक्षिणतः अदूरे तत्पश्चिमतो वा अदूरे अपहता असुरा रक्षांसि वेदिषद इति मन्त्रेण दक्षिणसंस्थां लेखां करोति । एतच्च रेखाकरणं स्फ्येन । तथाच—

आपस्तम्बः, सकृत्स्फ्येनोल्लिख्येति ।

आश्वलायनश्च, स्फ्येन लेखामुल्लिखेदपहता इतीति । उल्मुकं परस्तात्करोति येरूपाणीति । रेखायाः परस्ताद्दक्षिणप्रदेशे येरूपाणीति मन्त्रेण उल्मुकं दक्षिणाग्नेरेकदेशं निदधाति । उदपात्रेणावनेजयत्यपसव्यं सव्येन वोद्धरणसामर्थ्यात् । उदकपूर्णं पात्रम् उदपात्रं तेनोदपात्रेण । अवनेजयति अवनिक्तान् शुचीन् करोति । अपसव्यं सव्यादपेतम् अपसव्यम् । क्रियाविशेषणमेतत् । अपसव्यत्वे हेतुः सव्येन वोद्धरणसामर्थ्यादिति । वाशब्द एवार्थे । उद्धरणं च मनुष्येभ्यो दानम् तत्रैव सव्येन ।

सामर्थ्यात् । पितृभ्यस्तु सव्येन दातुं न शक्यते । तथा च अपसव्येनैव पितृभ्यो देयमिति भावः । अत्र कनिष्ठिकामूलेन यद्दानादि तत्सव्येन । तद्विरुद्धं तर्जन्यङ्गुष्ठयोरन्तरालप्रदेशेन यद्दानादि तदपसव्येन । तथाचाभिनयेन तर्जन्यङ्गुष्ठयोरन्तरालप्रदेशेन पितृभ्यो दानमाह—

श्रुतिः, स वा इति ददातीतीव वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैवं पितॄणां तस्मादिति ददातीति ।

तत्रावनेजने मन्त्रः असाववनेनिक्ष्वेति । असावित्यत्र अवनेज्यनामग्रहणम् । तच्च अवनेनिक्ष्वेतिनिर्देशात् सम्बुद्ध्यन्तं ग्राह्यम् । अवनेज्यानाह यजमानस्य पितृप्रभृति त्रीनिति । यजमानस्य पितृपितामहप्रपितामहान् अवनेजयति । उपमूलं सकृदाच्छिन्नानि लेखायां कृत्वा यथावनिक्तं पिण्डान् ददात्यसावेतत्त इति । मूलसमीपे एकेनैव प्रयत्नेन छिन्नानि दर्भतृणानि रेखायामास्तीर्य अवनेजनक्रमेण पितृपितामहप्रपितामहानां पिण्डान् ददाति असावेतत्त इति मन्त्रेण । एतच्च आस्तरणं दक्षिणाग्रैः कुशैः दक्षिणासंस्थं च कर्त्तव्यम् । तानि दक्षिणोपस्तृणानि तत्र ददातीतिश्रुतेः । असावित्यस्य स्थाने च पितॄणां संबुद्ध्यन्तनामादेशः । साकाङ्क्षत्वादेतत्त इत्युत्तरम् अन्नमित्यध्याहार्यम् । वाक्यान्तरात्स्वधेति च ।

द्विपितृकस्य आपस्तम्बसूत्रे विशेषः । यदि द्विपितृकः स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेदिति ।

ये च त्वामन्विति चैके । एके ये च त्वामनु इति पिण्डदानमन्त्रस्य शेषं कुर्वन्ति । स ददात्यसावेतत्त इत्येवं यजमानस्य पित्रे ये च त्वामन्वित्युहैक आहुरिति श्रुतेः । एतस्मिन् पक्षे च पितुर्नाम उच्चार्य एतत्तेऽन्नं ये च त्वामनु तस्मै स्वधेत्येव प्रयोगः ।

तथा च मानवसूत्रम्, पिण्डान्निदधाति पितुर्नाम्नाऽसावेतत्ते ये च त्वामनु तस्मै स्वधेति प्रथमं, पितामहस्य नाम्नः स्थवीयांसं मध्यमं, प्रपितामहस्य नाम्ना स्थविष्ठं दक्षिणमिति।

पित्रादीनां नामाज्ञाने विशेष उक्तो मानवसूत्र एव। यदि बन्धुनाम न विद्यात्स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं दद्यात्, स्वधापितृभ्योऽन्तरिक्षसद्भ्य इति द्वितीयं, स्वधा पितृभ्यो दिविषद्भ्य इति तृतीयमिति।

शौनकस्मृतौ च, नामान्यजानन् पितः पितामह प्रपितामहेति।

पितृभ्यश्च ततो दद्यादन्नमामन्त्रणेन तु।
अमुकामुकगोत्रैतत्तुभ्यमन्नं स्वधा नमः॥

इति ब्रह्मपुराणे श्राद्धमात्रमुपक्रम्य गोत्रोच्चारणस्योक्तत्वात् पिण्डपितृयज्ञस्यापि श्राद्धत्वेन बहुशो व्यवहारात् अत्रापि गोत्रोच्चारपूर्वकं दानं भवतीति। गोत्राज्ञाने तु विशेषमाह—

व्याघ्रपात्, गोत्राज्ञाने तु काश्यप इति।

एवं चावनेजनादावपि गोत्राद्यज्ञाने काश्यपगोत्र पितः पृथिवीषत् अवनेनिक्ष्वेतिरीत्याऽवनेजनादिकं बोध्यम्।

अत्र पितर इत्युक्त्वोदङ्ङास्त आतमनात्। अत्र पितर इतीमं मन्त्रं पिण्डसंमुख एवोक्त्वाऽप्रदक्षिणं पर्यावृत्त्य उदङ्मुखो भूत्वा श्वासधारणं कृत्वा उपविशेत्। आतमनात्। तमु ग्लानौ इत्यनुशासनात् तमनं ग्लानिः। उदङ्मुखावस्थानमात्रेण ग्लानिर्न सम्भवतीति श्वासावरोधोऽपि सूत्रकारस्याभिप्रेत इत्युन्नीयते। सूत्रान्तरे च श्वासावरोधः स्पष्टतयैवोक्तः। तथाच—

आश्वलायनसूत्रम्, यथाशक्त्यप्राणन्नासित्वेति।

अप्राणन् प्राणनिरोधं कृत्वेत्यर्थः। तदाह—

विष्णुः, यथाशक्ति प्राणनिरोधं कृत्वाऽऽसीतेति।

स वा आतमितोरासीतेति। स वा आतमितोरासीतेत्या-हुरेतावान् ह्यसुरिति स वै मुहूर्त्तमेवासित्वेतिश्रुतिबलादप्यय-मर्थोऽवसीयते। अत्र पितर इति मन्त्रवचनं च जपधर्मेण। तत्र जपत्यत्रपितरो मादयध्वमिति श्रुतेः। जपधर्मश्च स्वरः। एक-श्रुतिदूरात्सम्बुद्धौ यज्ञकर्मणि सुब्रह्मण्यासामजपन्यूङ्खयाजमानव-र्जमिति सूत्रेण सुब्रह्मण्यासामजपाद्यतिरिक्तेष्वेवैकश्रुत्यविधाना-देतेषु स्वरो भवतीत्यवगमात्। स्वरश्चात्र संहितास्वरः। आवृ-त्याऽमीमदन्तेति जपति।प्रदक्षिणं प्रत्यावृत्य पिण्डसंमुखो भूत्वा अमीमदन्तेति मन्त्रं स्वरेण पठति। अवनेज्य पूर्ववन्नीविं विस्रस्य नमोव इत्यञ्जलिं करोति। पूर्ववदिति यजमानपितृपितामहप्र-पितामहेभ्यस्तैरेव मन्त्रैः तत्तत्स्थानेषु च उदपात्रेण अवनेजनं करोति। नन्वेवं पूर्वं भूमाववनेजनस्य कृतत्वादिदमप्यवनेजनं भूमावेव कार्यमिति चेत्, सत्यम्। पूर्ववदित्यनेन स्थानातिदेशो-ऽपि प्राप्यते। तत्तत्स्थानेषु च पिण्डानां निहितत्वात्साक्षात्तत्र कर्त्तुमशक्यत्वेन पिण्डोपरि क्रियमाणं तत्र कृतं भवतीति पिण्डो-पर्येव क्रियते।नन्वेवं भूम्यधिकरणं वाधिष्यते इति चेत्, बाध्यताम् तत्प्रदेशविशेषप्रापकेण।न चैवं प्रापकस्य समानत्वात्तत्प्रदेशविशेष-स्यैव कथं न वाध इति वाच्यम्। पिण्डोपरिक्रियमाणं तत्प्रदेशविशेषे परम्परया भूमौ च कृतं भवतीति तदुभयानुग्रहाय पिण्डोपर्येव तस्य कर्त्तुं युक्तत्वात्। नीविं विस्रस्य। परिहितवस्त्रग्रन्थिविशेषं विस्रंस्य। परिहितवस्त्रमध्येऽवगूहितं वस्त्रप्रान्तं विस्रंस्येति तु श्रीदत्तः। विस्रंसनोपदेशाच्च प्रारम्भे नीविमत्परिधा-नम्। नमो व इत्यञ्जलिं करोति। नमो वः पितरोरसायेत्यादि-भिर्मन्त्रैः षड् अञ्जलीन् करोति। अथ नीविमुद्गृह्य नमस्करो-

ति पितृदेवत्या वै नीविस्तस्मान्नीविमुद्वृह्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट्कृत्वो नमस्करोति षड्वा ऋतव ऋतवः पितरस्तस्मात्षट्कृत्वो नमस्करोतीति श्रुतेः। सूत्रकारेणानुपसंहारान्नेति चेत्, न। महापितृयज्ञे सूत्रकृतोपसंहृतत्वात्। षड्वा नमस्कारानिति श्रुतेश्चोभयत्रापि तुल्यत्वात्। प्रतिनमस्कारमञ्जलिकरणं भवतीति तु श्रीदत्तः। गृहान्न इत्यस्यापि पठनम्। गृहान्नः पितरो दत्तेति गृहाणाᳪ ह पितर ईशत एषो एतस्याशीः कर्मण इति श्रुतेः। एतद्व इत्यपास्यति सूत्राणि प्रतिपिण्डम्। एतद्वः पितरो वास इति मन्त्रेण तन्तून् प्रतिपिण्डं प्रक्षिपति। बहुवचनोपदेशात् त्रीन्। ऊर्णादशा वा। अपास्यतीत्यनुवर्तते। वेत्युक्तत्वाद्विकल्पः। वयस्युत्तरे यजमानलोमानि वा। शतायुःपुरुषः। तत्र पञ्चाशद्वर्षादुत्तरम् उत्तरं वयः। तस्मिन् यजमानलोमानि वा अपास्यति। तानि च लोमानि हृदयादिप्रदेशोद्भवानि ग्राह्याणि। प्रदेशान्तरोद्भवानामशुद्धत्वात्। ऊर्जमित्यपो निषिञ्चति। ऊर्जमित्यनेन मन्त्रेणापः निषिञ्चति तर्पयत मे पितॄनिति मन्त्रलिङ्गात्। पिण्डानां पित्रधिष्ठानत्वाच्च पिण्डेषु निषिञ्चति। पिण्डमूलेष्विति तु केचित्। अवघाय जिघ्रति यजमानः। अवधानं त्वध्वर्युः करोति, अवघ्राणं तु यजमानः। अध्वर्युः कर्मसु वेदयोगादिति परिभाषासूत्रेण सामान्यतः कर्ममात्र एवाध्वर्योः कर्तृत्वबोधनात्। न चात्रावधायावजिघ्रतीति अवधानावघ्राणयोः समानकर्तृकताबोधकल्यप्प्रत्ययदर्शनात् कथमेवमिति वाच्यम्। ल्यप्प्रत्ययस्यात्र तदुत्तरकालतामात्रबोधकत्वात्। निरुप्याज्यं प्रातर्दोहनमन्यस्मिन्नित्यादावपि तथादर्शनात्। अवघ्राणं च यजमानसंस्कारः। अथावजिघ्रति प्रत्यवधाय पिण्डान् स यजमानभाग इति श्रुतेः। ततश्च प्रस्थिते यजमा-

ने लुप्यते। एतच्च प्रत्यवधानमुखायां भवति प्रत्यवधायेत्युक्तत्वादिति सम्प्रदायः। उल्मुकसकृदाच्छिन्नान्यग्नौ। आदधातीति शेषः। अत्र प्रथमतः सकृदाच्छिन्नानि अग्नौ आदधाति। तदुत्तरमुल्मुकम्। अग्नौ सकृदाच्छिन्नान्यभ्यादधाति पुनरुल्मुकमपि सृजतीति श्रुतेः इति।

अत्र स्मार्त्ते अध्वर्य्वादेरभावाद्यजमानः स्वयमेव सर्वं करोति। न चानाहिताग्नेरप्येष इति सूत्रेणानाहिताग्निकर्त्तव्यत्वेन साङ्गपिण्डपितृयज्ञस्योक्तत्वादनाहिताग्निकर्त्तव्यपिण्डपितृयज्ञेऽध्वर्युणा भवितव्यमिति वाच्यम्। स्मार्त्तपाकयज्ञेषु ब्रह्मव्यतिरिक्तऋत्विजां ब्रह्मैवैकर्त्विक् पाकयज्ञेषु स्वयं होता भवतीति गोभिलेन निराकरणात्।

अत्रैव पिण्डपितृयज्ञे गुणकाममाह—

कात्यायनः, आधत्तेति मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा। अस्यार्थः। आधत्त पितरो गर्भमिति मन्त्रेण मध्यमपिण्डं यजमानपत्नी पुत्रकामा प्राश्नाति, प्रसवसमर्थेति सूत्रशेष इति भाष्यकाराः। अयं पिण्डपितृयज्ञः यस्य पिता पितामहः प्रपितामहश्च मृतः तस्य भवति नान्यस्य। तदाह—

कात्यायनः, प्रेतेभ्यो ददातीति।

तथा, जीवपितृकस्य होमान्तमनारम्भो वा न व्यवेते जातूकर्ण्यो न जीवन्तमति ददातीति। अस्यार्थः। प्रेतेभ्यः मृतेभ्यः पितृपितामहप्रपितामहेभ्यः ददाति। कुत एतदिति चेत्, स वापराह्णे ददातीत्यादिना अपराह्णस्य पितृणामशनकालत्वमुक्त्वा पिण्डदानस्योक्तत्वात्। न हि अपराह्णः जीवतां पितृणामशनकालः। जीवपितृकस्य जीवत्पितृकस्य। होमान्तं भवति। अग्नये कव्यवाहनाय स्वाहे-

त्यादिर्होमः तदन्तं भवति । एतच्च अनुपपन्नम् । होमस्य पिण्डदानाङ्गत्वात् । पिण्डदानाभावे च होमकरणस्याकरणसमशीलत्वात् । इत्यतः पक्षान्तरमाह अनारम्भो वेति । जीवत्पितृकस्य पिण्डपितृयज्ञानारम्भः यष्टव्यपित्राद्यभावात् । अथैवं यस्य पिता जीवति पितामहादिश्च मृतः तस्य पिण्डदानं विहाय सम्पूर्णः पिण्डपितृयज्ञः स्यादिति । तत्राह—न व्यवेत जातूकर्ण्यो न जीवन्तमति ददातीतिश्रुतेरिति । जातूकर्ण्यः व्यवायं नेच्छति। कुतः न जीवन्तमतिददातीति श्रुतेरिति । अतिददाति अतिक्रम्य ददाति । अत एव जीवपितृकोऽपि जीवान्ताहिंतोऽपीतिसूत्रोक्तपूर्वपक्षोऽप्यपास्तः । मानवादिसूत्रे विशेषः ।

जीवत्पितुः पिण्डनिधानं जीवत्पितामहस्य वा । न जीवन्तमतिदद्याद्यदि दद्याद्येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति ।

अथ पिण्डपितृयज्ञप्रयोगः ।

तत्र नित्यानि विधाय त्रिधाविभक्तादिनतृतीयांशरूपे द्विधाविभक्तादिनद्वितीयांशरूपे वाऽपराह्णे पिण्डपितृयज्ञकर्माहं करिष्ये इति सङ्कल्प्य प्राचीनावीती भूत्वा नीविं कुर्यात् । नीविकरणं च कुशतिलसंयुक्तानां वस्त्रदशानां सव्यभागे परिहितवस्त्रेण संवेष्ट्यावगूहनमिति देवयाज्ञिकः । ततो ग्रन्थकारलिखनात् देवताभिध्यानम् । तद्यथा, पिण्डपितृयज्ञेनाहं यक्ष्ये, तत्र अग्निं कव्यवाहनं सोमं पितृमन्तम् अमुकगोत्रान् पितृपितामहप्रपितामहान् अमुकामुकशर्मणः व्रीहिभिरहं यक्ष्ये इति चिन्तयेत् । ततः शालाग्नेर्दक्षिणाग्रैर्दर्भैर्दक्षिणसंस्थमपसव्यं परिस्तरणम् । ततः पात्रासादनम् । अग्नेः पश्चात् उत्तरतो वा दक्षिणासंस्थम् । तद्यथा, स्रुक् उलूखलं मुसलम् शूर्पम् चरुः उदकम् आज्यम् मेक्षणम् वस्त्रः सकृदाच्छिन्नानि व्रीहयः सूत्राणि दशा यजमानलो-

म्नामन्यतममिति । यजमानलोम्नामासादनं च तस्योत्तरे वयसि नान्यदा । स्थाल्यां ग्रहणपक्षे स्रुक्सादनाभावः । स्रुक्सादनोत्तरं कृष्णाजिनस्यासादनमिति केचित् । ततः अग्निमपरेण स्रुचि चरुस्थाल्यां वा अपूर्णता यथा भवति तथा आसादितान् व्रीहीन् तूष्णीं गृह्णीयात् । ततः उत्थाय अग्नेरुत्तरत आगत्य तत्र उदग्ग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य तदुपरि उलूखलं निधाय तत्र व्रीहीनोप्य मुसलमादायावधाय दक्षिणाभिमुखस्तिष्ठन्नवहन्ति यावद् व्रीहीणां वितुषीभावो भवति । अत्र कृष्णाजिनास्तरणं न भवतीति तु बहवः । तत उलूखलाद् व्रीहीन् शूर्पे कृत्वा निष्पूय तुषान् पृथक् कृत्वा पुनरुलूखले प्रक्षिप्य फलीकृत्य उलूखलान्निष्काश्य शूर्पे कृत्वा कणान् पृथक् कुर्यात् । ततः सकृत् प्रक्षाल्य तण्डुलान् सोदकचरुपात्रे प्रक्षिप्य अग्नावधिश्रित्य मेक्षणेनाप्रदक्षिणं चालयन्नपित् शृतं चरुं श्रपयेत् । तत आसादिताज्येन चरुमभिघार्य अग्नेर्दक्षिणत उद्वास्य अप्रदक्षिणं पूर्वेणाग्निमुत्तरत आनीय स्थापयेत । ततः सव्यं जान्वाच्य मेक्षणेन चरुमादाय, अग्नय इत्यस्य प्रजापतिर्ऋषिः अग्निः कव्यवाहनो देवता यजुर्होमे विनियोग इति स्मृत्वा, अग्नये कव्यवाहनाय स्वाहेति जुहोति । इदमग्नये कव्यवाहनाय न मम इति त्यागः । पुनरपि मेक्षणेनैव चरुमादाय, सोमायेत्यस्य प्रजापतिर्ऋषिः सोमः पितृमान् देवता होमे विनियोग इति स्मृत्वा, सोमाय पितृमते स्वाहेति जुहोति । इदं सोमाय पितृमते न मम इति त्यागः । मेक्षणमग्नौ प्रक्षिप्य ततः अपहता इत्यस्य प्रजापतिर्ऋषिः अनुष्टुपछन्दः असुरा रक्षांसि च देवताः रेखाकरणे विनियोग इति स्मृत्वा, अपहता असुरा रक्षाꣳसि वेदिषद इति मन्त्रेण अग्नेर्दक्षिणतः पश्चिमतो वा दक्षिणाग्रामेकां रेखां करोति । तत उदकं स्पृष्ट्वा, ये रूपा-

णीत्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः असुरा देवता उल्मुकनिधाने विनियोग इति स्मृत्वा, ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टाल्लोकात्प्रणुदात्यस्मात् इति मन्त्रेण उल्मुकं रेखाग्रे निदधाति। तत उदकोपस्पर्शनम्। ततो रेखायाम् अमुकगोत्र अस्मत्पितः अमुकशर्मन् अवनेनिक्ष्वेति रेखामूलप्रदेशे पितरमवनेज्य अमुकगोत्र अस्मत्पितामह अमुकशर्मन् अवनेनिक्ष्व इति रेखाया मध्यप्रदेशे पितामहमवनेज्य, अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् अवनेनिक्ष्व इति मन्त्रेण रेखाग्रप्रदेशे प्रपितामहवनेजयेत्। इति सम्प्रदायः। स्वसूत्रे सूत्रान्तरे च पिण्डपितृयज्ञसम्बद्धावनेजनादौ गोत्राद्युच्चारणस्यानुक्तत्वात् गोत्राद्युच्चारणमन्तरेणैव अमुकशर्मन् पितरवनेनिक्ष्वेतिरीत्यैवावनेजनपिण्डदानादिकं भवतीत्यन्ये। ततः सकृदाच्छिन्नानि दर्भतृणानि लेखायां दक्षिणाग्राण्यास्तीर्य अमुकगोत्रास्मत्पितः अमुकशर्मन् एतत्तेऽन्नं स्वधा इति मन्त्रेण प्रथमावनेजनस्थाने पितृपिण्डं दद्यात्। ततः अमुकगोत्र अस्मत्पितामह अमुकशर्मन् एतत्तेऽन्नं स्वधा इति द्वितीयावनेजनस्थाने पितामहपिण्डं दत्त्वा, अमुकगोत्रास्मत्प्रपितामह अमुकशर्मन् एतत्तेऽन्नं स्वधा इति तृतीयावनेजनस्थाने प्रपितामहपिण्डं दद्यात्। अथ वा अमुकगोत्र अस्मत्पितः अमुकशर्मन् एतत्तेऽन्नं ये च त्वामनु तस्मै स्वधेतिरीत्या पिण्डान् दद्यात्। पिण्डान् तदेवमन्यतरप्रकारेण दत्त्वा पिण्डाभिमुखः अत्र पितर इत्यस्य प्रजापतिर्ऋषिः यजुः पितरो देवता जपे विनियोग इति स्मृत्वा, अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् इति स्वरेण पठेत्। ततो अप्रदक्षिणमुदङ्पर्यावृत्य श्वासमवरुद्ध्य आतमनादास्ते। पुनः प्रदक्षिणं पर्यावृत्य पिण्डाभिमुखो भूत्वा

अमीमदन्तेत्यस्य प्रजापतिर्ऋषिः पितरो देवता यजुर्ज्जपे विनियोगः इति स्मृत्वा, अमीमदन्त पितरो यथाभागमावृषायिषत इति स्वरेण पठेत् । ततः पिण्डानामुपरि पिण्डमूलेषु वा पूर्ववदवनेज्य नीविं विस्रंस्य नमो व इत्यादीनां यजुषाम् प्रजापतिर्ऋषिः पितरः लिङ्गोक्ता देवताः अञ्जलिकरणे विनियोग इति स्मृत्वा, नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोरायेति पञ्चभिर्म्मन्त्रैः पञ्चाञ्जलीन् कृत्वा, नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो व इत्येतावता मन्त्रेण षष्ठमञ्जलिं कुर्यात् । नमो वः पितरो मन्यव इत्येतावतैव मन्त्रेण षष्ठमञ्जलिकरणमिति वहवः । ततो गृहान्न इत्यस्य प्रजापतिर्ऋषिः गृहा देवता यजुःपदेन विनियोग इति स्मृत्वा, गृहान्नः पितरो दत्त इति पठेत् । तत एतद्व इत्यस्य प्रजापतिर्ऋषिः पितरो देवता यजुः सूत्रदाने विनियोग इति स्मृत्वा, एतद्वः पितरो वास इति मन्त्रेण त्रीणि त्रीणि सूत्राणि ऊर्णाया दशा वा उत्तरे वयसि यजमानलोमानि वा प्रतिपिण्डं दद्यात् । ततः ऊर्ज्जं वहन्तीत्यस्य प्रजापतिर्ऋषिः विराट्छन्दः आपो देवता निषेके विनियोगः इति स्मृत्वा, ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधास्थ तर्पयत मे पितॄन् इति मन्त्रेण अवनेजनावशिष्टोदकं पिण्डानामुपरि निषिञ्चेत् । ततः पिण्डानुत्थाप्य स्थाल्यां प्रत्यवदधाति । ततो यजमानस्तान् पिण्डानवजिघ्रति । ततः सकृदाच्छिन्नान्यग्नौ प्रक्षिप्य उल्मुकं प्रतिप्रास्यति । तत उदकोपस्पर्शनम् । पुत्रकामा गर्भग्रहणयोग्या पत्नी आधत्त इत्यस्य प्रजापतिर्ऋषिः पितरो देवता गायत्री छन्दः पुत्रकामनया मध्यमपिण्डप्राशने विनियोग इति स्मृत्वा, आधत्त पितरो गर्भं कुमारं पु-

ष्करस्रजम् । यथेह पुरुषोसत् । इति मन्त्रेण मध्यमपिण्डं प्राश्नाति । अस्मिन् पक्षे मध्यमपिण्डस्यानवघ्राणम् ।

इति पिण्डपितृयज्ञविधिः ।

अथ नवप्राशनम् ।

तत्र पारस्करः,

अनाहिताग्नेर्नवप्राशनम्।नवः स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति।शतायुधाय शतवीर्याय शतोतये। अभिमातिषाहे।शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा।ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवीवियन्ति । तेषां योऽज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहेति । स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्ने अभितत् पृणीहि विश्वांश्च देवः पृतना अविष्यत् । सुगन्तु पन्थां प्रदिशन्न एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः स्वाहेति।अथ प्राश्नाति।अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः। शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावशेन समशीमहि त्वा । स नो मयोऽभूः पितो आविशस्व शन्तोकाय तनुवे स्योन इति । अन्नपनीयया वा। अथ यवानामेतमुत्यं मधुना संयुतम्।यवं० सरस्वत्या अधिवनाय चक्रुषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति । ततो ब्राह्मणभोजनम् । इति ।

अस्यार्थः । आनहिताग्नेर्नवप्राशनम् । अनाहिताग्निरवैतानिकाग्निः आवसथिक इतियावत् । यद्यपि निरग्निरप्यनाहिताग्निरिति वक्तुं शक्यते तथापि गृह्यस्थालीपाकानां कर्मेति गृह्याग्निसाध्यानामेव कर्मणां प्रतिज्ञातत्वात् गृह्याग्निरेवानाहिताग्निरत्रोच्यते । नवप्राशनस्य संस्थासु गणनाच्च । पाकसंस्थास्तु निः-

सन्दिग्धं गृह्याग्निमत एवेति सर्वसम्मतम्। अत एव गोभिलेन अथातः श्रवणाकर्म्मेति श्रवणाकर्मोक्त्वा आश्वयुज्यां पौर्णमास्यां पृषातके पायसश्चरुरिति च उक्त्वा नवयज्ञे पायसश्चरुरिति अधिकारिकथनं विनैव श्रवणाकर्म्मादिवन्नवप्राशनमप्युक्तम्। तेन यः श्रवणाकर्म्मादावधिक्रियते स एवात्राधिक्रियत इति ज्ञाप्यते। पारस्करस्तु अनाहिताग्नेर्नवप्राशनमित्यधिकारिणं ब्रुवन् आहिताग्नेरिदं न भवतीति ज्ञापयति। न त्वनाहिताग्नेर्निरग्नेरिदं भवतीति। सुदर्शनभाष्यमपि अनाहिताग्नेराग्रयणमित्यापस्तम्बसूत्रव्याख्याने अनाहिताग्निग्रहणम् अर्द्धाधानिनोऽप्याहिताग्नेर्नेदं स्मार्त्तमाग्रयणं श्रौतेन सग्रहेतव्यमित्येवमर्थमित्याह। किञ्च अनाहिताग्नेर्नवप्राशनमिति अगृह्याग्निसम्बन्धं नवप्राशनस्य ब्रुवत् नेदं सूत्रं चतुरस्रमर्थमावहति अप्रस्तुतकथनादिति। नवप्राशनमित्यर्थानुगतया संज्ञया एतत्कर्म्म कृत्वैव नवं प्राशितव्यं नाकृत्वेति।

तथाच छन्दोगपरिशिष्टे कात्यायनः,

अनिष्ट्वा नवयज्ञेन नवान्नं योऽत्त्यकामतः।
वैश्वानरचरुस्तस्य प्रायश्चित्तं विधीयते॥ इति।

अत एवाशनस्य नित्यत्वादिदमपि नित्यम्। तद्विशेषस्तु श्रवणाकर्मप्रकरणादवगन्तव्यः। एतस्य चाग्रयणशब्दवाच्यत्वाभावात् पौर्णमास्यमावास्ययोर्नियमो न भवति। औचित्याच्छरद्वसन्तौ तु भवत इति कर्कः। छन्दोगपरिशिष्टकात्यायनस्तु कालान्तरमप्याह—

शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः॥ इति।

नवं स्थालीपाकः श्रपयित्वेति वदतः पारस्करस्याप्ययमे-

राशयो यदैव नव उपलभ्यते तदैवैतद्भवतीति । तथाचोक्तम्—

शाङ्खायनब्राह्मणे, अथ व्रीहिसस्ये यवसस्ये वा आगते ।
तथा, वर्षास्वागते श्यामाकसस्ये पक्केषु वेणुयवेष्विति ।
वैतानसूत्रे च, पक्कास्वौषधीष्वाग्रयणमिति ।

अनाहिताग्नेराग्रयणं नवानां स्थालीपाकं श्रपयित्वेत्याद्यापस्तम्बादिसूत्रेष्वेतस्याग्रयणशब्दवाच्यतादर्शनात्पौर्णमास्यमावस्ययोर्नियमो भवत्येवेत्यन्ये । अत्र देवयाज्ञिकरेणुदीक्षितादिधृतकारिका नानार्थोपसंग्राहिकाः ।

पौष्णद्वये चादितिभद्वये च ब्रह्मद्वये चैव करद्वये च ।
त्रिरुत्तरे विष्णुयुगे सजीवे सिते च रिक्तातिथिवर्जिते च ॥
यवैर्वसन्ते यष्टव्यं व्रीहिभिः शरदीष्यते ।
श्यामाकैश्च शरद्येव ग्रीष्मकाले च वेणुजैः ॥
कृताकृतं वेणुयवैर्वदन्त्याग्रयणं बुधाः ।
समानतन्त्रे वा व्रीहिश्यामाकाग्रयणे उभे ॥
कात्यायनमतेनैके श्यामाकेष्ट्यां न कुर्वते ।
शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥
नानिष्ट्वा नवसस्येन पशुना वाऽग्निमान् द्विजः ।
नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः ॥
नवेनानर्चितो येन पशुहव्येन वाऽनलः ।
प्राणानेवात्तुमिच्छेत्स तस्मादाग्रयणं चरेत् ॥
श्यामाकान् वैणवान् व्रीहियवानाग्रयणात्पुरा ।
न भुञ्जीतेति विस्पष्टं यज्ञपार्श्वे निरूपितम् ॥
दत्त्वैव ब्राह्मणेभ्यश्च कृत्वा वा वैश्वदेविकम् ।
अन्यन्नवान्नमश्नीयादिति बौधायनश्रुतिः ॥

अनिष्ट्वा वैणवाम्नाग्यात् दुर्भिक्षादौ तथाऽऽपदि ।
श्यामाकवैणवेषु स्यात् देवता सोम एव तु ॥
नवाशननिषेधोऽयं दम्पत्योरुभयोः समः ।
नवस्यावध्यपेक्षत्वादस्मिन्नवधिरुच्यते ॥
कियद्दूरं पुराणत्वं नवत्वं कियदन्तिकम् ।
सस्यानामवधिर्ज्येष्ठी पौर्णमासी प्रसिद्धितः ॥
तादृश्योरुभयोः पौर्णमास्योर्मध्ये यदुद्भवम् ।
धान्यं तन्नवमित्याहुः तत्कालाग्रयणं प्रति ॥
तदेव च पुराणं स्यादूर्ध्वमाग्रयणेषु च ।
यद्वाऽऽग्रयणशास्त्रे तन्नवत्वावध्यपेक्षणे ॥
ये कालास्तेषु बुद्धिस्थास्तेऽन्योन्यावधयः स्मृताः ।
प्रावृट्कालात्परं पक्वं शरदाग्रयणे नवम् ॥
ऊर्ध्वं वसन्तान्निष्पन्नं प्रावृडाग्रयणे नवम् ।
प्रत्यासन्नतरत्वाद्वा स्वयमेवावधिर्भवेत् ॥
यस्मिन्नाग्रयणं कुर्यादृतौ तदनुसम्भवम् ।
धान्यं तन्नवमित्याहुरर्वाक्पक्वं पुरातनम् ॥
एवं सति शरत्कालमात्राग्रयणकारिणः ।
शरत्पक्वं नवं ज्ञेयमर्वाक्पक्वं पुरातनम् ॥
स्मार्त्तमाग्रयणं कृत्वा तत्रैवर्त्तौ कदाचन ।
यत्राद्धीत तत्रर्त्तौ श्रौतस्याग्रयणस्य तु ॥
कालेऽपि वर्त्तमानेऽपि न श्रौताग्रयणं पुनः ।
स्मार्त्तनाग्रयणेनैव सिद्धं यस्मान्नवाशनम् ॥
सर्वथा व्रीहिलाभे तु शाल्युपादानमिष्यते ।
यवानामप्यलाभे तु गोधूमानां परिग्रहः ॥
पुराणा वा प्रदीयन्ते ग्रन्थे श्रुतिरुदाहृता ।

अन्ये तु एकपादिकाख्ये द्वितीयकाण्डे देवाश्च वा असुराश्चोभये प्राजापत्याः पस्पृधिरे ततोऽसुराः। उभयीरोषधी-र्याश्च मनुष्या उपजीवन्ति याश्च पशव इत्यादिवाक्यशेषात् त-दोत्पन्नलतागुल्माद्यपि न भक्षणीयमित्याहुः।

गृह्यसङ्ग्रहकारस्तु,

नवयज्ञाधिकारस्थाः श्यामाका व्रीहयो यवाः।
नाश्नीयात्तानहुत्वैवमन्येष्वनियमः स्मृतः॥
ऐक्षवं सर्वशुक्तांश्च नीवारांश्चणकांस्तिलान्।
अकृताऽऽग्रयणोऽश्नीयात्तेषां नोक्ता हविर्गुणाः॥ इति प्राह।

नवं स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्या-हुती जुहोति। नवग्रहणाद् व्रीहिकाले व्रीहीणां यवकाले यवानाम्। स्थालीपाकं चरुं पक्त्वा इत्यादि स्पष्टम्। स्थालीपाकस्याग्रय-णदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्ने इति। आ-ग्रयणदेवताः श्रौतोक्ताः इन्द्राग्नी विश्वे देवा द्यावापृथिव्या-विति। ताभ्यः चरुणा प्रत्येकमेकैकामाहुतिं हुत्वा स्विष्टमग्न इति स्विष्टकृतः पूर्वं पश्चाच्चाज्याहुतीर्जुहोति। तयोर्मध्ये चरु-णा सौविष्टकृतम्। ततो महाव्याहृत्यादिप्राजापत्यान्तम्। केचित् स्विष्टकृते चेति चशब्दमानन्तर्ये वर्णयित्वा स्विष्टमग्न इति स्विष्टकृद्धोमं मन्यन्ते। स्विष्टकृल्लिङ्गादिति भर्तृयज्ञः। अथ प्रा-श्नात्यग्निः प्रथमः प्राश्नात्विति। यत् हुतशेषप्राशनं तत्रायं गु-णविधिः। यत्प्राश्नाति तदनेन मन्त्रेणेत्यर्थः। पक्षान्तरमाह अन्नपतिशब्दवत्या वा। अन्नपतीयया वेति वाशब्दं केचित् स्वप-दविभाषां मन्यन्ते। मन्त्रत्वज्ञापकस्य इति शब्दस्यानुच्चारणात्। ततश्च अग्निः प्रथम इत्यनेन प्राश्नात्येव। अन्नपतेऽन्नस्य नो देहीत्ययं मन्त्रस्तस्मिन्नेव प्राशने पठनीयो वा न वेतिविकल्प

इति भर्तृयज्ञः । अथ यत्रानामेतमुत्यामिति । वसन्ते यत्रानां प्राशने एतमुत्यमिति मन्त्रः । ततो ब्राह्मणभोजनमित्युक्तार्थम् ।

अथ प्रयोगः ।

तत्र शरदि वसन्ते च पूर्वोक्तनक्षत्रादियुक्तकाले पौर्णमास्याममावास्यायां वा नवप्राशनं कर्म्म भवति । तत्र देशकालादिकीर्त्तनान्ते नवप्राशनकर्म्माहं करिष्ये इति सङ्कल्पः । तत आधानप्रकरणलिखित–आधानहोमयोश्चैवेतिवाक्येन प्रथमप्रयोगे एव मातृपूजापूर्वकं श्राद्धं कृत्वा देवताभिध्यानं कुर्य्यात् । तत्र प्रजापतिमिन्द्रमग्निं सोमम् इन्द्रं सर्वान् देवान् आज्येन, इन्द्राग्नी विश्वान् देवान् द्यावापृथिव्यौ चरुणा, अग्निं घृतेन, अग्निं स्विष्टकृतं चरुशेषेण, अग्निमाज्येन, भूरादीनां पूर्ववत् । अभिध्याय आवसथ्येऽग्नौ ब्रह्मोपवेशनाद्याज्यभागहोमान्तमाधानवत् । तत आज्याहुतिद्वयं जुहुयात् । शतायुधायेति परमेष्ठी ऋषिः इन्द्रो देवता त्रिष्टुप्छन्दः होमे विनियोगः । शतायुधाय शतवीर्य्याय शतोतयेऽभिमातिषाहे । शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा इति प्रथमाम् । इदमिन्द्राय न मम । ये चत्वार इति परमेष्ठी ऋषिः सर्वदेवतास्त्रिष्टुप्छन्दः होमे विनियोगः । ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां योऽज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहा इति द्वितीयाम् । इदं सर्वेभ्यो देवेभ्यो न मम । ततः स्थालीपाकमभिघार्य तेनाग्रयणदेवताभ्यो होमं कुर्यात् । इन्द्राग्निभ्यां स्वाहा इदमिन्द्राग्निभ्यां न मम । विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यो न मम । द्यावापृथिवीभ्या९ँ स्वाहा इदं द्यावापृथिवीभ्यां न मम । तत आज्येन स्विष्टमग्न इति प्रजापतिर्ऋषिः अग्निर्देवता त्रिष्टुप्छन्दः होमे विनियोगः । स्विष्टमग्ने

अभितत्पृणीहि विश्वांश्च देवः पृतना अविष्यत् । सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः स्वाहेति हुत्वा इद-मग्नय इति त्यागं विधाय स्थालीपाकादग्नये स्विष्टकृते स्वाहेति हुत्वा पुनराज्येन स्विष्टमग्न इति जुहोति । ततो महाव्याहृत्या-दिप्राजापत्यहोमान्तं कृत्वा, अग्निः प्रथम इति प्रजापतिर्ऋषिः लि-ङ्गोक्ता देवता यजुः प्राशने विनियोगः । अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्ष-णिः । भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावशेन समशीमहि त्वां स नो मयोऽभूः पितो आविशस्व शन्तोकाय तनुवे स्यो न इत्यनेन मन्त्रेण संस्रवं प्राश्नाति । अथ वा अन्नपत इति परमेष्ठी ऋषिः लिङ्गोक्ता देवता बृहती छन्दः प्राशने विनियोगः । अन्नपतेऽन्न-स्य नो देह्यनमीवस्य शुष्मिणः । प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे । इत्यनेन प्राश्नाति । अत्र यवान्नप्राशने विशेषः । एतमुत्यमिति प्रजापतिर्ऋषिः लिङ्गोक्ता देवता जगती छन्दः प्राशने विनियोगः । एतमुत्यं मधुना संयुतम् । यव२ं स-रस्वत्या अधिवनाय चकृषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इत्यनेन प्राश्नाति । ततो ब्राह्मणं भोजयेत् ।

इति नवप्राशनप्रयोगः ।

अथ श्रवणाकर्म लिख्यते ।

तत्र पारस्करः, अथातः श्रवणाकर्म । श्रावण्यां पौर्णमा-स्याम् । स्थालीपाकः श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशं धानानां भूयसीः पिष्ट्वाऽऽज्याहुती जुहोति । अपश्वेतपदा जहि पूर्वेण चापरेण च । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा । न वै श्वेतस्याभ्याचारेऽहिर्ददर्श कं चन । श्वेताय वैद-

र्व्याय नमः स्वाहेति। स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति। धानावन्तमिति धानानाम्। घृताक्तान् सक्तून् सर्पेभ्यो जुहोति। आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतये स्वाहा श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहाऽभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपतये स्वाहेति। सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति। प्राशनान्ते सक्तूनामेकदेशꣳ शूर्पे न्युप्योपनिष्क्रम्य बहिः शालायाꣳ स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरागमतेत्युक्त्वा वाग्यतः सर्पानवनेजयति। आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्व श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वाभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वेति। यथावनिक्तं दर्व्योपघातꣳ सक्तून् सर्पेभ्यो बलिꣳ हरति। आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपत एष ते बलिः श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपत एष ते बलिरभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपत एष ते बलिरिति। अवनेज्य पूर्ववत्कङ्कतैः प्रलिखति। आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपते प्रलिखस्व श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपते प्रलिखस्वाभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपते प्रलिखस्वेति। अञ्जनानुलेपनꣳ स्रजश्चाङ्क्ष्वानुलिम्पस्व स्रजोऽपिनह्यस्वेति। सक्तुशेषꣳ स्थण्डिले न्युप्योदकपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः। स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदकधारया निवेशनं त्रिः परिषिञ्चन् परीयादपश्वेतपदा जहीति द्वाभ्याम्। दर्वीशूर्पे प्रक्षाल्य प्रतप्य प्रयच्छति। द्वारदेशे मार्जयन्त आपोहिष्ठेति तिसृभिः। अनुगुप्तमेतꣳ सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून् सर्पेभ्यो बलिꣳ हरेदाग्रहायण्याः। तꣳ हर-

न्तं नान्तरेण गच्छेयुः। दर्व्याचमनं प्रक्षाल्य निदधाति। धानाः प्राश्नन्त्यसंस्यूताः। ततो ब्राह्मणभोजनम्। इति।

अथशब्दः प्रकरणविच्छेदार्थः। अतःशब्दश्च हेत्वर्थः। यतः आवसथ्याग्निसाध्यानि कर्म्माणि प्रतिज्ञातानि श्रवणाकर्मणश्चावसथ्याग्निसाध्यत्वम्। अतः श्रवणाकर्म्म व्याख्यास्यत इति सूत्रशेषः। श्रावण्यां पौर्णमास्याम्। श्रवणयुक्तायां पौर्णमास्यां, कर्त्तव्यमिति शेषः।

तथाच हिरण्यकेशिगृह्यम्, अथातः श्रवणाकर्म्म तद्या पौर्णमासी श्रवणेन युज्ज्यात्तस्यामुपरिष्टात्सायमग्निहोत्रस्य दक्षिणाग्निमुपसमादधात्यौपासनमनाहिताग्नेरथोपकल्पयत इत्यादि।

यदा च श्रवणयुक्ता न लभ्यते तदा श्रवणरहिताऽपि श्रावणपौर्णमासी ग्राह्या। अथातः श्रवणाकर्म्म पौर्णमास्यां कृत्यमिति गोभिलगृह्ये पौर्णमासीमात्रस्योपादानात्। यदि पुनस्तस्यां पौर्णमास्यां सूतकादिना कर्त्तुं न शक्यते तदा आग्रहायणीपर्य्यन्तं यदाकदाचिद्बलिवर्जमशेषतः कर्त्तव्यम्। तदाह—

छन्दोगपरिशिष्टे कात्यायनः,

श्रवणाकर्म्म लुप्तं चेत्कथञ्चित्सूतकादिना।

आऽऽग्रहायणिकं कुर्याद्बलिवर्ज्जमशेषतः॥ इति।

आ आग्रहायणिकमित्येवं पदच्छेदः। स्थालीपाकं श्रपयित्वा। स्थालीपाकं चरुं श्रपयित्वा। अक्षतधानाश्च। अक्षताः यवाः तत्सम्पाद्याः धानाः अक्षतधानाः। चकारात् श्रपयित्वा श्रपणेन सम्पाद्य।

तदुक्तं छन्दोगपरिशिष्टे,

अक्षतास्तु यवाः प्रोक्ता भृष्टा धाना भवन्ति ते। इति।

यद्वा धानाशब्दस्य भृष्टयवमात्रवाचकत्वात् धानाः श्रपयि-

त्वेत्यनेन निस्तुषयवस्यापि श्रपणप्राप्तेः तन्निरासाय कण्डनादि-जन्यक्षतशून्यार्थकस्याक्षतपदस्योपादानम् । एवं च कण्डनादि-जन्यक्षतशून्यैः सतुषयवैः धानाः सम्पाद्या इत्यर्थः । धानाश्च कर्प-रेण भवन्तीति धानार्थं कर्परं चरुस्थाल्यनन्तरम् आसादनीयम्। अर्थवदासाद्येत्यनेन प्रयोजनवतां सर्वेषामेवासादनस्योक्तत्वात् । वक्ष्यमाणपुरोडाशार्थकपालं च कर्परानन्तरमेवेति । एककपालं पुरोडाशम् । एकस्मिन् कपाले संस्कृत एककपालः तम् एक-कपालम् । श्रपयित्वेत्यनुवर्त्तते । स च पुरोडाशः अश्वशफपरि-माणः स्वेच्छया समुचितपरिमाणो वा कार्य्यः। पुरोडाशपरिमा-णस्य तथैव दृष्टत्वात् । तथा च दर्शपूर्णमासप्रकरणे—

श्रुतिः, अश्वशफमात्रं कुर्य्यादित्युहैक आहुः । कस्तद्वेद यावानश्वशफो यावन्तमेव स्वयं मनसा न सत्रा पृथुं मन्यत एवं कुर्य्यादिति ।

कपालमपि तावत्परिमाणमेव न न्यूनाधिकपरिमाणम् । उरुप्रथा इति प्रथयति यावत्कपालमनतिपृथुमिति कात्यायने-न पुरोडाशपृथुत्वस्य कपालपरिमितत्वबोधनात् । अत्र स्थाली-पाकादिहोमानामितिकर्त्तव्यताविशेषश्रवणेनापूर्वत्वस्य व्यवस्थि-तत्वात् इह च पुरोडाशादिधर्माणामश्रवणात् पुरोडाशादिश्रपण-स्वरूपसम्पादकमात्रेतिकर्त्तव्यतया पुरोडाशादयः कर्त्तव्याः। सा च संयवनकपालाद्युपधानाधिश्रयणप्रथनश्रपणादिरूपा । न चैवं पेषणादिकमपि क्रियेत तद्व्यतिरेकेणापि पुरोडाशस्वरूपासिद्धेरि-ति वाच्यम् । पेषणादिकमन्तरेणापि सिद्धपिष्टमुपादाय पुरोडा-शादिस्वरूपनिष्पत्तिसम्भवेऽन्यथानुपपन्नत्वाभावेन पुरोडाशादि-श्रपणविधेस्तदनाक्षेपकत्वादिति । धानानां भूयसीः पिष्ट्वा । धा-नानां मध्ये भूयसीः धानाः दृषदुपलाभ्यां पिष्ट्वा । दृषदु-

पले चार्थपरिमाणे भवतः। एतच्च पेषणम् आज्यधानापुरोडाशा-नुद्वास्याज्यमुत्पूयावेक्ष्य प्रोक्षणीश्चोत्पूय पश्चात्कर्तव्यमिति हरिहरः। धानोद्वासनोत्तरं भवतीति तु कश्चित्। आज्यभागाविष्ट्वाऽऽज्याहुती जुहोति। अपश्वेतपदा जहि, न वै श्वेतस्याभ्याचार इति द्वाभ्यां मन्त्राभ्यां प्रतिमन्त्रं द्वे आहुती जुहोति। पाकयज्ञेष्ववत्तस्यासर्वहोम इति पूर्वलिखितसूत्रात्सर्वत्र संस्रवस्थापनं च कार्यम्। स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति। स्थालीपाकस्य चरोः विष्णवे स्वाहा श्रवणाय स्वाहा श्रावण्यै पौर्णमास्यै स्वाहा वर्षाभ्यः स्वाहेत्येवं चतस्र आहुतीर्जुहोति। धानावन्तमिति धानानाम्। धानावन्तं करम्भिणमित्येतया ऋचा धानानामेकाहुतिं जुहोति। घृताक्तान् सक्तून् सर्पेभ्यो जुहोति आग्नेयपाण्डुपार्थिवानाᳫं सर्पाणामधिपतये स्वाहा श्वेतवायवान्तरिक्षाणाᳫं सर्पाणामधिपतये स्वाहा अभिभूः सौर्यदिव्यानाᳫं सर्पाणामधिपतये स्वाहेति। घृतेन अक्तान् आज्येन अभ्यक्तान् सक्तून् सर्पेभ्यः आग्नेयपाण्डुपार्थिवानामित्यादिभिर्मन्त्रैः प्रतिमन्त्रं जुहोति। एतच्चाञ्जनार्थमाज्यं लौकिकं ग्राह्यं न संस्कृतम्। विषये लौकिकमयुक्तत्वादित्यादिना कात्यायनेन तथैव व्यवस्थापनात्। नन्वत्र सूत्रे सर्पेभ्य इत्यवाच्यम्। मन्त्रलिङ्गादेव सर्पाणां देवतात्वसिद्धेरिति चेत्, न। विजातीयस्यापि स्वजातीयाधिपत्यसत्त्वेन सर्पविजातीयस्यापि सर्पाधिपत्यसम्भवात्। सर्पाधिपतित्वेन रूपेण सर्पभिन्नमुद्दिश्य त्यागकरणनिराकरणाय सर्पविशेष एव सर्पाधिपतिरिति बोधनार्थं सर्पेभ्य इत्यस्य उपादानात्। अथ विजातीयस्य स्वविजातीयाधिपत्यं न क्वापि दृष्टमिति चेत्, न। सूर्यो भूतानामधिपतिः स माऽवत्विन्द्रो ज्येष्ठानां यमः पृथिव्या

वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणामित्यादौ वहुषु त-
दर्शनात्। सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति। सर्वहुतं यथा
स्यात्तथा एककपालं पुरोडाशं ध्रुवाय भौमाय स्वाहेति जुहोति।
प्राशनान्ते सक्तूनामेकदेशं शूर्पे प्रक्षिप्य उप समीप एव शालातो
बहिरागत्य। शूर्पं चात्र नडवंशेषीकान्यतममयं श्रौते तन्मयस्यैव
दृष्टत्वात्। तथा च दर्शपूर्णमासप्रकरणे—

श्रुतिः, अथ शूर्पमादत्ते वर्षवृद्धमसीति वर्षवृद्धꣳ ह्येतद्यदि-
नडानां यदि वेणूनां यदीषीकाणामिति।

बहिः शालायां स्थण्डिलमुपलिप्य। शालाया वहिः स्थ-
ण्डिलं गोमयेन उद्वर्त्य। एतच्च उपलेपनं स्वयमेव कर्त्तव्यम्। तस्य
पदार्थतया विहितत्वात्। कर्तृविशेषस्य चानुक्तत्वात्। निष्क्रमणो-
पलेपनयोर्ल्यबन्तेनोपादानात्। निष्क्रमणेन सह समानकर्तृक-
त्वलाभाच्च। उल्कायां ध्रियमाणायां माऽन्तरागमतेत्युक्त्वा वा-
ग्यतः सर्पानवनेजयत्याग्नेयेति। ज्वलति काष्ठाद्यन्येन ध्रिय-
माणे आवसथ्यस्य मम चान्तरा मागच्छत इत्यर्थकं माऽन्तरा ग-
मत इति प्रैषमभिधाय मौनी सर्पान् आग्नेय—श्वेत—अभिभूरि-
त्यादिभिरवनेनिक्ष्वेत्यन्तैस्त्रिभिर्मन्त्रैः प्राक्संस्थमवनेजयति। य-
थावनिक्तं दर्व्योपघातꣳ सक्तून् सर्पेभ्यो बलिꣳ हरत्याग्नेयेत्या-
दि। अवनेजनक्रमेण दर्व्या सक्तूनुपहत्योपहत्य सर्पेभ्यो बलि-
म् आग्नेयेत्यादिभिरेष ते बलिरित्यन्तैर्म्मन्त्रैः प्रतिमन्त्रं द-
दाति। उपघातमिति णमुल्प्रत्ययान्तः। उपपूर्वो हन्तिर्ग्रहणार्थः।
अथ स्रुवेणोपहत्येत्यादिश्रुतौ दर्शनात्। दर्व्याः परिमाणादिकं
तु छन्दोगपरिशिष्टे कात्यायनेनोक्तम्—

इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्।
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्॥

एषैव दर्वी यस्तत्र विशेषस्तमहं ब्रुवे ।
दर्वी ह्यङ्गुष्ठपृथ्वग्रा तुरीयोनं च मेक्षणम् ॥ इति ।

इध्मजातीयं खादिरं पालाशं वा। बिभीतकादिवर्ज्जं यत्किञ्चिद्वनस्पतिमयं वा ।

तथा च गोभिलः,

अथेध्मानुपकल्पते खादिरान् पालाशान् वा। खादिरपालाशालाभे विभीतकतिल्वकबाधकनीपनिम्बराजवृक्षशाल्मल्यरलुदधित्थकोविदारश्लेष्मातकवर्ज्जं सर्ववनस्पतीनामिध्मो यथार्थः स्यादिति ।

इध्मार्द्धप्रमाणं प्रादेशप्रमाणम् । इध्मस्य प्रादेशद्वयपरिमितत्वात् । तदाह—

छन्दोगपरिशिष्टे कात्यायनः,

प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितम् । इति ।

वृत्तं वर्त्तुलदण्डम्। वार्क्षं वृक्षकाण्डनिर्म्मितं न तु शाखाभवम् । पृथ्वग्रं स्थूलाग्रम्। अवदानक्रियाक्षमम् अवदानग्रहणयोग्यम्। एषैव दर्वी यादृशं मेक्षणमुक्तं तादृश्येव दर्वी। यस्तत्र विशेषः यः दर्वीगतो विशेषस्तमहं ब्रुवे तमहं वदामि । दर्वी ह्यङ्गुष्ठपृथ्वग्रा । अङ्गुष्ठद्वयपरिमितं पृथु विस्तीर्णम् अग्रं यस्याः सा ह्यङ्गुष्ठपृथ्वग्रा दर्वी भवति । तुरीयोनं च मेक्षणम् । ह्यङ्गुष्ठचतुर्थांशन्यूनपरिमाणपृथ्वग्रं मेक्षणं भवति । एवं च प्रादेशपरिमाणा ह्यङ्गुष्ठपरिमितपृथ्वग्रा खादिरपालाशादिमूलदण्डोद्भवा दर्वी भवति। अवनेज्य पूर्ववत्कङ्कतैः प्रलिखत्याग्नेयपाण्डुपार्थिवानामिति । पूर्ववदवनेजनं दत्त्वा त्रिभिः कङ्कतैः एकतोदन्तैः आग्नेयेत्यादिभिस्त्रिभिर्मन्त्रैः प्रतिमन्त्रं प्रतिबलिं प्रलिखति कण्डूयति । तच्च कङ्कतं प्रादेशमात्रं वैकङ्कतमिति हरिहरः। वारणान्यहोमसंयुक्तानी-

ति कात्यायनपरिभाषातो वारणमेव भवतीत्यन्ये । अञ्जनानुलेपनर्ऽ०स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपिनह्यस्वेति । अञ्जनं कज्जलं सौवीरं वा । उभाभ्यामपि चक्षुषः समञ्जनदर्शनात् । अनुलेपनं घृष्टसुरभिचन्दनादि । स्रक् पुष्पमाला । आग्नेयेत्यादिभिर्मन्त्रैः अञ्जस्वानुलिम्पस्व स्रजोऽपिनह्यस्वेत्यन्तैः प्रतिबलिहरणं यथाक्रममेकैकं ददाति । अपरे तु अञ्जस्व अनुलिम्पस्व स्रजोऽपिनह्यस्वेत्येतावत्परिमाणा एव एते मन्त्राः न तु पूर्वमन्त्रस्य शेषभूताः । एवं च अञ्जस्वेत्यादिभिरेव मन्त्रैरञ्जनादिकं ददातीत्याहुः । सक्तुशेषं स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः । सक्तुशेषं बलिदानावशिष्टं स्थण्डिले शूर्पादिना प्रक्षिप्य । उदपात्रेण उदकपात्रेण । उपनिनीयेत्यस्य जलमिति शेषः । जलनिनयनेन स्थण्डिलप्रक्षिप्तसक्तुशेषं प्रवाह्येत्यत्र तात्पर्यम् । उपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिर्ऋग्भिः सर्पानुपतिष्ठते । वल्याभिमुखः प्राङ्मुखः तिष्ठन् नमोऽस्तु सर्पेभ्य इत्यादीन् मन्त्रान् पठतीत्यर्थः । स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन् परीयादपश्वेतपदाजहीति द्वाभ्याम् । स गृहपतिः यावन्तं देशं सर्पाः न सञ्चरेयुरिति इच्छेत् तावन्तं देशम् अविच्छिन्नया उदकधारया गृहं वारत्रयं परिषिञ्चन् गच्छेत् अपश्वेतपदाजहीति द्वाभ्यां मन्त्राभ्याम् । तत्राद्यं परिक्रमणं मन्त्रेण । द्वितीयं तृतीयं च तूष्णीमेव । एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचनमिति कात्यायनसूत्रात् । दर्वीं शूर्पं च प्रक्षाल्य प्रतप्य प्रयच्छति । दर्वीं शूर्पं च प्रक्षालयित्वा तापयित्वा प्रयच्छेत् । तापनं च सन्निधानादुल्कायामेव प्रदानमप्युल्काधारायैवेति कर्कः । द्वारदेशे मार्ज्जयन्त आपोहिष्ठेति तिसृभिः । शाखाया द्वा-

रे आपोहिष्ठा, यो वः शिवतमः, तस्मा अरङ्गमाम व इति तिसृभिर्ऋग्भिः उदकेन आत्मानमभिषिञ्चन्ति। मार्जयन्ते इति बहुवचनोपदेशाद्ब्रह्मयजमानोल्काधारकाः। अनुगुप्तमेतं सक्तुशेषं निधाय। सुरक्षितप्रदेशे होमावशिष्टान् सक्तून्निधाय। ततोऽस्तमितेऽग्निं परिचर्य दर्व्योपघातं सक्तून् सर्पेभ्यो बलिं हरेदाग्रहायण्याः। ततः तत्कालमारभ्य। ततः तेभ्यः सक्तुभ्य इति कर्कः। प्रतिदिनम् आवसथ्यं सायंहोमेन समाराध्य अस्तमिते सूर्ये दर्व्या गृहीत्वा गृहीत्वा शूर्पे न्युप्तान् सक्तून् सर्पेभ्यो बलिं हरेत् आग्रहायणीं पौर्णमासीं यावत्। बलिदानं च अवनेजनादिप्रत्यवनेजनान्तं भवतीति कर्कः। उपलेनादिरेखाकरणान्तमिति हरिहरः। तं हरन्तं नान्तरेण गच्छेयुः। तं गृहपतिं बलीन् हरन्तं तस्य आवसथ्यस्य चान्तरा न गच्छेयुः प्राणिनः। ततः श्वादयोऽपि निवार्याः। दर्व्याचमनं प्रक्षाल्य निदधाति। आचम्यते अनेनेति करणव्युत्पत्त्या आचमनं मुखं तत्प्रक्षाल्य स्थापयति। दर्व्याः मुखं प्रक्षाल्य स्थापयतीत्यर्थः। एतच्च प्रक्षालनं प्रत्यहं भवति बलिदानसंलग्नसक्तुनिर्णेजनार्थत्वात्। सक्तुसम्बन्धस्य च प्रत्यहं भावात्। दर्वीमुखप्रक्षालनस्योपदेशादनु शूर्पप्रक्षालनस्यानुपदेशाच्च शूर्पप्रक्षालनाभावः। धानाः प्राश्नन्त्यसंस्यूताः। धाना भर्जिता यवाः तान् प्राश्नन्ति भक्षयन्ति असंस्यूताः दन्तैरनवखण्डिताः। ततो ब्राह्मणभोजनम्। ततः एकस्य ब्राह्मणस्य भोजनमित्यर्थः। यद्यपि प्रत्यहं क्रियमाणमिदं सर्पबलिरूपं भिन्नमेव कर्म इति श्रवणाकर्मप्रतिपादनावसरे न प्रतिपादयितुमुचितम्, तथापि श्रवणाकर्मसम्बद्धद्रव्योपजीवित्वेन सूत्रकृता श्रवणाकर्मप्रतिपादनावसरे एव एतस्य प्रतिपादितत्वात्तत्प्रतिपादितमिति।

अथ प्रयोगः।

तत्र श्रावण्यां पौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा आवसथ्याग्नेः पश्चात्प्राङ्मुखः पत्न्या सह उपविश्य अद्येहेत्यादिदेशकालादिकं सङ्कीर्त्य श्रवणाकर्माहं करिष्ये इति सङ्कल्पं कुर्यात् । ततः अनेकपद्धतिकारलिखनात् देवताभिध्यानं कुर्यात्। तद्यथा, श्रवणाकर्मणाऽहं यक्ष्ये, तत्र प्रजापतिमिन्द्रमग्निं सोमं श्वेतपदं श्वेतवैदर्व्यं घृतेन, विष्णुं श्रावणीं पौर्णमासीं वर्षाश्चरुणा, इन्द्रं धानाभिः, आग्नेयपाण्डुपार्थिवानाᳪं सर्पाणामधिपतिं श्वेतवायवान्तरिक्षाणाᳪं सर्पाणामधिपतिम् अभिभूः सौर्यदिव्यानाᳪं सर्पाणामधिपतिं सक्तुभिः, ध्रुवं भौमं पुरोडाशेन, अग्निं स्विष्टकृतं चरुधानासक्तूनां शेषेण, अग्निं वायुं सूर्यम् अग्नीवरुणौ अग्नीवरुणौ अग्निम् अयसं वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणमदितिं प्रजापतिं चाज्येनाहं यक्ष्ये इति चिन्तयेत् । ततो ब्रह्मोपवेशनादि आज्यभागान्तं पूर्वोक्तप्रकारेण कुर्यात्। ततः पात्रासादनादौ विशेषः। चरुस्थाल्यनन्तरं भर्जनकर्परम्। तत एकं कपालं क्रियमाणपुरोडाशपरिमाणम्। तण्डुलानन्तरं यवान्। ततस्तण्डुलपिष्टानि। एवं पात्राण्यासाद्य अन्यान्यपि पात्राण्युपकल्पयेत् । दृषदुपले शूर्पोल्के उल्काधारकं च । उदपात्रं दर्वीं कङ्कतत्रयम् अञ्जनम् अनुलेपनं स्रजश्चेति । ततः पवित्रकरणादिप्रोक्षणीनिधानान्ते चरोः स्थानादुत्तरतः अग्नौ भर्जनकर्परमधिश्रित्य तदुत्तरतः अङ्गारं स्थापयित्वा तदङ्गारोपरि कपालमुपदध्यात् । तत्कपालोपरि पुनरुष्णत्वार्थमङ्गारं निदध्यात् । तत आज्यस्थाल्यामाज्यं निरुप्य चरुस्थाल्यां प्रणीतोदकमासिच्य तण्डुलान् प्रक्षिप्य प्रणीतोदकेन पिष्टानि संयुज्य अश्वशफपरिमाणं यावत्परिमाणे

कृते अत्यधिकपरिमाणता न भवति तावत्परिमाणं वा पुरोडाशं कुर्यात् । ततः युगपत् आज्यादीनां सर्वेषामधिश्रयणम् । तत्र आज्यं ब्रह्माऽधिश्रयति चरुं होमकर्त्ता । अन्यः कश्चित्कर्परे धानाः । कपाले पुरोडाशम् अपर इति । यः पुरोडाशाधिश्रयणं करोति सः अधिश्रयणोत्तरं पुरोडाशस्य प्रथनमपि करोति । प्रथनं च यावत्कपालं पुरोडाशस्य विस्तारणम् । ततः होमकर्त्ता सर्वेषां पर्यग्निकरणं करोति । ततः स्रुवं संस्कृत्याज्यमुक्तप्रकारेणोद्वास्य चरुं चोद्वास्याज्यस्योत्तरतः स्थापयित्वा धाना उद्वास्य चरोरुत्तरतो निधाय पुरोडाशमुद्वास्य धानानामुत्तरतः स्थापयेत् । तत आज्योत्पवनावेक्षणप्रोक्षण्युत्पवनानि कृत्वा भूयसीर्धाना दृषदुपलाभ्यां पिष्ट्वा स्वल्पा धानाः पृथक् स्थापयित्वा लौकिकघृतेन सक्तूनक्त्वा पद्धतिकारलिखनादरे तु स्थाल्याज्येनैव तदक्त्वा उपयमनकुशादानादि आज्यभागान्तं कर्म कुर्यात् । ततः स्रुवेणाज्यस्थाल्या आज्यं गृहीत्वा अप श्वेतपदा जहीत्यस्य प्रजापतिर्ऋषिः लिङ्गोक्ता देवता यजुः इति स्मृत्वा "अपश्वेतपदा जहि पूर्वेण चापरेण । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा" इति जुहोति । इदं श्वेतपदे न ममेति त्यागः । तथैव ऋष्यादिकं स्मृत्वा "न वै श्वेतस्याध्याचारेऽहिर्ददर्श कं चन । श्वेताय वैदर्व्याय नमः स्वाहा" इति पुनस्तथैव जुहोति । इदं श्वेताय वैदर्व्याय न मम इति त्यागः । ततः स्थालीपाकमभिघार्य स्रुवेण स्थालीपाकस्य चतस्र आहुतीर्जुहोति । तद्यथा, विष्णवे स्वाहा इदं विष्णवे न मम । श्रवणाय स्वाहा इदं श्रवणाय न मम । श्रावण्यै पौर्णमास्यै स्वाहा । इदं श्रावण्यै पौर्णमास्यै न मम । वर्षाभ्यः स्वाहा इदं वर्षाभ्यो न मम । ततो धाना अभिघार्य स्रुवेणादाय धानावन्तमित्यस्य प्रजापत्यश्विसरस्वतीन्द्रा ऋषयः

त्रिष्टुप् छन्दः इन्द्रो देवता होमे विनियोगः—इति स्मृत्वा "धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः स्वाहा" इति होमः। इदमिन्द्राय न मम इति त्यागः। ततः सक्तून् स्रुवेणादाय आग्नेयपाण्डुपार्थिवानामित्यस्य परमेष्ठी ऋषिः लिङ्गोक्ता देवता यजुः होमे विनियोगः--इति स्मृत्वा आग्नेयपाण्डुपार्थिवानाᳬ सर्पाणामधिपतये स्वाहेति होमः। इदमाग्नेयपाण्डुपार्थिवानाᳬ सर्पाणामधिपतये न ममेति त्यागः। पुनस्तथैव ऋष्यादिकं स्मृत्वा श्वेतवायवान्तरिक्षाणाᳬ सर्पाणामधिपतये स्वाहेति होमः। इदं श्वेतवायवान्तरिक्षाणाᳬ सर्पाणामधिपतये न मम इति त्यागः। पुनस्तथैव ऋष्यादिकं स्मृत्वा अभिभूः सौर्यदिव्यानाᳬ सर्पाणामधिपतये स्वाहेति होमः। इदम् अभिभूः सौर्यदिव्यानाᳬ सर्पाणामधिपतये न ममेति त्यागः। ततः पुरोडाशमभिघार्य सम्पूर्णं पुरोडाशं स्रुवे गृहीत्वा ध्रुवाय भौमाय स्वाहेति जुहोति। इदं ध्रुवाय भौमाय न मम इति त्यागः। ततः चरुधानासक्तूनामुत्तरार्द्धान्महत्तरं स्रुवे अवदानत्रयं गृहीत्वा अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धे जुहोति। इदमग्नये स्विष्टकृते न मम इति त्यागः। ततो महाव्याहृतिहोमादिब्रह्मदक्षिणादानान्तं कुर्यात्। ततो हुतशेषं सक्तूनामेकदेशं शूर्पे गृहीत्वा उदकपात्रं दर्वीं कङ्कतत्रयम् अञ्जनम् अनुलेपनं स्रजश्चादाय सपत्नीको ब्रह्मणा उल्काधारेण च सह शालाया उदीच्यां दिशि प्राच्यां दिशि वा स्थण्डिलं कृत्वा तदुपलिप्य उल्काधारकेण लौकिकाग्न्युल्कायां ध्रियमाणायां माऽन्तरा गमत इति प्रैषं दत्त्वा वाग्यत उदकपात्रोदकेन आग्नेयपाण्डुपार्थिवानाᳬ सर्पाणामधिपते अवनेनिक्ष्व इति स्थण्डिले अवनेज्य तदवनेजनदेशपूर्वतः स्थण्डिल एव पुनः प्राच्यां दिशि श्वेतवायवान्तरिक्षाणाᳬ सर्पाणामधि-

पते अवनेनिक्ष्वेति अवनेज्य पुनस्तदवनेजनपूर्वतः स्थण्डिले एव अभिभूः सौर्यदिव्यानाः सर्पाणामधिपते अवनेनिक्ष्वेति अवनेज्य भूमौ उदपात्रं निदध्यात्। ततो दर्व्या सक्तून् शूर्पादादायादाय आग्नेयपाण्डुपार्थिवानां सर्पाणामधिपत एष ते बलिः, श्वेतवायवान्तरिक्षाणां सर्पाणामधिपत एष ते बलिः, अभिभूः सौर्यदिव्यानां सर्पाणामधिपत एष ते बलिरित्येभिर्मन्त्रैरवनेजनक्रमेण तत्स्थाने बलीन् दद्यात्। ततः पूर्ववदवनेजनं कृत्वा आग्नेयपाण्डुपार्थिवानां सर्पाणामधिपत इत्यादिभिः प्रलिखस्वेत्यन्तैः त्रिभिर्मन्त्रैः कङ्कतत्रयेण प्रतिबलिं प्रतिमन्त्रं प्रलिखति। तत आग्नेयेत्यादिभिरेव मन्त्रैरञ्जस्वेत्यन्तैः प्रतिमन्त्रं प्रतिबलिमञ्जनं ददाति। पुनस्तैरेव मन्त्रैरनुलिम्पस्वेत्यन्तैः प्रतिमन्त्रं प्रतिबलिम् अनुलेपनं ददाति। पुनस्तैरेव मन्त्रैः स्रजोऽपिनह्यस्वेत्यन्तैः प्रतिमन्त्रैः प्रतिबलिं पुष्पमालां ददाति। अथ वा अञ्जस्वेति अञ्जनदानम् अनुलिम्पस्वेत्यनुलेपनदानम् स्रजोऽपिनह्यस्वेति मालादानम् न पूर्वमन्त्रानुषङ्ग इति। ततः सक्तुशेषं स्थण्डिले प्रक्षिप्य उदपात्रस्थजलेन प्लावयेत्। ततः नमोऽस्तु सर्पेभ्य इति तिसृणां साध्या ऋषयः सर्पा देवता अनुष्टुप् छन्दः उपस्थाने विनियोगः इति स्मृत्वा, "नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ या इषवो यातुधानानां ये वा वनस्पतीं रनु। ये वा वटेषु शेरते तेभ्यः सर्पेभ्यो नमः॥ ये वाऽमी रोचने दिवो ये वा सूर्यस्य रश्मिषु। येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः" इति तिसृभिर्ऋग्भिः सर्पानुपतिष्ठेत। एतावद्देशं सर्पा न प्रविशेयुरिति यावत्कामयेत तावन्तं देशं सन्ततयोदकधारया परिषिञ्चन् गृहं त्रिः परीयात्। तत्र आद्यं परिक्रमणम् ऋष्यादिस्मरणपूर्वकम् अपश्वेतपदाज-

हीतिपूर्वलिखितमन्त्राभ्याम् । उत्तरं परिक्रमणद्वयं च तूष्णीम् । दर्वीं शूर्पं च प्रक्षाल्य उल्कायां सकृत्प्रतप्य उल्काधारिणे प्रयच्छति। ततः शालाया द्वारि उपविश्य आपोहिष्ठेत्यादीनां सिन्धुद्वीप ऋषिः गायत्रीछन्दः आपो देवता मार्जने विनियोग इति स्मृत्वा, आपोहिष्ठामयो भुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ।आपो जनयथा च नः॥इति त्र्यृचेन ब्रह्मयजमानोल्काधाराः स्वस्वात्मानं जलेन मार्ज्जयन्ते । ततो ब्रह्मयजमानोल्काधारा अनवखण्डयन्तः धानाः प्राश्नन्ति । ततः एकं ब्राह्मणं भोजयेत् । सक्तुशेषं च सुगुप्ते देशे निदध्यादिति ।

इति श्रवणाकर्मप्रयोगः ।

अथ सर्पबलिहरणप्रयोगः ।

अस्तमिते सूर्ये सायंहोमानन्तरं शूर्पे सक्तून् कृत्वा दर्वीं कङ्कतम् उदपात्रं च गृहीत्वा सपत्नीकः सोल्काधारो वहिः शालायां गत्वा स्थण्डिलोपलेपनादिपरिलेखनान्तं बलिहरणं प्रतिदिनं पूर्ववत्कुर्यात् । माऽन्तरा गमतेति प्रैषाभावः । न कश्चिदन्तरा गच्छेत् । दर्वीमुखस्यैव प्रक्षालनं न सम्पूर्णदर्व्याः शूर्पस्य च । एवम् आग्रहायणीपर्यन्तं कुर्यात् ।

इति बलिहरणप्रयोगः ।

अथेन्द्रयज्ञाख्यं कर्म ।

तत्र पारस्करः, प्रौष्ठपद्यामिन्द्रयज्ञः। पायसमैन्द्रꣳ श्रपयित्वाऽपूपांश्चापूपैस्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्रायेन्द्राण्या अजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति। प्राशनान्ते मरुद्भ्यो बलिꣳ हरत्यहुतादो मरुत इति श्रुतेः। आश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरिति वचनात्।शुक्रज्योतिरिति प्रतिमन्त्रम्। विमुखेन-

च मनसा। नामान्येषामेतानीति श्रुतेः। इन्द्रं दैवीरिति जपति। ततो ब्राह्मणभोजनम् इति।

अस्यार्थः। प्रौष्ठपद्यां भाद्रपदपौर्णमास्याम्। यद्यप्यत्र प्रौष्ठपदसम्बन्धिनी या कापि तिथिः प्रतीयते तथापि अथातः श्रवणाकर्म श्रावण्यां पौर्णमास्यामित्युपक्रम्य प्रौष्ठपद्यामिन्द्रयज्ञः आश्वयुज्यां पृषातका इति विधानात् प्रौष्ठपद्यादिभिः पदैः पौर्णमास्येव विशेष्यत्वेनोपतिष्ठते। तस्याम् इन्द्रयज्ञाख्यं कर्म भवति। पायसमैन्द्रं श्रपयित्वाऽपूपांश्च। पायसं पयसा निष्पादितं चरुं परमान्नमिति यावत्।

पृषदाज्यं सदध्याज्ये परमान्नं तु पायसम्।

इति कोषात्। ऐन्द्रम् इन्द्रदेवतं श्रपयित्वा पक्त्वा। पायसं श्रपयित्वेत्येतावतैव सिद्धे ऐन्द्रमिति देवतातद्धितनिर्देशस्तद्दैवत्यहोमविधानार्थः। अवसरस्तूपरिष्टाद्वक्ष्यते। पायसश्रपणार्थं दुग्धस्यापि प्रणयनमत्र कार्यम्। उपदेशातिदेशयोरभावान्न दुग्धस्य प्रणयनमित्यपि केचित्। अपूपांश्च पोलिकापरपर्यायान्। चकारात् श्रपयित्वा।

पूपोऽपूपः पोलिकास्तु पोलिकापोलियूपिकाः।

इत्यभिधानचिन्तामणिः। अपूपो मण्डक इत्यष्टकाप्रकरणे कर्कः। तांश्च चतुरः कुर्यात्। प्रतिदिशं संस्तरणार्थं हि ते इति हरिहरः। अन्ये तु यावद्भिः संस्तरणमुपपद्यते तावतोऽपूपानाहुः। अपूपैस्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्रायेत्यादि। अपूपैः अग्निं स्तीर्त्वा तत आज्यभागाविष्ट्वा इन्द्रायेत्याद्या आज्याहुतीर्जुहोति। इदं च परिस्तरणं न प्राकृतं श्रपणोत्तरं पाठात्। किन्तु अपूर्वम्। अतश्च प्राकृतपर्युक्षणानन्तरमिदं न कार्यम्। किन्तु आज्यभागाव्यवहितपूर्वक्षणे। स्तीर्त्वेत्यनेन क्रमविधानात्। न

चैत्रं श्रपयित्वेत्यनेनापि क्रमविधानाच्छ्रपणानन्तरमपि किं न स्यात्। तस्य पायसादिश्रपणविधिपरत्वेन क्रमपरत्वाभावात्। आज्यभागाविष्ट्वेत्यस्य तु अनन्यपरत्वात्क्रमपरत्वमेवेति। अन्ये तु नात्रापूर्वं स्तरणं विधीयते। किन्तु प्राकृतस्तरणानुवादेन दर्भकार्येऽपूपविधिर्लाघवात्। अतश्च अपूपास्तरणाज्यभागयोरानन्तर्यं स्तृत्वेति क्त्वाप्रत्ययबोधितमपि प्राकृतं च विकृताविति न्यायेन बाधित्वा पर्युक्षणानन्तरमेवावतिष्ठत आस्तरणमित्याहुः। ग्रन्थकारास्तु उपयमनकुशादानात्पूर्वमेवाहुः। प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरितिसूत्रेण महाव्याहृतिहोमात्प्राक् स्विष्टकृद्धोमेन भवितव्यम्। न च प्रधानमहुत्वा स्विष्टकृद्धोमस्ततः कर्तुं शक्यते। शेषात्स्विष्टकृते समवद्यतीतिवचनात्। तस्मादत्रावसरे इन्द्राय स्वाहेति पायसेनैकाहुतिः। ततः स्विष्टकृदादिप्राजापत्यान्ता नवाहुतयः। प्राशनान्ते मरुद्भ्यो बलिं हरत्यहुतादो मरुत इति श्रुतेः। ततः संस्रवभक्षान्ते मरुद्भ्यः देवताविशेषेभ्यः बलिं हरति बलिं ददाति। बलिमित्येकवचनं जात्यपेक्षम् प्राशनान्तग्रहणं माभूत्तत्कालमेव बलिहरणमित्येतदर्थम्। बलिप्रमाणं पक्षादिप्रकरणेऽभिहितम्। कथमेभ्यो होमो न क्रियते बलिरेव दीयत इत्याह अहुतम् अदन्तीत्यहुतादः तादृशा मरुत इति श्रुतेः। विशेषमाह। आश्वत्थेषु पलाशेषु। मरुतोऽश्वत्थे तस्थुरिति वचनात् अश्वत्थसम्बन्धिषु बलिदानं कर्त्तव्यम्। यत्र च येषामवस्थानं तत्रैव तेषां दानमुचितमित्यभिप्रायः। मन्त्रानाह शुक्रज्योतिरिति प्रतिमन्त्रम्। विभुत्वेन च मनसा नामान्येषामेतानीति श्रुतेः। ननु नामभिरेवात्रत्यबलिदानं दृष्टं कुतोऽत्र मन्त्रैर्दीयते इत्याह। नामान्येषामेतानीति श्रुतेः। एषां मरुताम्। एतानि शुक्रज्योतिःप्रभृतीनि। अत एव

यावतीषु कण्डिकासु नामबुद्धिः तावतीभिरेव बलिदानम् । ताश्च शुक्रज्योतिरित्यादिपद् । उग्रश्च भीमश्चेत्यादिना अध्येतृप्रसिद्धेन विमुखेन च मनसा मनसैव बलिमन्त्रान् स्मरेत् । न मुखेनोचरेत् । इन्द्रं दैवीरिति जपति । इन्द्रं दैवीरित्यमुं मन्त्रं जपति । ततो ब्राह्मणभोजनमित्युक्तार्थम् । इति सूत्रार्थः ।

अथ प्रयोगः ।

प्रथमप्रयोगे भाद्रपदपौर्णमास्यां देशकालादिकीर्त्तनान्ते इन्द्रयज्ञकर्माऽहं करिष्य इति सङ्कल्पः । ततो मातृपूजामाभ्युदयिकं च कृत्वाऽऽवसथ्याग्नौ कर्म कुर्यात् । ततो ब्रह्मोपवेशनमारभ्य संस्रवप्राशनान्ते विशेषः । अपां दुग्धस्य च प्रणयनम् । तत्र प्रणयनपात्रे मध्ये सेतुं कृत्वा मूलभागे जलम् अन्यत्र क्षीरं निनीय प्रणयनं कार्यम् । मूलभागे वा क्षीरमितरत्र जलम् । उपकल्पनीयानि तण्डुलपिष्टम् सप्ताश्वत्थपत्राणीति हरिहरः । यत्रापिष्टं लौकिकोदकम् अपूपसंयवनार्थं, खर्परं च अपूपार्थमेव, सप्ताश्वत्थपत्राणीति युक्तमेव गङ्गाधरो लिलेखोपकल्पनीयानि । तत आज्यनिर्वापं कृत्वा चरुपात्रे प्रणीतक्षीरमासिच्य तण्डुलान् प्रक्षिपेत् । प्रणीतोदकेन पिष्टं सम्यक् बद्धा तेन चतुरोऽपूपान्निर्माय स्तरणपर्याप्तान् वा निर्माय खर्परेऽधिश्रयेदिति हरिहरः । लौकिकोदकेनैव संयवनमिति गदाधरः । तत्रायं क्रमः । आदौ आज्याधिश्रयणं तदुत्तरतश्चरुः तदुत्तरतोऽपूपानिति । ततः पर्यग्निकरणादिप्रोक्षण्युत्पवनान्तम् । ततोऽपूपैर्यथोक्तं स्तरणं प्रतिदिशं चैकैकेन । तत उपयमनकुशादानाद्याज्यभागहोमान्ते आज्येन पञ्चाहुतीर्जुहोति । आसु च न ब्रह्मणोऽन्वारम्भः । इन्द्राय स्वाहा इदमिन्द्राय । इन्द्राण्यै स्वाहा इदमिन्द्राण्यै । अजा-

यैकपदे स्वाहा इदमजायैकपदे। अहिर्बुध्न्याय स्वाहा इदमहिर्बुध्न्याय। इदमहये बुध्न्यायेति केचित्। प्रौष्ठपदाभ्यः स्वाहा इदं प्रौष्ठपदाभ्यो न ममेति। एवं पञ्चाज्याहुतीर्हुत्वा पायसमभिघार्य स्रुवेणादाय इन्द्राय स्वाहेति हुत्वा इदमिन्द्राय न मम। ततः पायसेनैव ब्रह्मान्वारब्धः स्विष्टकृद्धोमं विधाय तथैव महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतीर्हुत्वा संस्रवं प्राश्य दक्षिणां दद्यात्। ततोऽग्नेरुत्तरतः प्राक्संस्थानि उदक्संस्थानि वा सप्ताश्वत्थपर्णानि निधाय स्रुवेण पायसशेषमादाय शुक्रज्योतिरित्यादिभिर्नमस्कारान्तैः षड्भिः उग्रश्च भीमश्चेत्येतेन सप्तमेन च नमोऽन्तेन मनसैव स्मृतेन एकैकस्मिन् पत्रे एकैकेन मन्त्रेण बलिं हरति। तत्रेत्थं प्रयोगः। शुक्रज्योतिश्चेति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता उष्णिक् छन्दः मरुद्भ्यो बलिदाने विनियोगः। शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च। शुक्रश्च ऋतपाश्चात्यꣳहाः नमः॥ इदं शुक्रज्योतिषे चित्रज्योतिषे सत्यज्योतिषे ज्योतिष्मते शुक्राय ऋतपसेऽत्यꣳहसे च न मम। एवमेकं बलिम् एकस्मिन् पत्रे दत्त्वा पुनः स्रुवेणादाय ईदृङ् चेति प्रजापतिर्ऋषिः साध्या वा मरुतो वा देवता गायत्रीछन्दः बलिदाने विनियोगः। ईदृङ्चाऽन्यादृङ् च सदृङ् च प्रतिसदृङ् च। मितश्च संमितश्च सभराः नमः॥ इदमीदृशेऽन्यादृशे सदृशे प्रतिसदृशे मिताय संमिताय सभरसे च न ममेति द्वितीयपत्रे द्वितीयं बलिं दत्त्वा, पुनस्तथैवावदाय ऋतश्चेति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता उष्णिक् छन्दः बलिदाने विनियोगः। ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च। धर्त्ता च विधर्त्ता च विधारयः नमः॥ इदमृताय सत्याय ध्रुवाय धरुणाय धर्त्रे विधर्त्रे विधारयाय च न मम इति तृतीयपत्रे दत्त्वा, पुनस्तथैवावदाय ऋतजिच्चेति प्रजापतिर्ऋ-

षिः साध्या वा मरुतो देवता गायत्री छन्दः बलिदाने विनियोगः। ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च। अन्तिमित्रश्च दूरे अमित्रश्च गणः नमः॥ इदमृतजिते सत्यजिते सेनजिते सुषेणाय अन्तिमित्राय दूरेअमित्राय गणाय च न ममेति चतुर्थपत्रे दत्त्वा, पुनस्तथैवावदाय ईदृक्षास इति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता गायत्री छन्दः बलिदाने विनियोगः। ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतन। मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् नमः॥ इदमीदृक्षेभ्यः एतादृक्षेभ्यः सदृक्षेभ्यः प्रतिसदृक्षेभ्यो मितेभ्यः सम्मितेभ्यः सभरेभ्यो मरुद्भ्यश्च न ममेति पञ्चमे पत्रे दत्त्वा, पुनस्तथैव गृहीत्वा स्वतवांश्चेति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता उष्णिक् छन्दः मरुद्भ्यो बलिदाने विनियोगः। स्वतवांश्च प्रघासी च सान्तपनश्च गृहमेधी च। क्रीडी च शाकी चोज्जेषी नमः॥ इदं स्वतवसे प्रघासिने सान्तपनाय गृहमेधिने क्रीडिने शाकिने उज्जेषिणे च न मम इति षष्ठपत्रे दत्त्वा, पुनस्तथैव उग्रश्चेति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता गायत्री छन्दो मरुद्भ्यो बलिदाने विनियोगः। उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा नमः॥ इदमुग्राय भीमाय ध्वान्ताय धुनये सासह्वनेऽभियुग्वने विक्षिपाय च न ममेति सप्तमे पत्रे बलिं दत्त्वा, इन्द्रं दैवीरिति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता यजुः जपे विनियोगः। इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो भवन्यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्। एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु। इति स्वरपूर्वकं जपः। मरुद्भ्यो बलिं हरतीति विधेः सर्वत्र इदं मरुद्भ्य इति वा त्यागः। ततो ब्राह्मणभोजनम्। इदं च मृत-

कादिना मुख्यकालातिक्रमे प्राक् आश्विन्याः पौर्णमास्या यथासम्भवं कार्यमिति गङ्गाधरकारिकाकारादयः ।

इतीन्द्रयज्ञः समाप्तः ।

अथाऽऽश्वयुजीकर्म ।

तत्र पारस्करः,

आश्वयुज्यां पृषातकाः । पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति । प्राशनान्ते दधिपृषातकमञ्जलिना जुहोति ऊनं मे पूर्यतां पूर्णं मे माव्यगात्स्वाहेति । दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन । मातृभिर्वत्सान्त्सꣳसृज्य ताꣳ रात्रिमाग्रहायणीं च । ततो ब्राह्मणभोजनमिति ।

आश्वयुज्यां पृषातकाः, भवन्तीति शेषः । आश्वयुजीशब्देन च आश्विनी पौर्णमासी अभिधीयते । पृषातकाः इति च कर्मनाम । एवं च आश्विन्यां पौर्णमास्यां पृषातका इतिसंज्ञकं कर्म भवतीत्यर्थः । पायसमैन्द्रं श्रपयित्वा दधिमधुघृतमिश्रं जुहोति । इन्द्रदेवत्यं पयसा संस्कृतं द्रव्यं श्रपणेन संसाध्य दधिमधुघृतमिश्रं कृत्वा वक्ष्यमाणदेवताभ्यो जुहोति । इन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति । इन्द्रायेत्यादिभिः पञ्चभिर्मन्त्रैः स्वाहाकारान्तैः प्रतिमन्त्रं पञ्चाहुतीर्जुहोति । प्राशनान्ते दधिपृषातकमञ्जलिना जुहोत्यूनं मे पूर्यतामिति । स्विष्टकृन्महाव्याहृत्यादिहोमीयसंस्रवप्राशनान्ते दधिमिश्रितं आज्यम् अञ्जलिना संयुताभ्यां प्रसृतिभ्यां जुहोति ऊनं मे पूर्यतामिति मन्त्रेण । पृषातकशब्देन दधिमिश्रितमाज्यमेवोच्यते ।

तथाऽभिधानचिन्तामणौ,

आज्ये तु दधिसंयुक्ते पृषदाज्यं पृषातकम् । इति ।

एवं च दधिप्रधानं पृषातकमित्यर्थः । अन्ये तु पृषदाज्यं सम्पाद्य पुनरपि दध्ना संयोज्य जुहोतीत्याहुः । अञ्जलिशब्देन संयुतप्रसृतिद्वयमेवोच्यते ।

तथाच अमरसिंहे,

पाणिर्निकुब्जः प्रसृतिः तौ युतावञ्जलिः पुमान् । इति ।

दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन । दधिमधुघृतमिश्रं पायसम् अमात्याः यजमानगृह्याः । गयः कुदरः इत्युपक्रम्य अमाशब्दो निघण्टौ गृहनामसु पठितः । एवं च अमा गृहं तत्र भवाः अमात्याः इति अमात्यशब्दस्य व्युत्पादनात् । ते पश्यन्ति आयात्विन्द्र इत्यनुवाकेन आयात्वष्टा इत्यध्येतृप्रसिद्धेनाष्टकण्डिकात्मकेन । मातृभिर्वत्सान् संसृज्य तां रात्रिम् । वत्सपदसमभिव्याहारात् मातृभिः गोभिः वत्सान् संसृज्य सम्मेल्य तां रात्रिम् अत्यन्तसंयोगे द्वितीयास्मरणात् तस्यां समस्तरात्रावित्यर्थः । ततो ब्राह्मणभोजनम् । ततः एकस्य ब्राह्मणस्य भोजनं कारयेदित्यर्थः ।

अथ प्रयोगः ।

आश्विन्यां पौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा आवसथ्याग्नेः पश्चात्पत्न्या सह उपविश्य देशकालादिकं सङ्कीर्त्य पृषातकाख्यं कर्माहं करिष्ये इति सङ्कल्पं कुर्यात् । ततः पद्धतिकारलिखनाद्देवताभिध्यानं करोति । तद्यथा, प्रजापतिमिन्द्रम् अग्निं सोमम् आज्येन, इन्द्रमिन्द्राणीमाश्विनौ आश्वयुजीं पौर्णमासीं दधिमधुघृतमिश्रेण पायसेन, अग्निं स्विष्टकृतं पायसशेषेण, भूरादिदेवताश्चाज्येन, अग्निं पृषदाज्येनाहं यक्ष्ये इति मनसा चिन्तयेत् । ततो ब्रह्मोपवेशनादिप्राशनान्ते विशेषः । प्रणयनपात्रे माश्वमुदश्वं वा सेतुं कृत्वा

एकस्मिन् प्रदेशे जलमपरस्मिन् प्रदेशे च दुग्धं निनीय पूर्ववत्प्रणयनं कुर्यात् । उपदेशातिदेशयोरभावात् न दुग्धस्य प्रणयनमित्यपि कश्चित् । पात्रासादनानन्तरं दधिमधुघृतान्युपकल्पयेत्। आज्यनिर्वापोत्तरं चरुपात्रे पोतकादिना प्रणीतं सर्वमपि दुग्धं प्रक्षिप्य तत्र तण्डुलावापं कृत्वा आज्याधिश्रयणकाले पूर्ववदधिश्रयणं कुर्यात् । उपयमनकुशादानात्पूर्वं पायसे दधिमधुघृतानि प्रक्षिपेत् । आज्यभागान्ते दधिमधुघृतमिश्रितेन पायसेन जुहोति इन्द्राय स्वाहेति । इदमिन्द्राय न ममेति त्यागः । पुनस्तेनैव इन्द्राण्यै स्वाहा इदमिन्द्राण्यै न मम । अश्विभ्यां स्वाहा इदमश्विभ्यां न मम । आश्वयुज्यै पौर्णमास्यै स्वाहा इदमाश्वयुज्यै पौर्णमास्यै न मम । शरदे स्वाहा इदं शरदे न मम । एवं हुत्वा त्यागं च कृत्वा तत एव पायसादवदाय अग्नये स्विष्टकृते स्वाहेति सौविष्टकृतं हुत्वा महाव्याहृतिहोमादिदक्षिणादानान्तं कुर्यात् । ततः स्थाल्याज्ये दधि प्रक्षिप्य पृषदाज्यं कृत्वा अञ्जलिना आदाय ऊनं म इत्यस्य गर्ग ऋषिः गायत्री छन्दः अग्निर्देवता होमे विनियोगः इति स्मृत्वा, ऊनं मे पूर्यतां पूर्णं मे माव्यगात्स्वाहेति मन्त्रेण जुहोति । इदमग्नये न मम इति त्याग इति सम्प्रदायः ।

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥

इति छन्दोगपरिशिष्टवचनात्प्रजापतिरेवात्र देवता । ततश्च इदं प्रजापतये न मम इति त्याग इति तु केचित् । ततो यजमानपुत्रपौत्रादयः आयात्विन्द्र इत्यादीनां सप्तानां वामदेवभरद्वाजागस्त्याश्विसरस्वतीगर्गविश्वामित्रवासिष्ठा ऋषयः त्रिष्टुप्छन्दः अष्टमस्य बृहती छन्दः इन्द्रो देवता अवेक्षणे विनियोगः । इति

स्मृत्वा, आयात्विन्द्रो वस उपन इह स्तुतः सधमादस्तु शूरः। वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्नक्षत्रमभिभूतिपुष्यात्। आन इन्द्रो दूरादान आसादभिष्टिकृदवसेयासदुग्रः। ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सुतुर्वणिः पृतन्यून्। आन इन्द्रो हरिभिर्यात्वच्छार्वाचीनो वसे राधसे च तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनुनो वाजसा तौ। त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः। इन्द्रः सुत्रामा स्ववाꣳ अवोभिः सुमृडीको भवतु विश्ववेदाः। बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम। तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। ससुत्रामा स्ववाꣳ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु। आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। मा त्वा केचिन्नियमन्निवन्नपाशिनोति धन्वेवताꣳ इहि। एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः। स नस्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः। इत्यनुवाकेन दधिमधुघृतमिश्रं हुतशेषं पायसं पश्यन्ति। ततो ब्राह्मणभोजनमिति।

अथाग्रहायणीकर्म।

तत्र पारस्करः,

मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म। स्थालीपाकꣳ श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति। यां जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम्। संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा। संवत्सरस्य प्रतिमा या ताꣳ रात्रिमुपास्महे। प्रजाꣳ सुवीरां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा। संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः। तेषां वयꣳ सुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम

स्वाहा। ग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः। तेषामृतूनाꣳ शतशारदानां निवात एषामभये वसेम स्वाहेति। स्थालीपाकस्य जुहोति, सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति।प्राशनान्ते सक्तुशेषꣳ शूर्पे न्युप्योपनिष्क्रमणप्रभृत्यामार्जनात्। मार्जनान्त उत्सृष्टो बलिरित्याह इति।

मार्गशीर्षी पौर्णमासी प्रसिद्धा तस्याम् आग्रहायणीसंज्ञकं कर्म कर्त्तव्यमिति शेषः। स्थालीपाकꣳ श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति। स्थालीपाकं चरुं श्रपयित्वा श्रवणाकर्मवद्दपश्वेतपदाजहीत्याहुतिद्वयं हुत्वा अपराः चतस्रः आहुतीः यां जना इत्यादिभिर्मन्त्रैर्जुहोति। स्थालीपाकस्य जुहोति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति। सोमायेत्यादिभिः स्वाहान्तैर्मन्त्रैः स्थालीपाकस्य चरोर्जुहोति। प्राशनान्ते स्विष्टकृन्महाव्याहृत्यादिहोमीयसंस्रवप्राशनान्ते। सक्तुशेषं शूर्पे न्युप्य उपनिष्क्रमणप्रभृति आमार्जनात् श्रवणाकर्मवत्कुर्यात्। मार्जनान्ते उत्सृष्टो बलिरित्याह। मार्जनस्यावसाने उत्सृष्टो बलिरिति ब्रूयात्।

अथ प्रयोगः।

तत्र आग्रहायण्यां पौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकश्राद्धं कृत्वाऽग्निमपरेण सपत्नीक उपविश्य देशकालादिकं सङ्कीर्त्य आग्रहायणीकर्माहं करिष्य इति सङ्कल्पं कुर्यात्। ततः अनेकपद्धतिकारलिखनात् देवताभिध्यानं कुर्यात्। तद्यथा, प्रजापतिम् इन्द्रम् अग्निं सोमं श्वेतपदं श्वेतं वैदर्व्यं रात्रिं संवत्सरं परिवत्सरम् इदावत्सरम् इद्वत्सरं ग्रीष्मं हेमन्तं वसन्तं वर्षाः शरदं च आज्येन, सोमं मृगशिरसं मार्गशीर्षीं पौर्णमासीं हेमन्तं च स्थालीपाकेन, अग्निं वायुं सूर्यम् प्रजाप-

वरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणं प्रजापतिं च आज्येन, आग्नेयपाण्डुपार्थिवानां सर्पाणामधिपतिं श्वेतवायवान्तरिक्षाणां सर्पाणामधिपतिम् अभिभूः सौर्यदिव्यानां सर्पाणामधिपतिं च बलिभिः अस्मिन्नाग्रहायणीरूपे कर्मण्यहं यक्ष्ये इति चिन्तयेत् । ततो ब्रह्मोपवेशनादिप्राशनान्तं कुर्यात् । तत्र विशेषः । पात्रासादनोत्तरं शूर्पम् उदपात्रं दर्वीं कङ्कतत्रयम् अञ्जनम् अनुलेपनं स्रजः उल्का उल्काधारश्च एतानि उपकल्पयेत् । एतेषामप्यासादनप्रोक्षणे इति तु कश्चित् । तत आज्यभागानन्तरम् अपश्वेतपदाजहीत्याहुतिद्वयं श्रवणाकर्मवद्धुत्वा यां जना इत्यस्य आथर्वण ऋषिः अनुष्टुप्छन्दः रात्रिर्देवता होमे विनियोग इति स्मृत्वा, यां जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गलीः स्वाहेति जुहोति।इदं रात्र्यै न ममेति त्यागः।पुनः संवत्सरस्येत्यस्य पूर्ववदेव ऋष्यादिकं स्मृत्वा,संवत्सरस्य प्रतिमा या तां रात्रिमुपास्महे । प्रजां सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहेति जुहोति। इदं रात्र्यै न ममेति त्यागः। ततः संवत्सरायेत्यस्य शल्वायन ऋषिः त्रिष्टुप्छन्दः संवत्सरादयो देवताः होमे विनियोगः इति स्मृत्वा संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुत बृहन्नमः । तेषां वयꣳ सुमतौ यज्ञियानां ज्योग्जीता अहता स्याम स्वाहेति जुहोति।इदं संवत्सराय परिवत्सरायेदावत्सराय इद्वत्सराय वत्सराय च न ममेति त्यागः।ततः ग्रीष्म इत्यस्य शल्वायन ऋषिः त्रिष्टुप्छन्दः ग्रीष्मादयो देवताः होमे विनियोगः इति स्मृत्वा, ग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः। तेषामृतूनां शतशारदानां निवात एषामभये वसेम स्वाहेति जुहोति । इदं ग्रीष्माय हेमन्ताय वसन्ताय वर्षाभ्यः श-

रदे च न ममेति त्यागः । एताश्च आज्याहुतयः । ततः स्थालीपाकेन होमः । तद्यथा, सोमाय स्वाहा इदं सोमाय न मम । मृगशिरसे स्वाहा इदं मृगशिरसे न मम । मार्गशीर्ष्यै पौर्णमास्यै स्वाहा इदं मार्गशीर्ष्यै पौर्णमास्यै न मम । हेमन्ताय स्वाहा इदं हेमन्ताय न मम । ततः स्थालीपाकस्य उत्तरार्द्धादवदाय अग्नये स्विष्टकृते स्वाहेति जुहोति। इदमग्नये स्विष्टकृते न ममेति त्यागः । ततो महाव्याहृतिहोमादिप्राशनान्तं कुर्यात् । ततः सक्तुशेषं शूर्पे न्युप्य निष्क्रमणप्रभृतिमार्जनान्तं श्रवणाकर्मवत्कुर्यात् । ततः मार्जनान्ते उत्सृष्टो बलिरिति वदेत् । ततस्तां रात्रिं वत्सान् मातृभिः सह मेलयेत् ।

इत्याग्रहायणीकर्म ।

अथ स्रस्तरारोहणम् ।

तत्र पारस्करः, पश्चादग्नेः स्रस्तरमास्तीर्याहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति दक्षिणतः स्वामी जायोत्तरा यथाकनिष्ठमुत्तरतः । दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रꣳ शमीशाखासीतालोष्ठाश्मनो निधायाग्निमीक्षमाणो जपति । अयमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः सुवीर्योऽयꣳ श्रेष्ठो दधातु नाविति । पश्चादग्नेः प्राञ्चमञ्जलिं करोति । दैवीं नावमिति तिसृभिः स्रस्तरमारोहन्ति । ब्रह्माणमामन्त्रयते ब्रह्मन् प्रत्यवरोहामेति । ब्रह्मानुज्ञाताः प्रत्यवरोहन्त्यायुः कीर्त्तिर्यशोबलमन्नाद्यं प्रजामिति । उपेता जपन्ति । सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतान्नः । शिवा नो वर्षाः सन्तु शरदः सन्तु नः शिवा इति । स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति । उपोत्तिष्ठन्त्युद्वायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरिति । एवं द्विरपरं ब्रह्मानुज्ञाताः ।

अधःशयीरंश्चतुरो मासान् यथेष्टं वेति ।

अस्यार्थः । यद्यप्यत्र आश्वयुज्यां पृषातकाः प्रौष्ठपद्यामिन्द्रयज्ञ इतिवत् न किञ्चिदभिधायोक्तम्, तथापि स्रस्तरारोहणस्य पृथक् पाकयज्ञमध्ये गणनात् आग्रहायणीकर्मान्ते पठितमपि कर्मान्तरमेव स्रस्तरारोहणम् । तच्च आग्रहायणीकर्माष्टकाकर्ममध्ये पठितत्वात् तदन्तराले काले एव कर्त्तु युज्यते । अत एव गङ्गाधरः मार्गशीर्षपौर्णमास्या ऊर्ध्वम् अर्वागष्टम्याः शुभवासरे एतस्य कर्तव्यतामाह ।

रेणुदीक्षितोऽपि,

स्रस्तरारोहणं कुर्यात्पौर्णमास्या अनन्तरम् ।
अर्वाव च शुभे वारे अष्टकायाः पुरैव तु ॥ इति ।

तत्र च पश्चादग्नेः स्रस्तरमास्तीर्य । आवसथ्यस्याग्नेः पश्चात् स्रस्तरं तृणैः आस्तीर्य । अहतं च वासः । सकृत्प्रक्षालितं नवं च वासः । चकारात् आस्तीर्य । उत्तरसूत्रे वासोग्रहणात्पूर्वसूत्रस्थस्रस्तरपदं कटादिपरम् । आप्लुताः कृतस्नानाः अहतवाससः सकृत्प्रक्षालितनूतनवाससः सन्तः स्रस्तरं प्रत्यवरोहन्ति निविशन्ते । तत्प्रकारमाह । दक्षिणतः स्वामी जायोत्तरा यथाकनिष्ठमुत्तरतः । स्वामी गृहपतिः सर्वेषां दक्षिणतः । तदुत्तरतो जाया यजमानपत्नी यथाकनिष्ठम् । अन्येषां तु यो यस्मात्कनिष्ठः स तस्मादुत्तरो भवति । पुनरपि विशेषमाह । दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं शमीशाखासीतालोष्टाश्मनो निधायाग्निमीक्षमाणो जपत्ययमग्निरिति । गृहपतिः आदौ अग्नेर्दक्षिणतः ब्रह्माणम् उपवेश्य । होमाभावात् ब्रह्मोपवेशनमप्राप्तमत्राभिधीयते । उत्तरतः अग्नेरुत्तरतः उदपात्रं जलपूरितं किञ्चिद्भाजनम् । शमीशाखां सीतालोष्टं हलपद्धतिभवं

मृत्खण्डम् अश्मानं पाषाणं निधाय स्थापयित्वा अग्निम् ईक्षमाणः अवलोकयन् अयमग्निरिति मन्त्रं पठेत् । पश्चादग्नेः प्राञ्चमञ्जलिं करोति दैवीं नावमिति तिसृभिः । अग्नेः पश्चात् प्राञ्चं प्रागग्रम् अञ्जलिं करोति । नमस्कारार्थत्वात्पुटाञ्जलिं निदधाति दैवीं नावमिति तिसृभिः ऋग्भिः । स्रस्तरमारोहन्ति ब्राह्मणमामन्त्रयते ब्रह्मन् प्रत्यवरोहामेति । पूर्वोक्तं स्रस्तरम् आरोक्ष्यन् ब्राह्मणम् आमन्त्रयते पृच्छति स्वामी ब्रह्मन् प्रत्यवरोहामेति । बहुवचनं पत्न्याद्यपेक्षम् । पूर्वं ये आरोहणधर्मा उक्तास्तेषामयं कालः । ब्रह्मानुज्ञाताः प्रत्यवरोहन्त्यायुः कीर्तिर्यशो बलमन्नाद्यं प्रजामिति । प्रत्यवरोहध्वमिति यथोचितवाक्येन ब्रह्मणाऽनुज्ञाताः दत्ताज्ञाः प्रत्यवरोहन्ति स्रस्तरम् अधितिष्ठन्ति आयुः कीर्त्तिरितिमन्त्रेण । पुरुषाणां स्त्रीणां सर्वेषां मन्त्रपाठ इति हरिहरः । उपेता जपन्ति सुहेमन्त इति । उपेताः कृतोपनयनाः ये ते जपन्ति सुहेमन्त इति मन्त्रम् । अत्र उपेता इति विशेषोपादानात् अनुपनीतानां मन्त्रजपाभावः । पत्नीवर्जं सर्वस्त्रीणां च मन्त्राभाव इति गर्गपद्धतौ । स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति । स्योना पृथिवीत्यनेन मन्त्रेण दक्षिणपार्श्वैर्दक्षिणबाह्वधस्तात्प्रदेशैः । पार्श्वे इति सप्तम्यन्तपाठे तदधिकरणकं शयनम् । प्राक्शिरसः पूर्वस्यां दिशि शिरः कृत्वा शेरते स्वाम्यादयः । उपोत्तिष्ठन्त्युदायुषा स्वायुषेति । उप स्रस्तरसमीपे एवोत्तिष्ठन्ति किञ्चित् शयित्वा उत्तिष्ठन्ति । एवं द्विरपरं ब्रह्मानुज्ञाताः । एवमुक्तेन प्रकारेण वारद्वयं पुनः कुर्यात् । किंप्रभृति ब्रह्मानुज्ञाताः ब्रह्मणोऽनुज्ञाप्रभृतीत्यर्थः । अधः शयीरंश्चतुरो मासान् यथेष्टं वा । अत ऊर्द्धं चतुरो मासान् पौषादिचैत्रान्तान्

अधः भूमौ शयीरन् ते सर्वेऽपि। यथेष्टं वा यथारुचि वा। मासमेकं ह्यादि वा। इति सूत्रार्थः। अत्र गौणकालाभाव इति गङ्गाधरः।

अथ प्रयोगः।

मार्गशीर्षपौर्णमास्या ऊर्ध्वं प्रागष्टम्याः कस्मिंश्चित् शुभे दिने कृतनित्यक्रियः सपत्नीकः अद्येत्यादिदेशकालादिकीर्त्तनान्ते स्रस्तरारोहणमहं करिष्य इति सङ्कल्प्य मातृपूजाभ्युदयिके कुर्यात्। एतच्च आवसथ्यं स्थलान्तरे नीत्वा पञ्चभूसंस्कारपूर्वकं तत्र स्थापयित्वा कार्यम्। औपवसथ्यरात्रिमन्तरेण अग्निशालायां शयननिषेधादिति हरिहरः। अन्ये तु अग्नेः पश्चात् गृह्यशयनपर्याप्तस्थलाभावे एवान्यत्र गमनमाहुर्नान्यथा। यश्च शयननिषेधः स रागप्राप्तशयनस्य निषेधो न वैधस्येत्याहुः।

रेणुककारिकापि,

निवेशनमलङ्कुर्याद्धास्त्वत्यभ्युदिते सति।
स्नान्ति गृह्याः सपत्नीकाः सन्ति ये वृत्तिकृन्मताः॥
अवकाशो न चेदग्नेः पश्चादारोहणाय वै।
अग्निं देशान्तरं नीत्वा तत्पश्चात् स्रस्तरास्तृतिः॥ इति।

ततोऽग्नेः पश्चात् कुशैरास्तरणं विधाय तदुपरि अहतवासस्तृणुयात्। स्रस्तरारोहणं करिष्ये, तत्र त्वं ब्रह्मा भवेति ब्रह्माणं वृत्वा अग्नेः दक्षिणतः उपवेश्य उत्तरतः उदपात्रं शमीशाखासीतालोष्टम् अश्मानं च उदकसंस्थानि निधाय स्रस्तरस्य पश्चादुपविश्य अग्निमीक्षमाणो यजमानो जपति वक्ष्यमाणं मन्त्रम्। अयमग्निर्वीरतम इत्यस्याः प्रजापतिर्ऋषिः अग्निर्देवता अनुष्टुप् छन्दः जपे विनियोगः। अयमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः। सुवीर्योऽयं श्रेष्ठे दधातु नौ इति। ततोऽग्नेः पश्चात्

प्राश्वमञ्जलिं करोति दैवीं नावमिति तिसृभिः । दैवीं नावमित्यस्याः प्रजापतिर्ऋषिः अग्निर्देवता सुनावमित्यस्या अश्विनावृषी नौर्देवता आनोमित्रावरुणेत्यस्याः सरस्वती ऋषिः मित्रावरुणौ देवते तिसृणामपि गायत्री छन्दः अञ्जलिकरणे विनियोगः । दैवीं नाव स्वरित्रामनागसमस्रवन्तीमारुहेमास्वस्तये । सुनावमारुहेयमस्रवन्तीमनागसम् । शतारित्राꣳ स्वस्तये । आनोमित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाꣳसि सुक्रतू इति । ततो ब्रह्मन् प्रत्यवरोहामेति ब्रह्माणमामन्त्र्य प्रत्यवरोहध्वमिति ब्रह्मणा दत्ताज्ञाः सर्वे सुस्नाताः परिहिताहतवाससः प्रत्यवरोहन्ति । आयुः कीर्त्तिरित्यस्य गौतम ऋषिः अग्निर्देवता गायत्री छन्दः स्रस्तरारोहणे विनियोगः । आयुः कीर्त्तिर्यशो बलमन्नाद्यं प्रजामिति । ततः स्रस्तरमारुह्य कृतोपवीतास्ते जपन्ति । सुहेमन्त इत्यस्याश्वलायन ऋषिः हेमन्तादयः पञ्च देवताः पङ्क्तिश्छन्दः जपे विनियोगः । सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतान्नः । शिवा नो वर्षाः सन्तु नः शिवा इति मन्त्रम् । ततस्ते सर्वेऽपि स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः स्वपन्ति । स्योना पृथिवीत्यस्य दध्यङ्ङाथर्वण ऋषिः गायत्री छन्दः पृथिवी देवता स्वापे विनियोगः । स्योना पृथिवि नो भवानृक्षरा निवेशनीति । ततः किञ्चित्सुप्त्वा उदायुषेतिमन्त्रेणोत्तिष्ठन्ति । उदायुषेति गौतम ऋषिः अग्निर्देवता गायत्री छन्दः उत्थाने विनियोगः । उदायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरिति मन्त्रेण । ततः स्रस्तरादुत्तीर्य ब्रह्मानुमन्त्रणप्रत्यवरोहणोपेतजपसंवेशनोत्थानानि वारद्वयमेवमेव कुर्युः । तत आरभ्य चतुरो मासान् अधः शयीरन् यथेष्टं वा । अन्यत्रानीतं चेत् पञ्चभूसंस्कारपूर्वं पुनः स्वस्थाने स्थापयेत् । इदं च

स्रस्तरारोहणम् अस्तमयानन्तरं कार्यम् इति गर्गपद्धतौ ।

इति स्रस्तरारोहणम् ।

अथाष्टकाकर्मोच्यते ।

तत्र पारस्करः, ऊर्द्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः । ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येति । अपूपमांसशाकैर्यथासङ्ख्यम् । प्रथमाष्टका पक्षाष्टम्याम् । स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति । त्रिꣳशत्स्वसार उपयन्ति निष्कृतꣳ समानं केतुं प्रतिमुञ्चमानाः । ऋतूंस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः स्वाहा । ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा । एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून्व्यसहन्त देवा हन्तासुराणामभवच्छचीभिः स्वाहा । अनानुजामनुजां मामकर्त्त सत्यं वदन्त्यन्विच्छ एतत् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामति मा प्रयुक्त स्वाहा । अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामति मा प्रयुक्त स्वाहा । पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकꣳ स्वाहा । ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं बिभर्त्ति । सूर्यस्यैका चरति निष्कृतेषु धर्मस्यैका सवितैकां नियच्छतु स्वाहा । या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा नः पयस्वती धुक्ष्वोत्तरामुत्तराꣳ समाꣳ स्वाहा । शुक्रऋषभा नभसा ज्योतिषागाद्विश्वरूपा शबली अग्निकेतुः । समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आगाः स्वाहा । ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजा-

नाम्। एका सती बहुधोषो व्यौच्छत्साऽजीर्णा त्वं जरयासि सर्वमन्यत्स्वाहेति ॥ स्थालीपाकस्य जुहोति शान्ता पृथिवी शिवमन्तरिक्ष५ शन्नो द्यौरभयं कृणोतु। शन्नो दिशः प्रदिश आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा ॥ आपो मरीचीः परिपान्तु सर्वतो धाता समुद्रो अपहन्तु पापम्। भूतं भविष्यदकृन्तद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्या५ स्वाहा ॥ विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु। ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहेति। अष्टकायै स्वाहेतीति।

अस्यार्थः। ऊर्ध्वमाग्रहायण्याः। मार्गशीर्षपौर्णमास्यनन्तरम्। तिस्रः अष्टकाः। अष्टकाख्यानि त्रीणि कर्माणि भवन्ति। आसां चाभ्यासास्मरणात् सकृत्क्रियेति कर्कः। विशेषस्तु पाकयज्ञसंस्थाविचारे पूर्वमभिहितः। तत्र देवता आह। ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येति। तत्र प्रथमा ऐन्द्री इन्द्रो देवता अस्या इत्यैन्द्री। इन्द्रदेवत्येत्यर्थः। तद्धितान्तनिर्देशात्। इन्द्राय स्वाहेति तदीयद्रव्येण होमः कार्यः। एवं द्वितीया वैश्वदेवी विश्वदेवदेवत्या। तत्र विश्वेभ्यो देवेभ्यः स्वाहेति तदीयद्रव्यहोमः। तृतीया प्राजापत्या प्रजापतिदेवत्या। तत्र प्रजापतये स्वाहेति होमः। पित्र्येति चतुर्थी पितृदेवत्या। तत्र पितृभ्यः स्वाहेति होमः। मध्या वर्षे च तुरीया शाकाष्टकेति वक्ष्यति। तत्र देवताकथनाभावात् इदं तत्रोत्कृष्यते। स्वतन्त्रो हि मुनिः कस्यचित् प्रसङ्गेन किञ्चिद्वदतीति देवताकथनप्रसङ्गेन अप्रतिज्ञाताया अपि चतुर्थ्या अष्टकाया देवताकथनं न दोषाय। इदानीं द्रव्याण्याह। अपूपमा५सशाकैर्यथासङ्ख्यम्। अपूपाः पोलिकाः। केषां चिन्मण्डकत्वेन प्रसिद्धाः।

पूपोऽपूपः पोलिकास्तु पौलिकापौलियूपिकाः ।

इत्यभिधानचिन्तामणिः । अपूपश्च शाकश्च मांसं च तैः । यथासङ्ख्यं या यस्याः सङ्ख्या तामनतिक्रम्य । प्रथमाष्टकायां प्रथमं द्रव्यमपूपः द्वितीयाष्टकायां द्वितीयं मांसम् तृतीयाष्टकायां तृतीयं शाक इत्येवंप्रकारेण । तत्र मांसं गोमांसम् । मध्यमा गवेति वक्ष्यमाणत्वात् । प्रथमाष्टका पक्षाष्टम्याम् । सौरादिभेदेन मासानामनेकत्वादष्टम्योऽप्यनेका इति संशयच्छेदार्थमाह । प्रथमा आद्या अष्टका पक्षाष्टम्याम् । पक्षशब्देनात्र ऊर्ध्वमाग्रहायण्या इत्युक्तत्वात् स एव पक्षो गृह्यते । आग्रहायण्यूर्ध्वपक्षस्याष्टम्यामित्यर्थः ।

स्मृतिश्च, हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति ।

स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्रिꣳशत्स्वसार इत्यादि । स्थालीपाकं चरुं श्रपणेन निष्पाद्य आज्यभागौ आघारपूर्वकौ हुत्वा त्रिंशत्स्वसार इत्यादिभिर्मन्त्रैर्दशाज्याहुतीर्जुहोति । स्थालीपाकस्य जुहोति शान्ता पृथिवीति । स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । स्थालीपाकस्यावयवमादायादाय शान्ता पृथिवीत्यादिभिश्चतुर्भिर्मन्त्रैर्जुहोति चतस्र आहुतीः । अत्र यद्यप्यपूपहोमस्यावसरो नोक्तस्तथाप्यपूपहोमेन भवितव्यम् । अपूपमांसशाकैरिति पूर्वलिखितसूत्रेण अष्टकायाम् अपूपस्य साधनत्वात् ऐन्द्री वैश्वदेवीत्यादिना देवताया अप्युक्तत्वात् । केवलमवसरमपेक्षामहे । तत्र आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीत्यादिभिर्विशेषवचनैरुक्तानां होमानां मध्ये निवेशासम्भवात्तदन्ते एव इन्द्राय स्वाहेत्यपूपेनैकाहुतिर्देयेति । एवं प्रत्यष्टकं ज्ञेयम् । इति सूत्रार्थः ।

अथाष्टकाकर्मपद्धतिः ।

तत्र मार्गशीर्ष्या अनन्तरं या कृष्णाष्टमी तस्यां मातृपूजा आभ्युदयिकं चेति हरिहरादयः । अपरे तु—

नाष्टकासु भवेच्छ्राद्धम्—

इति वचनात् न श्राद्धमिच्छन्ति । तदा च मातृपूजामात्रम् । केचित्तु यत्रैवाभ्युदयिकं श्राद्धं तत्रैव मातृपूजनमित्याहुः । ततो देशकालादिकीर्त्तनान्ते अष्टकाकर्माहं करिष्य इति सङ्कल्पः । केचिन्मातृपूजनात्पूर्वं सङ्कल्पमिच्छन्ति । ततो वैकल्पिकावधारणम् । ततोऽनेकपद्धतिकारलिखनाद्देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं सोमं स्वसॄः रात्रिम् अष्टकाम् रात्रीः रात्रीः रात्रीः रात्रिं रात्रिं रात्रिं घृतेन, पृथिवीम् अन्तरिक्षं दिवं दिशः प्रदिशः आदिशः अहोरात्रे अपः मरीचीः धातारं समुद्रं ब्रह्माणं विश्वान् वसून् देवान् रुद्रान् आदित्यान् गोप्तॄन् मरुतः प्रजापतिं परमेष्ठिनमष्टकाम् एताः स्थालीपाकेन, इन्द्रम् अपूपेन, अग्निं स्विष्टकृतं स्थालीपाकशेषेण, अग्निं वायुं सूर्यम् अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणं प्रजापतिम् एता आज्येनाहं यक्ष्ये । ततो ब्रह्मोपवेशनाद्यावसथ्याग्नौ विशेषः । तण्डुलानन्तरम् आवसथ्याग्निपक्वसिद्धस्यैवापूपस्यासादनं प्रोक्षणकाले प्रोक्षणं च । केचित्तु नावसथ्याग्निपक्वस्य नियममाहुः । अपूपमात्रस्योपादानात् । ततः आज्यभागान्तं हुत्वा ऋष्यादि स्मरेत् । त्रिंशत्स्वसार इत्यादिमन्त्रजातस्य याज्ञवल्क्य ऋषिः लिङ्गोक्ता देवताः त्रिष्टुप् छन्दः अष्टम्या अनुष्टुप् छन्दः होमे विनियोगः । त्रिꣳशत्स्वसार उपयन्ति निष्कृतꣳ समानं योनिं प्रतिमुञ्चमानाः । ऋतूंस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः

स्वाहा। इदं स्वसृभ्यो न मम । १ । ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा॥इदं रात्र्यै न मम।२।एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून् व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः स्वाहा ॥ इदमष्टकायै न मम।३। अनानुजामनुजां मामकर्त सत्यं वदन्त्यन्विच्छ एतत्। भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा ॥ इदं रात्रीभ्यो न मम । ४ । अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा ॥ इदं रात्रीभ्यो न मम।५। पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनुपञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकꣳ स्वाहा।। इदं रात्रीभ्यो न मम।६। ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नियच्छतु स्वाहा ॥ इदं रात्र्यै न मम।७। या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे।सा नः पयस्वती धुक्ष्वोत्तरामुत्तराꣳ समाꣳ स्वाहा ॥ इदं रात्र्यै न मम ।८। शुक्रऋषभा नभसा ज्योतिषागाद्विश्वरूपा शबली अग्निकेतुः । समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजरउष आगाः स्वाहा।इदं रात्र्यै न मम।९। ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्यौच्छत्साऽजीर्णा त्वं जरयसि सर्वमन्यत्स्वाहा ॥ इदं रात्र्यै न मम । १० । ततः स्थालीपाकमभिघार्य स्रुवेणादाय चतस्र आहुतीर्जुहुयात् । शान्ता पृथिवी शिवमन्तरिक्षꣳ शं नो द्यौरभयं कृणोतु । शन्नो दिशः प्रदिश आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा ॥ इदं पृथिव्यै अन्तरिक्षाय दिवे दिग्भ्यः प्र-

दिग्भ्य आदिग्भ्यः अहोरात्राभ्यां न ममेति त्यागः । आपो मरीचीः परिपान्तु सर्वतो धाता समुद्र अपहन्तु पापम् । भूतं भविष्यदकृन्तद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याᳪ स्वाहा। इदमद्भ्यो मरीचिभ्यो धात्रे समुद्राय ब्रह्मणे न मम । विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु । ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहा ॥ इदं विश्वेभ्य आदित्येभ्यो वसुभ्यो देवेभ्यो रुद्रेभ्यो गोप्तृभ्यो मरुद्भ्यः प्रजापतये परमेष्ठिने च न मम । ततः अष्टकायै स्वाहा इदमष्टकायै न मम । ततः अपूपमभिघार्य किञ्चित्स्विष्टकृदर्थं पात्रेऽवशेषयन् स्रुवेणावदाय जुहुयात् । इन्द्राय स्वाहा इदमिन्द्राय न मम। ततः स्थालीपाकापूपशेषाभ्यां स्विष्टकृत् । ततो व्याहृत्यादि हुत्वा शेषं समापयेत् ।

इत्यष्टकाकर्मपद्धतिः ।

ततः श्वोभूतेऽन्वष्टकाकर्म ।

तत्र पारस्करः, श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत् । स्त्रीभ्यश्चोपसेचनं च कर्षूषु सुरया तर्पणेन चाञ्जनानुलेपनᳪस्रजश्च । आचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन् इति ।

श्वः अष्टकानामुत्तरेद्युः। अन्वष्टकासु चतसृणामप्यष्टकानाम् अपरेद्युः कर्म भवति। तत्र पार्श्वसक्थिसव्याभ्याम्। पार्श्वं च सक्थि च पार्श्वसक्थिनी ते च सव्ये ताभ्यां पार्श्वसक्थिसव्याभ्याम् परिवृते सर्वतः आच्छादिते गृहे।तच्चार्थात्परिमाणम्।चतुरस्रमुदग्द्वारमिति कारिकाकारः। पिण्डपितृयज्ञवत्। तत्र पिण्डपितृयज्ञ इत्यत्र यदुक्तं तत् भवतीत्यर्थः। विशेषमाह । स्त्रीभ्यश्च। अत्र स्त्रीभ्यः मातृपितृपितामहीप्रपितामहीभ्योऽपि ददाति । चकारः पिण्डपि-

तृयज्ञवदित्यनेन प्राप्तैः पितृपितामहप्रपितामहैः सह समुच्चयार्थः। अत्र सामान्योऽपि स्त्रीशब्दः पित्रादिसन्निधानात् मात्रादिपरोऽवसीयते। उपसेचनं च कर्षूषु सुरया तर्पणेन चाञ्जनानुलेपनं स्रजश्च। केवलं ताभ्यः पिण्डानेव दद्यादिति न। किन्तु उपसेचनं च कर्षूषु सुरया कुर्यात्। तर्पणेन च। तर्पयत्यनेनेति तर्पणं सक्तवः तैरपि। चकारात् उपसेचनं कुर्यात्। अञ्जनं सौवीराञ्जनं कज्जलं वा। अनुलेपनं चन्दनादि सुगन्धिद्रव्यम्। स्रजः पुष्पनिर्मिता मालाः। चकारात् दद्यात्। अत्र च स्त्रीपिण्डसमीपे कृतेषु गर्तेषु सुरया तर्पणेन चोपसेचनम्। अञ्जनादीनां तु स्त्रीपिण्डेष्वेव दानमिति कर्के स्पष्टम्। आचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन्। आचार्य उपनयनपूर्वकं वेदाध्यापकः। अन्तेवासी नैष्ठिको ब्रह्मचारी। अनपत्याः ये पितृव्यादयः तेभ्यश्च यदि कामयेत्तदा दद्यान्न नियमः। हरिहरादयस्तु अनपत्येभ्य इति आचार्यान्तेवासिविशेषणमेव मन्यन्ते।

इति सूत्रार्थः।

अथ प्रयोगः।

तत्र सर्वत आच्छादिते आवसथ्याग्नौ कर्म। नित्यवैश्वदेवान्ते अपराह्णे सङ्कल्पादि पूर्वोक्तपिण्डपितृयज्ञवत् कर्म कुर्यात्। विशेषस्तु आसादने उलूखलमुशलाभावः। शूर्पस्य च व्रीहिस्थाने। क्रीतयोर्लब्धयोर्वा छागस्य पार्श्वसक्थोर्मांसम् सुरा अञ्जनम् अनुलेपनम् स्रजः सूत्राणि च। मांसं च छित्वा श्लक्ष्णानि कृत्वा तेषां ग्रहणादि कार्यमिति वासुदेवः। कारिकाकारोऽपि ग्रहणमाह—

अवखण्ड्यासिना मांसं श्लक्ष्णं वह्नेस्तु पश्चिमम्।
एतत्स्थाल्यां तु गृह्णीयात् स्रुचि वा पुनरेत्य सः॥ इति।

हरिहरस्तु मांसस्य ग्रहणं नेच्छति केवलं छित्वा स्थाल्यां प्रक्षिप्य पचेदित्याह । भेक्षणप्राशनान्ते कृते दक्षिणाग्निमपरेण पूर्वेण वा लेखाद्वयकरणम् उभयत्राप्युल्मुकनिधानमिति हरिहरे स्पष्टम् वासुदेव्यां च । प्रथमरेखायां पित्रादिभ्योऽवनेजनं दत्वाऽमुकगोत्रे अस्मन्मातरमुकि देवि अवनेनिक्ष्व इति द्वितीयरेखाया मूले अवनेज्य तस्या एव मध्याग्रयोः गोत्रादि पितामहि अवनेनिक्ष्वेति प्रपितामहि अवनेनिक्ष्वेत्यवनेज्य सकृदाच्छिन्नस्तरणादि अमुकगोत्र पितरमुकशर्मन्नेतत्ते मांसं स्वधेति पित्रे दत्वा एवं पितामहप्रपितामहयोश्च दत्वा द्वितीयलेखायाम् अमुकगोत्रेऽस्मन्मातरमुकि देवि एतत्ते मांसं स्वधेति मात्रे दत्वा एवं पितामहीप्रपितामह्योश्चावनेजनस्थाने दत्वा इच्छया मात्रादिपिण्डसमीपे अवनेजनसकृदास्तरणपूर्वकम् अनपत्येभ्य आचार्यान्तेवासिभ्यः यथासम्भवं मांसपिण्डान् दद्यात् । चकारादन्येभ्योऽपि सपिण्डादिभ्यो दद्यादिति हरिहरः । स्त्रीपिण्डसन्निधानेऽवटत्रयखननम् । प्रादेशमात्रं खातम् चतुरङ्गुलं दीर्घता अङ्गुलं विपुलतेति गर्गः ।

स्त्रीपिण्डसन्निधौ पिण्डसमं खात्वाऽवटत्रयम् ।
यथापूर्वं ततस्तासां सुराद्यैरभितर्पणम् ॥

इति रेणुः । अमुकगोत्रेऽमुकि देवि सुरां पिबस्वेत्येकत्रावटे सुरां प्रसिच्य तथैव पितामहीप्रपितामह्योरपि इतरयोरवटयोरासिच्य सक्तूनादायामुकगोत्रेऽमुकि तृप्यस्वेति मातृप्रभृतिभ्यः सक्तून् दत्वा तथैव गोत्राद्युच्चार्य अङ्क्ष्वेत्यञ्जनं दत्वा तथैवानुलिम्पस्वेत्यनुलेपनं दत्वा स्रजोऽपिनह्यस्वेति स्रजो दत्वाऽत्र पितर इति जपाद्युल्मुकप्रक्षेपान्तं कर्म कुर्यात् । ततोऽन्वष्टकाश्राद्धं कुर्यात् । इदं च मातरि विद्यमानायां न भवतीति गङ्गाधरः ।

कारिकाकाररेणुश्च,

मातर्यविद्यमानायामान्वष्टक्यमिदं भवेत् । इति ।

अन्योऽपि विशेषस्तत्रैव ।

केचिल्लोकभयादत्र प्रत्यक्षां नाहरेत्सुराम् ।

किन्तु तत्सदृशं द्रव्यं गुडवार्यादिकं भवेत् ॥ इति ।

अत एव गर्गः सुराद्रव्यस्यैवासादनमाह--

काण्डहरीतकी गुडश्चेति ।

इत्यन्वष्टका ।

पौषीपौर्णमास्यनन्तरभाविन्यामष्टम्यां द्वितीयाष्टका ।

तत्र पारस्करः, ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टका ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येत्यपूपमांसशाकैर्यथासङ्ख्यमिति पूर्वलिखितसूत्रेणैव देवतायाः सामान्यतो मांसरूपद्रव्यस्य च लाभात्तद्विशेषाकाङ्क्षायामाह---

मध्यमा गवेति ।

वैश्वदेवी मध्यमाष्टका गोमांसेन निर्वर्त्तनीयेत्यर्थः । एवं चात्राष्टकाशब्दः द्रव्यदेवतासम्बन्धानुमितपशुहोमवाचकः । तत्र च दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात् । तथा दर्विहोमाः पौर्णमासधर्माः जुहोत्यविशेषात् जुहूदर्शनाच्च तूष्णीमनर्थलुप्ता इत्यादि । तथा अग्नीषोमीयात्पशुष्वित्यादिन्यायमूलककात्यायनसूत्रैः प्रापितानां दर्शपूर्णमासधर्माणाम् अग्नीषोमीयधर्माणां च एष एव विधिर्यत्र क्वचिद्धोम इतिसूत्रेण शब्दत एव एतत्सूत्रस्यैवकारस्य प्रकारान्तरयोजनापक्षेऽपि प्राप्तानां प्रणयनादीनां प्रणीयेत्यादिना पुनर्विधानादर्थतो निराकरणात् पशुश्चेदाप्लाव्येत्यादिपारस्करसूत्रैः केषां चिद्धर्माणां प्रतिप्रसवाच्च कुशकण्डिकोक्तसर्वहोमसाधारणधर्मैः पशुश्चेदाप्लाव्येत्यादिना प्रतिप्रसूतधर्मैश्चायं पशुः कर्त्तव्य

इत्यवगम्यते । प्रतिप्रसूताश्च धर्माः परिव्ययणादयः ।

तथा च पारस्करसूत्रम्,

पशुश्चेदाप्लाव्याऽग्रामेऽग्रेणाग्नीन्परीत्य पलाशशाखां निहन्ति । परिव्ययणोपाकरणनियोजनप्रोक्षणान्यावृता कुर्याद्यच्चान्यत् । परिपशव्यं हुत्वा तूष्णीमपराः पञ्च । वपोद्धरणं चाभिधारयेद्देवतां त्वादिशेत् उपाकरणनियोजनप्रोक्षणेषु । स्थालीपाके चैवम् । वपां हुत्वावदानान्यवद्यति । सर्वाणि त्रीणि पञ्च वा । स्थालीपाकमिश्राण्यवदानानि जुहोति । पश्वङ्गं दक्षिणेति ।

अस्यार्थः । पशुश्चेदाप्लाव्याऽग्रामेऽग्रेणाग्नीन् परीत्य पलाशशाखां निहन्ति । चेत् यदा स्मार्तः पशुः क्रियते तदा तं पशुम् आप्लाव्य अगां गोपशुं वर्जयित्वा गोपशोराप्लावनाभावः । अग्रेण पुरस्तात् अग्नीन् परीत्य प्रादक्षिण्येन गत्वा पलाशशाखां निहन्ति निखनति गर्ते आरोपयति । यूपकार्यत्वात् शाखायाः इदं निखननम् आज्यासादनानन्तरकाले कार्यम् । श्रौते तस्मिन्नेव काले दृष्टत्वात् । अत्राग्नीनिति बहुवचनं शूलगवपश्वाभिप्रायेण । परिव्ययणोपाकरणनियोजनप्रोक्षणान्यावृता कुर्यात् यच्चान्यत् । परिव्ययणं यथा श्रौते उक्तम्--

त्रिगुणा त्रिव्यामा कौशी रसना तया नाभिमात्रे त्रिवृतं परिव्ययतीति शाखाया वेष्टनम् ।

उपाकरणं तदपि तत्रैवोक्तम्—

उपावीरसीति तृणमादाय तेन पशुमुपस्पृशत्युपदेनानेन तृणेन पशोरुपस्पर्शनम् ।

नियोजनम् तदपि तत्र यथा दृष्टम्—

द्विगुणाऽनया द्विव्यामया कौश्या पाशं कृत्वाऽन्तरा शृङ्गमभिदक्षिणं दद्यातीति पशोः शाखायां बन्धनम् ।

प्रोक्षणं प्रोक्षणीभिरद्भिः पशोरासेचनम् । एतानि परिव्ययणोपाकरणनियोजनप्रोक्षणानि आवृता मन्त्ररहितक्रियामात्रेण कुर्यात् । न केवलमेतान्येव । किन्तु अन्यदपि । यत् पशुसंस्कारकं पशुसमञ्जनपर्यग्निकरणप्राणशोधनादिकं तदपि तथैव मन्त्ररहितं कुर्यात् । परिपशव्ये हुत्वा तूष्णीमपराः पञ्च । पशव्यं संज्ञपनं परि उभयतः संज्ञपनात् पूर्वं पश्चाच्च हूयेते इति परिपशव्ये स्वाहा देवेभ्यः देवेभ्यः स्वाहेत्याहुती ते हुत्वा तूष्णीं मन्त्रवर्जमपराः अन्याः पञ्च आज्याहुतीर्जुहोति । वपोद्धरणं चाभिघारयेत् । पशोर्वपाया उद्धरणं यथोक्तं कृत्वा निष्काशनम् उक्तप्रकारेण तां वपाम् अभिघारयेत् अञ्ज्यात् अर्थात् घृतेन । देवतां त्वादिशेदुपाकरणनियोजनप्रोक्षणेषु । पूर्वोक्तेषु उपाकरणनियोजनप्रोक्षणेषु देवतां यस्यै देवतायै पशुः आलब्धो भवति तां देवताम् आदिशेत् उच्चरेत् । अमुष्मै त्वा उपाकरोमि अमुष्मै त्वा नियुनज्मि अमुष्मै त्वा जुष्टं प्रोक्षामीत्येवम् । स्थालीपाके चैवमिति । स्थालीपाके तद्दैवत्ये चरौ च एवं देवतामादिशेत् । एवमिति यथा उपाकरणादिषु । तत्र चरोरुपाकरणनियोजनाभावात् प्रोक्षणमात्रं गृह्यते । अमुष्मै त्वा जुष्टं प्रोक्षामीति तद्दैवत्यतण्डुलप्रोक्षणं कर्तव्यमित्यर्थः । वपां हुत्वाव दानान्यवद्यति सर्वाणि त्रीणि पञ्च वा । वपां च यथोक्तविधिना हुत्वा पशोः हृदयादीन्यवदानानि अवद्यति छिनत्ति । कियन्ति सर्वाणि । हृदयं जिह्वा क्रोडं सव्यसक्थि पूर्वनडकं पार्श्वे यकृत् वृक्कौ गुदमध्यं दक्षिणा श्रोणिरित्येकादश प्रधानार्थानि । दक्षिणसक्थि पूर्वनडकं गुदतृतीयापाणिष्ठं भव्या श्रोणिरिति सौविष्टकृतानि । यद्वा हृदयादीनि त्रीणि अथ वा पञ्च अवद्यति । अत्र त्रीणि पञ्च वा यदावद्यति तदा अवशिष्टेभ्यः स्विष्टकृत् । यदा च एकादशावद्यति

तदाऽन्येभ्यः त्रिभ्यः स्विष्टकृत् । वपां हुत्वावदानान्यवद्यतीति वदता पशुपुरोडाशो निरस्तः । स्थालीपाकमिश्राण्यवदानानि जुहोति । स्पष्टम् । पश्वङ्गं दक्षिणा । पशोर्यदङ्गं तदेव दक्षिणा । इति सूत्रार्थः ।

अत्र पशोरितिकर्तव्यतायाः श्रौतसूत्रसाध्यत्वात्तान्यपि व्याख्यायन्ते ।

बर्हिषि प्लक्षशाखाः स्तृणाति ।

प्लक्षशाखानां पशुसंस्कारत्वादत्राप्यास्तरणं कार्यम् । पलाशशाखां निहन्तीति विशेषवचनादवटस्य यथोक्तखननाभावः ।

तथा च रेणुः,

नैवात्रावटसंस्कारो न यूपस्य च संस्कृतिः ।

किन्तु रोपणमात्रं स्याद्विशेषवचनादिह ॥ इति ।

शाखाया उपकारकत्वात्परिव्ययणं कार्यम् । तच्च त्रिगुणेत्यादि पूर्वोक्तम् । शकलस्याभावादेवात्रगूहनाभावः । अन्ये तु शाखाया दार्ढ्यार्थं येन केनचित् शकलेनाप्यत्रगूहनं कार्यमित्याहुः परिव्ययणवत् ।

उपावीरसीति तृणमादाय तेन पशुमुपस्पृशत्युपदेवानिति ।

अत एव

कारिकाकारः,

तूष्णीं तृणमुदादाय पशुं तेन स्पृशेदिह ।

उपाकरोमीत्यन्तं स्यात्पूर्वं देवतापदम् ॥

अग्रेणापारानान्तं तं पशुं प्रत्यङ्मुखं स्थितम् ।

शिरोदेशे स्पृशेदेतदुपाकरणमुच्यते ॥

इत्याह । देवतां त्वादिशेदुपाकरणनियोजनप्रोक्षणेष्विति सूत्राच्च देवतादेशमात्रपूर्वकमुपाकरणं भवति । नियोजनमप्याह—

कात्यायनः, द्विगुणरशनया द्विव्यामया कौश्या पाशं कृत्वाऽन्तरा शृङ्गमभिदाक्षिणं बध्नात्यृतस्यत्वेति । देवस्यत्वेति यूप इति ।

द्विगुणरशनया गुणद्वयनिर्मितया रशनया द्विव्यामया व्यामद्वयपरिमितया कौश्या कुशमय्या पाशं कृत्वा । हरिस्वामिलिखनात् नागपाशं कृत्वेत्यर्थः । अन्तरा शृङ्गयोरन्तराले । अभिदक्षिणम् । अभिदक्षिणं दक्षिणशृङ्गस्याभिमुखमित्यर्थः । बध्नाति प्रतिमुञ्चति । पाशं कृत्वा प्रतिमुञ्चत्यृतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामीति श्रुतः । तत्र मन्त्रः— ऋतस्य त्वेति । देवस्य त्वेति यूपे । देवस्य त्वा सवितुरिति मन्त्रेण यूपे । बध्नातीत्यनुवर्तते । तथाच देवस्यत्वेति मन्त्रेण तस्य यूपे बन्धनं करोतीत्यर्थः । अथ बध्नातीत्यस्य प्रतिमुञ्चतीत्यर्थः पूर्वं कृत इति न बध्नातीत्यनुवृत्त्याऽत्र बन्धनलाभ इति चेत्, न । बध्नातीत्यस्य तत्रापि बन्धनमेवार्थः । बन्धनं न क्वचित्पाशप्रतिमोकः क्वचिदन्यदिति । तदनुवृत्त्या बन्धनरूपार्थलाभे विरोधाभावात् । एतच्च नियोजनं शाखाया उत्तरतो भवति । उत्तरत उपचारो यज्ञ इति कात्यायनसूत्रात् । दक्षिणेऽर्द्धशिरसि पाशेनाक्ष्णया प्रतिमुच्य धर्षा मानुष इति उत्तरतो यूपस्य नियुनक्तीत्यापस्तम्बसूत्राच्च । अत्र देवस्यत्वेति मन्त्रश्च उक्तसूत्रेण निवर्तते । देवतां त्वादिशेदिति सूत्राच्च देवतादेशपूर्वकं नियोजनं भवतीति । प्रोक्षणन्तु व्याख्यातमेव । एतच्च प्रोक्षणं ब्रह्मणोऽनुज्ञां गृहीत्वा कर्तव्यम् । अग्नीषोमीयपशौ तथैव दृष्टत्वात् । अनुज्ञा च सङ्केतादिनैव भाव्या । ब्रह्मन् हविः प्रोक्षिष्यामीत्यादीनां मन्त्रत्वेन पूर्वलिखितसूत्रेणैव निवर्तितत्वात् । अत्रापि पूर्वलिखितसूत्राद्देवतादेशो भवत्येव । यच्चान्यत् । यच्च अन्यत् तदपि मन्त्ररहितक्रियया निर्वर्तनीयमित्य-

र्थः। किमन्यदिति चेत्, पशुसंस्कारकम्। कथमेवमिति चेत्, प्रोक्षणादिसमभिव्याहारात्। सूत्रान्तरेष्वपि पशुसंस्कारकाणामेव पदार्थानां दर्शनात्।

तथा च गोभिलगृह्यम्, यवमतीभिरद्भिः प्रोक्षेदष्टकायै त्वा जुष्टं प्रोक्षामीति उल्मुकेन परिहरेत्परिवाजपतिः कविरिति अपः पानाय दद्यात्पीतशेषमधस्तात्पशोरवसिञ्चेदात्तं देवेभ्यो हविरिति अथैनमुदगग्नेः संज्ञपयन्ति प्राक्शिरसमुदक्पादं देवदेवत्ये दक्षिणाशिरसं प्रत्यक्पादमपि नृदेवत्ये संज्ञप्तायां जुहुयाद्यत्पशुर्मायुमकृतेति पत्नी चोदकमादाय पशोः सर्वाणि स्रोतांसि प्रक्षालयेदग्रेणनाभि पवित्रे अन्तर्धायानुलोममकृत्वा वपामुद्धरन्ति तार्ष्यं शाखाविशाखयोरवसज्याभ्युक्ष्य स्नापयेत्प्रच्युतितायां विशसथेति ब्रूयाद्यथा न प्रागग्नेर्भूमिं शोणितं गच्छेत् तथा तामभिघार्योदगुद्वास्य प्रत्यभिघारयेत् स्थालीपाकावृता वपामवदाय स्विष्टकृदावृता वाष्टकायै जुहोति स्थालीपाकावृतान्यत् स्थालीपाकावृतान्यदिति।

एवञ्च पशुसंस्कारकाणि आस्योपग्रहणादीनि सर्वाण्यपि भवन्ति। तत्रास्योपग्रहणम् अधस्तादुपोक्षणीः पशोः आस्ये मुखे उपगृह्णाति उपसमीपे स्थापयतीत्यर्थः। एतच्च स्थापनं पानार्थम्। अथोपगृह्णात्यपां पेरुरसीति प्रकृत्यैव तदेनमन्तरतो मेध्यं करोतीति श्रुतेः। अथोपगृह्णात्यग्निः पशुरासीदिति प्रकृत्य तर्पयित्वाऽथ पुनः संस्कृत्य प्रोक्षणीरितरान् पशून् प्रोक्षतीत्यश्वमेधप्रकरणीयश्रुतेश्च। गोभिलेन तु अत एव पयः पानाय दद्यादित्युक्तम्। अपो देवीरित्यधस्तादुपोक्षति। अपोदेवीरिति मन्त्रेण यथा अधस्तात् उदरहृदयादिप्रदेशम् उपोक्षति।

श्रुतिरपि, अथाधस्तादुपोक्षत्यपोदेवीरितीति।

तत उपयमनकुशादानादिपूर्वकम् उत्तराघारमाघार्य पशोः समञ्जनं कार्यम् । तदुक्तं पशौ—

कात्यायनेन, उत्तराघार्य पशुं पूर्वं समनक्ति ललाटांसश्रोणिषु सन्त इति प्रतिमन्त्रम् ।

उत्तराघार्य उत्तराघारं कृत्वा। पशुं पूर्वं समनक्ति।ध्रुवासमञ्जनात्पूर्वं पशुं सन्त इति प्रतिमन्त्रं समनक्ति। ललाटांसश्रोणिषु। ललाटे भाले अंसयोः स्कन्धयोः श्रोण्योः कट्योः ।

तथा च श्रुतिः, स ललाटे समनक्ति सन्ते प्राणो वातेन गच्छतामिति, समङ्गानि यजत्रैरित्यंसयोः, संयज्ञपतिराशिषेति श्रोण्योरिति ।

ततः असिमादाय स्रुवाग्रे अक्त्वा तेन पशोर्ललाटे उपस्पृशति ।

तदुक्तं तेनैव, दशेष्टा प्रयाजानाह शासमाहरेति। स्वरुमादायोभौ जुह्वग्रे ताभ्यां पशोर्ललाटमुपस्पृशति घृतेनाक्ताविति ।

दश प्रयाजानिष्ट्वा शासमाहरेति ब्रूयात् । आनीते च शासे शासं स्वरुं चादाय जुह्वग्रे अक्त्वा ताभ्यां शासस्वरुभ्यां पशोर्ललाटमुपस्पृशति । तत्र मन्त्रः—घृतेनाक्ताविति । अत्र च स्वरोरभावात् शासमेव स्रुवाग्रे अक्त्वा तेनैव पशोर्ललाटोपस्पर्शनं कार्यमिति सम्प्रदायः । शासस्वरुभ्यामुपस्पर्शनस्य पशुसंस्कारकत्वात्पशुसंस्कारानुरोधेन सौमिकचातुर्मास्येषु शुक्रामन्थिसंमार्जनार्थलौकिककुशकलवत् लौकिकं स्वरुमादायासिस्वरू स्रुवाग्रे अक्त्वा ताभ्यामुपस्पृशतीत्यन्ये । असिस्रुवाभ्यामुपस्पृशतीति कश्चित् । तद्विचारणीयम् । ततः पर्यग्निकरणम् । तत्प्रकारस्तु तेनैवोक्तः—

आहवनीयादुल्मुकमादायाग्नीध्रः त्रिः समन्तं पर्येति पश्वा-

ज्यशामित्रदेशयूपचात्वालाहवनीयानाज्यपशुशामित्रान् वेति ।

आहवनीयोल्मुकमादाय आग्नीध्रः त्रिवारं सर्वतः प्रदक्षिणं पश्वाज्यशामित्रदेशयूपचात्वालाहवनीयान् पर्येति । अथवा आज्यपशुशामित्रान् पूर्ववदेव पर्येति । अत्र च शामित्रदेशचात्वालाहवनीयादीनामभावात् शाखाग्न्योश्च यूपाहवनीयस्थानीयत्वात् आवसथ्यस्योल्मुकं गृहीत्वा स्वयमेव पश्वाज्यशाखाग्नीनां सर्वतः वारत्रयं पर्येति । अथ वा आज्यपश्वोः सर्वतः वारत्रयं पर्येति । ततः तदुल्मुकम् अग्नौ प्रक्षिप्य पश्वाज्यशाखाग्नीनामाज्यपश्वोर्वा सर्वतः अप्रादक्षिण्येन वारत्रयं प्रतिपर्येति ।

तथाचोक्तं तत्रैव, प्रतिप्रास्योल्मुकं तावत्प्रतिपर्येतीति । ततः पशुं कण्ठे बद्ध्वा शमिता उदीच्यां दिशि संज्ञपनार्थं नयति।

तथाचाग्नीषोमीये कर्कादिधृतश्रुतिः, शमितैनं कण्ठे बध्दा नयतीति ।

तं नीयमानं पशुं वपाश्रपणीभ्यामन्वारभते । तदुक्तं तत्र कात्यायनेन, पुनरादायोदङ् प्रतिपद्यते । पशुश्चान्वक् प्रतिप्रस्थाताऽन्वारभत एनं वपाश्रपणीभ्यां काष्मर्यमयीभ्यां त्रिशाखात्रिशाखाभ्यामिति ।

आग्नीध्रः शामित्रार्थं पुनः आहवनीयादुल्मुकमादायोदङ् प्रतिपद्यते उदङ्मुखः गच्छति । पशुश्चान्वक् । पशुः तम् आग्नीध्रम् अन्वक् अनु पश्चादञ्चतीत्यन्वक् आग्नीध्रपृष्ठतो गच्छतीत्यर्थः । प्रतिप्रस्थाता ऋत्विग्विशेषः । स एनं नीयमानं पशुम् अन्वारभते स्पृशति । वपाश्रपणीभ्यां वपा श्रप्यते आभ्यामिति वपाश्रपण्यौ ताभ्याम् । काष्मर्यमयीभ्यां श्रीपर्ण्यवयवभूताभ्याम् । त्रिशाखात्रिशाखाभ्याम् । द्विशूलैकशूलाभ्यामिति काठके । द्विशूलैकशूलाभ्यामित्यापस्तम्बः । अतश्च द्विशूला मेध्याकारा त्रि-

शाखा, ऋज्वी शाखा अविशाखा ताभ्यामित्यर्थः । तत्परिमाणं यज्ञपार्श्वे उक्तम्–

स्फ्यशूर्पोपवेषेध्मानपि प्रणयनीयावधि वपाश्रपण्यौ कुर्यादरत्निमात्राणीति ।

अत्र च एकाग्नय इति कात्यायनसूत्रेण शामित्रादेर्निराकरणात् ऋत्विगन्तरस्य चाभावात् अन्वारम्भस्य च पशुसंस्कारकत्वादुल्मुकमनुपादायैव नीयमानं पशुं स्वयमेव वपाश्रपणीभ्यामन्वारभते इति । तृणद्वयमादाय पशुं शिरसि उन्मुच्य कण्ठे धृत्वा वा पलाशशाखातः उन्मुच्य रशनया वामकरेण धृत्वा दक्षिणेन वपाश्रपणीभ्यामन्वारभ्य पशुमुदङ् नयतीति तु हरिहरः । ततः तृणद्वयादानं तयोः तृणयोर्मध्ये एकं तृणं पशुसंज्ञपनदेशे उदगग्रं वा प्रक्षिपति ।

तदुक्तं तत्रैव, वेदितृणेऽध्वर्युरादायेति ।

तथा, पश्चात्तृणमुपास्यति वषं वर्षीयसीति ।

ततः तस्मिन् तृणे शमिता मुखसङ्ग्रहणेन रज्ज्वादिना कण्ठवेष्टनेन वा यथाशब्दं न करोति तथा पशुं प्रत्यक्शिरसं प्राक्शिरसं वा उदक्पादं पातयित्वा निहन्ति ।

तथाचोक्तं तत्रैव, तस्मिन्नेनं निघ्नन्ति प्रत्यक्शिरसमुदक्पादं प्राक्शिरसं वा सङ्गृह्य मुखं तमन्वघ्नन्त्ययाश्यमानं वेष्टकेण इति ।

वेष्टकः गलावेष्टकः ।

पारस्करः, परिपशव्यं हुत्वा तूष्णीमपराः पञ्च ।

जुहोतीति शेषः । परिपशव्ये इत्याहुत्योः संज्ञा । ते वा एते परिपशव्ये इत्याहुत्यादिश्रुतेः । एवं च परिपशव्ये इतिसंज्ञके आहुती हुत्वा तूष्णीमपराः पञ्चाहुतीर्जुहोतीत्यर्थः । तद्धोमप्रकारश्च कात्यायनेनोक्तः

स्वाहा देवेभ्य इति जुहोति ।

स्वाहा देवेभ्य इति मन्त्रेणैकाम् आहुतिं जुहोतीत्यर्थः । एवंविधाहुतीनां च पूर्णाहुतिविकारत्वम् ।

तथा च क्रतुसङ्ख्यापरिशिष्टम्, कर्मणां प्रकृतिमनुक्रमिष्यामो यास्ताः प्रकृतयः पूर्णाहुतिराहुतीनामिति ।

एवं च पूर्णाहुतिधर्माः सर्वत्र एवंविधास्वाहुतिषु भवन्ति । ते धर्माः कात्यायनेनोक्ताः ।

तद्यथा, निरुप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक्स्रुवं च सम्मृज्योद्वास्योत्पूयावेक्ष्य गृहीत्वान्वारब्ध एवं सर्वत्रेति ।

अस्यार्थः । निरुप्याज्यम् । आज्यं पात्रान्तरादाज्यस्थाल्यां प्रक्षिप्य । गार्हपत्येऽधिश्रित्य । गार्हपत्यसंज्ञकस्याग्नेरुपरि ताम् आज्यस्थालीं निधाय । स्रुक्स्रुवं च सम्मृज्य । स्रुवं च स्रुचं च सम्मार्ष्टीतिश्रुतेः प्रथमतः स्रुवस्य सम्मार्गः ततोऽनन्तरं स्रुचः । सूत्रे स्वल्पाच्तरत्वात् स्रुचः पूर्वं निर्देशः । प्रतिप्रधानमङ्गावृत्तिरिति न्यायाच्च भेदेन सम्मार्गः । स च द्रव्यान्तरानुपदेशात् क्वचित्पाणिनेति विशेषविधानाच्च दर्भैरेव कार्यः । उद्वास्य । गार्हपत्यादाज्यस्थालीं गृहीत्वा उत्तरतः खराद्बहिर्भूमौ निधाय । उत्पूय । साग्राभ्यां दर्भाभ्यामाज्यस्थालीस्थमाज्यमुत्पूतं कृत्वा । अवेक्ष्य तस्याज्यस्यावेक्षणं कृत्वा । गृहीत्वा । आज्यं स्थाल्याः सकाशात्स्रुवेण गृहीत्वा । अन्वारब्धः । यजमानेन कृतस्पर्शः । एवं सर्वत्रेति । यत्र यत्र अव्यक्ता जुहोतिनोदना यथा यूपाहुतिं जुहोतीत्यादि तत्र सर्वत्र एवम् अधिश्रयणादिकं कर्तव्यमित्यर्थः । इतोऽपि पूर्णाहुतिधर्माः परिपशव्याहुतौ भवन्तीत्यवगम्यत इति ।

प्रकृते च स्रुचः अभावात् स्रुवस्य च संस्कृतत्वादेतदुत्तरी-

स्या आज्यमात्रमावसथ्ये संस्कृत्य स्रुवेणैव समिदाधानपूर्वकं होमः कार्यः। समिदाधानपूर्वकत्वं चोक्तं पूर्णाहुतिप्रकृतिभूतमायश्चित्ताहुतिश्रुत्या, "गार्हपत्य आज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतमाज्यं गृहीत्वा समिधमुपसङ्गृह्य प्राङुदाद्रवत्याहवनीये समिधमभ्याधाय दक्षिणं जान्वाच्य जुहोति" इति। यत्र यत्राहुतिसम्पत्तिस्तत्र तत्र समित्सम्पत्तिदर्शनादप्ययमर्थोऽवसीयते। यथा पञ्चाग्निविद्यायां तस्यादित्य एव समित् तस्य सम्वत्सर एव समित् तस्य पृथिव्येव समिदित्येवमादि।

अपरे तु एष एव विधिर्यत्र क्वचिद्धोम इत्यादिसूत्रैर्दर्शपूर्णमासादिधर्माणामिव पूर्णाहुतिधर्माणामपि निराकरणात्कुशकण्डिकोक्तेतिकर्तव्यतया च संस्कृतस्याज्यस्य विद्यमानत्वान्न परिपशव्याहुत्यर्थं पुनः पूर्णाहुतिवदाज्यसंस्कारः। किन्तु पूर्वसंस्कृतेनैवाज्येन तद्धोम इत्याहुः। द्वितीयपरिपशव्याहुतिमाह—

कात्यायनः, संज्ञप्तः पशुरिति प्रोक्ते शेतां नु मुहूर्तमित्याहासोमे। ततो देवेभ्यः स्वाहेति जुहोति। न वैते जुहुयात्। इति।

स्वाहा देवेभ्य इति प्रथमा, देवेभ्यः स्वाहेति च द्वितीया, एते उभे आहुती न वा जुहुयादित्यर्थः। प्रकृते च प्रैषादेर्निवर्तितत्वात् शमित्रा सङ्केतादिना संज्ञप्तः पशुरिति ज्ञापिते पूर्वाहुतिहोमावशिष्टाज्येन देवेभ्यः स्वाहेति जुहोति। यद्यपि श्रौते परिपशव्याहुत्योर्विकल्पस्तथापीह परिपशव्ये हुत्वा तूष्णीमपराः पञ्चेति नित्यवत्पाठान्नियम इति। तूष्णीमपराः पञ्च। अपराः पञ्चाहुतीः तूष्णीं जुहोति। तूष्णीमित्युक्तत्वाच्च प्रजापतिरेतासां देवतेति गम्यते। यत्तूष्णीं तत्प्राजापत्यम्। तथा, अनिरुक्तं प्राजापत्यमिति शाखान्तरीयश्रुतेः।

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥

इति छन्दोगपरिशिष्टवचनादप्ययमर्थो लभ्यते । एवं च प्रजापतिमुद्दिश्य होमादिकं कार्यमिति । ततः पशोः बन्धनरज्जुं वपाश्रपणीभ्यामुत्तरस्यां दिशि क्वचित्प्रक्षिपति । तदुक्तं तत्रैव कात्यायनेन,

वपाश्रपणीभ्यां नियोजनीं चात्वाले प्रास्यति माहिर्भूरिति।

वपाश्रपणीभ्यां नियोजनीं चात्वाले विधिना सम्पादिते गर्त्ते प्रास्यति प्रक्षिपति माहिर्भूरिति मन्त्रेणेत्यर्थः। प्रकृते च चात्वालस्याभावात् तत्प्रासनस्य प्रतिपत्तिरूपसंस्कारत्वेनावश्यकत्वात् उत्तरत उपचारो वै यज्ञ इति श्रुतेश्च उत्तरस्यां दिशि यत्र कुत्रचित्तूष्णीं कर्त्तव्यमिति । ततः उपकल्पितोदपात्रहस्ता समानीता पत्नी पशोः मुखादिषु उदपात्रस्थमुदकं प्रत्येकं प्रक्षिपति । तदुक्तं तत्र—

कात्यायनेन,

पशोः प्राणान् शुन्धति पत्नी। मुखं नासिके चक्षुषी कर्णौ नाभिं मेढ्रं पायुं पादान् सꣳहृत्य वाचं ते शुन्धामीति प्रतिमन्त्रमिति ।

प्राणान् प्राणायतनानि । मेढ्रं प्रजननम् । शेषं प्रसिद्धमेव।प्रकृते मन्त्रस्य निवर्त्तितत्वात्तूष्णीमेव प्रत्येकं शोधनं भवति। न चाध्वर्य्वादीनामिव पत्न्या अपि नात्र कर्तृत्वम्, किन्तु स्वस्यैवेति वाच्यम् । पूर्वलिखितगोभिलसूत्रेऽत्र पत्न्या एव कर्त्तृत्वदर्शनात् "पत्नी चोदकमादाय सर्वाणि स्रोतांसि प्रक्षालयेत्" इति । ततः तदुदकशेषेण यजमानः पशोः शिरःप्रभृतीनि परिषिञ्चति ।

तदुक्तं कात्यायनेन, शेषेण यजमानश्च शिरः प्रभृत्यनुषिञ्चतो मनस्त इति शिरो यत्ते क्रूरमित्यङ्गानि शमहोभ्य इति

पश्चात्पशोर्निषिञ्चत इति ।

शेषेण पत्नीकृतशोधनावशिष्टेन। यजमानः चकाराद्ध्वर्युश्च । शिरःप्रभृति शिरःप्रभृत्यङ्गानि शिरोवाक्प्राणचक्षुःश्रोत्रनाभिपायुचरणानि अनुषिञ्चतः । 'मनस्त इति शिरः । मनस्त इति मन्त्रेण शिरः अनुषिञ्चतः । यत्ते क्रूरमित्यङ्गानि । यत्ते क्रूरमिति मन्त्रेण सर्वाण्यङ्गान्यनुषिञ्चतः । अन्येष्वङ्गेषु च लिङ्गादेव मन्त्रप्राप्तिरिति न सूत्रकृता मन्त्रविनियोग उक्त इति । शमहोभ्य इति पश्चात्पशोर्निषिञ्चतः । शमहोभ्य इति मन्त्रेण पशोः पश्चाद्भागे जघनप्रदेशे अवशिष्टं जलं निनयतः । निनयनस्य पशुसंस्कारत्वात्पशुशरीर एव पश्चाद्भागे निनयनमिति । प्रकृते च मन्त्रस्याध्वर्योश्चाभावाद्यजमानः स्वयमेव तूष्णीं शिरः प्रभृतीन्यङ्गान्यनुषिञ्चति इति ।

ततः पशुमुत्तानं कृत्वा नाभ्यग्रे प्रागग्रं तृणं निधाय घृताक्तयाऽसिधारया सतृणां त्वचं तिर्यक् पाटयित्वा द्विधाभूततृणस्य मूलमादाय तन्मूलं निःसृतलोहितेनोभयतः अक्त्वा उत्तरतो निरस्य वपां निष्काशयति ।

तदुक्तं तत्र कात्यायनेन, उत्तानं पशुं कृत्वाऽग्रेण नाभिं तृणं निदधात्योषध इति । स्वधित इति प्रज्ञातयाभिनिधाय छित्वाग्रं सव्ये कृत्वा दक्षिणेन मूलमुभयतोऽनक्ति लोहितेन रक्षसामिति । निरस्तमित्यपास्यतीति ।

प्रज्ञातया प्रकर्षेण ज्ञातया धारया । सा या ज्ञाताश्रिस्तयाऽभिनिदधाति सा हि यज्ञष्कृता मेध्येति श्रुतेः । अत्र च मन्त्रस्य निवर्तितत्वात्तूष्णीमेताः क्रिया भवन्ति । तृणाग्रस्य सव्यहस्तकरणं तु न भवति । तस्य स्तोकाहुत्यर्थसमिदाधानस्थानापन्नतृणाग्रप्रासनार्थत्वात् । प्रकृते च तदभावात् । समिदाधानस्थानापन्नत्रिश्च-

श्रुतौ यथा, स एतत्तृणमध्वर्युराहवनीये प्रास्यति वासो वेः स्तोकानामिति स्तोकानाᳪ हैषा समिदिति।

तृणमूललोहिताञ्जनप्रासने तु भवतः। लोहितप्रतिपादनार्थत्वेन संस्कारकत्वात्। एतद्द्वयं न भवतीत्यपि कश्चित्। ततः वपां निष्कास्य वपाश्रपण्यौ आदाय प्रोर्णोति।

तदुक्तं तत्र कात्यायनेन, वपामुत्खिद्य वपाश्रपण्यौ प्रोर्णोति घृतेन द्यावापृथिवी इति।

ततः उदरसंलग्नां वपां छेदनेन पृथक्कृत्य क्वचिदुत्तरदेशे प्रक्षालयेत्।

तदुक्तं तेनैव,

परिवास्य चात्वालेऽवसिच्येति।

प्रकृते च चात्वालस्याभावादुत्तरतः प्रक्षालनमिति। अत्र परिवासनानन्तरं वपामभिघारयेत्। तथा च पूर्वलिखितपारस्करसूत्रम्,

वपोद्धरणं चाभिघारयेदिति।

वपोद्धरणं तस्या अभिघारणं च कुर्यादित्यर्थः। अत्र चातिदेशप्राप्ताभिघारणानुवादे आनर्थक्यादपूर्वमेवाभिघारणान्तरं विधीयते। तस्य च पाठक्रमेणैवानुष्ठानं समुचितमिति वपापरिवासनोत्तरमभिघारणं युक्तमेव।

अत एव कारिकाकारः,

नाऽभिमर्शे तृणादि स्याद्वपाप्रोर्णवनान्तिकम्।
मूलाञ्जननिरसनं केचिदाहुस्तृणस्य तु॥
शेषं यथोदितं कुर्यात्साग्रेणात्र प्रयोजनम्।
परिवास्य वपोद्धारं कृत्वा तामभिघारयेत्॥ इति।

तत अग्नेरुत्तरतः स्थित्वा प्रतप्य शामित्राग्न्योरन्तरेण हृत्वा

स्वयं शाखाया बहिर्गत्वा अग्नेर्दक्षिणतः स्थित्वा वपां श्रपयेत् ।

तदुक्तं तत्र कात्यायनेन, उत्तरतस्तिष्ठन् प्रतप्य वपामन्तरा यूपाग्नी हृत्वा दक्षिणतः प्रतिप्रस्थाता श्रपयति परीत्येति ।

अत्र च प्रतिप्रस्थातुरभावात् शाखायाश्च यूपकार्यकारित्वात् स्वयमेव यथोक्तान् पदार्थान् करोति । ततः श्रप्यमाणां वपां स्रुवेणाभिघारयति । अथ पशोः साम्नाय्यविकारत्वात् साम्नाय्ये च परिक्षालनान्तं कृत्वा सायंदोहमाहृत्य प्रातर्दोहमाहृत्य प्रातर्दोहꣳ श्रपयित्वाभिघार्योद्वास्योभावनक्तीति सूत्रेण शृतस्यैव पयसः अभिघारणमुक्तमिति वपाया अपि शृताया एवाभिघारणं समुचितं न श्रप्यमाणाया इति चेत्, न । वपाꣳ स्रुवेणाभिघारयत्यग्निराज्यस्येति, स्तोकेभ्योऽनुवाचयति शृतायाꣳ शृता प्रचरेत्याह प्रतिप्रस्थातेति पशुप्रकरणीयसूत्रात् श्रप्यमाणाया एवाभिघारणस्य लाभात् । ततो वपां प्रत्याहृत्य स्वासने उपविश्य स्रुवेणाज्यं गृहीत्वा वपायाः तूष्णीं प्राणदानं विधाय आज्यस्योत्तरत आसाद्यालभते । प्राणदानासादनालम्भानां साम्नाय्यधर्मत्वेनात्रातिदेशप्राप्तत्वात् संस्कारकत्वाच्च करणं न विरुद्धम् । ततः मध्यमाष्टकायां विशेषस्यैवोक्तत्वात्प्रथमाष्टकाधर्माः सर्वेऽपि मध्यमाष्टकायां भवन्तीति प्रथमाष्टकोक्तरीत्यैवाज्यभागान्तिष्ट्वा त्रिꣳशत्स्वसार इत्यादिभिर्दशाहुतीश्च हुत्वा चरुणा शान्तापृथिवीत्यादिभिश्चतस्रो जुहुयात् । ततो वपाहोमार्थमासादितमर्थपरिमाणस्रुवमुपादाय सव्यहस्ते कृत्वा स्रुवान्तरेण तदुपस्तीर्य तत्र हिरण्यशकलमवधाय सम्पूर्णामेव वपां गृहीत्वा तत्रावधाय तदुपरि हिरण्यशकलमवधाय द्विः प्रत्युपस्तीर्य दक्षिणामुखः सव्यं जान्वाच्य प्राचीनावीतिनैव वह वपां जातवेद इति मन्त्रेण जुहोति इदं पितृभ्यो न ममेति त्या-

गः । उपस्तरणादिप्रकारश्चोक्तस्तत्र---

कात्यायनेन,

वपया चरिष्यन्नुपस्तीर्य हिरण्यमवधाय वपामवद्यन्नाहे न्द्राग्निभ्यां छागस्य वपायै मेदसोऽनुब्रूहीति । हिरण्यमवधाय द्विरभिघारणꣳ सोमे इति ।

नन्वत्र सूत्रे सामान्यतोऽवदानस्योक्तत्वात्साम्नाय्ये विकृतित्वेन प्राप्तस्य वपाया द्विरवदानस्य केन बाध इति चेत्, न । उपस्तृणीत आज्यं तत्पृथिव्यै रूपं करोति हिरण्यशकलमवदधाति तदग्ने रूपं करोति वपामवदधाति तदन्तरिक्षस्य रूपं करोति हिरण्यशकलमवदधाति तदादित्यस्य रूपं करोत्यथ च उपरिष्टादभिघारयति तद्दिवो रूपं करोति सा वा एषा पञ्चावत्ता वपा भवतीति श्रुतौ पञ्चावत्तत्वस्य श्रुतत्वाद्वपाया द्विरवदाने गृह्यमाणे तद्बाधः स्यादिति । जुह्वामुपस्तीर्य हिरण्यशकलमवधाय कृत्स्नां वपामवदाय हिरण्यशकलमुपरिष्टात्कृत्वाऽभिघारयत्येवं पञ्चावत्ता भवति चतुरवत्तिनोऽपि पञ्चावत्तैव स्यादित्यापस्तम्बसूत्रादप्ययमर्थोऽवसीयते । अथाप्यग्नीषोमीये "अथाज्यमुपस्तृणीतेऽथ हिरण्यशकलमवदधात्यथ वपामवद्यन्नाहाग्नीषोमाभ्यां छागस्य वपायै मेदसोऽनुब्रूहीत्यथ हिरण्यशकलमवदधात्यथोपरिष्टात् द्विराज्यस्याभिघारति" इति द्विरभिघारणस्य श्रुतत्वात्पञ्चावत्तत्वस्य च बाधितत्वेन अतिदेशप्राप्तं वपाया द्विरवदानं स्यादेव। तत्र च सिद्धे वपाया द्विरवदाने तद्विकृतिभूतप्रकृतपशौ सुतरां तत् भविष्यतीति चेत्, न । निरूढपशोर्वपावदानप्रकारमुक्त्वा द्विरभिघारणꣳ सोम इत्यनेनाग्नीषोमीये द्विरभिघारणं विशेष इति वदता कात्यायनेन विशेषान्तराभावस्य द्योतितत्वात् । असिना वपां सकृद-

वदाय द्विरभिघार्येति काठकसूत्रादप्ययमर्थोऽध्यवसेय इति । अत एव वासुदेवदीक्षिताः स्रुवोपस्तरणं हिरण्यशकलावधानं वपाग्रहणं पुनर्हिरण्यशकलावधानं द्विरभिघारणमित्येव लिखितवन्तः । कारिकाकारस्तु वपाया द्विरवदानमूचे ।

अथ स्रुवमुपस्तीर्य हिरण्यशकलं ततः ।
द्विरवद्येद्वपां तत्र लेखास्वर्णमथोपरि ॥
द्विरुपस्तीर्य मन्त्रेण जुहुयाद्वह वपामिति ॥ इति ।

हरिहरोऽप्येवमाह। वह वपामिति मन्त्रश्च पारस्करेणोक्तः। मध्यमा गवा । तस्यै वपां जुहोति वह वपां जातवेदः पितृभ्य इतीति ।

एतस्य मन्त्रस्य च पितृदेवत्यत्वाद्धोमस्य पितृदेवत्यत्वे सिद्धे तत्र विपर्यस्य पित्र्येषु सकृद्दक्षिणा चेति परिभाषातः प्राचीनावीतित्वादिकं भवतीति । अत्र केचित् अङ्गानां प्रधानोपचारन्यायात्प्रधानस्य वपाहोमस्य प्राचीनावीतिना कर्त्तव्यत्वे तदङ्गानाम् उद्धरणश्रपणाभिघारणप्रभृतीनामपि प्राचीनावीतिनैव करणमित्याहुः । युक्तं चैतत् । ततः रौद्रं राक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृशेदप इति कात्यायनपरिभाषातः यज्ञोपवीती भूत्वा उदकं स्पृशेत् । ततः प्रतिपत्तिरूपसंस्कारत्वाद्वपाश्रपण्योः प्रासनं भवति । तथा वपाश्रपण्योर्मध्ये या द्विशूला विशाखा तां प्रागग्रां कृत्वा इतरां च प्रत्यगग्रां कृत्वा एकदैव ते उभे अग्नौ प्रक्षिपति। तदुक्तं तत्र-

कात्यायनेन,

हुत्वा वपाश्रपण्यावनुप्रास्यति प्राचीं विशाखां प्रतीचीमितरां स्वाहाकृते इति ।

प्रकृते च मन्त्रमात्रस्य निवृत्तिः। उक्तहेतोः ।मार्ज्जनपशुपु